
तपोवनवासिनी



डा० कृष्णकुमार

तपोवनवासिनी

TAPOVANAVĀSINĪ

लेखक की अन्य प्रकाशित रचनायें:-

१. भारतीय संस्कृति के आधार तत्त्व
२. अलङ्कारशास्त्र का इतिहास
३. वैदिक साहित्य का इतिहास
४. संस्कृत साहित्य का इतिहास
५. पं० अम्बिकादात्त व्यास-एक अध्ययन
६. ऋक्सूक्त-सुधाकर
७. ऋक्सूक्त-संग्रह
७. चतुर्वेद-सूक्त-संग्रह
९. वैदिक-सूक्त-संग्रह
१०. विषविज्ञान
११. पोषण के लिए खनिज और विटामिन
१२. संस्कृत-नाटक-सूक्तितरङ्गिणी
१३. छन्दोऽलङ्कारप्रकाश
१४. प्राचीन कथायें
१५. गढ़वाल के प्रमुख तीर्थ
१६. गढ़वाल के संस्कृत अभिलेख
१७. उदयनचरितम् (संस्कृत उपन्यास)
१८. ध्वन्यालोक व्याख्या
१९. अभिज्ञानशाकुन्तलम् व्याख्या
२०. प्रियदर्शिका व्याख्या
२१. प्रतिमानाटकम् व्याख्या
२२. हर्षचरितम् पञ्चम उच्छ्वास व्याख्या
२३. किरातार्जुनीयम् प्रथम सर्ग व्याख्या
२४. रघुवंशम् द्वितीय सर्ग व्याख्या
२५. रघुवंशम् त्रयोदश सर्ग व्याख्या
२६. कुसुमलक्ष्मी व्याख्या
२७. शिवराजविजय व्याख्या
२८. अस्ति कश्चिद् वागर्थीयम् (संस्कृत नाटक)
२९. संस्कृत नाटकों का भौगोलिक परिवेश
३०. **Descriptive Catalogue of Sanskrit Manusripts Part I**
३१. **Descriptive Catalogue of Sanskrit Manusripts Part II**
३२. **Descriptive Catalogue of Sanskrit Manusripts PartIII**
३३. संस्कृत नाटकों का वानस्पतिक पर्यावरण
३४. संस्कृत नाटकों का जीव-जगत्
३५. चौरपञ्चाशिका
३६. अस्ति कश्चिद् वाग्विशेष:
३७. अन्त:स्रावी ग्रन्थियां
३८. प्राचीन भारत का सांस्कृतिक इतिहास
३९. तपोवनवासिनी (संस्कृत उपन्यास)
४०. केदारखण्ड पुराण (चार खण्डों में)
४१. मेघदूतानुशीलनम्
४२. गढवाल के प्राचीन अभिलेख एवं उनका ऐतिहासिक महत्त्व

तपोवनवासिनी

(शाकुन्तलीया कथा)

प्रिय प्रो० वेदप्रकाशशास्त्रिणः सेवायाम्
सस्नेहम्
कृष्णकुमारः
22.8.99.

डा० कृष्णकुमारः
एम० ए०, साहित्याचार्य,
पी० एच० डी०, डी० लिट्०

मयंक प्रकाशन
मिश्रा बाग, हनुमानगढी
कनखल (हरिद्वार)

तपोवनवासिनी

(संस्कृत उपन्यासः)

प्रकाशकः
मयंक प्रकाशन
मिश्रा बाग, हनुमानगढी
कनखल (हरिद्वार)

Published with the financial assistance from the Rastriya Sanskrit Sansthan

१९९४

मूल्यः

मुद्रकः
Competent Printographics
54 - Civil Lines, Roorkee.

प्ररोचना

विदुषां सुविदितमिदं यद् यथा प्राग्वर्तिभिर्विद्वद्भिर्लोके रसगर्भया नवनवोन्मेषशालिन्या प्रतिभानैपुण्यसंवलितया स्वधिया सुधियां हृदयानामुल्लासाय हृद्याः काव्यग्रन्थाः संग्रथितास्तथैवाद्यापि महीयांसो विद्वांसः काव्यनिर्माणे समुल्लासे च सन्त्येव बद्धादराः। श्रीनगरस्थहेमवतीनन्दनबहुगुणा-गढ़वालविश्वविद्यालयस्य संस्कृतविभागस्य सेवानिवृत्ताध्यक्षेण डा0 कृष्णकुमारेण बहुविधानि काव्यान्यधीत्य आलोचनेनामृतीकृतं रसं निपीय भावयित्र्या प्रतिभया कारयित्रीं प्रतिभां संजीव्य महता प्रयासेन काव्यप्रथां प्रथयता ग्रथितं "तपोवनवासिनी"ति पदाभिधानं गद्यकाव्यं ममाक्षिपथमवतीर्णम्। प्रसन्नेन मनसा निपुणमाद्योपान्तं सावेक्षणं प्रकृतं गद्यकाव्यमधीत्य मदीये हृदि काव्यानन्दः समजनि। सत्यमिदं यत् प्रतिभाप्रपन्नेन प्रणेत्रा प्रणीतं सर्वमपि रसतामुपयात्येव। एकमपि वस्तु सहस्रशः कवयः सहस्रधा वर्णयन्ति, परं समेषामपि कवीनां रचनासु भवत्येव रसानुभवः। वाल्मीकिवाग्वैचित्र्यचित्रितं रामचरितमेकमेवास्ति परं तदेव वाल्मीकेरनन्तरं बहुभिः कविभिः काव्यप्रतिभानैपुण्येनानेकधा वर्णितमपि नवं नवमेवाभाति। लौकिकं वृत्तं शुभमशुभं वा, सुन्दरमसुन्दरं वा आकर्षकमनाकर्षकं वा गहनमगहनं वा स्यात् परं कविवाचमुपेत्य तत्सर्वं सरसं सभावं लोकोत्तरचमत्कारकरञ्च जायते। काव्यरचनायां प्रतिभावैभवमनुभावयता दशरूपककारेणाचार्यधनञ्जयेनोदीरितं वचः सत्यमेव प्रतिभाति -

रम्यं जुगुप्सितमुदारमथापि नीचमुग्रं प्रसादि गहनं विकृतं च वस्तु।
यद् वाऽप्यवस्तु कविभावकभाव्यमानं तन्नास्ति यन्न रसभावमुपैति लोके।।

प्राचीनभारतीयसंस्कृतसाहित्ये मेनकाविश्वामित्रसंश्लेषणेनोत्पन्नायाः शकुन्तलाया उपाख्यानं बहुत्र लभ्यते। पद्मपुराणे पुरातनी शकुन्तलाकथा वर्णिता वर्तते। महाभारतस्यादिमे पर्वणि महर्षिणा वेदव्यासेन कुरुवंशीयानां नृपतीनां वंशवर्णनप्रक्रमे शकुन्तलोपाख्यानं पूर्णतया समाख्यातम्। उभयत्र पद्यमयेन काव्यबन्धेन शकुन्तलाकथा प्रकीर्तिता वर्तते। अथ कविकुलावतंसेन वाग्देवीवन्दनायां संविष्टचित्तेन कालिदासेन महाकविना नाटकवृत्त्या स्वधिया शकुन्तलावृत्तमुद्वीक्ष्य समीक्ष्य यथोचितं परिवर्त्य परिवर्ध्य परिष्कृत्य च अभिनेयतामुपनीतम्। महाभारतवर्णितेन शकुन्तलोपाख्यानेन पाठकानां चेतांसि समाहृतानि पद्मपुराणवर्णितेनापि तद्वृत्तेन तथैव पाठकमनांसि समाकृष्टानि, परमभिज्ञानशाकुन्तलाभिधाने नाटके कालिदासोदीरितेन शकुन्तलावर्णनेन तु सकलसहृदयानां हृदयानि सततमनिर्वचनीयानन्दनिःस्यन्देनापूरितानि।

प्राचीनेषु संस्कृतग्रन्थेषु शकुन्तलावृत्तं प्रायशः पद्यमयमेवोपलभ्यते। परं गद्यग्रन्थेषु तद्वृत्तं न केनापि निबद्धम्। डा0 कृष्णकुमारेणामुमेवाभावं दूरीकर्तुं गद्यमय्या शैल्या परिष्कृता बहुविधनवकल्पनासमन्विता नारीणां मातृरूपौजःपरिचायिका शकुन्तलाकथा संकीर्तिता। अमुना लेखकेन शकुन्तलानाम्ना नाऽपितु नाम परिवर्तनं विधाय "तपोवनवासिनी"ति नाम्ना सा समाख्याता। कविना कथाया मूलं बीजं तु प्राक्तनेभ्य एव ग्रन्थेभ्यः समाहृतं स्वग्रन्थे चोप्तं परं तदेव प्रतिभाम्भसा सिक्तम्। यद्यप्यनेककविनिबद्धं वस्तु अन्यकविनिबद्धेन वस्तुना संवदति तथाप्युभयोर्भवत्येव कश्चिद् भेदविशेषः। स खलु प्रतिभोत्थित एव। वसन्तकालमवाप्य यथा सर्वेऽपि वृक्षा नवा इवाभान्ति तथैव दृष्टपूर्वा अपि ह्यर्थाः कविप्रतिभामुपेत्य रसवत्तया नवतामुपयान्ति -

"मुख्या व्यापारविषयाः सत्कवीनां रसादयः।
तेषां निबन्धने भाव्यं तैः सदैवाप्रमादिभिः।।"

अनया धिया डा0 कृष्णकुमारेण "तपोवनवासिनी" कृतिर्विरचिता। अस्यां रचनायां वर्णविन्यासो रसाद्यनुवृत्तिं वितनुते, ललितपदविलासः सुचिरं ललनालावण्यमुल्लासयति, समुचितशब्दोत्प्रासो गुणाभिव्यञ्जकतां निश्चिनोति, वाक्यनिचय इष्टार्थमुच्चिनोति, काव्यशोभावर्धकालङ्कारनियोगः सर्वथा रसमुपकुरुते, त्रिविधगुणोत्करश्च यथोचितं रसमुत्कर्षयन् चमत्कृतिमातनोति।

ममायं प्रत्ययो विद्यते यत् सुश्लिष्टकाव्यबन्धबद्धामिमां "तपोवनवासिनी" गद्यरचनां पठित्वा सर्वेऽपि रसास्वादनिपुणाः संस्कृतवाग्विदो विद्वांसः साहित्यमधिजिगांसवश्छात्राश्च काव्यानन्दमनुभविष्यन्ति।

दिनाङ्कः वैशाख-१, १९५१
१३ अप्रैल १९९४

विदुषां विधेयः
(धर्मपाल)
कुलपतिः
गुरुकुल कांगड़ी विश्वविद्यालयस्य
हरिद्वार

INTRODUCTION

I have great pleasure in introducing to the lovers of Sanskrit the novel *Tapovanavāsinī* of Dr. Krishna Kumar, an eminent creative writer in Sanskrit. He had not only confined himself in writing expositons, commentaries, criticism, reviews, treatises on rhetorics, history of Vedika and Sanskrit literature and Ancient Indian Culture, but has also shown his brilliance in creative writing in Sanskrit, composing of prose as well as plays. After penning his famous prose (Novel) *Udayanacaritam*, Dr. Krishna Kumar composed plays also, the most well-known of which is the *Asti Kaścidvāgarthīyam*.

Udayanacaritam deals with the life of the well-known king Udayana of 6th Century B.C., Contemporary of Lord Buddha. Many Legends and episodes of that time, with descriptions of cities, palaces, villages, rivers and other places of natural beauty have been interwoven in this prose. The poet has full command in arranging the theme, the treatment of charcacters and designing the dialogues. The style and the language of this Sanskrit novel are artistic, ornamented and sophisticated with a charming natural sentimental flow and these are able to delight the readers in their deep hearts.

The *Asti Kaścidvāgarthīyam* deals with the age-old legend of Vidyottamā and Kālidāsa. Though that work is a play, it has quite a few lengthy descriptions in it of the different streams of the Ganga as it courses through the Himālayan ranges and the various places restling in their uper reaches to indicate potentialities of its author in handling Sanskrit prose with its compulsive demand of approaching it to that of ancient

masters like Bāṇa, Subandhu and Ḍaṇḍin who have given it a shape and a form which is difficult for later writers of Sanskrit prose to deviate from for fear of inviting derision of connoisseurs.

Our author with his unusual command over the Sanskrit expression has been able to carve out a work which though approaching in its prose to that of the celebrities of old in wealth of words and ornamentation breathes freshness in its none too laboured style and natural flow with their greater appeal to a modern reader. The freashness is noticeable not only in style but also in the treatment of the theme as well.

Before attempting the present novel, the author had two versions of the Śakuntalā story before him, the one of the *Mahābhārata* which is more direct and matter of fact and the other of the *Abhijñānaśākuntala* which is more artistic and sophisticated. Of the two, it is the *Abhijñānaśākuntala* which has weighed heavily with him in moulding his story. In some parts it is the same with a profusion of paraphrase of its verses and prose passages. But he does not seem to have utterly neglected the *Mahābhārata*. This is particlarly noticeable in his treatment of the characters of Śakuntalā and Duṣyanta. Our author has totally omitted the Durvāsas incident and the resultant curse, the device that Kālidāsa had adopted to save the character of Duṣyanta, though retaining the ring episode with the difference that it is made to slip in the Gaṅgā rather than in the Śacītīrtha as in the Kālidāsan narrative. The rest of the episode with the swallowing of it by a fish, its catch by a fisherman, its recovery from its belly, the arrest of the fisherman and the sight of the ring by Duṣyanta making him remoresful of his maltreatment of Śakuntalā are in more or less the same as in Kālidāsa.

In the novel under reference Duṣyanta is shown to be much more cruel, much more harsh, much more heartless with

streaks of saddism in sniping and hurling jibes at the innocent Āśrama girl, the *tapovanavāsinī* than the Duṣyanta of Kālidāsa who has the attenuating factor of the cover up of the curse for all such traits of his. In the present novel he does not have his memory under cloud. After initial confusion he is able to recognize his one-night companion but poses otherwise, thus opening himself to the charge of double talk. It is interesting, however, that the same crook is a bundle of nerves upon having a look at the ring without the rationale of the lifting of the cloud of curse of his memory which the recovery of the ring heralds in Kālidāsa and pines for the self-same lady whom he had cast off as evil. It is clear that to our author Duṣyanta, in keeping with his picutre as emerging from the *Mahābhārata*, was a typical product of the feudal times enjoying beautiful women, making promises which he did not intend to keep. Śakuntalā was to him a toy to play with for a while to be all but forgotten with scant regard for her sensitivities.

In the delineation of the character of Śakuntalā, our author has followed Kālidāsa to a point. She is the same till Duṣyanta crosses her path. Her story is almost identical with that of the master play, till she falls headlong in love with Duṣyanta. After that the character of Śakuntalā is somewhat different from that of Kālidāsa. Smitten with love she leaves her cottage along with Anasūyā in the solitude of the night, goes over to the river Mālinī, sits on a stone slab on its bank with her feet in water. She continues in that state till Duṣyanta, not getting sleep with his thoughts, on her comes along there from his camp from across the river with none of his soldiers noticing his absence.

Prior to that Anasūyā had been telling Śakuntalā to send a message to him. Śakuntalā had taken out a piece of birch bark from her bark garment for the purpose. As the process was on, there appeared Duṣyanta before Śakuntalā and Anasūyā describing his condition to be more pitiable than that of

Śakuntalā. Anasūyā invites him to take a seat at the stone slab. She is apprehensive that kings known to keep big harems, her friend may not receive proper treatment and extracts the promise from Duṣyanta that it is Śakuntalā's off-spring that he would anoint as Hair Apparent, and advised him thereafter to come to the Āśrama the next afternoon and beg from Kulapati Kaṇva the hand of Śakuntalā. Duṣyanta, however, proposes Gāndharva marriage there and then. Anasūyā agrees to it on the condition that it is followed by the fire ritual. She gets together some reeds, lights them and solemnizes the marriage with the usual rites. She departs after that, leaving the couple alone to consummate the marriage.

After spending the night in nuptial bliss, Dusyanta leaves Śakuntalā on the plea of joining his soldiers who, not finding him in his camp and not knowing his whereabouts, would be looking for him. He has also to go back to Hastināpura to attend an important meeting of envoys, Indian and foreign, the reason advanced by him for his inability to stay back for the day and meeting the Kulapati which no doubt he would do after a few days when he would be back to the Āśrama to take her along with all fanfare and regal splendour.

Śakuntalā with her heart heavy with the thought of separation coming after only a few hours of marital bliss, retraced her steps to the Āśrama with all sorts of apprehensions gnawing her. Before leaving her, Duṣyanta had given her his signet ring and had told her that as the number of syllables of his name on it would be the number of days she would have to wait after which he would come to pick her up.

Śakuntalā counted the syllables countless times. She waited and waited for Duṣyanta but he did not show up. Often she would go the river Mālinī, sit on the same stone slab and look at the moon, the only witness of her wifehood for the fateful night. Days, months and years rolled by. She had

delivered a son in the meantime. Her only mainstay, she spent much of her time with him.

After thirteen years Kaṇva felt like sending her to her husbands home. Unlike her counterpart in Kālidāsa, Śakuntalā did not accept any dowry. Dressed like a female ascetic, with her twelve years old son by her side, and in the protection of Śārṅgarava and Śāradvata she left for Hastināpura inviting there many swipes from its astonished citizens. On the roads of Hastināpura Śārṅgarava and Śāradvata leave Śakuntalā alone and helpless. Then she goes straight to the Court pleading with Duṣyanta to accept her and her son and engages herself in a bout of arguments with him, when he shows total ignorance of her and charges her with moral turpitude.

Stung with the calumny and the ridicule heaped upon her, Śakuntalā tells him that her son is predicted by soothsayers to be a Cakravartin king. For this he does not have to depend upon his father. He will earn this position with his own mettle and with his regular training in arms that she has imparted him, a proof of which she furnishes in the Court itself by pulling up an arrow from her son's quiver and shooting it at the king which blows off his crown much to the consternation of everybody present.

Śakuntalā of our author is not a coy and a timid woman throwing up her arms after repudiation, crying and shrieking (*bāhūtkṣepaṁ kranditum ca pravṛttā*). She is bold and brave, capable of charting up her life's course herself. She does not return to the parental abode, nor is she lifted up by the invisible hands of her celestial mother. Leaving the crownless king aghast and the distraught courtiers flabbergasted, she darts out of the Court, resolute and firm to groom her son to be *Cakravartin* to serve as an effective rebuff to the uncalled for deception, chicanery and insult she had been subjected to. It is not only the *Śāstras* that she teaches her son but also the

sastras (the armaments) turning him thereby into a formidable warrior.

The son had shown his promise in martial qualities, even while in Kaṇva's Āśrama, pounding to death with his bare hands a firce demon king who had invaded it even in the course of a sacrifice. On the way back from Amarāvatī after helping Indra against the demons, Duṣyanta had stopped at Mārīca's Āśrama. On noticing a tiger running towards an ascetic practising penace he aimed an arrow at it. At that moment the son accosted him and using harsh words had warned him to desist from killing his friend. Duṣyanta, incensed at his audacity, aimed the arrow at him only to frighten him.

The young one getting out of his way with a quick movement threw a rope at him with which he tied him so tightly as to render him immobile, thereby unknowingly fulfilling the vow of her mother undertaken by her in the Hastināpura Court that one day her son would conquer him (Duṣyanta) and place him tied in rope at her feet. He, the young one, was eighteen at this time and though living the life of a hermit, exuded confidence beyond his years, the confidence emanating from the consciousness in him of being the scion of the Puru race. When Duṣyanta reminds him of his being rude to him not knowing who he is, he shoots back the remark that he might be a great man, a king or a Cakravartin but is no match to him, a Paurava, a descendant of the Puru race, a remark that takes Duṣyanta entirely by surprise.

Duṣyanta is equally taken by surprise when a woman calling out to him mentioned his name as Sarvadamana. That was the name, he muses, with which Śakuntalā had introduced her son to him in the Court. The young one drags him to a tree to tie him with it to prevent his escape. The women reports his queer action to his mother who appears on the scene charging him with indecency towards a gentleman. The young one

accuses the so-called gentleman of disturbing the peace of the hermitage in attempting to shoot an animal which along with others moves about freely causing no harm to anybody.

Śakuntalā gradually coming closer, Duṣyanta recognizes her. He is now sure of Sarvadamana to be his son. No wonder then that he is an embodiment of boldness and bravery. On being chided by Śakuntalā as pointed out above, in putting a gentleman in a rope, he recounts the circumstances of it. He himself having become the aim of the arrow, there was no other way for him. Self-defence is one justification for his act, to teach the roguish king a lesson is another. He was grown up enough, of twelve years of age, when he had accompanied Śakuntalā to the Hastināpura Court and was sensible enough to feel the pinch of the insult and the humiliation of her. He had not forgotten the vow that she had undertaken in the Court and it is the same which he has redeemed. He has brought to her the king in rope, the king who had shied away from his duty and was as a result thereof deserving of harsh punishment. He clearly acknowledges that it was her training that had made him accomplish such a feat.

Sarvadamana was eighteen when Duṣyanta had met him the second time. He had not spoken a word in the Court, the entire conversation having taken place between his mother and father. But his sensitive heart must have suffered a grievous blow for his mother and he himself having been wronged for no fault of his to make him nurse the feeling of revenge for five long years from the age of thirteen to that of eighteen. He was not made of the timber to take insult lying down. This trait he must have inherited from his mother. He would not blame fate for all the misery. He had the boldness to lay the accusing finger at the very source of it, the Cakravartin king Duṣyanta, the ruler of Hastināpura.

The gentleman addresses Śakuntalā as 'Śakuntale', the

same form with which he had addressed her in the fateful night of her marriage, the address so familiar to her even after a lapse of eighteen years. She recognizes the gentleman to be no other than her husband of one night, king Duṣyanta. Though buffeted by feelings of having been cheated, insulted and humiliated, she controls herself. As a true Āryan lady she accepts him and tells her son in a plaintive tone the mistake that he has committed. At her behest the young one releases the king.

In the present novel it is not the recovery of the ring that reminds Duṣyanta of Śakuntalā and makeshim pine for her. He had never even for a moment forgotten her. He had all the time been posing to be so. With the departure of Śakuntalā he had been overtaken by remorse, stung by his guilt complex. He never had peace thereafter. And now when in Mārīca's Āśrama, he spotted her, he was a bundle of nerves, not sure as to how he would be received by her. She recognized him as he fell at her feet, tears streaming down his eyes. He was a changed man from the bully of the Court to the penitent husband and a gentle father. So were Śakuntalā and Sarvadamana with no rancour in them. The alchemy of transformantion was total and complete.

Our author has been at pains to show that the gods and the demons were not the inhabitants of some other planet. He has labourrd hard to put forward the theory, to the development of which he has devoted considerable space that they were inhabitants of some upper reaches of the Himālayas which are difficult of approach to the people of Āryāvarta. There used to be frequent interaction, according to our author, between the kings of Āryāvarta and those of the gods who depended very much on the help and the assistance of the former to face the scientifically and technologically superior kingdom of the demons close to theirs. It was at one of such encounters beetween the two neigbours that Duṣyanta had gone to the

kingdom of the gods and it was on the way back from there that he had chanced to meet Śakuntalā and Sarvadamana. After making Śakuntalā the Chief Queen and Sarvadamana as Heir Apparant, and enjoying the kingdom for long he had entered with Śakuntalā the hermitage of Kanva to spend the evening of his life there as per the tradition of his race.

Before the critique on the theme of the work is brought to a close, it should be pertinent to say a few words about the way it (the theme) is introduced in it. The work starts with Duṣyanta moving out of his capital to go ahunting in a forest wherein he meets after a he-buffalo which he after chasing for quite a distance shoots down. Having been carried afar in the chase, he overcome with thirst comes to a rivulet to quench it.

Duṣyanta notices there a deer. Overpowered with the desire to hunt it, he goes after it in hot pursuit. As soon as it comes within his shooting range, he is intervened by two hermits who dissuade him from killing it, it belonging to the Āśrama, the Āśramamṛga. They also invite him to the Āśrama to accept its hospitality through Śakuntalā, the daughter of Kulapati Kaṇva who is away for important work.

The king comes to the Āśrama and what transpires after that is exactly as it is described in the Abhijñānaśākuntala. His noticing three girls, their playful talk, their watering the plants, insistence of one of them, Priyaṁvadā on the other, Śakuntalā, to return to her the watering of the trees, a bee tormenting Śakuntalā, Duṣyanta's appearance to ward it off with his introduction as a royal officer, he getting charmed with Śakuntalā and with a view to deciding about her fitness for marriage with him enquiring about her parentage, he expressing doubt on being told of her being the progeny of Kulapati Kaṇva on account of his reputation for celebacy and so on.

After traversing the Śakuntalā ground our author charts out his own course. Through Priyaṁvada he seeks to convey the account of the birth of Śakuntalā. Priyaṁvadā and Anasūyā are the daughters of two of the teachers of the gurukula. Since their childhood they had taken Śakuntalā to be Kaṇva's daughter. When grown up a bit, they too were assailed with the same doubt as was Duṣyanta. The doubt was clarified by Kaṇva on a persistent query of the sage Parāśara who happened to visit him once and on being pleased with Śakuntalā's service to him had blessed her with becoming the Empress of Āryāvarta with the three of the girls also present on the occasion. Kaṇva had at that time given the following account of the birth of Śakuntalā :

He (Kaṇva) and the Gādhi ruler Viśvāmitra were classfellows. Intimate friends of student days, they on completion of their education, went each their way, Viśvāmitra to his kingdom and he to an Āśrama he had set up. Viśvāmitra once went to the Āśrama of Vasiṣṭha and was received with rich hospitality through the grace of Nandinī, the off-spring of the divine cow Surabhi. He begged Nandinī of Vasiṣṭha for himself and on his refusal to do so invaded his Āśram with his soldiers, killed his hundred sons but had his soldiers destroyed through Nandinī's power. To avenge the insult. he began practising penance in the Nadapitavana forest, suggested to him by Kaṇva, striking terror in Indra who sent the nymph Menakā to interrupt his penance, a task in which she succeeded. Delivering a baby, she left it with Viśvāmitra who dropped it under a tree to continue his penance at a different place. The birds of the tree surrounded the infant and protected it. In the meantime happened to come there Kaṇva with the desire to meet his friend and coming to know through his Yogic power the infant to be his progeny took it along with him to his Āśrama and placed it in the care of his old sister Gautamī (practising Brahmacarya, celebacy, since the time

she had been cheated in love).

Language and Style

The author has laboured hard to model his work, as said in the beginning of this write-up, on works of old. His language has by and large a classical ring around it. However at places it does admit into it some modernisms, not unexpected in a work of the modern period, e.g.,

जयजयकाराणा कोलाहलाः	Topovana	p.	5
परन्तु यत्र युद्धस्यानिवार्यता भवति	,,	,,	8
तत्र पश्चात् पदं न निदधाति	,,	,,	8
समारोहाः समायोज्यन्ते स्म	Topovana.	p.	9
सैनिकाः सम्राजो जयजयकारैर्व्योमापि प्रकम्पयामासुः	,,	,,	11
शिशुभिः सह किलोलान्यकुर्वन्	,,	,,	13
रसस्य पान एकाग्रमनाः	,,	,,	14
भयभीता भवेयुः	,,	,,	21
सहसैव शीतलसमीरणस्यैकस्तनुपवनवेगः (**Hindi:**हल्का सा झौंका) समागतः	,,	,,	19
मनसि तर्कवितर्कं कृत्वा	,,	,,	26
परमायुषा सह सांसारिकलोकव्यवहाराणां बोधे सति	,,	,,	29
साऽऽशीर्वादैः संयोजिता	,,	,,	30
प्रथमं तावद्भवद्भिर्मे सुरक्षायाः प्रबन्धः करणीयः	,,	,,	36
इयं शकुन्तला तु तस्य निजस्यैवाऽऽत्मा	,,	,,	55
तथापि मनस्तु मन एव (**Hindi** :फिर भी मन तो मन ही है)		,,	58
न जाने केषां जन्मनां पुण्यप्रभावैः	,,	,,	61
शकुन्तला अतिभावुकहृदया	,,	,,	61
गता चैवागता चाहमिति (**Hindi** : मैं गई कि आई)	,,	,,	67
महता समारोहेण	,,	,,	72
शिशिरर्तोः समयोऽवर्तत (**Hindi** : शिशिर ऋतु का समय था)		,,	87
शृङ्गारसज्जाविहीना	,,	,,	107
साजसज्जानां परिकल्पनानां च न लेशमात्रमप्यलक्ष्यत	,,	,,	153
शत्रुश्च शिरसि वर्तते (**Hindi** : शत्रु सिर पर है)	,,	,,	169
प्रश्नवाचकदृष्ट्याऽवलोकयन्तं तं	,,	,,	182
कर्णेषु पीयूषमिव घोलयन्तो विरावाः	,,	,,	184

Occasionally a new idiom also meets the eye: गधुना स्नातु ते रसना (Topovana p.118). So does a new word: अवग्रहणीः द्वारावग्रहणीमवलम्ब्य (Topovana p.80) which probably means a handle. Once a while a vernacular expression is adopted as such :

वनं हलचलोपद्रवाक्रान्तं विहितम्	Topovana.	p.	13
झिलामिलायते स्म	,,	,,	6
झिलमिलायमाना	,,	,,	48
झिलमिलायमानम्	,,	,,	49
चमचमेति द्योतमाना	,,	,,	67
अतिशयं चमचमायते	,,	,,	68
प्रवाहस्तं कुतकूतयामास			
लपलपायमानाभिः	Topovana.	P.	11

Of the other peculiarities of the vocabulary of the work mention may be made of the profusion of the onomatopoeia:

पादानां टापू-टापू-ध्वनिना	Topovana.	p.	11
कुक्कुराणां बुत्क्रोशेन	,,	,,	11
सैन्धवाः घुर्घुरायमाणाः	,,	,,	11
कौलेयकानां बुत्क्रोशैः	,,	,,	13
रथघर्घरध्वनिः	,,	,,	13
महिषस्य झर्झरितवेपनेन	,,	,,	14
पिकानां मधुरकुहूध्वनयः	,,	,,	23
नूपुरमधुररुनझुनध्वनिभिः	,,	,,	40
मृगाणां चीत्कृतिध्वनयः	,,	,,	52
छपछपेति विशेषध्वनिः समुदितः	,,	,,	54
सरसरध्वनिः	,,	,,	68
ओ पी ओ पी इति ध्वनिः	,,	,,	68
सीत्कारनिःस्वनः समुद्बभूव	,,	,,	70
जीमूतानां कडकडदिति घोरगर्जनै :	,,	,,	85
तडितां च तडतडदिति निर्घोषचमत्कृतिभिः	,,	,,	85
कलकलझरझरध्वनिसङ्गीतविराविणः	,,	,,	99
हुङ्कतिगर्जन	,,	,,	101
हुङ्कतिध्वनिं समुच्चार्य	,,	,,	102
कशेरुकास्थीनि चरमरेति ध्वनिना सह	,,	,,	102

ग्रीवा .... मडमडायिता	Topovana. p.		102
लेलिह्यमानोत्सुकदीर्घशोणितरसनाः	,,	,,	103
टप्टपेति	,,	,,	117
चहचहेति गायद्भिः	,,	,,	139
रथघर्घरध्वनिना	,,	,,	179
पयःस्रोतांसि कलकलं छलछलमिति शब्दायमानानि	,,	,,	180
छलछलायमानाः जलप्रपाताः	,,	,,	182
व्याघ्रेण घुर्घुरायितम्	,,	,,	194
व्याडेन घुर्घरायितम्	,,	,,	200

In at least three places the author uses 'ओ' to address some body:

(i) ओ मे सख्यौ	Topovana. p.		24
(ii) ओ सर्वदमन	,,	,,	189
(iii) ओ शकुन्तले	,,	,,	189

The unfinished speech is indicated by him with dots :

(i) श्वः कुलपतिं प्रणन्तुं समायाते तस्मिन् तत्रभवति सम्राजि	Topovana p.		49
(ii) यदि चायं राजसिंहासनारोहणावसरं लभते तदा .... तदा	,,	,,	107
(iii) यदि च भवान्	,,	,,	193
(iv) तदनन्तरं सुतेन सह राजसभायां गतायां सत्याम्	,,	,,	193
(v) तस्मिन् समये राजसभायां यदीमां मुद्रिकां भवन्तं दर्शयितु महं समर्थाऽभविष्यम्	,,	,,	197
(vi) अहं तुभ्यं यानि यानि	,,	,,	198
(vii) अहम्........अहम्........	,,	,,	199

In the last three of the instances above, the speech is incomplete on account of interruption by another person. In the first it is due to apprehension; the girls are not sure as to how the king would reckon their behaviour the day before. In the the second it is due to lack of assuredness. If Sarvadamana were to occupy the throne would Śunkuntalā nurture the same bad feelings about Duṣyanta which she now has ? She is not sure of it. In the third it is due to hesitation. The minister wants the

king to attend to some important matters of State but hesitates to request him for that keeping in view his uneasy state of mind. In the fourth it is due to the thoughts taking a different turn. Śakuntalā had all along been nurturing the feeling that the king will have some place in his mind for her and her son. But when she went to the Court, well, it was a different story.

Since the novel in some of the parts seems to be an adaptation of the Abhijñānaśākuntalam, it is natural that it should have in it reflection of the original's words and expressions, stanzas and prose passages, in the form as they are or in the form of the paraphrase. Along with these are also met with lines and expressions from other works altered or paraphrased as would be borne out from the following illustrations from this novel :

1. परिणामरमणीया दिवसा निशालतां प्रपेदिरे	Topovana	p.	9
2. कतमो वा राजर्षिवंशो भवताऽलङ्क्रियते कस्य			
जनपदस्य प्रजाजनाः समुत्कण्ठापात्रतां नीताः	,,	,,	25
3. तस्य तथा व्यवसायात्मिकां बुद्धि निरीक्ष्य	,,	,,	33
4. तपोऽनुष्ठानभीरवो हि देवा लोके प्रथिताः	,,	,,	34
5. (a) वह्निना गृहे प्रदीप्ते कूपखननोद्यमस्य को लाभः			
(b) सन्दीप्ते भवने कूपखननोद्यमो वृथा भवति	,,	,,	35
६. कुलपतिः कण्वस्तु पालनपोषणवर्धनादिभिरेतस्याः			
पालनधर्मेण पिता	,,	,,	42
7. सा स्पर्शक्षममेव रत्नम्	,,	,,	44
8. प्रियसखि शकुन्तले ! मोचितासि त्वमार्येणानुकम्पिना			
महाराजेन ऋणादस्मात् ।	,,	,,	46
9. अनन्तकालजन्मजन्मान्तरपरिचयमसौ दधाति	,,	,,	55
10. जननान्तरसौहृदं नियतमीदृशमेव भवति	,,	,,	51
11. ध्यानमास्थाय निगृहीतचित्तवृत्तिरहं योगदृशा	,,	,,	41
12. अस्माकमियं सखी प्राणेभ्योऽपि गरीयसी	,,	,,	61
13. पौरव ! रक्ष विनयं रक्ष	,,	,,	69
14. बह्वीभिः क्षत्रियकन्याभिर्गान्धर्वविधिना			
परिणयनं कृतं पितृभिश्चानुमोदितम्	,,	,,	71
15. क्षत्रिययुवकाः क्षत्रिययुवतयश्चान्योन्यानुरागाभिलाषाः			

पितृजनैरविदितवृत्तान्ता अप्यन्योन्यं परिणयन्ति। Topovana. p.
विदितवृत्तान्तैः पितृभिस्ताश्चानुमोद्यन्ते। ,, ,, 65

16. प्रिये ! मन्नामाङ्कितेऽङ्गुलीयके त्वं प्रतिदिनमेकैकं
नामाक्षरं गणय। यस्मिन्नेव दिवसे गणनेयमन्तं
यास्यति, तस्मिन्नेव दिवसे त्वामानेतुमहमुपैष्यामि ,, ,, 73

17. कोमलविटपानुकारिभ्यां भुजाभ्यां ,, ,, 75

18. कन्या परकीय एवार्थः ,, ,, 78

19. अनुरूपाय वराय कन्या प्रदेयेति भवतः प्रथमः सङ्कल्पः ,, ,, 79

20. शकुन्तलाया मनोरमं रूपं नवं वयः कान्तं वपुश्चावलोक्य ,, 81

21. दुष्यन्तेनाहितं तेजो गर्भे दधाना सा वराकी ,, ,, 86

22. तृणाच्छन्नकूपोपमेन कितवेन तेन ,, ,, 91

23. अहो ! तृणाच्छन्नकूपोपमे जने विश्वसितम् Tapovana p. 116

24. राजरक्षितव्यानि हि तेषां तपोवनानि ,, ,, 94

25. वियति बहुतरमूर्ध्वमुल्लसन्त्यः ,, ,, 98

26. तदापि सा रोषणतया न विप्रतीपमाचरेत् ,, ,, 108

27. अतो मनसि वचसि काये पुण्यपीयूषपूर्णया त्वया ,, ,, 108

28. सुमनसामुन्मादयितृकं सौरभं ,, ,, 114

29. उदग्रप्लुतिं विधाय ,, ,, 109

30 हुतवहपरीतगृहादिव तस्मात् पुरात् ,, ,, 131

31. प्रभातरलमिदं ज्योतिः न वसुधातलवर्ति, दिव्यमेवैतत् ,, ,, 132

32. रक्षितो धर्म एव सकलान् रक्षति ,, ,, 140

33. तस्य सदा सहायिका सखी सचिवो भवति ,, ,, 140

34. सुतस्तु पुन्नाम्नो नरकात् पितरं त्रायते,
अत एव स पुत्र इत्यभिधीयते ,, ,, 141

35. एष तवात्मगतो मनोरथः ,, ,, 24

36. नृपतयो देवान् भावयन्ति उपकृताश्च देवा अपि
यज्ञकर्मरतान् तान् भावयन्ति स्म ,, ,, 163

37. धर्मकञ्चुकं परिधाय त्वं शोभनीयासनाछन्नकूपसमः ,, ,, 149

38. राजन् ! शान्तमिदमाश्रमपदं रथारूढेन भवता
न गन्तव्यम् ,, ,, 186

39. दैवेन ललाटपट्टे लिखितं न कोऽपि प्रोञ्छयितुं समर्थः ,, ,, 208

40. अनङ्गरङ्गप्रतिमेषु तदङ्गेषु ,, ,, 27

41. वाचां विलासा सर्वातिशयिनोऽतिथिसत्काराः ,, ,, 27

42. सममेव समाक्रान्तम् ,, ,, 53

43. शशविषाणमपि क्वचिल्लभ्यते ,, ,, 57

44. वात्यया तृणमिव नेनीयते Topovana. p. 61

45. दास्यपदमप्यधिकारित्वमस्य प्राप्स्यसि ,, ,, 89

Besides the above which have instances, as pointed out earlier, paraphrases of a line or two from the Abhijñāna'sākuntala have been taken. There are instances of paraphrase of full verses and passages from the same in the novel under review. The words of the hermits to Dusyanta to desist from killing the hermitage deer :

वैखानसः– भो भो राजन् ! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

द्वितीयः– न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् ।
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।। **Abhi. I.10**

वैखानसः– तत्साधुकृतसन्धानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ।। **Abhi. I.11**

are put by our author in the following words :

राजन् ! आश्रममृगोऽयम् । भवता वधयोग्यो न । मृदुवपुषि निरपराधेऽस्मिन् मृगे शरो न सन्निपात्यः । भवतां शस्त्रं त्वार्ततायिनां विनाशाय प्रजानाञ्च रक्षणाय वर्तते । एनं मृगं प्रति भवता दयालुना भवितव्यम् । अतः सायकं प्रतिसंहरत्वेव भवान् ।

Tapovana p. 17

Similarly the description of the Ā'srama consequent to the above:

राजन् ! समिधाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः । प्रविश्य प्रतिगृह्यतामतिथिसत्कारः । अपि च–

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद् भुजो मे रक्षति मौर्वीकिणाङ्क इति ।। **Abhi. I.13**

is given by our author in the following words :

राजन् ! एष खलु सन्निकटमेवानुमालिनीतीरं महर्षेः कुलपतेराश्रमपदं गुरुकुलं वर्तते । आवां तु कण्वशिष्यौ समिधामाहरणाय वनं प्रस्थितौ । निमन्त्र्यतेऽत्रभवानाश्रमे । न चेदन्यकार्यातिपात आश्रममागत्य प्रतिगृह्यतामतिथिसत्कारः । प्रतिहतविघ्नानां तपस्विनामध्यापकानामध्येतृणाञ्च क्रियाः समवलोक्य स्वभुजयोः पराक्रमप्रभावं भवान् ज्ञास्यति ।

Tapovana p. 17

Kaṇva's description of his condition at the time of Śakuntalā's departure for husband's home in the Kālidāsan stanza

काश्यपः– (सनिःश्वासम्)

शममेष्यति मम शोकः कथं नु वत्से ! त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ।। **Abhi. IV.21**

is given by our author in the words :

वत्से ! त्वया सिक्ताः पादपा लताश्च पालिता मृगपोतकाश्च सततं मम दृष्टिपथमागमिष्यन्ति। दर्शं दर्शं च तान् कथमहं तव विस्मरणे समर्थो भविष्यामि।

Tapovana p. 128

So is his instruction to the young bride in the Kālidāsan play

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।। **Abhi. IV. 18**

is put by him in words

पतिगृहं प्राप्य त्वं गुरुजनस्य शुश्रूषां कुर्याः। पत्युः सर्वेषु कार्येषु सहगामिनी सहयोगिनी च भूयाः। भर्तुरपकृताऽपि तिरस्कृताऽपि कदाचन रोषणतया न विपरीतमाचरेः। यदि कदाचित्ते पतिः भर्ता रुष्टः कुपितोऽपि भवति, तदा निजावेगं विजित्य मधुरवचनैस्तस्य प्रसादनाय सचेष्टा भूयाः। सेवकानाश्रितजनांश्च प्रति उदात्तभावेन वर्तेथाः । त्वया राजमहिष्या कदाचिदपि चञ्चलस्वभावेष्वस्थिरेषु धनेष्वैश्वर्येषु सगर्वया न भवितव्यम्। वत्से! यास्तु युवतयः पतिगृहं प्राप्यैवमाचरन्ति ता एव गृहिणीपदशोभां प्राप्नुवन्ति। विपरीताचरणवत्यस्तु युवतयः पतिकुलं पितृकुलं च द्वयमेव दुःखानामपयशसाञ्च गर्तेषु निपातयन्ति।

Tapovana p. 126–127

Śakuntalā's words to her father

तपश्चरणपीडितं तातशरीरम्। तन्मातिमात्रं मत्कृते उत्कण्ठितुम्। **Abhi. Act IV**

find mention in the novel in the words

पितः! तपःपूतशरीरमिदमतिशयकृशीभूतं शिराजालसन्ततं लक्ष्यते। ..... मम स्मरणं

कृत्वा भवान् मा निजं शरीरं मनश्च कृशयतु। न च मह्यं तथा उत्कण्ठितो भवेत्।

Tapovana p. 128

It is a peculiarity of the style of our author that he once a while gives a summary of the past events, e.g.,

शकुन्तलाया मानसचक्षुषोः पुरतः सकलान्येव तानि चतुर्दशवर्षपूर्वघटितानि दुष्यन्तसङ्गमेनानुभूतानि दृश्यानि साकाराणीव समुपस्थितानि बभूवुः। अश्वत्थविटपिपरिवेष्टिन्यां वेदिकायां निषद्य सखीभिः सार्धं हास्यजल्पितानि, लघुप्रमाणान् कलशान् सलिलैरापूर्य आश्रमोपवनस्य पादपानां क्षुपानां वल्लरीणां लतानां च सेचनं, वनज्योत्स्नायाः पुष्पस्तबकेषु तस्याः कराघातः, ततो भ्रमरेण बहिरागत्य तदुपर्यभिवर्तनं, तस्या इतस्ततः प्रचरणं सहायतायै चाक्रन्दनं, सहसैव दुष्यन्तस्याविर्भावः, दुष्यन्तेन सह वेद्यां निषद्य सखीनां हासपरिहासाः, द्वयोरेव तयोः परस्परसंवीक्षणादिजन्यमाकर्षणं, तस्याः प्रबला दुर्निवारा दुष्यन्ताभिलाषा, निशीथे अनसूयया सह मालिनीतटं समागम्य शिलातलनिवेशनं, सहसैव तत्रापि दुष्यन्तस्यावतरणं, वैश्वानरं साक्षीकृत्य तयोः गान्धर्वविवाहोऽयोन्यं च शपथाः, अनसूयाया सव्याजं तस्मात् स्थानात् प्रसरणं, तदनन्तरं तदनन्तरं......।

Tapovana p. 113–114

The author has good insight into Sanskrit grammar as borne out by his use of some of the typical grammatical forms:

(1) ते तत्र समागच्छन्त– Ātmanepada here by Pāṇini
समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः (1.3.29)

(2) मृगयानुसरणस्य विस्मृत्य (Tapovana p. 13) The Genitive case, have by Pāṇini "अधीगर्थदयेषां कर्मणि" (2.3.52)।

(3) (i) द्वे अपि (Tapovana p. 161)
(ii) ते उभे अपि (Tapovana P. 22) The rude form of the words by Pāṇini "ईदूदेद् द्विवचनं प्रगृह्यम् (1.1.11)

(4) (i) सख्यौ समुदतिष्ठेताम् (Tapovana p. 22)
(ii) सहसा शकुन्तला समुत्तस्थे (Tapovana p. 75)
Ātmanepada here by Pāṇini "समवप्रविभ्यः स्थः" (1.3.22)

(5) (i) श्रीद्रुमं निकषा (Tapovana p. 41)
(ii) तपोवनं निकषा (Tapovana p. 101)
(iii) मुनेराश्रमं निकषा (Tapovana p. 105)
(iv) नगरं च परितः (Tapovana p. 99)

(v) परितश्च ताम् (Tapovana p. 33)

The Accusative case here by Kātyāyana "अभितः परितः समया निकषा हा प्रतियोगेऽपि" under Pāṇini (2.3.2)

(6) तां नन्दिनी ययाचे (Tapovana p. 32) द्विकर्मकत्व here by Pāṇini "अकथितं च" (1.4.51)।

(7) जनकं पराजयेत (Tapovana p. 195) Ātmanepada here by Pāṇini "विपराभ्यां जेः" (1.3.19)।

(8) हस्तपादमितस्ततः प्रक्षिपन्तीम् (Tapovana p. 88) एकवद्भाव by Pāṇini "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" (2.4.2)।

(9) देवराजधानीमाक्रामन्ति (Tapovana p. 166) "Long vowel by Pāṇini" क्रमः परस्मैपदेषु (7.3.76)।

The author has full command over the Sanskrit language as borne out by the high-flown style particularly in descriptions. His composition is marked at a number of places by *ojas*, vigour, the profusion of compounds described by the celebrated rhetorician Daṇḍin as the very soul of prose : *ojas samāsabhūyastvam etad gadyasya jīvitam*. It is also marked by exquistic alliteration and rich vocabulary. The author's keen insight brings out every little detail of the subject under description, every shade of it. The chain of similes and fancies impart a particular grace and charm to his work highlighting the free movement of his muse in quest for ever new models for comparison turning his work into a superb piece of art which has a durability far beyond the immediate present.

The *Tapovanavāsinī* fits into the chain of the best prose writings in Saṃskrita in the manner of its style and presentation even if not in its form which runs independently of the two of the accepted ones *Kathā* and *Akhyayikā*, not answering any of their description. What the author has given to the Sanskrit world is a novel, a form of writing novel to Sanskrit, a new graft on the old soil. And this novel has the Śakuntalā story as its theme, something no other author has attempted so far. It

speaks volumes for the ingenuity and the innovativeness of our author and his fine workmanship that he could stretch the small old theme to fill a full volume in prose without losing even an iota of its original intrinsic appeal. The story meandering in it is like the age-old river Ganga accepting into it many brooks and rivulets and reaching its destination in all its glory.

The following excerpts are reproduced below by way of corroboration to what has been said above :

(i) सकलं दिवसं यावद् व्योममण्डलस्याधिपत्यमुपमुज्य सकलं च जगद् दीप्तिमता प्रकाशेनोपकृत्य दिवसावसाने प्रकृतिपरिणाममिवावलोकयन् भगवान् भास्करो निर्वेदमापन्नो यतिरिव काषायवस्त्राणि धारयन् अस्तगिरिगुहासु तपस्तप्तुकाम इवालक्ष्यत।

(Tapovana p. 48)

(ii) प्रगाढान्धकारे सकलमेव लोकमाच्छादयन्ती निभृतं पदमादधाना खद्योतालीविलसन्नक्षत्रजालमणिखचितनीलगगनशाटिकाविहितनेपथ्याऽभिसारिणीव रजनी कमपि प्रियमन्वेषमाणा समागच्छति। परं व्योम्नि पूर्वदिशि समुदयन्तं प्रियतमं शशिनं रोहिणीरमणं वीक्ष्य सपत्नीजन्ययेर्ष्ययेव गाढमुरसि तस्य शेते। अपि च शशी श्यामशरीराया बलादिव प्रणयप्रदर्शनव्यग्रहृदयायाः निशायाः भारमसहमान इव वैराग्याभिभूतः पाण्डुरवदनमण्डलो भूत्वा पश्चिमाचलमारुह्य प्रतीचीदिग्वर्तिपयोनिधिपयसि स्वात्मानं निमज्ज्य सन्तापशमनप्रयासतत्परोऽवलोक्यते। (Tapovana p. 84)

(iii) तत्र च तेऽसङ्ख्यसङ्ख्यैर्ब्रह्मचर्यव्रतपालनसमुद्दीपिततेजोविभूषितवदनपुण्डरीकैः श्यामपट्टिकावनद्धकृष्णाजिनाधोवस्त्रधारिभिः, पीतपट्टांशुकसुशोभितस्कन्धैः कनककान्ति-कुञ्चितकेशराशिबद्धजटाजूटैः, शिरोमध्यदीर्घशिखावबद्धग्रन्थिमिः, दृश्यमानत्रिधावर्ति-तयज्ञोपवीतसूक्ष्मसूत्रालङ्कृतस्कन्धकक्षैः, रुद्राक्षमालाविभूषितकण्ठैस्त्रिपुण्ड्रचमत्कृत-सुविस्तृतभालपट्टैः, पीतमृत्तिकास्थासकविराजितभुजदण्डवक्षोभिर्दीर्घपलाशदण्डदक्षिणकरैः, कुशालङ्कृतश्रोत्रकुण्डलिनीकैस्त्रिसन्ध्यव्रतपारङ्गतैर्यमनियमासनप्राणायामप्रत्याहारधारणा-ध्यानसमाधय इति योगङ्गाभ्यसनरतैरुदात्तानुदात्तस्वरितस्वरसंयोगसंस्कृतपटुकण्ठ-वेदमन्त्रोच्चारणदक्षैः सकलविद्याध्यनावदातवपुर्मनोबुद्धिशालिभिरन्तेवासिभिः सार्धमागत्य यज्ञभूमिमशोमभयन्। (Tapovana p. 96)

(iv) व्योममध्यमार्गमारूढवति च शशिनि, पूर्वं स्वर्णमयमिव भूत्वा सकलं त्रिभुवनं सम्प्रति रजतमयमिव भवितुं प्रवृत्तम्। मालिनीरश्मयो रजतद्रवमिव प्रवाहयन्ति स्म। सैकतञ्चापि तारप्रच्छदपटेनाच्छादितमिव सञ्जज्ञे। मन्दं मन्दं प्रसरन् समीरणस्तपोवनोपवन-

सुरभितसुमनसामुन्मादयितृकं सौरभं परागचयञ्च सरितस्तीरमानिनाय।

(Tapovana p.114)

(v) त्रिविष्टपदेशस्य नारीणां सौन्दर्यं लावण्यञ्चानुपमेयमासीत्। ब्रह्मणा ज्योत्स्नायाः कोमलकान्तिं, मधुमासोद्भिन्नप्रसूनस्तम्बकेभ्यः सौकुमार्यं, मल्लिकायूथिकाकेतकी-वनस्पतिपुष्पराशिभ्यः सौरभं निर्मलनीलनीरपरिपूरितसरोवरेभ्यो नयनविशदत्वविशालत्वं, गगनाच्छादकेभ्यस्तुङ्गश्यामलजीमूतपङ्क्तिभ्योऽलकराशिसघनत्वं, चन्द्रकलायाः ललाटगौरकान्तिं, कामदेवकार्मुकप्रत्यञ्चातो भ्रूविलासं, प्रत्यूष आविर्भूताया उषसः कपोलकरतलारुणत्वं, बिम्बफलराशिभ्य ओष्ठयोस्ताम्रभावं, शंखेभ्यः कण्ठतनुसौन्दर्यभावं, गिरिसानुभ्यो वक्षःपयोधरोन्नतत्वं, विटपिमृदुविटपेभ्यो भुजमार्दवं, कमलपत्रेभ्यः कराङ्गुलिकोमलत्वं, केसरिकटिभ्यः कृशोदरत्वं, सरिच्चञ्चललहरीभ्यस्त्रिवलिवक्रत्वं, नागेन्द्रहस्तेभ्य ऊर्वोरूष्मत्वं, कदलीस्तम्भेभ्यः त्वग्गौरमसृणत्वं, स्थलारविन्देभ्यश्च चरणतललोहितत्वं गृहीत्वा तासां त्रिविष्टपनारीणां वपुषां रचना विहिता। (Tapovana p. 160)

(vi) तत्र सरल-साल-तमाल-शाक-शिंशपा-शाल्मलि-काञ्चनार-अशोक-पीतपुष्प-कदम्ब-वट-अश्वत्थ-निम्ब-प्रियाल-तुणादिपादपानाम् आम्र-जम्बु-बिल्व-आमलकी-निम्बु-नारङ्ग-अमृतफल-रम्भा-दाडिम-कपित्थादिफलतरूणाम् इङ्गुदी-केतकी-तुम्बुरु-बन्धूक-जपादिक्षुपानां नवमल्लिका-मल्लिका-यूथिका-जाति- सेवती- पिप्पली- बिम्बफलादिलतावल्लरीणां दीर्घाः पङ्क्तयः सुदीर्घविस्तारवत्योऽनुपमां शोभां विस्तारयन्ति स्म। वनस्पतीनां मध्ये व्याघ्रचित्रकतिन्दुकादिहिंस्रवन्यश्वापदैः सार्द्धं तपोवनपालितगोमृगादिपशवो निर्भयाः निश्शङ्काश्च विचरन्ति स्म। (Tapovana p. 203)

The sentiments are the soul of poetry. They constitute the very essence of it. Bharata says-

न हि रसादृते कश्चिदर्थः प्रवर्तते। Bharata Nāṭyaśāstra ch.6.

There are ten sentiments (रस)-

(i) sentiment of love (शृङ्गार),
(ii) sentiment of mirth (हास्य),
(iii) sentiment of sorrow (करुण),
(iv) sentiment of wrath (रौद्र),
(v) sentiment of heroism (वीर),
(vi) sentiment of terror (भयानक),
(vii) sentiment of disguist (बीभत्स),
(viii) marvellous sentiment (अद्भुत),
(ix) sentiment of queitism (शान्त) and

(x) sentiment of affection (वात्सल्य).

(Sentiment of affection is also considered as to be a rasa.)

Dr Krishna Kumar the author of *Tapovanavāsinī* has full command and control to express all the sentiments in this Sanskrit novel: The following illustrations from this prose work may be reproduced here as examples of these sentiments-

(i) Sentiment of love-

(a) Conjunction-

गात्राण्यवष्टम्भयितुमपारयन्ती सा वेपमानाङ्गयष्टिरेकेनैव प्रणोदनेन स्वकीयाननेन सह वक्षःस्थलं दुष्यन्तस्याङ्के निपातयामास।

(Tapovana p. 69)

(b) Separation-

शकुन्तलाविरहो तस्य दुस्सह एव जातः। तस्य हृदयवेदनया धैर्यमर्यादोल्लंघिता। किमपि भोग्यं न तस्यानन्दप्रदायकमभूत्।

(Tapovana p. 152)

(ii) Sentiment of mirth-

कथय कः समाचारः। रजन्यां कुत्र गतासीः। (Tapovana p. 76)

हसन्तं तमवलोक्य सर्वेऽपि हसितुमारेभिरे। (Tapovana p. 144)

(iii) Sentiment of sorrow-

न च वाष्पावरुद्धवचोवृत्तयस्ताः किमपि वक्तुमपारयतन्।

(Tapovana p. 127)

दर्शं दर्शं च तान् कथमहं तव विस्मरणे समर्थो भविष्यामि।

(Tapovana p. 128)

(iv) Sentiment of wrath-

अपरे च भयप्रदं गर्जन्तोऽभ्यागतानां मुनीनां वधं विधाय....।

(Tapovana p. 101)

हुङ्कृतिध्वनिं समुच्चार्य हृदयविदारिकेन गर्जनेन सङ्गर्ज्य...'

(Tapovana p. 102)

(v) Sentiment of heroism-

बालोऽप्यबालपराक्रमः शक्त्या सामर्थ्येन च किशोरान्नवयुवकांश्चाप्यतिशेते।

(Tapovana p. 92)

रिक्तहस्तोऽपि शस्त्रविहीनोऽपि सर्वदमनोऽसुरसैनिकानामग्रभागे..... केसरी.... वारणमिव समाचक्राम। (Tapovana p. 101-102)

(vi) Sentiment of terror-

केचन कमप्याश्रयं शरणं वाऽलभमानाः चक्षूंषि मीलयित्वा तिरोहिता एव वयमिति मन्यमानाः भूभावुपविष्टाः।

(Tapovana p. 14)

देवो वा देवाङ्गना वाऽप्सराः वा.......... भयत्राससङ्कुचितसकलगात्रो विषण्णवदनो .... सशङ्कित इव प्राविशत्। (Tapovana p. 170)

(vii) Sentiment of disgust-

शोणितमांसवसादिवर्षणेन.....मांसभक्षणरुधिरपानलालसान्।

(Tapovana p. 103)

निहतासुरहस्तपादशिरःकबन्धादिसम्भृतामवलोक्य।

(Tapovana p. 105)

(viii) marvellous sentiment-

ततोऽपि मनोहारीणि दृश्यान्यवलोक्न्ते।...... विश्वविधातुः सौन्दर्यरचनाकौशलमभिव्यञ्जयन्त्यो जलबिन्दुनिचितस्वर्णशलाका इव चमत्कृतिमादधानाः शोभन्ते।

गिरिशिखरवर्तिमनोरमस्थलसौन्र्येण नितरामभिभूतं दुष्यन्तस्य हृदयं हठादिवावर्जितम्। ...... तस्मिन् हरितश्यामलतरुभिराच्छादिते गिरिशिखरे किमेतद् दृश्यते।

(Tapovana p.185)

(ix) sentiment of quietism-

नयने निमील्य परब्रह्मणि स्वात्मानं विलीनं कर्तुकामस्तपःसाधनायां समाधिगतो बाह्यजगद्विस्मृतिशीलः स्थाणुरिव निश्चलोऽतिष्ठत्।

(Tapovana p.36)

शिलायां निषण्ण एकस्तपस्वी यमनियमासनप्राणायामप्रत्याहारधारणाध्यानानीति सप्तयोगाङ्गान्यभ्यस्य अष्टमाङ्गे समाधौ परब्रह्मण्यात्मानं विलीनं कर्तुं नियतवृत्तिः निवाते दीपशिखेव निश्चलाङ्गः स्थितः।

(Tapovana p.186)

(x) sentiment of affection-

पितरं प्रतीक्षमाणा..... अङ्काश्रयप्रणविनी मधुरकलप्रलापिनी प्रतनुभुजलताभ्यां तं परिष्वजति।

(Tapovana p. 78)

क्रीडाव्यापारेषु विलुठ्य रजोभिर्दिग्धसकलावयवः स शिशुर्यदा मातः मातरिति व्याहरन् जनन्याः क्रोडमधिरुह्य वक्षसा च संश्लिष्य, सुमृदुलघुभुजलताभ्यां शकुन्तलायाः कम्बुकन्धरामावेष्ट्य दृढं सम्पीड्य....।

(Tapovana p.90)

With the imaginative handling of the old theme in a powerful and vibrant style, the ***Tapovanavāsinī*** is a welcome addition to the growing novel literature in Sanskrit which in spite of interest in it can not account for more than a score or so of standard works. For this it's talented author deserves rich plaudits.

(SATYAVRATA SHASTRI)
Retd. Professor of Sanskrit
Delhi University

तपोवनवासिनी

प्रस्तावना

न केवलं भारतीया: जना: कवयो विद्वांस: सहृदया: समालोचका: मनीषिणश्चात्र प्राचीनसाहित्ये प्रस्तुतेन शकुन्तलोपाख्यानेन बद्धपरिचया: सन्ति, अपितु सकलस्य भुवनस्य साहित्यानुरागिण: सहृदया: शकुन्तलामभिजानन्ति। भुवनविश्रुतसकलविद्वज्जनवन्दित: कालिदासोऽभिज्ञानशाकुन्तलं नाम नाटकं विरच्य तत्र च नायिकाया: शकुन्तलाया: मुग्धं सौन्दर्यं सरलं सरसञ्च स्वभावं स्निग्धाश्च गुणान् सन्निवेश्य तां सहृदयानां हृदयेषु प्रतिष्ठापयामास।

प्राचीनभारतीयसाहित्ये शाकुन्तलीया कथा अतिप्राचीनलोककथारूपेण कालिदासादपि पुरातनी प्रथिता बभूव। महाभारतादिप्राचीनैतिहासिककाव्यग्रंथेषु पद्मपुराणादिमहापुराणेषु चेदमुपाख्यानमतिविस्तरेण वर्णितमुपलभ्यते। महाभारतस्यादिपर्वणि कुरुवंशीयानां नरपतीनां प्राचीनमितिहासं निदर्शयता महर्षिणा व्यासमहोदयेन शकुन्तलोपाख्यानमपि लिखितम्। उपाख्यानेऽस्मिन् तेन वर्णितं यत् पौरववंशीय: सम्राट् कुरुदेशशासको दुष्यन्तो मृगयायै पर्यटन् गौरीगुरोर्हिमगिरेरुपत्यकासु मालिनीसरित्तीरवर्त्याश्रमं कुलपते: कण्वस्य समाजगाम। आश्रमे च तत्र शकुन्तला निजोटजे स्थितैकान्तस्थानं भजमाना परमसौन्दर्यशालिनी तस्य दृष्टिपथमापतिता। तां तपस्विनीं बालां चित्तविमोहनकरीं नवयौवनाढ्यां विलोकयन्नेव सहसा स दुष्यन्तो हृतहृदयो बभूव। तस्मिन् काले समिदाहरणाय वनं गतस्य कण्वस्य तत्राश्रमे विद्यमानता दुष्यन्तस्य मनस: कामनाया: पूरयित्री बभूव।

कण्वस्यानुपस्थितावेव दुष्यन्तो गान्धर्वविवाहविधिना महताऽनुरोधेन शकुन्तलामुपयेमे। प्रणयिन्या अनुरोधं स्वीकृत्य तेन प्रतिज्ञातमपि यच्छकुन्तलाप्रसूतिरेव कुरुदेशशासनलोलानगाधिकारिणी भविष्यति।

शकुन्तलाया सन्निधौ कतिपयक्षणावधिकानि विलासरतिसुखान्यनुभूय हस्तिनापुरं गच्छन् स तामाश्वासयामास- "कालेनाचिरेणैव हस्तिनापुरं तामानेतुं राजपुरुषाः समागमिष्यन्ति," इति।

राजप्रासादसुखभोगनिमग्नस्य दुष्यन्तस्य शीघ्रमेव तपोवनवासिनी बाला सा शकुन्तला स्मृतिपथाद् दूरवर्तिनी सञ्जाता। परं दुष्यन्तसंयोगेन सा तपस्विकन्यका पौरवकुलगौरवभूतं गर्भमपि बभार। निवेदयामास च सा सकलमेव वृत्तान्तं स्वपित्रे कण्वाय। दशमासञ्च यावत् पतिं प्रतीक्षमाणा तत्रैवाश्रमे सा सुतं प्रसूतवती। परं दुष्यन्तस्य न कोऽपि समाचारस्तयाऽधिगतः। भर्त्रे स्पृहयन्त्यपि शकुन्तला बहुवर्षं यावदाश्रम एव निवसन्ती स्वसुतं पालयामास।

अथ द्वादशवर्षावधिं प्रतीक्ष्य सा सुतेन सह स्वयमेव हस्तिनापुरं गत्वा राजसभायां दुष्यन्तस्य समक्षं समुपतस्थौ। प्रथमं तावद् दुष्यन्तोऽभिजानन्नपि क्षणप्रेयस्याः शकुन्तलाया अभिज्ञानमपि न स्वीचक्रे। परं तदनन्तरमेवाकाशवाणीसाक्षिकं वचनमङ्गीकृत्य भार्यारूपेण तां शुद्धान्तवर्तिनीञ्चकार। शकुन्तलायाः सुतोऽपि सर्वदमनस्तेन स्वापत्यरूपेणाङ्गीकृतः। अयमेव सर्वदमनो भारतीयेतिहासे भरतनाम्ना प्रथितो बभूव। अस्यैव च नाम्ना देशोऽप्ययं भारतवर्षमित्यभिधेयतां गत इति प्रसिद्धिः।

महाकविना कालिदासेन स्वकीयेऽभिज्ञानशाकुन्तलनाटके कथानकस्य मूलभावना प्राचीनसाहित्ये निबद्धाल्लोकप्रसिद्धाच्छाकुन्तलोपाख्यानाद् गृहीता। तदनन्तरन्तेनेयं प्राचीना कथा बहुविधान् परिवर्तनपरिवर्धनसंशोधनादिसंस्कारान् विधाय नाटकीयरूपसम्प्रदानेन विधिना स्वकीये नाटके सन्निवेशिता। इदन्नाटकं कवये तस्य च नायिकायै शकुन्तलायै यशोऽविनश्वरं ददौ। अद्यापि समालोचकैरियं महाकविकालिदासस्य कृतिर्जगतः प्रशस्यतमं नाटकङ्गण्यते। कालिदासस्यानया शकुन्तलया प्राचीनसाहित्योपाख्यानवर्तिनी शकुन्तला सहृदयानां हृदयपटलेभ्यः प्रायशो विलोपिता।

कालिदासस्य शकुन्तला महाभारतस्य शकुन्तलया न सादृश्यं भजते। सा तु सर्वेष्वपि रूपेषु भिन्ना। कालिदासस्य शकुन्तला स्वभावेन मुग्धा, भीरू, स्नेहमयी, निसर्गसुन्दरी तापसबाला वर्तते, परन्तु महाभारतीया शकुन्तला नितरां व्यवहारकुशला, भयरहिता, तेजस्विनी, स्वाभिमानिनी च नारी

समवलोक्यते। महाभारतवर्णिता शकुन्तला कालिदासवर्णितशकुन्तलासदृशी न, या केवलं स्नेहानुरागभावनाविवशीभूता स्नेहानुरागं प्रदर्शयतो दुष्यन्तस्य कामनायै स्वात्मानं समर्पयति। महाभारते शकुन्तलायाः समर्पणमूल्यम्- "तस्याः प्रसूतिरेव दुष्यन्तस्योत्तराधिकारं प्राप्य राजपदमलङ्करिष्यति"। पुत्रेण सार्द्धं दुष्यन्तस्य राजसभां प्राप्य राज्ञा तिरस्कृताऽपि सा नाश्रूणि नयनाभ्यां प्रवाहयति, न च स्वानि भाग्यान्यधिक्षिपति। अपितु निर्भया सती स्वसामर्थ्यं महत्त्वमधिकारञ्च प्रदर्श्य दुष्यन्तस्य दोषानुद्घाटयति।

शकुन्तलामधिकृत्य प्रभूतमालोचनात्मकं साहित्यमनल्पैरालोचकैर्लिखितम्। शकुन्तला तु तस्यैवेतिहासप्रसिद्धस्य भरतस्य जननी, यस्य नाम्नाऽयमस्माकं देशो भारतवर्षमित्यभिधीयते। अत एव स्वाभाविकीयमाकाङ्क्षा यत्तां तपोवनलालितां तापसबालामधिकृत्य भारतजननीं प्रति श्रद्धाञ्जलिमर्पयता लेखकेन लेखन्या किञ्चिदपि नवीनरूपेण सहृदयजनसमक्षं प्रस्तूयेत। परमयं तु लेखो न भवतु केवलं समालोचनारूपेण, अपितु सरसं मनोहारि सहृदयहृदयावर्जकमुपाख्यानमाधुनिकोपन्यासविधामादधातु।

को लाभस्तेन नीरसेन केवलं समालोचनात्मकेन लेखनेन, यत्तु कथारसास्वादलुब्धानि सहृदयहृदयान्यावर्जयितुं न क्षमते। शकुन्तलायास्तु चरितं मनोहरोपाख्यानरूपेण वर्णयितव्यम्। अपि चाऽस्मिन् चरितोपाख्याने कालिदासस्य शकुन्तलायाः महाभारतस्य शकुन्तलायाश्च गुणानां समन्वयेनापि भवितव्यम्।

प्रस्तुता तु रचना फलं परिणामो वाऽस्या एवाऽऽकाङ्क्षायाः। प्राचीनेष्वाख्यानेषु वर्णितायाः शकुन्तलायाः कालिदासवर्णितशकुन्तलायाश्च चरितगतसौन्दर्यादिगुणगणस्य समन्वयं विधाय लेखकेनाऽस्मिन् कथारूपोपन्यासे सरसत्वगुणसम्भरणे प्रयासो महान् विहितः। इत्थं चाऽस्मिन् प्रयासे शकुन्तलायाः गुणानामभिव्यञ्जने लेखकः प्राचीनोपाख्यानापेक्षया अनल्पेतरनवकल्पनेष्वपि बाधितो बभूव। अथ चापि वर्तमानकालीनोपन्यासविधाप्रसंगेनालौकिकासम्भववृत्तान्तकल्पनाप्रलोभनं परित्यज्य तथाविधा एवात्र घटनाः परिकल्पिताः यासां सम्भवनमस्मिन् लोके कल्पयितुं शक्यम्। अपि च ताः न केवलं कविप्रौढोक्तिसिद्धाः कविनिबद्धवक्तृप्रौढोक्तिसिद्धाः वा भवेयुः, किन्तु स्वतःसम्भविन्योऽपि स्युः।


नारीणां शक्ति-सामर्थ्य-स्वाभिमानादिगुणानां प्रकटनमत्र रचनायां वर्तते। नारी न केवलं भोग्यं वस्तु। सा सकलबलसमन्विताऽपि मनोमोहिनी शक्तिरेव। सरसमानन्दं प्रवाहयन्ती सा निर्मितिसामर्थ्यमपि सन्दधाति। प्रस्तुतोपन्यासे नारीणां प्रणयभावगुणानामभिव्यञ्जनेन सह तासां स्वाभिमानत्वगुणस्य, बालकेषु शक्तिसंग्राहकनिर्मितिकारकस्य मातृरूपस्यापि च प्रकटनस्य प्रयासो विहितः। गुणोऽयन्तु न च महाभारतीयायां शकुन्तलायां, नापि च कालिदासीयायां शकुन्तलायामभिव्यज्यमानोऽनुभूयते। कदाचिदेनां शकुन्तलामनुभूय सहृदयजनाः नवनवोन्मेषप्रतिभासमन्वितन-वत्वगुणाकृष्टाः पुरातन्यास्तस्याः कालिदासीयशकुन्तलाया अपि न विस्मरेयुर्यथाऽभिज्ञानशाकुन्तलया महाभारतीया शकुन्तला सहृदय-हृदयपटलेभ्योऽपसारिता।

नारीणां मनोरमाणां सौन्दर्यादिगुणानां वर्णनं विधाय सहृदयहृदया-नामनुरञ्जनन्तु लेखकस्य प्रथमं प्रयोजनम्। तत्रापि तासामान्तरिक-सौन्दर्यमप्यभिव्यज्यते। अथ चेयं रचना कां काव्यविधां कांश्च काव्यगुणान् दधातीति निर्णयं सहृदयपाठका एव कर्तुं क्षमन्ते। तथापि गद्यकाव्यमिद-माधुनिकोपन्यासविधां दधातीति लेखकस्य मतम्।

समालोचनात्मकदृष्ट्या उपन्यासेऽस्मिन् प्रभूतानामेव दोषाणामुद्घाटने विद्वांसः समालोचकाः क्षमन्ते। तथाऽपि सहृदयाः पाठका उपन्यासविधिना रचितामिमां रचनां पठित्वा स्वल्पस्यापि कथारसस्यास्वादने यदि साफल्य-मधिगच्छन्ति, लेखकस्यास्याः रचनायाः लेखनस्य परिश्रमः सफल इत्याशास्यते।

विदुषां वशंवदः

कृष्णकुमारः



SAKUNTALA (1898)

(Courtesy: National Art Gallery, Madras)

तपोवनवासिनी

(१)

"विजयतां महाराजो दुष्यन्तः, विजयतां पौरववंशीयः सम्राड्, विजयतां कुरुदेशाधिपतिः, विजयतां हस्तिनापुरपालक", इति सहस्रशः सैनिकानां समवेतानां जयजयकाराणां कोलाहलाः कुरुदेशराजधानीं हस्तिनापुरीं परितः प्रासरन्। राजमार्गा आहन्यमानानां वाद्यमानानाञ्च भेरीढक्कापटहकाहल-तूर्यशङ्खादिवाद्यविशेषाणां ध्वनिप्रतिध्वनिभी रसितप्रनिरसितसम्भृताः बभूवुः। वायुमण्डले प्रसरन्तश्चैते निनादाः राजधानीनिवासिनां जनानां कर्णकुहराणि प्रविशन्तस्तान् प्रहर्षरोमोद्गमविभूषितान् व्यदधुः।

एतस्मिन्नेव समये सहसा गहनपरिखासंरक्षितस्य प्राकारपरिवेष्टितस्य राजप्रासादस्योत्तुङ्गशिखरतोरणाधस्ताच्छनैः शनैः निर्गच्छन्ती प्रसरन्ती मन्दपवनवेगेनान्दोल्यमाना काषायवर्णा मृगाङ्कचिह्नगर्भा राजकीयपताका जनानां दृष्टिगोचरतामाजगाम।

विपुलप्रमाणैश्चतुःसङ्ख्यैरमृतफेनपुञ्जनिर्मितैरिव, चन्द्रचन्द्रिकाराशि-चयरचितैरिव शुभ्रधवलवर्णैरूर्ध्वकरपुरुषप्राप्यपृष्ठभागैर्बालरविरश्मिरञ्जित-केसराग्रग्रीवैः भ्रूमध्यभ्रमरीविलसितैः सैन्धवैराकृष्यमाणो महाराजस्य सम्राजो दुष्यन्तस्य स्यन्दनस्तोरणाधस्माद् बहिर्निश्चक्राम। तस्याग्रभाग एव स्यन्दनसंवाहकसूतासनसमीपमेवोत्तुङ्गदण्ड एकोऽशोभत। तस्य शिखरप्रदेशे स्वातन्त्र्येण क्रीडन्ती राजकीयपताका दुष्यन्तस्य सार्वभौमत्वमुद्घोषयन्तीवोल्लसति स्म।

असंवृतच्छदिःपटले स्यन्दने समुपविष्टस्य सम्राजो दुष्यन्तस्याकृतिर्वि-प्रकृष्टान्तरालादपि सुस्पष्टरूपेण प्रत्यभिज्ञायते स्म। स्यन्दनस्य मध्ये पीठासनमेकमध्यतिष्ठत् सः। दीर्घाकारं गौरवर्णं सुघटितं शरीरं, विशालं वक्षःस्थलं, विस्तीर्णौ स्कन्धौ, सुदीर्घौ भुजौ, क्षीणा कटिः, सुपुष्टे सक्थिनी, सुरूपौ जघनाविति सकलान्यङ्गानि तस्य शारीरकं सौष्ठवं पराक्रम-मुद्दण्डत्वञ्चाभिव्यञ्जयन्ति स्म।

कर्णान्तविस्तीर्णाभ्यामरुणोदयविकचपुण्डरीकाभ्यामिव सुशोभिताभ्यां नयनाभ्यां विभूषिते, दीर्घनिशितनासिकाधारिणि, ऊर्णचक्राधिष्ठित-भ्रूमध्ययुतगौरविशाललाटसमुज्ज्वले, रत्नजटितकुण्डलालम्बिविस्तृत-श्रोत्रालङ्कृते च तेजस्विनि वदने मन्दस्मितस्य मनोमुग्धकारिणी कान्तिस्तस्य तेजस्वितामधिकाधिकां वर्धयन्ती संलक्ष्यते स्म। शिरसि सन्निहितं कनकरचितकिरीटं प्रोज्ज्वलरत्ननिचयजटितं प्रातरुदितदिनकरारुणरश्मीनां संस्पर्शमवाप्य पौनःपुन्येन झिलमिलायते स्म। किरीटस्य प्रान्तभागेषु पृष्ठप्रदेशे च संस्कारितः कृष्णकुन्तलचय ईषत्प्रकाशमानोऽवर्तत। विस्तृतललाटपट्टे प्रतनुश्रमसलिलपृषताः मुक्ताफलसकाशाश्चकाशिरे।

सम्राजः सव्ये स्कन्धे ज्यया ततं दीर्घसुदृढवंशविरचितं शरासनं लम्बते स्म। सव्येतरश्च स्कन्धः पृष्ठभागे नाराचनिचितेन तूणीरेणाशोभत। चरणयोः समीपे स्यन्दनभूमिः खड्गकरवालचन्द्रहासच्छुरिकापर-शुकुन्ततोमरादीनां नानाविधानां प्रहरणानाञ्चयेन सम्भृता समलक्ष्यत।

वामेतरं भुजमुन्नमय्य सैनिकानामभिवादनान्यङ्गीकुर्वतो दुष्यन्तस्य स्यन्दनो हस्तिनापुरस्य प्रमुखराजपथे प्राचलत्। रथसञ्चालनदक्षेण सारथिना निपुणं प्रेर्यमाणाः घोटकाः मन्दगत्या तं स्यन्दनं नगरस्य बाह्यद्वारम्प्रति निन्युः।

महाराजो दुष्यन्तस्तु कुरुवंशमध्ये परमप्रतापशाली भुवनविश्रुतो राजा बभूव। स्वभुजबलपराक्रमप्रभावेण स सकलामेव धरित्रीं विजित्य सुशासिताञ्च विधायैकच्छत्रं साम्राज्यं संस्थापयामास। दण्डनीति-पराक्रमोत्साहशासनदक्षतादिराजशासनगुणैः सन्धि-विग्रह-याना-सन-संश्रय-द्वैधीभावानां षण्णामङ्गानां साम-दान-दण्ड-भेदानाञ्चतुर्णामुपायानां च प्रयोगैरसौ सकलभुवनराजसंहतिं साम्राज्यान्तर्गतां कृत्वा स्वकीयान् परमपराक्रमशालिनोऽपि पूर्वपुरुषानतिशयितवान्।

कुरुवंशस्याभ्युदयस्तु महाभारतसमरादपि शतशः वर्षपूर्वमभवत्। एतद्वंशीयाः नरपतयस्तु चन्द्रात् समुत्पन्नाः सम्भाव्यमानाश्चन्द्रवंशीयाः कथ्यन्ते स्म। विस्तीर्णसाम्राज्यस्य स्थापना तैर्विहिता। तस्मिन् काले सूर्यवंशीयानान्नरपतीनां प्रतापसूर्यः कालचक्रप्रभावेणास्तङ्गमितप्रायोऽवर्तत, चन्द्रवंशीयानाञ्च मध्याकाशे चकाशे। दुष्यन्तस्य सिंहासनारोहणसमये

कुरुकुलपूर्वजस्य पुरुवंशस्य साम्राज्यमार्यावर्ते, हिमवद्-विन्ध्ययोर्मध्ये सुविस्तीर्णमासीत्। तथा- उत्तरस्यां दिशि हिमगिरेरुतुङ्गशिखराणि, दक्षिणस्यां दिशि चर्मण्वती सरिद् विन्ध्यगिरिश्रेणयश्च, प्रतीच्यां शतद्रुः सरित् प्राच्याञ्च ब्रह्मपुत्रसरिदिति सीमान्तास्तत्रावर्तन्त। परं दुष्यन्तो हिमगिरिदक्षिणसागरमध्यवर्तिनीं सकलामेव धरित्रीं स्वभुजोपधानशायिनीञ्चक्रे। तस्य च राजधानी गंगातटवर्तिनी हस्तिनापुर्यासीत्।

कस्मिंश्चित् समयेऽस्मिन् कुले नहुषो नामातिप्रतापशाली राजा बभूव। यज्ञभागसमुत्सुकानां सुराणामधिपस्येन्द्रस्यानुपस्थितावेकवारं स त्रिविष्टपस्यापि शासनसंचालनसूत्रधारो भूत्वा तथा सौभाग्यभाग् बभूव। नहुषस्य सुतो ययातिः पितुरप्यधिकः पराक्रमेऽतिशयितः संजज्ञे। तेनासुराणां गुरोः शुक्राचार्यस्य सुता देवयानी गान्धर्वविवाहविधिना परिणीता। तदनन्तरमसौ दासीरूपेण समागतामसुराणां सम्राजो वृषपर्वणोऽपि सुतां शर्मिष्ठां स्वान्तःपुरवर्तिनीञ्चकार।

असुरगुरुसुता देवयानी ययातिसंसर्गेण द्वौ सुतौ जनयामास यदुन्तुर्वसुञ्च। यदोस्तु परमपराक्रमशालि समृद्धिसमन्वितमितिहासप्रसिद्धं यादवं कुलं प्रावर्तत। अस्मिन्नेव कुले भगवता कृष्णेन विष्णोरवताररूपेण प्रथितेनावत्तीर्णं भारतवर्षञ्च पावनं कृतम्। शर्मिष्ठा तु त्रीन् सुतान् प्रसूतवती- द्रुह्युमनुं पुरुञ्चेति। ययातेः सुतः पुरुः कनिष्ठोऽपि पितरि भक्ततमः। जनकोऽपि तस्मिन्नत्यधिकमस्निह्यत्। जनकेन प्रार्थितं निजयौवनं तस्मै समर्प्य स पितृभक्तिशीलेषु शिरोमणिरिव दैदीप्यमानो बभूव। कनिष्ठोऽपि सन् स पुरुः पित्रा निजोत्तराधिकारी निर्वाचितः। राजसिंहासन मधिष्ठितं कृत्वा शासनञ्च सुदृढं विधाय स भूभृद् दिग्विजययात्राम्प्रारभ्य प्रायः सकलमेवार्यावर्तमेकशासनसूत्रान्तर्गतञ्चकार। पुरोर्नाम्नाऽयं वंशः पुरुवंश इति विश्रुतो बभूव।

पुरोरनन्तरमस्मिन् वंशे इललो नाम सुप्रथितयशाः सम्राड् बभूव। तस्य पञ्च पुत्रा आसन्- दुष्यन्तः, शूरो, भीमः, पुपुरुर्वसुश्च। एतेषु पञ्चसु पुत्रेषु ज्येष्ठो दुष्यन्तः पित्रा युवराजपदेऽभिषिक्तः।

समयक्रमेण इललो नाम राजा वृद्धत्वमापन्नः। कुलपरम्परां परिपालयन् स दुष्यन्तं राजसिंहासने प्रतिष्ठितं कृत्वा राज्यपदेऽभिषेचयामास।

तदनन्तरञ्चासौ वानप्रस्थधर्ममङ्गीकृत्य तपस्तप्तुं तपोवनानि जगाम।

दुष्यन्तस्तु महान् प्रतापी यशस्वी सम्राड् आसीत्। पराक्रमेण च शारीरिकबलेन च राजशास्त्रोक्तनीतिगुणान् परिपालयन् स सकलानेव भूमिपालान् शौर्यशालिनोऽतिशेते स्म। आयुधानां प्रयोगेष्वपि सोऽद्वितीय एवावर्तत। रथाश्वगजविद्यास्वपि तस्य दक्षता सर्वत्र प्रसिद्धा। न कोऽपि जनस्तत्र तस्य प्रतिमानम्। राजनीतिदण्डनीतिप्रयोगेष्वसौ प्रकाण्डपण्डितः। शत्रवस्तु तस्य राजनीतिप्रयोगैरेव वशवर्तिनो भवन्ति स्म। युद्धावसरास्तु तेन परिह्रियन्ते स्म। परन्तु सत्यां युद्धस्यानिवार्यतायामसौ पश्चात्पदन्न निदधाति स्म।

दुष्यन्तस्य राजनीति-दण्डनीति-युद्धनीत्यादीनां सकलाः प्रयोगाः नितरां साफल्यं प्राप्ताः। राजसिंहासनमधिकृत्य स स्वल्पेष्वेव दिवसेषूत्तरदिशि हिमालयादारभ्य दक्षिणदिशि समुद्रपर्यन्तं सुविस्तृतं सुदृढं साम्राज्यं संस्थापयामास। तस्येयं भूभार्या समुद्ररशना सञ्जाता। तदनन्तर-मसावार्षविधिनाऽश्वमेधयज्ञं याजयामास। एवञ्चासौ सार्वभौमचक्रवर्ति-सम्राडित्युपधिना स्वात्मानमलञ्चक्रे।

दुष्यन्तस्य सुदृढे सुव्यवस्थिते च प्रशासने प्रजासु सुखानां समृद्धीनां चातिशयेन वृद्धिर्बभूव। प्रशासनपद्धतौ तेन प्राचीनमनीषिभिः प्रतिपादिता एव परम्पराः परिपालिताः। मानवधर्मसूत्रे मनुस्मृतौ धर्मसूत्रग्रन्थेष्वन्येषु वा धर्मशास्त्रेषु व्याख्यातानां नियमानामवलोकनमेव स आदर्शरूपेण चकार। तस्मिन् युगे प्रशासनसञ्चालनकेन्द्रन्तु नरपतिरेवासीत्। तथापि न स तथा सर्वतन्त्रस्वच्छन्दोऽभवत्। प्रशासनसञ्चालने राज्ञः सहायतायै परामर्शाय नियन्त्रणाय चैका समितिनाम्नी संस्थाऽविद्यत। समितेश्च सदस्यानां निर्वाचनं प्रजानां विभिन्नवर्गाणां प्रतिनिधिभिर्विधीयते स्म।

समितेरस्या अन्तरङ्गसभैकाऽमात्यपरिषदपि संघटिता बभूव। अस्यां परिषदि षट्त्रिंशत्सदस्याः समाजस्य विभिन्नवर्गाणां प्रतिनिधित्वञ्चक्रुः। ब्राह्मणानाञ्चत्वारः, क्षत्रियाणामष्टौ, वैश्यानामेकविंशतिः, शूद्राणाञ्च त्रयः प्रतिनिधयोऽस्यां परिषदि सदस्यरूपेणातिष्ठन्। राज्ञः सुतेषु सिंहासनस्योत्तरा-धिकारी को भवितुं योग्य इत्येष निर्णयोऽपि समित्या अमात्यपरिषदा च विधीयते स्म। दुष्यन्तस्तु संस्थयोरेतयोरधिकारान् प्रति स्वकीयां

सुदृढामास्थामभिव्यञ्जयामास। एवञ्च तेनैषा प्रजातन्त्रव्यवस्था सुदृढीकृता।

दुष्यन्तस्य सुव्यवस्थिते शासनेऽतिशयेन सुखिनः समृद्धिमन्तश्च प्रजाजनाः पूर्ववर्तिनामपि महीपालकानां गुणानां विस्मृत्य तस्यैव राज्ञो गुणान् स्तुवन्ति स्म। सुदृढप्रशासनसंरक्षायां स्वस्वधर्माननुपालयन्तः प्रजाजनाः धनैर्धान्यैश्च समृद्धाः सन्तः साहित्ये काव्येषु ललितकलासु अन्येषु च आमोदप्रमोदेष्वानन्दानतिशयाननुभवन्ति स्म। साहित्ये ललितकलासु विज्ञानेषु च नित्यमेव नवीना आविष्कारा: समापद्यन्त।

कुरुजनपदे मुख्यरूपेणार्यजातिरेव न्यवसत्। परमत्र वानरर्क्ष-नाग-किन्नर-निषाद-भिल्ल-कोल-किरात-यक्ष-गन्धर्वा-सुर-राक्षस- यवना-दिजातीयानामार्येतराणामल्पसंख्यकानामपि निवास आसीदेव। एतासु जातिषु काभिश्चिदपि जातिभिरार्याणां धर्मस्य, सभ्यतायाः संस्कृतेश्च परम्पराणामङ्गीकारो विहितः। परं काश्चन जातयः स्वकीयानेव परम्परागताचारव्यवहारान् परिपालयन्तो महता सुखेनानन्देन च जीवनयापनं कुर्वन्ति स्म।

साम्राज्यस्य सीमान्तप्रदेशान् सुरक्षितान् सुदृढांश्च विधाय, आन्तरिकप्रशासनञ्च सुव्यवस्थितं कृत्वा दुष्यन्तः स्वप्रजाजनान् बाह्याभ्य आन्तरिकाभ्यश्च विपद्भ्यो विमुक्तांश्चकार। तासां सम्भावनामपि निराचक्रे। दुष्यन्तराज्ये प्रजाजनाः सुखानि विलासांश्चोपभुञ्जानाः न्यवसन्। विभिन्नेष्वृतुषु विविधप्रकाराः समारोहाः समायोज्यन्ते स्म। एषु समारोहेषूत्सवेषु महीपालेन सह प्रोत्साहिताः सोत्साहाः प्रजा अपि सम्मिलिताः बभूवुः।

एवं राज्यसुखान्यनुभवतो दुष्यन्तस्यानेकानि वर्षाणि व्यतीयुः। अथैकस्मिन् समये पुष्पकिसलयादिसमृद्धिसमेधिते, मलयानिलमदान्विते, जनजनमानसोन्मादकारिणि व्यतीते वसन्तर्तौ गीष्मर्तुः प्रादुरभूत्। रजनीभिः सङ्कुचितुमारब्धम्। परिणामरमणीयाः दिवसाः विशालतां प्रपेदिरे। नवयौवनमदोन्मत्ता कामिनी उषाः स्वकीयं पाटलं विद्योतमानं वदनं प्रियत-मदिनकरं दर्शयितुं सोत्कण्ठा सती, स्वमुखावरणमन्धकारनैपथ्यं पूर्वतोऽपेक्षयाऽतिसुप्रभातवेलायामपसारयितुं प्रावर्तत। दिवसस्य प्रथमप्रहरे सम्पूर्णताङ्गत एव प्रातःकालीनस्तपर्तुकुसुमसौरभसुवासितोऽपि शीतल:

पवनः प्रखरभास्करप्रतप्तकिरणेभ्यः सन्तापमादायास्य लोकस्य सकलानेव प्राणिनः सन्तापयितुं प्रवृत्तः। कतिचिद्दिवसपूर्वमेवोपवनानां यानि पुष्पाणि किसलयानि च निशीथिनीतुहिनबिन्दुभिरार्द्राणीव सञ्जायन्ते स्म, तपर्तुप्रारम्भे शुष्काणीव सन्ति म्लायमानानि संलक्ष्यन्ते स्म।

अस्मिन् काले रसालतरुविटपेषु सघनरूपेण विकासभावं भजमानाः मञ्जर्यः शोभमानाः बभूवुः। शिरीषकुसुमविभूषितकर्णाः प्रमदा उषसि अरुणालोके उपवनेषु कुसुमानि विचेतुं पर्यटन्। बन्धूक-जपा-यूथिका-मल्लिका-नवमल्लिका-केतकी-सेवती-शतदल-सहस्रदलपुष्पाणि सर्वत्र वाटिकासु वापीषु च विकसितान्यवालोक्यन्त।

प्रभातवेलायां मधुरकलध्वनिना कूजनं कुर्वन्तः खगा आहारान्वेषणायेतस्तत उत्पतन्तो, भास्करे किञ्चिदुन्नते वियति समारूढे सत्येव प्रचण्डसन्तापसमाकुलाश्छायाशीतलस्थानानामन्वेषणेऽतिव्यग्राः समजायन्त। सूर्ये मध्याकाशमलङ्कृतवति सत्येव सकलमपि विश्वं निस्तब्धमिव भूत्वा ग्रीष्मर्तोः स्वागताय सन्नद्धम्बभूव।

तपर्तुसुलभसुललितविलासविलसनसुखसंसक्तस्यापि दुष्यन्तस्यैतेषु दिवसेषु मनसि मृगयाविहाराभिलाषः समुदभूत्। एकस्मिन् दिवसे सायंकाले सेनानायकं रैवतकमाहूय स समादिशत्-

मृगयायै भवता प्रबन्धो विधेयः।

तत्क्षणमेव राजाधिराजस्यादेशः सर्वत्र सैनिकेषु समुद्घोषितः। दुष्यन्तस्य विचिताः केचनोत्तमशस्त्रविद्यानिष्णाता अंगरक्षकाः सुकुशलाः वनग्राहिणश्चाखेटकाः वनेभ्यः सज्जीभवितुमादिष्टाः। महाराजस्य मृगयायै महता विभवेनाडम्बरेण च बृहदायोजनं समारब्धम्।

अन्यस्मिन् दिवसे प्रभातवेलायां क्षितिजे प्राचीदिग्वर्तिन्युषसि समुदितायां सत्यामेव राजप्रासादस्य द्वारि सम्राजोऽङ्गरक्षकसेना सेनापतिरैवतकनायकत्वे पङ्क्तिषु सुसज्जिता बभूव। मृदङ्गकाहलढक्काभेरीतूर्यपटहादिसैन्यवाद्यानां समवेतध्वनयः प्रसरन्तः सर्वासु दिक्षु सकलानप्यन्यान् शब्दान् तिरोहितांश्चक्रिरे। धनूंषि, शराः, खड्गाः, शक्तयस्तोमराः, मुसलाः, कुन्ता इत्यन्यान्यायुधानि च गणवेशसुसज्जितानां सैनिकानां करेषु शोभमानानि बभूवुः। प्रहरणा-

लङ्कृता: सैनिका: सम्राजो जयजयकारैर्व्योमापि प्रकम्पयामासु:। तेषाम्मध्ये च सैन्धवानां हेषाध्वनीनां विचित्रो मधुरो रव: सैनिकानां मन:सु पूर्वतोऽप्यधिकमुत्साहरसं सञ्चारयामास।

तदनन्तरमेवाखेटकानां महान् समुदायस्तत्र समुपस्थित:। तेषां स्कन्धेषु दीर्घा: दृढाश्च रज्जव: पाशाश्च हस्तेषु च दण्डा: शोभन्ते स्म। दीर्घाकारै: लघुरासभसमोन्नतकायै: कौलेयकैरनुगम्यमानास्ते तत्र समागच्छन्। ग्रीवासु स्थूलकृष्णवर्णचर्मपट्टिकाभि: सुनिबद्धास्तत्र च संलग्नाभि: सुदृढाभि: परं तन्वीभि: लोहशृङ्खलाभिर्बलादाकृष्यमाणा: मृगयाकुक्कुरास्ताननुसरन्त: कूर्दन्ते स्म। मुखेभ्यो जिह्वाभिरतितरललोहिताभिर्बहिर्लपलपायमानाभिस्ते कौलेयका: यमराजस्य भयावहा: यमदूता इव आसन्।

सम्राजो दुष्यन्तस्य रथे तोरणमध्याद् बहिरायाते सत्येव जयघोषणानां कोलाहला: पूर्वतोऽप्यधिकां वृद्धिं प्रपेदिरे। दुष्यन्तमन्वेकमुत्तुङ्गं काषायवर्णं सैन्धवं समारूढो रैवतक: सेनापति: समागच्छति स्म। तदनु च तिसृषु पङ्क्तिषु व्यवस्थापितानामङ्गरक्षकाणामश्वारोहिणां सैनिकानाङ्गुल्म: प्रचलति स्म। अश्वारोहिणश्चैते कथमपि प्रयत्नेन स्वकीयवाहनभूतानामश्वानामतितीव्रां चपलाञ्च गतिं नियच्छन्त: खलीनान् निगृह्णन्तो रैवतकमन्वसरन्। अश्वारोहिणोऽनु च लौहशृङ्खलाभिर्मृगयाकुक्कुरानाकर्षन्तो व्याधा: प्रचलन्ति स्म। रथस्य घर्घरध्वनिना, घोटकानां हेषारवेण, पादातिकानाम्पादानां टाप्-टाप्ध्वनिना, कुक्कुराणां बुक्कोशेन, सैनिकानां जयजयकारघोषणेन, सैन्यवाद्यानां च वादनरवेण विमिश्रितो महारवोऽत्यद्भुतचमत्कारकारी प्रतिहतान्यशब्द: सकलामेव हस्तिनापुरीमप्युत्क्रम्य दिग्दिगन्तान् ध्वनिप्रति-ध्वनिभि: व्यापृतानकरोत्।

राजराजेश्वरो महाराजो मृगयायै नगराद् बहिर्वनानि गच्छतीति समाचारस्त्वरितन्नगरे प्रासरत्। बालका:, बालिका:, युवका: युवतयो वृद्धजनाश्च स्वकीयं प्रियं सम्राजं क्षणमपि दिदृक्षवो गृहेभ्यो बहि: राजमार्गेषु, गृहाणां बलभीषु, गवाक्षेषु, छदिषाञ्च प्रान्तभागेषु समवेता: समभूवन्। राजस्तुतिगीतानि गायन्त्यो मनोहारिण्य: कामिन्यो दुष्यन्तमुपरि पुष्पाण्यक्षतांश्च वर्षयन्त्यो राजमार्गमाकीर्णयामासु:।

स्मितविकसितवदनं परितो दिक्षु परिभ्रामयन् लोलत्तरलतारकचक्षुर्भ्यां

सर्वतो विलोकयन्, द्वाभ्यामेव करकिसलयाभ्यां कुड्मलाकारमञ्जलिमाबध्नन् नागरिकाणामभिवादनानि विनम्रताङ्गतेन शिरसा स्वीकुर्वन् दुष्यन्तः पुष्पाक्षतवृष्टिभिः सहैव प्राकारमुपगम्य नगरद्वाराद् बहिर्निश्चक्राम।

पुरपरिसरसुशोभितानुपवनप्रदेशान् प्राप्य मृगयोत्कण्ठितो दुष्यन्तः स्यन्दनस्य जवं तीव्रं विधातुं सारथिमादिदेश। रैवतकः सेनापतिरश्वारोहिणोऽङ्गरक्षकसैनिकाः कौलेयकाकर्षिणो वनग्राहिणो व्याधाश्चापि त्वरितगतिमास्थाय सम्राजमन्वसरन्। वियन्मध्यसमारूढे च भगवति सवितरि ग्रीष्मर्तुसुलभपुष्पफलालकृतान् पादपान् गोधूमादिसस्यच्छेदनरिक्तभूभागानि क्षेत्राणि विलोकयन् सम्राड् दुष्यन्तः स्वकीयया सेनया सह गङ्गामुत्तीर्य हिमगिरेरुपत्यकाः समाससाद।

(२)

भूधराधिराजस्य हिमालयस्योपत्यका असङ्ख्यसङ्ख्यैर्वन्यजन्तुभिः सम्भृताः सघनवनस्पतिभिररण्यैः समाच्छादिता आसन्। वनानाम्प्राकृतिकशोभाऽत्यद्भुता मनोमोहिनी चावर्तत। न तस्या उपमानं जगति क्वचिदप्यवलोक्यते। सघनानाम्पादपानां छाया शीतला सुखदायिनी च बभूव। सूर्यस्य रश्मयो निविडतरुनिकरपत्रच्छिद्रमध्येभ्यः क्षरन्तो वनभुवन्तु मन्दप्रकाशेनालोकयन्, परन्तेषां सन्तापस्तरुपत्रैरेवारुध्यत। सघनैः कण्टकस्तम्बैः लघ्वाकारैः क्षुपैरतितुङ्गशिखराणि यावल्लताजालनिबद्धैर्निविडनिविष्टैः पादपैः धरायाञ्च सान्द्रविस्तीर्णाभिर्वल्लरीभिश्च वनमध्यगतानाम्मार्गाणां चरणवीथीनाञ्च चिह्नानामपि विलोपनं तथा विहितं यथा तन्मध्ये यात्राऽपि सुदुष्करा बभूव।

अरण्यमध्ये कथमपि लब्धमार्गेण प्रचण्डघर्घरध्वनिना वनप्रान्तराणि प्रतिध्वनयता दुष्यन्तस्य रथेन धरापृष्ठभागे विस्तीर्णाः क्षुपाः वल्लरीश्च सम्मर्दयितुं समारब्धाः। वनस्पतिसम्मर्दनसम्पीडिताऽपि वनदेवता स्वकीयं धर्मं न तत्याज। सम्राट् तस्या अतिथिरेवासीत्। वनसुलभसाधनैः सा तदाऽऽतिथ्यक्रियां सम्पादयामास। पादपसुदृढस्कन्धविटपालिङ्गनकारिण्यो लतास्तस्योपरि मृदुलकिसलयानि सुरभिचयप्रसरसुमनांसि चावाकिरन्। सघनेष्वनातपेषु विश्राम्यन्तोऽलसभावसमन्विताः पतत्रिणः सुमृदुकलरवैः

सम्राजो यशोगीतिं जगुः। कीचकरन्ध्रलब्धमार्गो मृदुसमीरणो वंशीवादनकार्यं निर्वर्तयामास। वनस्य नैसर्गिकं सौन्दर्यं दुष्यन्तस्य हृदयमभिभावयामास। तस्मिन् समये शाकवृक्षस्यैकस्यातितुङ्गशिखरसमारूढेन शिखिनैकेन दुष्यन्तरथघर्घरध्वनिः जीमूतगर्जनध्वनिरिति सम्भावितः। तीक्ष्णञ्च केकाध्वनिमुच्चार्य स नर्तनाय सप्तरङ्गवर्तुलचन्द्रिकाङ्कितान् शिखण्डकान् प्रासारयत्। मृगयाव्यसन्यपि स सम्राड् मृगानुसरणस्य विस्मृत्य वनसौन्दर्यावलोकने निमग्नमनाः सम्बभूव।

त्वरितगत्या दुष्यन्तमनुधावन्तस्तस्यांगरक्षकसैनिकास्तत्क्षणमेव सकलामेवारण्यानीमाक्रान्तामकुर्वन्। वन्यप्राणिनामन्वेषणपरास्ते तेषां वधव्यापारं प्रारेभिरे। जालग्रहिणो व्याधाः स्वमृगयाकुक्कुरान् वनमध्ये सम्प्रेष्य तेषां साहाय्येन क्षुद्रानसहायान् जन्तून् पाशेषु निबबन्धुः। साऽरण्यानी बहुविधैः श्वापदैर्मृगैश्चाध्याक्रान्ताऽवर्तत। सारङ्गाः, मृगाः, रुरवश्चित्रकाः, लोमशाः, शशाः, वृकाः, शृगालाः, व्याघ्रास्तिन्दुकाः, सिंहाः, गजाः, शूकराः, महिषा इत्यादयो बहुविधाः जन्तवस्तत्र व्यचरन्।

दुष्यन्तस्य वनमध्यप्रवेशसमये मध्याह्नकालिको भास्करः प्रखररश्मिभिः सकलमेव भुवनं सन्तापयति स्म। केचन पशवो यूथेषु स्थितास्तरूणां शैत्यदायिन्यां छायायां निश्चिन्तभावेन रोमन्थायमाणास्तन्द्रासमावृतमनःकाया अतिष्ठन्। अपरे वन्यतडागेषु जलविहारानन्दमग्नमनसोऽवर्तन्त। अन्ये च स्वपरिवारमध्ये वर्तमानाः प्रियाप्रणयनिर्भररसास्वादनहर्षितमानसाः शिशुभिः सह किलोलान्यकुर्वन्। सिंहव्याघ्रादयस्तु श्वापदाः रात्रिविचरणपरिश्रान्ताः गहनतमसावृतनिवासगुहागह्वरेषु निद्रावशंगताः प्रणयिनीभिराश्लेषेषु निबद्धाः व्यपगतबाह्यवनोपद्रवावगमा अस्वपन्।

सैन्यानां कोलाहलैर्वनग्राहिणाञ्चाखेटकानामुपद्रवैः कौलेयकानां च बुक्कोत्क्रोशैः निस्तब्धमध्याह्नप्रखरसूर्यतापसन्तापितं वनं हलचलोपद्रवाक्रान्तं विहितम्। आखेटकैरनुधावद्भिः कौलेयकैर्गृह्यमाणैः सैनिकैश्च व्यापाद्यमानैर्मृगैः क्वचिदपि शरणं वा त्राणं वाऽलभमानैरितस्ततो निर्लक्ष्यमेव पलायितुं प्रवृत्तम्। केचन वृक्षानेवारोढुं प्रावर्तन्त। केचन तीक्ष्णकण्टकस्तम्बेषु प्रविष्टाः। केचन कर्दमपरिवेष्टितजलाशयेषु सङ्गताः। केचन भूमिविवराण्यालोक्यात्मानं संकोच्यान्तर्गताः। केचन कमप्याश्रयं शरणं

वाऽलभमानाः चक्षूंषि मीलयित्वा तिरोहिता एव वयमिति मन्यमानाः भूमावुपविष्टाः। परं कथमपि तेषां प्राणरक्षा न समवालोक्यत। हरिणशूकरमहिषादीनामार्तनादान् निशम्य व्यपगतनिद्राणां गुहागह्वरेषु शयानानां सिंहानां व्याघ्राणाञ्च मनःसु कौतूहलेन पदं निहितम्।

"क इमे कुतः समायाता उपद्रवकारिणोऽस्माकं राज्ये" एतदेव निरीक्षणाय यस्मिन्नेव क्षणे ते गुहागह्वरेभ्यो बहिरायान्ति तस्मिन्नेव क्षणे वनमध्यमालोडयद्भिः सैनिकैरवलोकिताः वनाधिपत्येन सहैव प्राणेभ्योऽपि वञ्चिताः विधीयन्ते।

एतस्मात् सकलादपि वनोपद्रवोपजनितकोलाहलान्निरपेक्ष इवापरिचित इव दुष्यन्तोऽतुलनीयप्राकृतिकसौन्दर्यरसपान एकाग्रमनास्तत्रैवावहितचित्तो बभूव। निसर्गरमणीयता तस्य हृदयमावर्जयामास। परन्तु सहसैव स सोत्कम्पो विस्मितश्च बभूव। स्यन्दनसंयोजिताः सैन्धवाः पलायनतत्पराः समजायन्त। रश्मिसंयमनेन सारथिस्तेषां नियमनाय प्रयासमकरोत्। दुष्यन्तस्तु सम्मुखमवालोकयत्-

"गहनश्यामवर्णो भीमकाय महिष एको रथस्याग्रे सन्निकृष्टान्तरालवर्तिन्यां धरण्यां निश्चलोन्नतस्थितो दीर्घं सकष्टञ्च श्वसिति। सुतीक्ष्णवक्रशृंगयोर्मध्ये तस्य रक्तवर्णे लोचने ज्वलिताङ्गारप्रतिमे दीप्यमान आस्ताम्"। आक्रमणतत्परं तमतिभीषणं महिषमवलोक्यापि भयरहितमानसो दुष्यन्तोऽविलम्बमेव तूणीरादतितीक्ष्णमर्धचन्द्राकाराग्रं शिलीमुखमाकृष्य शरासने सन्धाय महिषं लक्ष्यीकृत्य चिक्षेप। महिषस्य सुपुष्टमांसले स्थूलकृष्णचर्मावृते स्कन्धे गभीरं प्रविश्य स शिलीमुख उत्तानो भूत्वा संलग्नः। परन्तु महिषस्यैकस्य विशालवपुषो झर्झरितवेपनेन स भूम्यां निपतितः।

शरसम्पतनसमकालमेव कज्जलपर्वतगुहामध्यादापतद्गैरिकजलधाराभ्रान्तिमुत्पादयन्ती रुधिरधारा प्रस्रवितुमारेभे। पीडयातिमहत्या संपीडितश्चीत्कुर्वन् महिषो भयभीतः सन् सघनं वनं प्रविश्यैकस्यां दिशि पलायाञ्चक्रे। दुष्यन्तोऽपि रथेन तमन्वधावत्। परन्त्वरण्यस्य सघनानोकहेषु कण्टकस्तम्बेषु स तथा नयनागोचरतां गतो यथा स सम्राट् तस्य चिह्नमपि लब्धुं न शशाक।

सारथिना तु कासारगमनपथमनुमीय सघनक्षुपवल्लरीसंस्तृतेऽपि तीव्रगत्या रथस्य सैन्धवाः प्रचोदिताः। दुष्यन्तोऽपि स्वसैन्यात् पृथग्भूतो नातिदूरं निर्गतः। अस्मिन् समये रविरपि व्योममध्यमतिक्रम्य यात्रापरिश्रान्तो विश्रमाभिलाषी पश्चिमोन्मुखः संलक्ष्यमाणोऽपि तथैव सन्तापं वितनोति स्म, लोकञ्च सन्तापयति स्म। श्रमेण, सन्तापेन जलतर्षेण चातितरां विह्वलः सम्राड् जलस्यान्वेषणायेतस्ततो बभ्राम।

महिषोऽपि स आखेटकदृष्टिपथादगोचरीभूतो न जाने कस्यां दिशि प्रभ्रष्टः। बहुकालपर्यन्तमनिश्चयरूपेणापि परिभ्रमतो ललाटस्रवच्छ्रम-सलिलबिन्दून् करांगुलिभिरपसारयतः सूतस्य दृष्टिरुपरि नभसि सहसोद्गता। केचन जलचरखगाः हंस-सारस-क्रौञ्च-बकादयो निकटमेव पूर्वस्यां दिशि मन्दमन्दमुड्डीयन्ते स्म। निश्चयेन तत्र सलिलं लप्स्यत इत्यनुमीय स रथाश्वान् तस्यामेव दिशि प्रचोदयामास। क्रोशैकपरिमिते मार्गे व्यतिक्रान्ते निर्मलसलिलपूर्णा धारिका दृष्टिपथमुपागता।

उभयतोऽपि सुदूरं यावद् विस्तृतसैकतमध्ये प्रवहन्तीयं तन्वी सलिल-धारा सूर्यस्य प्रखरसन्तापालोके रजतस्यातिविशालप्रस्तरावरणे प्रवहन्ती नीलमणिचयपङ्क्तिरिव समवालोक्यत। तस्मिन्नेव काले शीतलसलिल-कणापहारी विकचारविन्दसौरभवाही प्रसरन् समीरणो दुष्यन्तमतिथिरूपेण समागतं सभाजयामास। पवनस्य स्पर्शमात्रेणैव तस्य सकलाऽपि परिश्रान्तिः क्लान्तिर्वा सुदूरं गता। सूतोऽपि रथं जलसमीपमानीय धारायाः सन्निकट-मेवावरोधयाञ्चक्रे। परिश्रान्ता अश्वाः स्वल्पेतरैः संघुटकैर्जलं पातुमारेभिरे। सारथिना सह दुष्यन्तोऽपि रथादवतीर्य धारायास्तटमुपगम्याञ्जलिम्प्रसार्य सलिलपाने तत्परो बभूव।

सलिलपानसन्तृप्ततर्षेण दुष्यन्तेन परितो दृष्टिं व्यापारयता धारासन्निकटमेव विशालाकारा काचिच्छिला विलोकिता। तत्र स्थित्वा किञ्चित् प्रशान्तचेताः सम्राट् निसर्गरामणीयकावलोकनप्रियः परितो विस्तीर्णस्य वनप्रान्तदृश्यस्य निरीक्षणे निमग्नमानसो बभूव। व्यतीतेषु च कतिपयेष्वेव क्षणेषु सहसा तस्य दृष्टिर्जलधाराप्रवाहनिम्नप्रदेशे निपतिता। किञ्चिद् विप्रकृष्टान्तराले चित्रकवर्णो दीर्घबहुलशृङ्गो लम्बपादः मारङ्ग एकोऽत्युन्नतप्रांशुदेहो धारायास्तटवर्तिनि समतलपृष्ठे प्रस्तरे उत्तानास्थितो

मुखे घासपत्राणि चर्वन् मदमनोहारिण्या दृष्ट्या परितो व्यलोकयत्। मृगयायै राजधान्याः सम्प्रस्थितेन तेन चक्रवर्तिना एतावत्कालपर्यन्तं न कोऽपि मृगयापशुः समासादितः। सुपुष्टं रमणीयं प्रांशुवपुषं चित्रवर्णकायं सारङ्गं समवलोक्य तस्य मानसं तस्मिन् सनिर्बन्धं बभूव। तत्क्षणमेव तेन सारथिरादिष्टः।

"त्वरितमेव रथसंयोजितानश्वान् तस्यां दिशि चोदय"।

रथमधिष्ठिते सत्येव दुष्यन्ते सारथिरपि स्वासने निषद्य प्रग्रहसंयमनेनाश्वान् चोदयामास। सलिलपानविगतश्रमा अश्वा अपि त्वरितगत्या सारङ्गमुद्दिश्याऽधावन्। रथचक्रध्वनिभिर्दिशाम्प्रान्तराणि समाच्छन्नानि प्रतिध्वानितानि च। मृगयाव्यसनिनं तं स्वं प्रति समायान्तमवलोक्यातिशयेन सावधानः स सारङ्ग उच्चैः कूर्दमानस्तत्क्षणमेव धावितुं प्रवृत्तः। व्यावृत-मुखात्तस्यार्धावलीढानि घासपत्रशकलानि बहिरागत्य सैकतप्रदेशेऽवकीर्णानि। पुनः पुनः मुखं व्यावृत्यानुपतति स्यन्दने दृष्टिं व्यापारयन्नसावत्युच्चैः कूर्द-मानस्तीव्रगत्याऽधावत्। एवञ्च तमनुपततो दुष्यन्तस्य रथोऽतिदूरन्निर्गतः। प्रचण्डजवरथेनानुधावन्नपि स नरपतिस्तं सारङ्गं कृच्छ्रेणैव द्रष्टुं शशाक।

धारातटवर्तिभूमिभागस्य सैकतप्रायत्वाद् रथस्य रयो न तथा सुतीव्रः। रथाश्वा अपि रश्मिसंयमनेन मन्दीकृतवेगाः। परन्तु सैकतप्रदेशमुल्लङ्घ्य समागतायां कठिनसमभूम्या सारथिनाऽभीषवो निर्मुक्ताः। तदानीं सारङ्गजवमसहमाना इव हयाः केसरकेशानुन्नतान् विधाय कर्णौ च निभृतोर्ध्वौ कृत्वाऽतित्वरितगत्याऽधावन्। रजोभिरप्यलङ्घनीयेन तेषां वेगेन पवनोऽपि पराजीयते। परन्तु केषुचिदपि क्षणेषु विप्रकृष्टान्तराले व्यपगते रथः सारङ्गमतिनिकटत्वेन सम्प्राप्नोत्। दुष्यन्तोऽपि तस्य वधाय धनुषि शरमारोप्याकर्णान्तं तज्ज्यामाकृष्टवान्।

कार्मुकादविनिर्मुक्त एव शरे सारथिः प्रग्रहानाकृष्य वाजिनः संयमितवान्। सत्वरं प्रधावतामश्वानां पादाः क्षणं यावद् वियत्येवोन्नतस्थिता अवर्तन्त। काचिन्महत्यनर्थघटना न सम्भवेदिति सूतः सम्राजो हस्तं नमयामास, अकथयच्च-

"राजन्! बाणपातवर्तिनस्ते रथस्य सारङ्गस्य चान्तरालवर्तिन्या भूमौ द्वौ तपस्विनौ तिष्ठतः"।

स्यन्दनसमक्षं तपस्विनाववलोक्य क्षणं निस्तब्धो जडीभूतो दुष्यन्तः सचेतनो भूत्वा कार्मुकाच्छरं पृथक्कृत्य शिरोऽवनमय्याञ्जलिं बद्ध्वा प्रणनाम। तपस्विनावपि कानिचित् पदान्युपसृत्य दक्षिणौ हस्तावुद्यम्योचतुः-

"राजन् ! आश्रममृगोऽयम्। भवता वधयोग्यो न। मृदुवपुषि निरपराधेऽस्मिन् मृगे शरो न सन्निपात्यः। भवतः शस्त्रं त्वार्ततायिनां विनाशाय प्रजानाञ्च रक्षणाय वर्तते। एनं मृगं प्रति भवता दयालुना भवितव्यम्। अतः सायकं प्रतिसंहरत्वेव भवान्"।

लज्जाविगलितचेताः दुष्यन्तोऽञ्जलिनिबद्ध एव रथादवतीर्य तपस्विनोश्चरणेष्ववननाम। तपस्विनावप्याशीर्वादैरनुगृह्य जगदतुः-

"राजन् ! इदं खलु सन्निकटमेवानुमालिनीतीरं महर्षेः कुलपतेराश्रमपदं गुरुकुलं वर्तते। आवां तु कण्वशिष्यौ समिदाहरणाय वनमागतौ। निमन्त्र्यतेऽत्र भवानाश्रमे। न चेदन्यकार्यातिपात आश्रममागत्य प्रतिगृह्यतामतिथिसत्कारः। प्रतिहतविघ्नानां तपस्विनामध्यापकानामध्येतॄणाञ्च क्रियाः समवलोक्य स्वभुजयोः पराक्रमप्रभावं भवान् ज्ञास्यति। अविलम्बमेवावां समिध आहृत्य निवर्तावहे। कुलपतिस्तु कस्यचिद् विशिष्टस्य कार्यस्य हेतोर्बहिर्गतः, परं तस्य दुहिता शकुन्तला आश्रम एव वर्तते। सा भवन्तं सत्करिष्यति।"

तस्मिन् युगे कण्वो महर्षिरति गुरुगुणगणान्वितो महान् शिक्षावित् प्रसिद्ध आचार्योऽवर्तत। स कुलपतिरासीत्। तस्याश्रमपदे गुरुकुले छात्राणां दशसाहस्रं विद्याध्ययनं करोति स्म। तेषां विद्यार्थिनां भरणस्य, पोषणस्य, आवासस्य, शिक्षाया इत्यादीनां सर्वेषामेव प्रबन्धानामुत्तरदायित्वं कुलपतिरेवाऽवहत्। न किञ्चिदपि शुल्कं छात्राः प्रयच्छन्ति स्म। निःशुल्क एव आसीत् सकलः प्रबन्धः। परं यथोचितां शिक्षामधिगम्य समावर्तनसंस्कारसमये आचार्येण निर्दिष्टा यथायोग्यं सामर्थ्यानुसारिणी दक्षिणा छात्रैरुपहर्तव्या। विद्यार्थिनामिदमनुल्लङ्घनीयं सदाचरणं कर्तव्यं धर्मश्चासीत्।

कुलपतेः कण्वस्य गुरुकुले विविधविषयाणां शिक्षणस्य प्रबन्धोऽविद्यत। तत्र वेद-वेदाङ्ग-ब्राह्मणो-पनिषद्-व्याकरण-दर्शन-काव्य-साहित्येतिहास-ज्योतिर्विद्या-कृष्युद्योग-वाणिज्यार्थशास्त्र-राजनीति-दण्डनीति-धनुर्वेद-पशुविज्ञान-वनस्पतिविज्ञान-वास्तुविज्ञान-विविधकला इत्यादयो विषया अध्याप्यन्ते स्म।

महर्षेः कण्वस्य नामश्रवणादेव दुष्यन्तस्य शिरोऽत्यादरेणावनमित्त बभूव। आश्रमपदं गुरुकुलं निरीक्षितुं महर्षये च प्रणामाय तस्य मनः महदुत्कण्ठितं बभूव। प्रस्थितयोश्च तपस्विनोस्ताभ्यां विनिर्दिष्टेन मार्गेण दुष्यन्तस्य स्यन्दनस्त्वरितगत्याऽऽश्रमं प्रति प्रावर्तत।

कतिपयेष्वेव क्षणेषु वनप्रान्तराण्युल्लङ्घ्य मालिन्याः सरितस्तटं दृग्गोचरीभूतम्। प्रशान्तसलिला प्रवहन्तीयं सरिद् द्वयोरेव तटयोः शुभ्रसैकतवसनावृताऽवर्तत। विस्तीर्णसैकतमध्ये शान्तस्निग्धनीलजलधारा नीलमणिप्रभानुकारिणी मालिनीयं सरित् प्रवहति। जलं तच्च नातिगभीरं परमतिनिर्मलं पारदर्शकञ्चासीत्। तस्यास्तलप्रदेशे नीलसलिलगाम्भीर्ये निमग्नाः गुरुलघुवर्तुलाकाराः विविधवर्णाः शोभमानाः ग्रावाणोऽति-मूल्यवन्मणय इव विभूषिता आसन्। दृशमुन्नमय्य दुष्यन्तेनावलोकितम्-

"सरितः परे पारे सघनमाम्रोद्यानं वर्तते। तरवस्तु प्रतनुभिर-परिपक्वफलैराच्छादिता अवलोक्यन्ते। तेषाञ्च मध्यादाश्रमकुटीराणां पङ्क्तयः प्रतिभासन्ते। कतिपयेष्वेव क्षणेषु दुष्यन्तस्य रथो मालिनीतीरं सम्प्राप्तः। नातिगभीरायां धारायां सारथिः स्यन्दनाश्वान् चोदयामास।

सौकर्येणैव वाजिभिः सा सरिदुत्तीर्णा। तस्मिन्नपि समये पश्चिमाभिमुखस्यापि सूर्यस्य सन्तापोऽन्यून एवावर्तत। गहना निस्तब्धता तत्र परितो व्याप्ता। सर्वतो विलोयताऽपि दुष्यन्तेन न कश्चिदपि तादृशो जनोऽवलोकितो यस्मात् स महर्षिविषयकं शकुन्तलाविषयकं वा किञ्चिदप्य-वगन्तुं क्षमेत। दुष्यन्तेनाश्रमान्तःप्रवेशो निश्चितः। स सारथिमब्रवीत्-

" सूत ! महर्षेराश्रमेऽस्माभिरतिविनीतभावेन प्रवेष्टव्यम्। रथमारुह्य तत्र प्रवेशो न मे रोचते। नोचितमिदं प्रतिभाति। त्वमत्रैव तिष्ठ। रथादश्वानुन्मोच्यात्रैव जलं पाययित्वा विश्रमय। महर्षेराश्रममवलोक्य महत्तमानाञ्चाचार्याणाञ्चरणेषु प्रणम्य महर्षेश्च दुहितुरातिथ्यमङ्गीकृत्याऽहं स्वल्पेनैव समयेन परावर्तिष्ये"।

सूतमेवमुक्त्वा राजकीयचिह्नान्यवतार्य रथे च निधाय दुष्यन्तो रथादवातरद् आश्रमाय च प्रस्थितवान्।

सरित्प्रवाहादविप्रकृष्ट एव सैकतप्रदेशमुल्लङ्घ्य भूभागं किञ्चिदुन्नत

बद्ध्वा तपोवनस्य सीमाः निर्धारिताः। तत्र कण्टकस्तम्बानां परिवृतिषु विस्तीर्णानां नवमल्लिकालतानां प्रतानेषु शुभ्रसुरभितलघुकुसुमस्तम्बकानि दूरादेव शोभमानान्यदृश्यन्त। एकस्मिन् पार्श्वे मार्गस्तूद्यानं प्रविशन् समलक्ष्यत। वृतिमुल्लङ्घ्य दुष्यन्तो वाटिकां प्राविशत्। तपोवनवाटिकायाः मनोरमा रमणीया निसर्गशोभा तस्य सम्राजश्चित्तमबध्नात्। रसालजम्बूबिल्वपनसजम्बीरदाडिमकदल्यमृतफलादीनां पादपानामशोक-शोभाञ्जनतिलकचम्पकबकुलादीनां पुष्पसमृद्धिशालिनां तरूणां राजयश्चित्तान्यागन्तुकानामाह्लादनेन वशीकुर्वन्ति स्म। तथापि तत्र रसालवृक्षा एव प्राचुर्येणावर्तन्त।

अपक्वाम्रकाणां सुरभिः परितः प्रासरत्। तेषां सौरभमपहृत्य निभृतं शनैः समागत्य पवनेन दुष्यन्तो निजालिङ्गनपाशे निबद्धः। दुष्यन्तेन निरीक्षितम्-

"पङ्क्तिक्रमनिवेशितानां चूततरूणां ततयः सूदूरं यावद् विस्तृताः। परित आच्छन्ना आशिखरं तरवश्चैते कुसुमिताभिर्लताभिः। तनुसूक्ष्म-विटपशालिन्य आकाशवल्लर्यो मध्ये मध्ये सुपाटलबिम्बफलधारिणीभिर्लताभिः परिवेष्टिताः वृक्षाणां शिखराण्युल्लङ्घ्योपरि तेषामवालोक्यन्त। तरुस्क-न्धानां भूमिभागे वर्तुलाकारा आलवालाः कुल्याभिरानीतैरम्भोभिः परिपूर्णाः। मन्दं मन्दं प्रवहन् पवनः सलिलानीमानि कम्पितानि विधाय तन्वीभिर्लहरीभिः सुशोभयति। उभयतश्च तोयाधारपथास्तपस्विजनचरणचिह्नाङ्किताः वर्तन्ते। स्थाने स्थाने भूमौ निपतितेष्वपक्वचूतफलेषु लताभिः पुष्पाण्यवकीर्णानि। यदा कदा अनोकहशिखरेष्वासीनानां चूतमञ्जरीणामास्वादनेन सञ्जातमदानां कोकिलानां मधुरः कुहूरवो वियतोऽपि विस्तरमुल्लङ्घ्य श्रोत्रविवराणि पीयूषद्रवेणेवाऽऽप्याययति"।

तपोवनवाटिकायाः परे पारे तरूणामन्तरालाद् दुष्यन्तेन कुटीराणां पङ्क्तिरेकाऽप्यवलोकिता। निश्चयेनैषैव गुरुकुलजननिवासभूमिः। तत्र विद्यमानेभ्यो विद्यार्थिभ्य आचार्याणां विषये किञ्चिदपि ज्ञातुं शक्यते।

एवं विचार्य दुष्यन्तः प्रवहन्निर्मलसलिलसुशोभितकुल्याधारपथमवलम्ब्य कुटीरपंक्तिं प्रति प्रचलितः। सहसैव शीतलसमीरणस्यैकस्तनुपवनवेगः समा-गतः। लताभ्यः कानिचित् पुष्पाण्यवकीर्णानि। तानि दुष्यन्तं समावृतञ्चक्रुः।

चूततरुभ्यः कानिचिदपक्वफलानि भूमौ पतितानि। पिकानां मधुरकुहूध्वनयः सर्वतो दिक्षु प्रासरन्। दुष्यन्तस्य दक्षिणभुजेन किञ्चित् प्रस्फुरितम्।


शुभैः शकुनैः किञ्चित् प्रमुदितमनसि दुष्यन्ते किञ्चिदिवाग्रयायिनि, दक्षिणतो लघुकुञ्जमेकं धवलपुष्पखचितनवमल्लिकालताजालसमाकीर्णानां नातिदीर्घतरूणां दृष्टिपथं समागतम्। कौतूहलसमाक्रान्तहृदयस्य तस्य निपतिता तस्यां दिशि दृष्टिः। युवतीनां परिहासध्वनयश्च श्रुतिगोचरीभूताः। समावर्जितहृदयस्य तस्य दुष्यन्तस्य विवशीभूतस्य चरणौ कयाचिदप्यदृश्यशक्त्या बलादिव तत्र नीतौ। कुञ्जं निकषा गत्वा वृक्षाणां व्यवधानादवलोकितन्तेन-

पुष्पोद्यानस्यैकस्य मध्ये मनोहरं शाकतरुपत्राच्छादितं छदिःपटलं नातिलघु नातिविशालं कुटीरम्। कुटीरप्राङ्गणस्य मध्ये विशाल एकः सप्तपर्णपादपो नवोद्गतरक्तवर्णकिसलयैः नातिचिरसमयप्रस्फुटित-हरिद्वर्णपत्रचयैश्चिरसमयजातपीतवर्णपत्रपटलैश्च सघनाच्छन्नः सुशोभते। मूलदेशे स्कन्धं परितः परिपक्वरक्तवर्णेष्टिकानिचिता वेदिका। वेदिकाया एकतस्तु शुभ्रवर्णचित्तिकानिचिता कपिला धेनुर्विशालसप्तपर्णतरुच्छायायां रोमन्थायते। तन्निकटमेव मृगशावक एकः कदाचित् कूर्दते, कदाचिद् धावति कदाचिच्च धेनुमुपगम्य निभृतं तिष्ठति।

वेद्यां कौमारात्परेण वयसाऽऽलिङ्गिताः जनमनोमोहनलावण्य-सारविरचिता इव, सौन्दर्येणाप्सरसोऽप्यतिशयानास्तिस्रस्तपस्विकन्यकास्तिष्ठन्ति। वयोऽवस्थानुरूपाः लघ्वाकारास्ताम्रकलशास्ताभिः निजमनोहरसुमृदुदीर्घ-गौरवर्णभुजैर्ग्रीवासु परिवेष्टिताः। परिहासशीलाः स्मितसुशोभितरदच्छदवदनाः कुन्दकलिकावदातदन्तशोभमानास्ताः परिहासविस्रम्भवार्तासु निमग्नचित्ता अवर्तन्त।

(३)

समानवयोरूपरमणीयानां तासां कन्यकानां कर्णामृतमधुरध्वनि-भिरनुपमरूपलावण्यैश्च दुष्यन्तस्य हृदयं बलादिव समाकृष्टम्। मनसि चाऽनिर्वचनीय आवेगः सञ्चचार। परितो द्युलोकसमागतसङ्गीतरवगुञ्जनमिव समावृतम्। सौरभशालिनां नवविकसितकुसुमानां वृष्टिरिव ववर्ष। सम्प्रतीयते स्म, तापसरूपधारिण्योऽप्सरस एव नाकपृष्ठाद् धरायामवतीर्णाः। दुष्यन्तस्य



SAKUNTALA PATHRALEKHAN
(Courtesy: Maharaja Fatesingh Museum Trust, Laxmi Vilas Palace, Baroda)

मन एकाग्रीभूतम्, वपुर्निष्कम्पं सञ्जातं, चरणौ च तत्रैव जडीभूतौ। कदाचिन्मामवलोक्यैतास्तपस्विकन्यका उद्विग्ना: भयभीता वा भवेयुरिति विचार्य दुष्यन्तस्तत्रैव लतासमाक्रान्तलघुपादपान्तरितो भूत्वा तासां सौन्दर्यरसास्वादने निमग्नमना: बभूव। तिस्रोऽपि कन्यकास्ता: यद्यपि सामान्येन समवयोरूपरमणीया: प्रतीयन्ते स्म, तथापि तासां मध्ये स्थिता बाला तन्वी, त्रिभुवनललामभूता, नवयौवनेन रूपेण सौन्दर्येण कान्त्या, रमणीयत्वेन, मनोरमत्वेन च सर्वातिशायिनी चित्ताकर्षिका चाऽऽसीत्। शीतरश्मिकरैरिव विरचितायास्तस्या अङ्गेषु लावण्यस्य न काऽपीयत्ता। परिपूर्णशशिनमपि लज्जितं कुर्वाणौ रक्ताभमिश्रितस्वर्णिमकपोलौ, तामरसपटलसुमृदुचञ्चत्स्फुरमाणावोष्ठौ, इन्दीवरातिशयनसमर्थे कान्तिपरिपूर्णे आकर्षके विशाले नयने, नयनयोरुपरिदेशे तनुश्यामवर्णे कोदण्डाकारे भ्रूलते, वर्तुला सत्यपि तीक्ष्णा दीर्घा नासिका, शशिकलानिभञ्चायतं ललाटम्। जटाग्रन्थिबद्धालकपङ्क्तिमध्यादपि दीर्घैका लटा गौरशुभ्रललाटे निर्बन्धं स्फुरन्ती कुदृष्टिनिवारणसाधनभूता कृष्णकज्जलरेखेव सुशोभते स्म। एवंविधमुज्ज्वलं कान्तिमन्मुखन्न कदापि पूर्वं दुष्यन्तस्य दृग्गोचरीभूतम्। तस्या: कामिन्या: कमनीया देहयष्टि: नवविकसितसुरभितयौवन-रूपपुष्पराशिविभूषितपारिजाततरुविटपलतेवाऽवर्तत।

तिस्रोऽपि कन्यकास्तपोवनानुरूपसुलभवल्कलवसनैरशोभन्त। तथाऽपि मध्यस्थिताया: कन्याया: लावण्यं किञ्चिदन्यदेवाऽवर्णनीयम्प्रतिभाति स्म। ध्रुवं तु तत्र शिवं भर्तृरूपेण वरणाय समुद्यता तपोनिरता वल्कलवसनधारिणी पार्वती उमा समुपतस्थौ। कटितटस्योपरि वक्ष:स्थलोभयपार्श्वयो: सुशोभनौ पयोधरौ वल्कलोत्तरीयेण सन्धार्य, ग्रन्थिसूत्रं कट्यामेव संवेष्ट्य सा पृष्ठभागे ग्रथितवती। उत्तरीयमप्येकत: कृत्वा प्रान्तभागेभ्य: प्रकाशमानौ पुष्पस्तबकसमानौ तौ पयोधरौ समुन्नतौ घोषयत: स्म-

"विफल एवायं प्रयास उच्छृङ्खलयौवनप्रतिबन्धनस्य"। कटिप्रदेशादारभ्य जघनयुगलमप्यावृण्वन् वल्कलनिष्पन्नमधोवस्त्रं जानुभ्यामप्यधो लम्बते स्म। केचन तन्तवश्च तस्य ततोऽप्यधिकं निम्नप्रदेशे प्रविश्य समुत्तप्तकनकवर्णाभे पिचिण्डिके चुम्बन्ते स्म। तन्तूनां चान्तरालवर्तिभ्यश्छिद्रेभ्य: सुपुष्टे ते पिचिण्डिके ज्वालाजालनिभे क्षणे क्षणे दीप्यमानेऽवालक्ष्येताम्। तापसकन्यका

सा निजकनकाभकृष्णकुन्तलान् जटाग्रन्थौ बद्ध्वा शिरसः पृष्ठभागे सन्निधाय ग्रन्थिञ्च परितः धवलपाण्डुवर्णानि कुन्दकुसुमदामानि परिवेशयामास।

दक्षिणस्था तापसकन्या मध्यस्थकन्यायाः कटिप्रदेशे कफोण्या लघुमन्दप्रहारमेकं कृत्वा तामुवाच-

"शकुन्तले ! आयाहि आयाहि, उत्तिष्ठ। समयो व्यत्येति। विलम्बो भवति। वियति भास्करोऽस्ताचलोन्मुखः संलक्ष्यते। तपर्तुतीक्ष्णसन्तापसन्तप्ताः पिपासाकुला एते पादपाः क्षुपाः लताश्च स्वपेलवविटपान्नान्दोलयन्तोऽस्माना-ह्वयन्त इव संलक्ष्यन्ते"।

अहो, इयमेव महर्षेः कुलपतेः कण्वस्य दुहिता शकुन्तला? दुष्यन्तस्य सकलमेव वपुरावेगेन कम्पमानमपि जडीभूतम्। तां तपस्विनीं बालामेकाग्रदृशा विलोकयन्नसौ नेत्राभ्यां पातुमुत्कण्ठित इव बभूव।

शकुन्तलाभिधाना सा तपस्विनी बाला भुजवल्लरीसमावेष्टितं कलशं कट्यां सन्धार्य सहसैव समुत्थिता। तया सार्धमेव ते सख्यौ समुदतिष्ठेताम्। तस्याः दक्षिणस्था कन्या प्रियंवदाऽऽसीत्, वामस्था चाऽनसूया। दक्षिणया दृशा प्रियंवदां वामयाचाऽनुसूयां समकालमेव विलोक्य शकुन्तला प्रोवाच-

शकुन्तला- "हला ! प्रियंवदे ! पश्य पश्य बकुलतरुरयं निजपल्लवाङ्गुलीनान्दोलमान्दोलमाकारयतीव माम्। उपसर्पामि तावत्। प्रथमं त्वेनमेव सलिलं पाययित्वा कृतार्थयामि"।

प्रियंवदा-"हला ! शकुन्तले ! त्वरितमुपसर्प। अहो, कतिपयक्षणं यावत् तिष्ठ। त्वमेनं पादपस्कन्धमवलम्बस्व"।

शकुन्तला- (नयने तिर्यग्विधाय)"किमर्थं तिष्ठेयम् ?"

प्रियंवदा- "यतः, प्रतिभातीदं यत् प्रियतमतरुणालिङ्ग्यमाना प्रेयसी वल्लर्येव काचित् तदाश्रयेण स्थिता"।

शकुन्तला- "अत एव त्वं पित्रा प्रियंवदेति नाम्ना विभूषिता"।

इत्थं तिस्र एव सख्यः परस्परं वार्तासु निमग्नाः स्मितसुशोभितरदच्छदाः मधुरं हसन्त्यः कुन्दकुसुमधवलदशनपङ्क्तिभिः प्रकाशमानास्तपोवनो-पवनपादपानामेकैकशः सेचने तत्पराः समजायन्त। यमेव वनस्पतिं ता

उपसर्पन्ति, स एव तासां स्वागतं करोति, तासाञ्च पयोधरतुल्येभ्यः कलशेभ्यो निर्गतानां पयसामास्वादनेन संतृप्तः प्रफुल्लश्च भूत्वा स विरहदुःखौदासीन्यं प्रकटयति।

सहसैवानसूयायाः दृष्टिर्दक्षिणस्थं रसालतरुमालिङ्गयमानायां लतायां मल्लिकायां निपतिता। तां सङ्केत्य सा विहस्य शकुन्तलां किञ्चिदूचे। तदनन्तरं तासां तिसृणामपि पुनरिमाः परिहासवार्ताः समभूवन्-

अनसूया- "प्रियसखि! पश्य पश्य। त्वं त्वस्या वनज्योत्स्नाऽभिधानायाः मल्लिकावल्लर्याः विस्मरस्येव। त्वयेयं सयत्नस्नेहं परिपालिता। पयः पाययित्वा परिषिच्य त्वयेयं नवयौवनं प्रापिता।

शकुन्तला-"सखि अनसूये! इयं वल्लरी तु मम सुतैव वर्तते। यद्यस्याः विस्मरिष्यापि, तदात्मनोऽपि विस्मरिष्यामि। (स्थिरीभूय) अनसूये! तपर्तुसन्तप्तापीयं लता नवोद्भिन्नकलिकाचयेन नवविकसितकुसुमराशिभिश्चास्माकं चेतांसि मोहयतीव। रसालतरुणालिङ्गने निबद्धेयं स्वयमपि भुवनस्य विस्मृत्य प्रमुग्धा। सुशोभमानाभिरतिपाण्डुवर्णकलिकाभिः सितसुमनोभि-र्लोहितकिसलयैश्चूतपल्लवानपक्वप्रतनुफलानि च परितस्तथा-ऽऽवृणोति, यथा काचित्प्रेयसी नवसङ्गममदप्रहर्षनिर्भरा स्वप्रेयांसं मनोरमेण नवयौवनेनाऽऽच्छादयति। अनया तु लतया रसालतरुरयं पतिरूपेण वृत एव। धवलनिर्मलसुरभितपुष्पस्तबकैः प्रियतमतरुस्क-न्धविटपसंस्पर्शमवाप्य तदालिङ्गननिबन्धनपरमसुखमनयाऽनु-भूयते"।

प्रियंवदा-"हला अनसूये! जानासि किं त्वं यदियं शकुन्तला वनज्योत्स्नामिमां चूततरुञ्च किमर्थमतिशयौत्सुक्येन निरीक्षते"?

अनसूया-"नैव। नाहमिदं रहस्यं जानामि"।

प्रियंवदा-"एतद् युगलमवलोक्य विचारयति, यथेयं वनज्योत्स्ना निजानुरूपेण प्रियेण संगता, तथाऽहमप्यनुरूपं प्रियं वरं लभेय"।

शकुन्तला-(प्रियंवदां तिर्यग्विलोक्य) एष तु तवात्मगतो मनोरथः"।

अवनतया शकुन्तलया सा वनज्योत्स्ना सेचितुमारब्धा। सहसैव तस्याः

कर एकस्मिन् कुसुमस्तबक आपतितः। कुसुमान्तराले निलीनो मधुकर एकः कुसुमरसपाननिमग्न आसीत्। शकुन्तलाकराघातमुपलभ्य शीतलसलिल-स्पर्शजनितक्षोभेन च प्रकुपितः स मधुकरो बहिरागत्य तस्याः वदनमभिवर्तितुं प्रवृत्तः। कदाचित् स तस्याः विलोचने अभिवर्तते, कदाचित् कर्णयोर्गुञ्जनं करोति कदाचिच्चाधरदशनप्रयासं विदधाति"।

मधुकरस्यानेनोपद्रवेण शकुन्तलाऽतिशयेन व्याकुलतां गता। कलश-मेकतो निपात्य सा वेगेन हस्तौ पादौ च व्याधुनोति स्म। कदाचिदितोऽधावत्, कदाचिच्चामुतश्चञ्चलपदानि न्यदधात्। परं यस्यामेव दिशि सा प्रासरत्, तस्यामेव दुष्टो मधुकरस्तामनुसरन् तमेव देशं समागच्छत्। व्याकुलीभूता सा सख्यावाकारयामास-

"अनसूये ! प्रियंवदे ! ओ मे सख्यौ ! पश्यतं पश्यतम्। दशत्येव मामयं दुष्टो मधुकरः। सततं पीडयन् मां न कथमपि परित्यजति। रक्षतं रक्षतं मामस्मादतिदुष्टमधुकरात्"।

दृश्यमिदं विलोकयन्त्यौ प्रियंवदाऽनसूये अपि विनोदनिर्भरे बभूवतुः। परिहसन्ती प्रियंवदा स्मितविभूषितेन वदनेन तामुवाच-

"तव रक्षणे आवां के ? प्रजानां रक्षणं तु राज्ञामेव कर्तव्यम्। स एवाततायिभ्यः साधुजनान् रक्षति। दुष्यन्त एवास्य देशस्य राजा। स एव ते परित्राणे समर्थः। तमेव त्वमाक्रन्द"।

लताच्छन्नकण्टकस्तम्बमध्ये निलीनो दुष्यन्तः सकलमेवैतद् दृश्यमवलोकयन्नासीत्। शकुन्तलायाः रूपेण सौन्दर्येण कान्त्या यौवनेन च समावर्जितहृदयस्य तस्याप्यवर्णनीया दशा समापद्यत। तस्याश्चेष्टाभिस्ताभिः स ततोऽप्यधिकं विह्वलो विमोहितश्च सञ्जातः। कथमपि तापसकन्यकानां सान्निध्यावसरो भवेदित्यसौ विचारयति स्म। अवसरस्तु समुपस्थित एव। कण्टकस्तम्बमध्याद् बहिरागत्याग्रेसरो भूत्वोच्चस्वरेण तेन कथितम्-

"अयि तपस्विकन्यकाः ! न भेतव्यं न भेतव्यम्। प्रशास्तीमां धरित्रीं सकलां पौरववंशीयः सम्राड् दुष्यन्तः। प्रजाजनपरिपालनव्यग्रे तस्मिन् नरपाले नास्ति कोऽप्येतादृशः सामर्थ्यवान् योऽत्रत्यासु तपस्विजनबालिकास्वविनय-माचरेत्। कोऽयं वर्तते, य एवं धृष्टमाचरति"?

दुष्यन्तमवलोक्य तास्तिस्रोऽपि तापसकन्यकाः विस्मयेन लज्जया कुतूहलेन च समाक्रान्ताः। एतस्मिन्नेव काले स मधुकरः कुत्राप्युड्डीय गतः। त्रपाविगलितविनमितनयना शुकन्तलाऽपि वदनं परावर्त्य शरीरमवनमय्य दक्षिणचरणाङ्गुष्ठेन भूमिं विलेखितुमारेभे। चित्तविक्षेपेण तस्याः हृद्गतिरतितीव्रतां जगाम। तथाप्यौत्सुक्यविवशा सा तिर्यग्दृष्ट्या राजानं निरीक्ष्य मुखं परावृत्य तत्रातिष्ठत्। तदानीमेव परिहासप्रिया प्रियंवदाऽवादीत्-

"आर्य ! इयमस्माकं सखी शकुन्तला महर्षेः कुलपतेः कण्वस्य दुहिता तपोवनोपवनवनस्पतीन् सिञ्चति। वनज्योत्स्नाभिधानां नवमल्लिकां सलिलं पाययन्तीमिमां दुष्ट एको मधुकरस्ततो बहिर्निर्गत्याभिवर्तते। भवानेवास्याः रक्षणे समर्थः"।

कृत्रिमक्रोधक्षोभाकुलमानसा शकुन्तला तिर्यग्दृष्ट्या प्रियंवदां निरैक्षत। परन्तु दुष्टभावेन सा स्मितविभूषितवदनाऽन्यतो मुखं व्यावर्तयामास। तदानीमेव दुष्यन्तमनसूया बभाषे-

"आर्य ! न काऽपीदृशी विशिष्टा परिस्थितिः। आवयोरियं सखी शकुन्तला वनज्योत्स्नामिमां सिञ्चति स्म। पुष्पस्तबके निलीनेनात्र मधुकरेण मकरन्दरसो निपीयते स्म। सलिलपातसमकालमेव स बहिरागत्यैनामभ्यवर्तत। अनेनैव हेतुना सा व्याकुलीभूता। भवन्तमागतं वीक्ष्यासौ दुष्टो मधुकरः कुत्रापि पलायितः"।

शकुन्तलासौन्दर्यविमुग्धचित्तस्य दुष्यन्तस्य हृदयं तत्परवशतामुपागतम्। पौनःपुन्येन तस्य दृष्टिर्विवशेव शकुन्तलायां न्यपतत्। तस्य सम्राजस्तेजस्विन्या प्रभावशालिन्या चाकृत्या तास्तिस्रोऽपि तापसकन्यकास्तस्य प्रभावेण वशीभूताः। परिचयजिज्ञासयाऽनसूयया कथितम्-

"आर्य ! आकृत्या तेजस्वितमः, प्रभावशालितमः, शिष्टतमश्च भवान् कस्यापि राजकुलस्य दीपकः प्रतिभाति। भवतां वाङ्माधुरी हृदयानि नो भयशङ्कारहितानि प्रसादितानि च करोति। तथापि भवन्तमत्रायातं विलोक्य कुतूहलेन नो हृदयेषु पदं निहितम्। यदि च न काऽप्यत्रापत्तिरपनयतु भवान् नः कुतूहलं स्वपरिचयप्रदानेन। कतमो वा राजर्षिवंशो भवताऽलङ्क्रियते? स्वविरहेण कस्य जनपदस्य प्रजाजनाः समुत्कण्ठापात्रतां नीताः?

नागरजनोचितोपयोगिसामग्रीविरहितायामस्यां तपोभूमौ समागमनस्य को हेतुः”?

दुष्यन्तस्य हृदयगतिस्तीव्रा तीव्रतरा तीव्रतमा च सञ्जाता। तेन विचारितम्- “कदाचिदिमास्तापसयुवतयो व्याकुला उद्विग्नाः सम्भ्रान्ताः वा भवेयुर्यथार्थपरिचयमधिगम्येति। अतः स्वकीयं परिचयं प्रकटयितुमनभिलषता तेन याथार्थ्यं न कथितम्। संकोचपरवशा एताः न स्वातन्त्र्येण निस्संकोचं वार्तालापं करिष्यन्ति व्यवहरिष्यन्ति वा”। एवं मनसि तर्कवितर्कं कृत्वा दुष्यन्तः प्रोवाच-

“भद्रे ! कुरुजनपदस्य सम्राट् पुरुवंशीयो दुष्यन्तो वर्तते। राज्ये धार्मिकक्रियाः निर्विघ्नरूपेण भवेयुरिति निरीक्षणाय प्रबन्धाय च स मां धर्माधिकारिणः पदे नियोजितवान्। तपोवनेषु गुरुकुलेषु च धार्मिकविधयो निर्विघ्नरूपेण सम्पाद्यन्ते विद्याध्ययनतत्पराश्छात्राः न कामपि बाधामनुभवन्तीति निरीक्षणायाहं तपोवनमेतत् समागतः। तपोवनं निरीक्ष्य कुलपतये कण्वाय च नमःकृत्वा निवर्त्य राजधानीं हस्तिनापुरीं गमिष्यापि। राज्ञे च सर्वानिव कुशलवृत्तान्तान् निवेदयिष्यामि”।

दुष्यन्तमुच्चपदस्थं राजकर्मचारिणं ज्ञात्वा प्रियंवदाऽसूये तं सादरं प्रणामाञ्जलिभ्यां सच्चक्रतुः। परन्तु त्रपोद्वेगौत्सुक्यसम्भ्रमादिभावसंभरितहृदया शकुन्तला नैकस्यापि शब्दस्य मुखादुच्चारणे क्षमा बभूव। निष्कम्पा, निश्चेष्टा सा स्तब्धीभूता, जडीभूता च। वदनमवनमय्य दक्षिणचरणाङ्गुष्ठनखेन भूमिं विलिखन्ती सा तत्रैव स्थिता। अनिर्वचनीयेनाऽऽवेगेन तस्याः हृदयमतितरामभिभूतं विह्वलमासीत्।

तदानीमेवाऽनसूया जगाद-

“आर्य ! कुलपतिमहोदयास्त्वद्याश्रमे नोपस्थिताः। कस्यापि विशिष्टस्य कार्यस्य हेतोः किञ्चिदस्मदविदितं स्थानं गताः। श्वस्तेषां प्रत्यागमनसम्भावना। सम्मुखमेवेदं कुलपतिमहोदयानां कुटीरम्। इयं तेषां दुहिता शकुन्तलाऽस्मिन्नेव कुटीरे निवसति। आश्रमसमागतानामतिथीनामातिथ्यस्य भारमियमेव वहति। एनामनुकम्प्य भवानाश्रमस्यातिथ्यमङ्गीकरोतु। प्रतीचीक्षितिजं प्रति प्रयादुमुत्सुकेऽपि दिनकरे दिवसस्यावसानवेला सुदूरा। आगम्यताम्। अत्रैव

सप्तपर्णप्रच्छायशीतलायां वेदिकामुपविश्य विश्रामं लभतां भवान्”।

अनसूयाया: वचनमङ्गीकृत्य दुष्यन्तस्तत्रैव सप्तपर्णवेदिकामुपाविशत्। सघनपत्रसुशीतलच्छायेन वनस्पतिना तेन स सत्कृत:। मालिनीसलिलकणवाही, तपोवनवनस्पतिकिसलयकुसुमसंस्पर्शसुरभितो मन्दं मन्दं प्रवहन् पवनो दुष्यन्तस्याङ्गानां सकलामेव क्लान्तिं ग्लानिञ्च जहार। तास्तपस्विकन्यकाश्चापि वेदिकासन्निकटमेवावतस्थु:।

तस्मिन्नेव काले चाञ्चल्यधाष्ट्र्यभावमुखरभावेन स्मितविभूषितवदना प्रियंवदा स्मितपूर्वं शकुन्तलां बभाषे-

“अयि प्रियसखि ! अतिथीनामातिथ्यं त्वदायत्तम्। त्वय्यारोप्य सकलमतिथिसत्क्रियाभारं कुलपतिमहोदया आश्रमात् प्रस्थिता:। गच्छ, कुटीरं प्रविश्य, तत: फलानि दुग्धञ्च समाहर। अस्माकं कलशेषु जलं सन्निहितमेव। एतदेवादरणीयस्य प्राघुणिकस्य पादोदकं भविष्यति”।

प्रस्थानसमुद्यतायामेव शकुन्तलायां दुष्यन्तस्तां निवारयितुमुत्सुको बभूव। न च तस्या: क्षणमपि गमनं तस्मै रुरुचे।

अनङ्गरंगप्रतिमेषु तदङ्गेषु रूपसौन्दर्यसारसमुच्चयसागरेषु निमग्नं दुष्यन्तस्य मनस्तमेवाविरतमवलोकयतुमीहाञ्चक्रे। शान्तापरचिन्तनेन शकुन्तलाया: क्षणिकामप्यनुपस्थितिमसहमानेन तेन कथितम्-

“भद्रे ! भवतां वाङ्माधुर्यैरेवाहं सत्कृत:। वाचां विलासा एव सर्वातिशायिनोऽतिथिसत्कारा:। सप्तपर्णतरुपत्राणां सघना च्छायेयं शीतलतादायिनी, मालिनीसलिलकणवाही पवनोऽयं श्रमक्लान्तिनिवारको, दिशि दिशि प्रसरन् मकरन्दगर्भकुसुमसौरभं नासिकेन्द्रियतृप्तिकरम्, आम्रतरुशिखरासीनमदमत्तपिककुहूरव: कर्णसुखावह:। भवतां दर्शनं नयनसुखकरम्। सर्वाण्येतान्युपकरणान्यस्माकमातिथ्यं विदधति। कतिपयक्षणं यावदत्रोपविश्य भवतीभि: सह विस्रम्भविनोदवार्ताभि: श्रमं विनोदयितुमिच्छामि। भवत्योऽपि तपर्तुदिनकरतापसन्तप्तास्तपोवनतरुसेचनश्रमेण च क्लान्तिमापद्यमाना: विश्रमितुमुत्सुका: संलक्ष्यन्ते”।

दुष्यन्तस्यानुरोधमङ्गीकृत्य स्मितालङ्कृतवदना आनताङ्ग्यस्तास्तापसकन्यका: मधुरसंलापैरेव तस्यातिथ्यनिष्पादने संलग्नचित्ता: बभूवु:। परन्तु

विविधभावोद्रेकोद्वेलितमानसा शकुन्तला न शशाक किञ्चिदपि संलपितुम्। मुखमवनमय्य त्रपाभरानताङ्गी सा हृदये मनसि च उद्विग्नेव, कयाचिदनिर्वचनीयया पीडया पीडितेव संबभूव। पुनश्च लब्धावसरा सा वदनं यथाकथञ्चिदुन्नमय्य दुष्यन्ताननं तिर्यगवलोकयति स्म, तञ्च स्वाभिमुखं निरीक्षमाणमवलोक्य तत्क्षणं दृष्टिमवनमयति स्म। दुष्यन्तोऽपि वारं वारं शकुन्तलामवलोकयति स्म। इत्थं च द्वयोरेव नयनानि परस्पराकर्षणनिबद्धानि संघट्टनमिव प्रपेदिरे।

शकुन्तलादुष्यन्तयोर्बाह्यविकारैरुपलक्ष्यमाणान् हृदयोद्वेगकरान् भावान् निर्निमेषमवलोकयन्ती परिहासपेशला प्रियंवदा शकुन्तलां तिर्यगवलोक्य दुष्यन्तमुवाच–

"आर्य ! भवता त्वस्माकं किञ्चिदप्यातिथ्यं नाङ्गीकृतम्। कुलपति–महोदया अप्यत्र नाऽद्य वर्तन्ते। यदि तेऽत्रोपस्थिता अभविष्यन्, आदरणीयस्य प्राघुणिकस्यातिथ्यं विधिना समापत्स्यत। ते तु स्वजीवनसर्वस्वमपि समर्प्यातिथिसत्क्रियां निरवक्ष्यन्"।

प्रियंवदाया: वचनाभिव्यञ्जनामभिगम्य शकुन्तलाया: कपोलयोरति–शुभ्रयोररुणत्वाविष्कृतिर्बभूव। शशिकलानिभे कान्तिमति भालपट्टे हृदयगतविक्लवत्वमुद्गिरन्त: प्रस्वेदबिन्दव: प्रादुरभवन्। मधुमासमलयानिलहता वेत्रयष्टिरिव मनसिजहतं वपु: वेपथुना प्रकम्पितम्। कशाघातसमुद्दीपितवेगस्य सैन्धवस्येवाऽनंगशरप्रहतस्य हृदयस्य गतिस्त्वरितत्वमुपजगाम। मुखात् किञ्चिदपि वक्तुमक्षमा सा प्रियंवदाया: भुजवल्लरीं रक्ताभदीर्घनखेन चिच्छिदे।

लोकप्रसिद्धिरियमेवासीद्, यत् कुलपति: कण्वस्त्वकृतपाणिग्रहणसंस्कार एव। आमरणं ब्रह्मचर्यव्रतपालनं तेन प्रतिज्ञातम्। अत: शकुन्तला कण्वस्य दुहितेति कथनं दुष्यन्तस्य चित्तं विस्मयपयोनिधौ निपातयामास। शकुन्तलां संकेत्य स सख्यौ पप्रच्छ–

दुष्यन्त:–"भद्रे ! कुतूहलेन निहितं पदमस्माकं हृदये भवत्यो: सखीविषये। यदि नाऽत्र गहनं रहस्यं भवत्योरनुमतिश्च स्यात् किञ्चिदपि प्रष्टुमना: वर्ते"।

प्रियंवदा – "आर्य ! अलमत्र विलम्बेन। एष तु भवतोऽनुग्रह एव।

भवतः कुतूहलनिवारणमस्माकं प्रसन्नताहेतुरेव भविष्यति। अपृष्टं कुतूहलं हृदयं भिनत्ति"।

दुष्यन्तः- " जगति प्रथितेयं वार्ता, यत्कुलपतिः कण्वो नैष्ठिकब्रह्मचारी वर्तते। आमरणं ब्रह्मचर्यव्रतपरिपालनमेव तेन प्रतिज्ञातम्। अतो भवत्योः सखीयं शकुन्तला कथमस्य सुता"?

प्रियंवदा-"आर्य ! सत्यं तथ्यमिदञ्च भवतो वचः। आदरणीयः कुलपतिः कण्वस्तु ब्रह्मचर्यव्रतपालनपरो वर्तत एव। परमियमावयोः प्रियसखी न तस्यौरसी धर्मपत्नीजा दुहिता। इयं तु धर्मपुत्री तेन पालिता पोषिता च। परन्त्वस्यां स औरससुतापेक्षयाऽप्यधिकं स्निह्यति"।

दुष्यन्तः- "अहो, पालिता सन्ततिरेवेयं कुलपतेः? कथं तेनेयं पालिता"?

प्रियंवदा-"आर्य ! अयं त्वतिदीर्घः समयापेक्षी च वृत्तान्तः। तथाप्येनं ज्ञातुं समुत्सुकमतिकुतूहलिनं भवन्तमहं सङ्क्षेपेण श्रावयामि"।

तदन्तरं च प्रियंवदा शकुन्तलायाः वृत्तान्तं सङ्क्षेपेण दुष्यन्तायानेन प्रकारेण निवेदयामास।

(४)

अहमनसूया शकुन्तला च तिस्रोऽपि सख्यः शैशवादत्राश्रमे सहोदरस्नेहसंसिक्तहृदयाः समवयस्काः निवसामः। सहैवास्माकं पालनं पोषणं वर्धनं क्रीडनमध्ययनमित्यादि सकलं कार्यजातं सम्बभूव। अभिन्ना एव वयम्। शरीरेषु त्रिषु सत्स्वपि मनोहृदयात्मसु चैकत्वं भजामः। अहमनसूया चैतद्गुरुकुलस्याध्यापकयोः सुते वर्तावहे। आवामेनां शकुन्तलामाशैशवात् कुलपतेः कण्वस्य दुहितरमेव जानीवहे। परमायुषा सह सांसारिकिलोकव्यवहाराणां बोधे सति आवयोर्मनस्येतत् कुतूहलं समुत्पन्नम्-

"महर्षिः कुलपतिः कण्वस्तु नैष्ठिकब्रह्मचारी, अकृतपाणिग्रहण-संस्कारोऽविवाहित एव। भार्यां विना कथमस्य सदाचरणरतस्येयं शकुन्तला सुता"।

औत्सुक्यनिर्भरयोरावयोः प्रश्नाः न केनापि समाहिताः। यः कोऽपि जनः पृच्छ्यते स्म, स एव विहस्य व्यपदिशति स्म।

एकस्मिन् समये अत्राऽऽश्रमे पाराशरो नाम महर्षिः समाजगाम। तस्य स्वागतायातिथ्याय चावयोरियं सखी तत्र नियुक्ता। शकुन्तलायाः सेवया विनम्रभावेन शिष्टाचरणेन च सन्तुष्टेन तेन साऽऽशीर्वादैः संयोजिता- "आर्यावर्तस्य सम्राज्ञी, त्रिलोकविजयिनश्च पुत्रस्य प्रसवित्री भूयाः"।

परं शकुन्तलां कुलपतेः कण्वस्य दुहितरं निशम्य महामुनिः पाराशरोऽपि महत्योत्कण्ठयोत्कण्ठितो बभूव- "कथमियं नैष्ठिकब्रह्मचारिणः कण्वस्य सुता"।

एकस्मिन् दिवसे भोजनानन्तरं मुनयोऽध्यापकाः मुनिबालकाः छात्राः सर्व एव चाश्रमवासिनो जनाः यज्ञशालां निकषा व्यावृते विस्तीर्णे प्राङ्गणे समुपविष्टाः ज्ञानचर्चानिरताः बभूवुः। अस्ताचलशिखरमारूढो भास्करोऽपि सकलदिवसभ्रमणपरिश्रान्त इव कस्मिंश्चिदन्यस्मिन्नज्ञातकूपान्धकारे पातयित्वाऽऽत्मानं विश्वञ्च निविडतमसि निमज्ज्य स्वयमपि नयनागोचरो बभूव। निशायाः श्यामलतमःपटलप्रच्छदपटेन सकलमेव विश्वमावृतम्।

अस्मिन्नेव समये शशिना पूर्वदिशि वियन्मध्यारोहणं प्रारब्धम्। सुप्रकाशमाना ज्योत्स्ना विद्योतमाना निविडान्धकारमपसारयितुं प्रवृत्ता। मानिन्या चण्डिकया नायिकयाऽपसारितो नायक इव सोऽप्यन्धकारः पादपानां निकुञ्जेषु भवनानाञ्च छायासु तिरोभवनस्थानानामन्वेषणपरो बभूव।

अस्मिन्नेव काले महर्षिः पाराशरः शकुन्तलाविषयिकां समुत्कण्ठां विनोदयितुं कुलपतिं पप्रच्छ। कुलपतिः प्रथमं तावत् प्रश्नमुपेक्षितुमियेष। परन्तु पाराशरेण साग्रहं पुनः पृष्टोऽसौ शकुन्तलाजन्मविषयकवृत्तान्तं प्रकटीकृतवान्। तस्मिन् समये तिस्रोऽपि वयं वयस्यास्तत्रैवोपविष्टा आस्म। कुलपतिना वर्णितं वृत्तान्तमहमत्रभवन्तं श्रावयामि। शृणोतु भवान्। तत्र कुलपतिना वर्णित एवंविधो वृत्तान्तः-

भवन्तः सर्वे महर्षेर्ब्रह्मर्षेर्विश्वामित्रस्य नाम्ना तु परिचिता एव। क्षत्रियकुलप्रसूतोऽप्यसौ तपस्यया साधनया ज्ञानाधिगमेन च ब्राह्मणत्वमध्यगच्छत्। सुरासुरनरगन्धर्वयक्षविद्याधरकिन्नरादयः प्राणिजनाः मुनयो महर्षयो महादेवाश्च ब्रह्मविष्णुमहेशा अपि सर्वे ते तस्य तपःसाधनेन चमत्कृताः। अथ च तेन ते निजसामर्थ्यस्य प्रभावस्याङ्गीकरणे विवशाः

विहिताः। ब्रह्मपुत्रो वसिष्ठोऽपि ब्राह्मणत्वाभिमानी तस्य ब्राह्मणभावं स्वीचक्रे। पुरा एकस्मिन्नवसरे त्रिशङ्कुयज्ञपुरोहितः स इन्द्रकृतां त्रिशङ्कुस्वर्गगमनबाधामवलोक्याऽसहिष्णुः सन् नवीनां सृष्टिं रचयितुं प्रवृत्तः। तस्मिन् समये महर्षीणां देवानां ब्रह्मणश्चानुराधेन प्रार्थनया च तस्य कोपः प्रशान्तो बभूव।

क्षत्रियकुलभूषणो विश्वामित्रस्तु पूर्वस्मिन् वयसि गाधिपुरजनपदस्य राजसुतो युवराज आसीत्। अहञ्च विश्वामित्रश्च द्वावेवावां कुलपतेर्वामदेवस्य गुरुकुले सहाध्यायिनावास्व। क्षत्रियवर्णत्वाद् राजपुत्रभावाद् राजसिंहासनोत्तराधिकारभावाच्च तस्याभिरुचिर्धनुर्वेदस्याध्ययने, ब्राह्मणभावाच्च ममाभिरुचिर्ब्रह्मविद्यायामवर्तत। भिन्नाभिरुचित्वेऽप्यावयोर्मैत्री अनिलानलयोरिव वसन्तकामदेवयोरिव च प्रतिदिनं वर्धते स्म। सह निवसनं, सहोपवेशनं, सह क्रीडनं, सह भोजनं, सहैव च वनेभ्यः समिधामाहरणमिति सर्वेष्वेव दैनिककार्येष्वावां सदा सहवर्तिनावेवाऽऽस्ताम्।

विद्याध्ययनानन्तरं गुरुकुले, निवृत्ते दीक्षान्तसंस्कारे, गुरुदक्षिणां सामर्थ्यानुसारिणीं गुरुजनेभ्य उपहारीकृत्य, गुरुकुलान्निवृत्य विश्वामित्रस्तु गाधिपुरं गत्वा तत्रत्यं राजसिंहासनं सुशोभितञ्चकार। अहमप्यत्र हिमालयस्योपत्यकां समायातः। अत्र कुरुजनपदान्तर्गते हस्तिनापुरसीमाप्रदेशेऽनुमालिनीतीरं सुरम्यं सर्वविधसुविधासम्पन्नञ्च स्थानं समुपलभ्य स्वकीयं तपोवनाश्रमं स्थापयित्वा मया विद्याकेन्द्रं संस्थापितम्।

कतिपयैरेव संवत्सरैरनेन विद्याकेन्द्रेण गुरुकुलरूपेण परा प्रसिद्धिरधिगता। प्रायशः सकलेभ्योऽपि जनपदेभ्यो विद्याध्ययनसमुत्सुकाश्छात्राः विविधविषयाणामध्ययनायात्र समागच्छन्ति। गुरुदक्षिणा-राजकीयसहायता-दानप्रभृतिभिः साधनैश्छात्राणां सकलान्येवाऽऽवश्यकप्रयोजनानि कुलपतिपदप्रतिष्ठितेन मयैव साध्यन्ते। न किञ्चिदपि शुल्कं छात्रैः देयं भवति। मम सहाध्यायी परमसुहृद् गाधिनरेशो विश्वामित्रोऽपि समागत्याऽत्र तपोवने कदाचित् कतिपयदिनान्यत्यवाहयत्। तेन सह सत्सङ्गचर्चास्वाध्यात्मिकविषया अपि समाधीयन्ते स्म।

अयोध्याजनपदस्योत्तरवर्तिनि सीमाप्रदेशे हिमालयस्यैवोपत्यकायां महर्षेर्वसिष्ठस्याऽऽश्रमपदं विद्यते। स तु सप्तर्षिषु गण्यते। लौकिकविद्याभिः

सह ब्रह्मविद्यायामपि स परमनिष्णातः। ब्राह्मणवंशप्रसूतः क्षमाशीलता-दिगुणविशिष्टः परमपण्डितः स वसिष्ठो ब्रह्मर्षिरित्यभिधीयते। इक्ष्वाकुवंशीयानां नरपतीनां स कुलगुरुः। सोऽपि कुलपतिपदालङ्कृतः स्वगुरुकुले दश-सहस्राधिकान् छात्रान् बिभर्ति पालयत्यध्यापयति च।

एकदा तु प्रकृतिरामणीयकावलोनाभिरुचिर्महीपालो गाधिपुराधीशो विश्वामित्रः सेनया सह हिमगिर्युपत्यकावर्तिवनप्रदेशेषु परिभ्रमन् ब्रह्मर्षेर्वसिष्ठस्याऽऽश्रमपदं समाजगाम। महर्षिणा वसिष्ठेन महत्या समृद्ध्या सम्पादितां राजपुरुषोचितामातिथ्यसत्क्रियामवलोक्य विश्वामित्रो महासमृद्धियुतोऽपि रत्नगर्भायाः वसुधाया अधिपतिरपि विस्मयविकलमानसो बभूव। कुत एतेन त्यागशीलेन धनहीनेन तपस्विना ब्राह्मणेनैतावती समृद्धिरगता? सर्वोऽप्येष कामधेनुसुतायाः विशालोधोभ्यः सततप्रवहत्क्षीर-धारायाः नन्दिन्या एव प्रभाव, इति विदितवृत्तान्तः स महर्षिं वसिष्ठं तां नन्दिनीं ययाचे। वसिष्ठस्तु सर्वस्वत्यागी महान् दानशीलो निःस्पृहो ब्राह्मणः कथं तां याचनां न स्वीकरोति? यथेच्छं नयतु भवानेतां गामिति कथयत्यपि वसिष्ठे, नन्दिनी स्वयमेव विश्वामित्रेण सह गमनं न समर्थयामास।

नन्दिन्यास्तथाभूतां धृष्टतामसहमानोऽसहिष्णुर्विश्वामित्रः कोपेनारुणि-तलोचनो बलात्कारं कर्तुं प्रवृत्तः। परं कुपितया नन्दिन्या लक्षलक्षरूपाणि धारयन्त्या भयावहसुतीक्ष्णवक्रशृङ्गप्रहारैरेव विश्वामित्रस्य सर्वे सैनिकाः विद्राविताः। वसिष्ठस्य प्रोत्साहनेनैव नन्दिनीयमित्थं धृष्टमाचरतीति सम्भावयन् विश्वामित्रस्तं ब्राह्मणं महर्षिं वसिष्ठं विविधमुत्पीडयामास। तस्य सकलानपि शतसंख्यान् पुत्रानसौ नामशेषान् विहितवान्। परन्तु वसिष्ठो नापि चुकोप नापि च पराजयमङ्गीचक्रे।

वसिष्ठेन सहैवं विरोधे सञ्जाते ब्रह्मबलापेक्षया हीनतरं क्षत्रबलं धिक्कृत्य राजसिंहासनं परित्यज्य विश्वामित्रो वनं गन्तुं निश्चिकाय। स्वल्पवयसं पुत्रमुत्तराधिकारे संयोज्य प्रधानामात्यञ्च तस्य संरक्षकं कृत्वा तपस्तप्तुकामः सोऽत्र मम तपोवनं समायातः।

प्रथमं तावदहं सहाध्यायिनं विश्वामित्रं समबोधयम्-"न भवतै-वंविधेऽस्मिन्नसम्भाव्ये कठोरे तपःसाधने प्रवर्तितव्यम्। नैष वसुधाधिपानां क्षात्रतेजस्तिरस्कृतरिपूणां मार्गः। क्षत्रियवर्णोऽपि भवान् धर्मानुकूलं प्रजापालनरूपं

कर्तव्यं निष्पाद्य तामेव स्थितिं गतिं वाऽधिगमिष्यति यां ब्रह्मज्ञानिनो ब्रह्मर्षयोऽधिगच्छन्ति। स्वधर्मस्थितो नियतानि कर्तव्यानि सम्पादयन्नेव जनः सिद्धिं लभते"। परं दृढसङ्कल्पशालिनो विश्वामित्रस्य मनः निजदृढनिश्चयान्न पदमपि विचचाल। तपसाऽसौ ब्राह्मणत्वनिश्चयात्मिकामेव बुद्धिमभि-व्यञ्जितवान्। तदनन्तरमहं तस्य तथा व्यवसायात्मिकां बुद्धिं निरीक्ष्य तपोऽनुष्ठानविधीनुपदिश्य कथितवान्-

"तपोवनादस्मान्नातिदूरे प्रायशश्चतुःक्रोशान्तरालवर्तिनि स्थाने पश्चिमदिशि भगवत्याः भागीरथ्याः धारायाः नातिविप्रकृष्टान्तराले चञ्चला निर्मलसलिलैका प्रतनु जलधारा पर्वतखण्डेभ्यो निःसृत्य त्वरितगत्योच्छलन्ती धावन्ती प्रवहति। स्थानीयजनैः सा गोमतीति ज्ञायते। परितश्च तां नडानां वनं नडपितवननाम्ना प्रसिद्धम्। तस्मिन्नेवारण्ये भवता तपःसाधना विधेया। दृढसंकल्पमास्थायाविचलितमनाः भवान्निश्चयेन ब्राह्मणत्वमधिगम्य ब्रह्मर्षिपदविभूषितो भविष्यति"।

मम परामर्शमङ्गीकृत्य विश्वामित्रो नडपितवनं प्रपेदे। गोमतीतटे सुविस्तृतसुचिक्कणसमतलप्रस्तरफलकमेकमुपलभ्य प्रमुदितमनाः स तपः-साधनायां परब्रह्मणि केन्द्रितमनोबुद्धिस्तस्थौ। शनैः शनैरुपभोगान् परित्यजता तेन सर्वाण्यपि लौकिकभोजनानि परित्यक्तानि। पूर्वं तावत्पर्णाशनस्तदनन्तरं केवलं प्राणायामेन श्वासवायुभिः फुफ्फुसौ सम्पूर्य वायुनैव शरीरपोषणं प्राप्नोत्।

सुकठिने तपःसाधने रतोऽसौ कदाचिदेकेनैव पादेन स्थितो हस्तावुद्यम्य निश्चलो निष्कम्पश्च स्थिरो भवति, कदाचित्तमपि पादमुपरि कृत्वा चरणाङ्गुष्ठाश्रयेणैव तिष्ठति, कदाचित् कण्टकानां शय्यासु शयानो भवति, कदाचिच्च परितोऽनलं प्रज्ज्वाल्य तन्मध्ये चोपविश्य, तीक्ष्णभास्कर-सन्तापसमये पञ्चाग्नितपः साधयन् दिनकरं निर्निमेषं प्रेक्षते। शनैः शनैस्तेन सकलानीन्द्रियाणि विजितानि सर्व एवेन्द्रियविषयाः स्वायत्तीकृताः निजे भौतिकशरीरे चाध्यात्मिकशक्तीनामद्भुतः सञ्चयो विहितः।

विश्वामित्रं तथोग्रं प्रचण्डं तपस्यन्तमवलोक्य देवराजस्य मनोऽपि चकम्पे। तपस्यन्तो मानवाः न कथमपि तस्य प्रीतिपात्राणि। तपोऽनुष्ठानभीरवो हि देवाः लोके प्रथिताः। स्वयमपि तेन पुरा कदाचिदुग्रं तपस्तप्त्वा

तत्फलरूपमिदमिन्द्रासनं समधिगतम्। अत एव स सदैव शङ्कित-स्तपस्विनान्तपोभङ्गाय सततं प्रयतते। न कोऽप्यन्यो जनस्तादृशस्योग्रतरस्य तपसः प्रभावेण तस्येन्द्रपदमपहरेत्। एतत्प्रयोजनं सम्पादयितुमन्यै-र्विविधोपकरणैः सहासावप्सरसामपि प्रयोगं विदधाति। विबुधसद्मनि तासामप्सरसां चतुर्दशकुलानि वर्तन्ते। तत्र मेनकोर्वशीघृताचीतिलोत्त-मासुकेशीमञ्जुघोषारम्भेत्यादयः प्रमुखा अप्सरसो देवराजेन देवानां मनोरञ्जनाय नियोजिताः। तपस्विनां तपोभङ्गायापि देवराजस्ताः पृथिव्यां प्रेषयति। मेनका तासामपि प्रमुखा। विश्वामित्रस्य तपो भङ्क्तुं मेनकामेव समर्थां विज्ञाय स तां समादिशत्-

"मेनके ! सर्वासामप्सरसां त्वमेव सर्वाङ्गसुन्दरी लावण्येन रूपेण यौवनेन कान्त्या च सर्वातिशायिनी गुणवत्तमा प्रभावशालिनी वर्तसे। मम कार्याणि त्वं सर्वदैव साधयसि। दिव्ययौवनशालिनां तवाङ्गानां लावण्य-मवलोक्य सुसंयमी जनोऽपि न स्वेन्द्रियमनोहृदयानां संयमने समर्थः।

मेनके ! अद्याहं महद्विपद्ग्रस्तश्चिन्ताविकलमानसश्च किङ्कर्तव्यविमूढ इव वर्ते। अयं विश्वामित्र उग्रेण तपसा मम इन्द्रपदमपहर्तुकामः। पृथिव्यां स्वकीयं राजसिंहासनं परित्यज्य सर्वाण्येव लौकिकसुखान्युपेक्ष्य नडपितवने गोमतीतीरे तपस्तपन्नसौ देवराजपदेन सहेन्द्रासनस्याभिलाषी संलक्ष्यते। केनापि विधिना त्वया तस्य तपसो भङ्गः करणीयः।

तवैकमेव चित्तविमोहनं स्मितं त्रिभुवनविजयक्षमं वर्तते। पुनः सकलानामङ्गानां लावण्यस्य तु कथैव का ? निजेन रूपेण सौन्दर्येण, यौवनेन, कान्त्या, मधुरसंलापैरन्याभिश्चेष्टाभिस्त्वं तं तथा प्रलोभय, यथा तव शरीरं कामयमानस्यालिंगननिबद्धस्य तस्य तपस्या तवाङ्गेष्वेव विलयतां प्राप्नुयात्। यं कमप्युपायं प्रयुज्य विश्वामित्रस्य तपोभंगाय तवैवाधिकारः"।

विश्वामित्रस्य नामश्रवणेनैव मेनका तत्क्षणं व्याकुलीभूता। भयेन तस्य लावण्यमये वपुषि महान् वेपथुर्जनितः स्वेदबिन्दवश्च भालपट्टे समदृश्यन्त। त्रिष्वेव लोकेषु विश्वामित्रस्य प्रचण्डतपसः प्रसिद्धिः कीर्तिश्च व्याप्ता। कोपनप्रकृतिरप्यसाववर्तत। न कोऽपि समर्थस्तस्य कोपं सोढुं शमयितुं वा। यदेवायं मुनिरभिलषति कथयति वा तत्सकलमेव सत्यं यथार्थं वा परिणमति। इति विविधभावसंकुलितहृदया विभ्रान्तचित्ता स्वेदसलिलबिन्दु-

विभूषितभालपट्टा वेपथुमती सा मेनका देवराजमवादीत्-

"देवराज ! जानन्त्येवाऽत्रभवन्तः स्वयमेव विश्वामित्रस्य तपसः शक्तिं सामर्थ्यं प्रभावञ्च। तस्माद् भवन्तोऽपि सततं बिभ्यति। एकं पुरावृत्तमिदं लोके प्रथितम्-

सशरीरस्वर्गगमनकृतमतिरिक्ष्वाकुकुलतिलकस्त्रिशङ्कुर्विश्वामित्रं पुरोहितं कृत्वा यज्ञं याजयामास। वेदमन्त्राणामाहुतिभिः सार्द्धं सपार्थिवशरीरे स्वर्गमारोहति तस्मिन् भवति च प्रतिरोधके सति कुपितेनानेन महर्षिणा नवीना सृष्टिरेव स्त्रष्टुमारब्धा। किञ्चिदपि प्रतिकर्तुमसमर्थाः भवन्तस्तत्तपः-प्रभावपराजिताः ब्रह्मणः शरणमवापुः।

पुनश्च महातपस्वी विश्वामित्रो नेन्द्रपदकामनया तपस्तपति। अयं तु ब्राह्मणत्वाभिमानी ब्रह्मर्षिपदविभूषितो भूत्वा ब्रह्मर्षिं वसिष्ठं विजेतुकामस्तपः-साधने प्रवृत्तः। अतोऽनेन महातपस्विना सह कथमपि विरोधः कलहोपक्रमो वा न भवद्भिः कर्तव्यः। तदेव श्रेयः"।

परमिन्द्रः मेनकां बभाषे-"मेनके! सत्यं तथ्यं चाऽभिधीयते भवत्या। परं विपक्षबलवृद्धिर्न कदाप्युपेक्षणीया। अस्मिन् समये तु न कामयतेऽयं विश्वामित्र इन्द्रपदं त्रिविष्टपराज्याधिकारं वा। परमनेन परमोग्रेण तपःप्रभावेण स तथाविधं सामर्थ्यं निश्चयेनैव लप्स्यते, येन भविष्यति काले ममेन्द्रपदाप-हरणे समर्थो भविष्यति। अतोऽनुपस्थिता परं भविष्यति काले सम्भाविता विपत् पूर्वमेव प्रतिकरणीया। वह्निना गृहे प्रदीप्ते कूपखननस्योद्यमस्य को लाभः? अतो ममादेशो भवत्या पालनीय एव"।

मेनका प्रोवाच-

"भवतामादेशन्तु पालयिष्याम्येव। गमिष्याम्येवाऽहं विश्वामित्रस्य तपसो भञ्जनाय। परमुपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत्। मम सुरक्षाप्रबन्धोऽपि भवता विचारणीयः। विश्वामित्रो महातपस्वी परमसामर्थ्यशाली कोपनप्रकृतिः प्रसिद्धः। अपि च प्रसिद्धैवेयं लोकोक्तिः- "सुलभकोपा हि मुनिजनानां प्रकृतिः"।

कामविकारोन्मादकारिणीभिर्मम चेष्टाभिः प्रकुपिते तस्मिन्, कठोरेण शापेन च मां दण्डयितुं प्रवृत्ते सति, को मां परित्रास्यते? विश्वामित्रस्य

किञ्चिदप्यपकरणे तपोभ्रंशने वाऽक्षमाः भवन्तो मामपि परिहास्यन्ते। साध्यासाध्यमेव विचार्य जनेन पदं निधातव्यम्। न तु भवद्भिर्मोहवशंगतैः किञ्चित् करणीयम्। नास्ति मोहसमो रिपुः। यस्माद् विश्वामित्रात् सर्व एव देवा बिभ्यति, यश्च ब्रह्माणमप्यवहेल्यान्यसृष्टिरचनायां समर्थो, यञ्चान्य ऋषयः स्तुवन्ति, कथमहमेकाकिनी तस्य वशीकरणे समर्था? प्रथमन्तावद् भवद्भिर्मे सुरक्षायाः प्रबन्धः करणीयः, सहायकाश्च नियोजनीयाः, तदनन्तरमेवाहं विश्वामित्रतपःस्थलीगमनाय समादेष्टव्या"।

मेनकायाः युक्तिगर्भाणि वचांसि निशम्य देवराजः पवनं वसन्तञ्चाहूय समादिशत्-

"विश्वामित्रस्य तपो भङ्क्तुं भवद्भ्यां मेनकासहायभूताभ्यां गन्तव्यम्"। पुनः स मेनकां बभाषे-

"सहायकाभ्यामेताभ्यां सह प्रतिष्ठस्व त्वम्। एतौ ते परित्राणे साहाय्ये च समर्थौ"।

विश्वामित्रस्योग्रतपःप्रभावं शापसम्भावनाञ्च विचिन्तयन्ती भयेन कम्पमानाङ्गयष्टिः देवराजादेशविवशा मेनका नाकपृष्ठादवतर्तुमुपचक्रमे। विवशाभ्यां चपलनयनाभ्यां पौनःपुन्येन देवराजं निरीक्षमाणा कामप्यन्याङ्गतिमपश्यन्ती पवनवसन्ताभ्यां सह मेनका नडपितवने गोमतीतीरे तत्स्थानमुपाजगाम, यत्रासौ महातपस्वी नयने निमील्य परब्रह्मणि स्वात्मानं विलीनं कर्तुकामस्तपःसाधनायां समाधिगतो बाह्यजगद्विस्मृतिशीलः स्थाणुरिव निश्चलोऽतिष्ठत्।

अबलाऽपि प्रबला सा मेनका प्रथमन्तावत् कमलकलिकाकारमञ्जलिं निबध्य किञ्चिन्नम्रीभूय विश्वामित्रस्य चरणयोः सस्पर्शं प्रणनाम। तदनन्तरं विश्वामित्रनयनविषयीभूतमेकं समतलप्रदेशं स्वच्छीकृत्यातिमनोहररूपेण विभिन्नमुद्राविभूषिततालालयानुसारिणा नृत्येन नर्तितुमारेभे। नूपुराणां मञ्जुमुग्धकारिभिर्झङ्कृतिध्वनिभिर्वनप्रान्तराणामन्तरालानि मधुरिम्णाऽनिर्वचनीयेन सर्वास्वेव दिक्षु निनादितानि।

तस्मिन्नेव मनोऽभिरमणीये समये मेनकासहायभूतेन वसन्तेनापि स्वकार्यस्य विस्तारः प्रारब्धः। मधुमासः प्रादुर्बभूव। पादपेषु विटपबाहु-

भिराश्लिष्टासु प्रेयसीरूपासु वल्लरीषु सौरभं प्रसारयन्तो मकरन्दं परागञ्च प्रकिरन्तः कुसुमगुच्छकाः सर्वासु दिक्षु विकसन्तः समलक्ष्यन्त। मधुरपरागमकरन्दभोजनलालसाः मधुकराः मधुकरीभिः सार्द्धं पुष्पगर्भप्रवेशं लब्ध्वा पुष्परसास्वादनं प्रारभन्त। रसालतरुषु मधुरसौरभभरनिर्भराः मञ्जर्योऽशोभन्त। कर्णेषु मधुरिमाणं निश्च्यावयन् पिकानां कुहूध्वनिः प्रणयिजनानां हृदयान्यान्दोलयामास। विरहिजनानां प्रोषितानां प्राणास्त्वनेन ध्वनिना संशयपदवीमारोपिताः। मृगाः मृगीणां पश्चाद्धावन्तो बभूवुः।

अस्मिन्नेव समये पवनदेवेनापि स्वकीया लीला सम्प्रसारिता। दक्षिणदिशः प्रवहता पुष्पसौरभं सविलासमपहरता तेन विकचकुसुमरजांसि परितो विकीर्णानि, पादपमृदुविटपास्तदालिङ्गिताश्च वल्लर्यः प्रकम्पिताः, कमलदलपटलानि चेतस्ततो भ्रामितानि।

चित्तोन्मादकारिणि समारोहेऽस्मिन् नृत्यन्त्याः नृत्याङ्गनायाः देवराजवल्लभायाः मेनकायाः मधुरमञ्जुलनूपुररवस्तपस्यतो विश्वामित्रस्य समाधिं बभञ्ज। ध्यानमग्नयोर्नयनयोरुन्मीलनं विधाय कुतूहलगर्भदृशाऽसौ परितो व्यलोकयत्। सुरभिसुवासिते निर्जनेऽरण्ये नृत्यन्ती दृक्पथमुपगता सा मेनका प्रकृतिनट्याः परमाद्भुतमाभूषणरूपं मनोहरं कुसुममिव प्रतीयाय। मेनकायाः वपुषः सौरभमपहृत्य प्रवहन् महातपस्विशरीरस्पर्शञ्च प्राप्नुवन् पवन इन्द्रियजयिनोऽपि विश्वामित्रस्य वपुः प्रकम्पयामास। तस्य मनसि मनसिजविकारेण पदं निहितम्। तस्मिन्नेव समये सुतीव्रेण वायुवेगप्रहारेण मेनकायाः मनोमोहकमृदुलगौरवर्णेभ्योऽङ्गेभ्यः शिथिलोपगूढवसनमाकृष्य सहसैवोत्थाप्य विश्वामित्रस्य चरणयोर्निपातितम्। किञ्चित् सङ्कोचं लज्जाञ्चाभिनयन्ती मनोरमसकलगात्रा विवसना मेनका सङ्कोच्य सर्वाण्यङ्गानि दीप्यमानेन सौन्दर्यानलेन सकलमपि प्राणिजातं सन्दीपयन्ती वस्त्रग्रहणव्यपदेशेन विश्वामित्रसमक्षमात्मानमुपस्थापितवती। अवनतमुखी लज्जामभिनयन्ती सा कमलमुकुलस्तबकाकारमञ्जलिं प्रसार्य वसनं प्रत्यर्पयितुं प्रार्थयामास।


मेनकायाश्चित्तोन्मादकरं हृदयहारि यौवनं वसनविरहितानि च दीप्यमानानि गात्राणि विश्वामित्रस्येन्द्रियजयत्वं मनोनियमनं च सत्वरं तत्क्षणमेवापजह्रुः। स तु यम-नियमा-सन-प्राणायाम-प्रत्याहार-धारणा-

ध्यान-समाधिरूपाणां सकलानामेव योगाङ्गानां झटित्येव विसस्मार। कामभावनाविष्टचित्तेन तेन सत्त्वरमुत्थाय चरणयोर्नमन्त्या: मेनकाया: मन्मथपुष्पाञ्जलिरूपो निजतपोविनाशकरो मायामयो मुकुलाञ्जलि: वामेतरेण करेण गृहीत:। सव्येन करेण हनुं गृहीत्वा कपोलावुन्नमय्य स तपस्वी भुवनमोहनकरं स्मितं तस्या: प्रस्फुरिताधरे, अनुनयसहितमामन्त्रणञ्च नयनयो: संलक्षितवान्।

मन्मथाविष्टचेतसो विश्वामित्रस्य सर्वाण्यङ्गानि कामविकारेण वेपथुना निजायत्तीकृतानि, भालपट्टे च तनुसलिलबिन्दुराजयो विराजमाना: बभूवु:। निर्निमेषं साभिलाषं सतृष्णमेकाग्रं निरीक्षमाणस्य तस्य तपस्विनस्तप:-साधनकठोरकण्ठं निजमृदुलभुजवल्लरीभिरावेष्ट्य वल्कलवस्त्रावृतानि स्पर्शातिकठोराणि गात्राणि निजैर्विवसनै: सुमृदुभिरङ्गै: गाढं संस्पृशन्ती सा दुष्टाऽभिसारिका स्वकीयं स्मितशोभमानं मदिरेवोन्मादकरं शृङ्गाररससारभूतमधरं विश्वामित्रस्य तप:पूतयोरोष्ठयो: प्रास्थापयत्। लाघवेन च सा मुक्ताफलसमसितकान्तिभिर्निशितकोटिभी रदनैस्तस्य तपस्विनो निम्नरदच्छदमपि मृदुभावेनादशत्।

मेनकाया: प्रयोजनं साफल्यमवाप। मन्मथावेशविमोहितचित्त: सकलाया अपि तप:साधनाया: विस्मृत्य स महातपस्वी स्वतपसाऽर्जितां सिद्धिं लघुतृणराशिमिव देववाराङ्गनाया: मेनकाया: प्रचण्डोद्दामयौवनप्रवाहे प्रवाहयामास। बहुकालं यावन्मेनकाया: सुमृदुनि कामवापिकारूपे वपुषि रमणविलासविहरणसुखान्यनुभवन् मोहाभिभूतो विश्वामित्रो नडपितवने गोमतीतीरे विजहार।

दिवसानामगणिता संख्या व्यतीता। ब्राह्मणत्वप्राप्तिसाधनरूपां तप:साधनां मेनकागात्रसंस्पर्शसन्धुक्षितकामहुताशन आहुतीकृत्य स महातपस्वी निर्भरानन्दक्रीडाविलाससुखानि मेनकयोपहृतानि सततं सेवते स्म। वसन्तर्तुर्व्यतीतो, ग्रीष्मकालोऽपि निर्गतो वर्षर्तुरपि सम्पूर्णस्तदनन्तरं शरत्समये च गते शिशिरेण समायातम्। प्राणिनामङ्गानि प्रचण्डहिमगर्भशैत्यनिर्भरै: पवनै: कम्पयत: सङ्कोचयतश्च पौषमासस्य परिपूर्णमण्डलश्चन्द्र: प्रचण्डशैत्यमादधानो मध्यव्योम्नि समारूढ: सुधाधारया विमलया ज्योत्स्नया सकलमपि भुवनं शुभ्रंवर्णरूपन्नयति स्म। नडपितवने गोमतीतीरे व्यावृते



VISWAMITRA AND MENAKA

(*Courtesy: Maharaja Fatesingh Museum Trust,*
Laxmi Vilas Palace, Baroda)

प्रस्तरफलके निषण्णो विश्वामित्रोऽतिविकलमनसा वनानिलैर्हिमितमपि पर्यावरणमुपेक्षमाणो मेनकां प्रत्यैक्षत।

सकलोऽपि दिवसो व्यतीतः। चन्द्रचन्द्रिकया प्रकाशमानायाः निशाया अर्धमपि व्यतीतम्। परं न जाने सा देवाङ्गना प्रणयिनीपदप्रतिष्ठिता विश्वामित्रहृदयसाम्राज्ञी कुत्र गता। सहसैव नानाविधविकल्पव्यथितचित्तस्य विश्वामित्रस्य समक्षं पृष्ठतः समागत्य सा समुपस्थिता बभूव। एका परमलावण्यवती सौन्दर्येण कान्त्या च चन्द्रमसमपि लज्जितं विदधाना कुन्दकलिकाभिरिव मुक्ताकलापैरिव निर्मिता धवलगुणेनेव विरचिता नवजाता शिशुबालिका तस्याङ्कं सुशोभयामास। ताम्बालिकां तपस्विश्रेष्ठस्याङ्के निधाय स्मितशोभमानेनाधरेण दुष्टभावेन दन्तान् दीपयन्ती सा प्रोवाच-

"मुने! भवद्वीर्यप्रसूतेयं कन्या भवदीयैव। भवानेवैनां पालयतु। मया स्वप्रयोजनं संसाधितम्। अधुनाऽहं स्वस्वामिनो देवराजस्येन्द्रस्य सकाशमेव त्रिविष्टपं गच्छामि"।

ससम्भ्रमाकुलितचेताः प्रचण्डशैत्येऽपि स्वेदबिन्दुभिर्निचितसकलगात्रो विश्वामित्रस्तां दुष्टभावेन मन्दं हसन्तीं परिहासविभूषितवदनां मेनकां जडीभूतनयनाभ्यां निर्निमेषमैक्षत। विश्वामित्रस्यैतादृशीमवस्थां विलोक्य उच्चैर्हसन्ती सा मेनका पुनः प्रोवाच-

"मुनिवर! प्रचण्डोग्रतपःसाधनतो भयव्याकुलितमनसा देवराजेन वासवेन भवतस्तपस्यां खण्डयितुमहमत्र प्रेषिता। मया यौवनसौन्दर्यपाशमवलम्ब्य स्वप्रयोजनं साधितम्। अथ च भवतस्तपः खण्डितम्। इयं कन्या भवद्वीर्यप्रसूतिरेव। अस्माकं देवाङ्गनानामप्सरसामयमेव गुणो यदस्माकं गर्भावस्था न कैरपि बाह्यलक्षणैरुपलक्ष्यते। अयमेव हेतुर्यद् भवता मे सगर्भत्वं नोपलक्षितम्। अद्यैव गर्भावधौ सम्पूर्णेऽनया बालिकया धरायामवतीर्णम्।

मुनिवर! न वयमप्सरसः सन्ततिपालनकार्याणि सम्पादयामः। देववाराङ्गना एव वयम्। यस्येयं वीर्यप्रसूतिः स एवैनां पालयिष्यति। अतः भवदीया सन्ततिरियं बालिका भवतैव पालनीया। देवराजस्य प्रयोजनं साधयित्वा, भवतस्तपोभङ्गं विधाय, स्वामिनं भयशङ्कारहितं कृत्वा भवते चैनां बालिकां समर्प्य देवराजधानीममरावतीमधुनैवाहं निवर्ते"।

स्मितविभूषिताधरवदनेनैवमुच्चार्य नृत्यगतिविलसितचरणन्यासैर्नूपुरमधुररुनझुनध्वनिभिर्वनप्रान्तराणि गुञ्जनप्रतिगुञ्जनरवैर्निनादयन्ती सा मेनका स्वस्वामिनो वासवस्य सकाशममरावतीमुपागमत्।

जडीभूतसकलेन्द्रियव्यापारा महामुनिरसौ विश्वामित्रो नैकमपि शब्दमुच्चारयितुं क्षमो बभूव। वराकोऽसौ महातपस्वी नूपुराणां रवेण कर्णौ बधिरयन्तीं सुदूरमपसरन्तीं कुलिशकठिनहृदयां प्रणयिनीं तां तावत्कालपर्यन्तं निश्चलनिर्निमेषलोचनाभ्यामवलोयामास, यावत्सा वनराजिभिरन्तर्हिता।

नयनागोचरीभूतायां मेनकायां किञ्चिल्लब्धसञ्ज्ञस्य विश्वामित्रस्य दृष्टिरङ्कगतं नवजातमपत्यङ्गता। तत्तु तस्येन्द्रियमनश्चाञ्चल्यभावपादपस्य परिपक्वं गौरलोहितफलमिव तत्र पतितम्। तत्तस्य तपोभङ्गस्य परिणाम एवासीत्। मनसि प्रचण्डवेगेनोद्वेल्लता त्रपाग्लानिक्रोधोद्वेगादिभावजातेन तस्य वपुर्नितरामकम्पत। इयमिन्द्रवारयोषिन्मेनका तपो मे खण्डितं कर्तुमेवाऽत्रागता। स्वकीयं प्रयोजनं सफलं विधाय तपःसाधनां मे विहत्य, कामविहतचेतनस्य ममाङ्के नवजातामिमां कन्यकां निधाय सा वनोद्देशादस्मात् प्रयाता। त्रपाक्रोधपश्चात्तापानलेन स हृदयान्तः पुटपाकानलेनेव ज्वलितुमारेभे।

परन्त्वस्मिन् प्रसङ्गे सकले तस्य स्वकीया निर्बलता एव प्रधानं कारणम्। प्रतिशोधनेऽक्षमोऽसौ विषविहीनपददलितभुजङ्गमस्यावस्थां प्रपेदे। शपनस्यापि तस्य सामर्थ्यं, तया तत्तपोभङ्गं विधाय विनाशितम्। अङ्कमधिशयाना सा नवजाता रूपवती मेनकाप्रसूतिर्गहननिद्रावशंवदा कन्या तं क्लेशयन्तीव प्रतीयाय। कन्यायाः संस्पर्शोऽपि तस्य महतीं ग्लानिमजीजनत्। स पुनस्तपोऽनुष्ठानस्य निश्चयं विधायान्यत्र गन्तुं विचारयामास। लज्जयाऽनुतापेन चासौ सहाध्यायिनं कुलपतिं कण्वमप्युपगन्तुं न च साहसन्न च मनश्चक्रे। तत्रैव गोमतीतीरे सुकठिनभूमौ सघनश्रीद्रुमच्छायायां तां मेनकाप्रसूतिं निधायोग्रतरं तपस्तपनाय तेन तादृशमविज्ञातं दुर्गमं स्थानं गन्तुं व्यवसितं, यत्र न कोऽपि तं जानाति। सुदूरवर्तिनि प्राचीदिग्वर्तिन्याः कौशिक्यास्तटे स्वकीयमाश्रमं विरच्य सुकठोरतपःसाधनायामात्मानं निमज्जयामास।

तस्मिन् मालूरद्रुमे नानाविधान्यनेकशकुन्तकुलानि निवसन्ति स्म। समुदिते सवितरि शशिनमिव कान्तिमन्मुखं बालिकाया अवलोक्य

स्नेहसिक्तमानसानि तानि अविरलक्रन्दनपरम्पराभिर्वनप्रान्तराणि निनादयन्तीं तां परिवृत्योड्डीयमानानि पक्षच्छायाभिः शैत्योष्णत्वादिद्वन्द्वानि निवारयामासुः। अपि च सिंह-व्याघ्र-तिन्दुक-वृक-ऋक्ष-शृगाल- लोमशादिमांसाहारशीलेभ्यो हिंस्रजन्तुभ्यस्तां तस्मिन् घोरेऽरण्ये ररक्षुः।

कण्ववर्णितां तां शकुन्तलाविषयिकां कथां दुष्यन्तं श्रावयन्ती प्रियंवदा क्षणं विरम्य पुनः निवेदयामास। सरसरुचिरं पीयूषमिव वृत्तान्तं श्रोत्राभ्यामापिबन्निव दुष्यन्तस्तत्र सत्काव्यश्रवणसुखरसमास्वादयति स्म। प्रियंवदा जगाद-

तदनन्तरं कुलपतिः कण्वो मुनिवरं पाराशरं प्रोवाच-

एकदा स्वसहाध्यायिनं विश्वामित्रमवलोकयितुं मे मनः महत्योत्कण्ठया समाक्रान्तम्। महान् समयो व्यतीतो नडपितवने तपस्तपस्यतस्तस्य। समिधामाहरणव्यपदेशेनाहं तत्र गतः। महता प्रयासेनान्वेषणपरेणापि मया स बालसखा नावलोकितः। परितः परिभ्रमन्नहं गोमतीतटवर्तिनमेकं श्रीद्रुमं निकषा समागच्छम्। तत्र सघनश्रीवृक्षपत्रच्छायायां सुकठिनभूमौ नवजाता बालिकैका हस्तपादं दुधुवे तारस्वरेण च चुक्रोश। परितश्च वियत्युड्डीयमानाः शकुन्तास्तां ररक्षुः।

कन्याया अनुपमं रूपलावण्यं निरीक्ष्य चेतसि मे महता विस्मयेन पदं निहितम्। दिव्यमेव रूपं तदासीत्। सामुद्रिकलक्षणैरतिशयेन सा सौभाग्यशालिनी प्रतिभाति स्म। विचारितञ्च मया, केयं रूपवती नवजाता बालिका कुतः समायाता ? कस्येयं सन्ततिः ? कश्च कठिनहृदयो जन एनामत्र परित्यज्य गतः? इति विविधमनोभावव्याकुलितचेतसा मया सर्वतोऽपि विलोकयता न तादृशो जनस्तस्मिन् निर्जने हिंस्रजन्तुसमाकुलेऽरण्ये दृष्टो य एनां बालिकामुपलक्ष्य रहस्योद्भेदनं कुर्यात्।

तदनन्तरं ध्यानमास्थाय निगृहीतचित्रवृत्तिरहं योगदृशा तद्विषयकं वृत्तान्तं परिचेतुं प्रयासमकरवम्। मया ज्ञातम्-

मम परमसुहृदः सहाध्यायिनो विश्वामित्रस्यैवेयं सन्ततिर्नवजाता कन्या मेनकया प्रसूता। वासवेन प्रेरिता सा मेनका अरण्येऽस्मिन् स्वमनोरमेण यौवनेन सौन्दर्येण च तस्य महातपस्विनस्तपो भङ्क्तुं समायाता। तस्याः

मनोमोहकररूपराशिमवलोक्य कामपाशे निगृहीतो मम सखा यौवन-विलासानुपभुञ्जानो वासनारूपे महागर्ते निपतितः। इयं च कन्या मेनकया तद्वीर्यनिषेचनेन प्रसूता। प्रसवसमकालमेव तां तत्पितुर्विश्वामित्रस्याङ्के निधाय स्वसाफल्यं निवेदयितुं देवराजसकाशं सा गता। त्रपाभरव्यथित-चित्तोऽसौ विश्वामित्रो मामप्यनाख्यायैनाञ्चात्रैव श्रीतरुच्छायायां कठिनभूशय्यायामेव निक्षिप्य सुदूरवर्तिनं कौशिकीतटं तपस्तप्तुङ्गतः।

सहाध्यायिनो मम बालमित्रस्यैवेयं सन्ततिरिति वात्सल्यकरुणोद्वेगादि-भावानां परिवाहैर्निचितोऽहमङ्के तामुत्थाप्य, वक्षसि च स्नेहेनोपगुह्य विश्वामित्रमेनकाप्रसूतिमत्र तपोवनमानिनाय। वर्तते मे बालब्रह्मचारिणी भगिनी गौतमी। पुरा कदाचिन्नवयौवनकुसुमसुरभिता सा केनापि छलबलमायापरेण प्रणयिना छलिता, भौतिकसुखभोगविलासेभ्यो विरक्ताऽत्रैव मम तपोवने निवसति। समर्पिता मया सा कन्या तस्यै। निजसन्तत्यामिव तस्यां स्निह्यन्ती वक्षसाऽऽश्लिष्यैनां सा पालयामास। वने शकुन्तैः पक्षिभिरियं लालिता रक्षितेति मया शकुन्तलेत्यभिधाना कृता।

(५)

शकुन्तलायाः जन्मवृत्तान्तं सकलमेव दुष्यन्ताय निवेद्य प्रियंवदा पुनस्तं प्रोवाच–

"आर्य! आवयोः प्रियसख्या अयमेव जन्मवृत्तान्तः। कुलपतिः कण्वस्तु पालनपोषणवर्धनादिभिरेतस्याः पालनधर्मेण पिता। इयमेव ममौरसी सन्ततिरित्यस्यामसौ सातिशयं स्निह्यति। लोके कण्वदुहितृरूपेण प्रथितापीयं, तथ्यतः क्षत्रियवंशजातस्य विश्वामित्रस्य देवाङ्गनायाः मेनकायाश्च प्रसूतिः।

शकुन्तलायाः प्रथमदर्शन एव तस्याः वयोरूपराशिपाशैराकृष्यमाणो दुष्यन्तो भावावेशविवशो बभूव। शकुन्तलाया अपि ईदृश्येवावस्था समजनि। प्रियंवदया शकुन्तलायाः वृत्तान्ते निवेद्यमाने द्वावपि प्रणयाभिलाषगर्भनयनौ निभृतं परस्परमवलुलोकाते। कदाचिन्नयनसम्मेलने दृष्टिसंघट्टने वा सञ्जाते लज्जाभावेन शकुन्तला स्मितशोभमानवदनमवनमितञ्चकार।

निभृतं चेष्टमानायाः शकुन्तलाया इमे व्यापारास्तस्याः मनोविकारान-भिव्यञ्जयन्ति स्म। दुष्यन्तस्तु पूर्वमेव तस्याश्चित्तोन्मादकाप्रतिमरूपराशिपाशे

निबद्धो मुग्ध एवासीत्। शकुन्तलाया: मनोदशाभिव्यञ्जकचेष्टनेन्धनैर्दुष्यन्तस्य हृदये दीप्यमान: प्रणयकामानलोऽतिशयं समेधित:।

वैदिकयुगीनानामार्याणां समाजश्चतुर्षु वर्णेषु विभक्त आसीत्- ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु। गुणकर्मानुसारं वर्णनिर्धारणमृषिभिर्व्यवस्थितम्। वर्णेषु परस्परं विवाहादिसंम्बन्धा: समाजेनानुमोदिता:। द्विविधा विवाहपद्धतिरत्र प्रचलिता- अनुलोमविवाह: प्रतिलोमविवाहश्च। उच्चवर्णेन युवकेन निम्नवर्णा युवतिर्यदि परिणीयते स त्वनुलोमविवाह:। निम्नवर्णेन युवकेन उच्चवर्णायां युवत्यां परिणीतायां प्रतिलोमविवाह:। अनुलोमप्रतिलोमविवाहौ द्वावेव श्रुत्यनुमोदितौ। परं दुष्यन्तसमये वर्णनिर्धारणे गुणकर्मणामपेक्षया जन्मन: प्राधान्यादुच्चवर्णा कन्या निम्नवर्णं युवकं नापैक्षत।

अपि च प्रतिलोमविवाहस्तु निन्दास्पद एवासीत्। स तु लोकेऽनादरस्यैव हेतुर्बभूव। निम्नवर्णप्रसूतो जन उच्च्वर्णां, विशेषतस्तु ब्राह्मणवर्णीयां कन्यां कामयमान: समाजे निन्दापात्रमयशोभाजनं च निन्द्यते स्म। अपि च दण्डनीयोऽयमपराधोऽवर्तत। ब्राह्मणकन्यायै निम्नवर्णस्य युवकस्यासक्ति- मत्यनुचितां विपद्दायिनीं च व्याचक्षते स्म समाजकर्णधारधुरीणा:। कुलपति: कण्वो ब्राह्मण:, शकुन्तला च तस्य सुतेति ब्राह्मणकन्या सा । दुष्यन्तस्तु क्षत्रिय:। कथं तयोर्मिलनसम्भावना ? शकुन्तलाया: कामनाऽपि दुष्यन्ताय पापकारिणी, महदवनतिगर्त्तपातिनी चाऽवर्तत।

परन्तु प्रियंवदया निवेदितेन वृत्तान्तेन शकुन्तलां मेनकाविश्वामित्र- योर्देववारयोषित्क्षत्रियतपोधनयो: प्रसूतिं विज्ञाय क्षत्रियकुलजातमिदं मे कामनापात्रमिति संगमसम्भावनया दुष्यन्तस्य मनसो भयस्याशङ्कायाश्च भावास्तिरोभूता:। परिणयनस्याशा मनसि तस्य प्रसह्य प्राबल्येन पदञ्चकार। विश्वामित्रस्तु जन्मना क्षत्रिय:। ब्रह्मर्षिं वसिष्ठं प्रति प्रतिद्वन्द्विताभावनाक्रान्त: स ब्राह्मणत्वाधिगमाय तपस्तप्तुं वनानि गत:। अत: क्षत्रियकुलजा सा शकुन्तला न खलु तस्य दुरवापा। न कश्चिदप्यवरोधस्तत्र संलक्ष्यते। सा स्पर्शक्षममेव रत्नम्।

परं पुन: शङ्कयाऽन्यया समाक्रान्तं दुष्यन्तस्य चेत:। कदाचिद् बालब्रह्मचारी कुलपतिरयं स्वपालितां धर्मपुत्रीं शकुन्तलामाजन्मवैखानस- व्रतपालिनीं मृगाङ्गनापालनव्यसनिनीमेव विधातुमभिलषति?

आशङ्कानिवृत्तये स प्रियंवदां पुनः प्रोवाच-

दुष्यन्तः-"भद्रे ! भवत्योः सख्याश्चरितं मनःसमावर्जकं निशम्य कुतूहलेनैकेन समाक्रान्तं मे हृदयम्। अन्यदपि किञ्चित् प्रष्टव्यं वर्तते"।

प्रियंवदा-"आर्य ! कुतूहलनिवृत्तिरवश्यमेव करणीया। तपस्विन्यो वयमनियन्त्रणानुयोगाः। जिज्ञासितोऽननुयुक्तः प्रश्नो निरन्तरं हृदयं पीडयति।

दुष्यन्तः-"भवत्योः सखीविषयकाणां कुलपतिविचाराणां जिज्ञासुरस्मि"।

प्रियंवदा - "कथमिव?"

दुष्यन्तः- "आप्रदानादेवेयं वैखानसं व्रतं पालयिष्यति, आहोस्विदाजन्मब्रह्मचारिणी सती मदिरेक्षणाभिर्हरिणाङ्गनाभिः समं क्रीडन्ती विहरन्ती तपोवनवृक्षकानेव सेक्ष्यति।

प्रियंवदा-आर्य ! अस्मिन् विषये परायत्तोऽयं जनः। तथापि शकुन्तला अनुरूपाय वराय प्रदेयेति कुलपतेः सङ्कल्पो लक्ष्यते। यदि चात्र कुलपतिः सन्निहितो भवेत् ?

शकुन्तलादुष्यन्तयोश्चेष्टितानि मनोगतभावाभिव्यञ्जकानि प्रियंवदाऽतिसूक्ष्मदृशा निरीक्षमाणा तथा कथयामास। तस्य इदं वचनमाकर्ण्य शकुन्तलाया वदने विकचाशोकपुष्पस्तबकरक्तता नारीसुलभलज्जया आविर्बभूव हृदयञ्च विविधैर्भावैरान्दोलितम्। कृत्रिमं क्रोधमभिनयन्ती सहसैव सा समुत्थिता। प्रियंवदां तिग्मेन कटाक्षेण कफोणिप्रहारेण च प्रहृत्य साऽनसूयाम्बभाषे-

"अनसूये ! गच्छाम्यहम्"।

गमनाय पदानि निवेशयन्त्याः शकुन्तलायाः हस्तमाकृष्य अनसूयया पृष्टम्-"कथमिव"?

शकुन्तला प्रोवाच-

"असम्बद्धमेवं भाषते प्रियंवदेयम्। कथमप्यसहमानाऽहमधुनैव गत्वा आर्यायै गोतम्यै विज्ञपयामि"।

इति कथयित्वा सा अनसूयाहस्तात् स्वहस्तं बलादिवाकृष्य प्रचलितुमुपचक्रमे। तस्मिन् क्षणे दुष्यन्तस्य हृदयं तामवरोद्धुमनिर्बन्धमिव बभूव। परं कथमपि नियन्त्रित आत्मा तेन। स्वस्थानादनुच्चलन्निव स प्रतिनिवृत्तः।

परन्तु परिहासप्रिया प्रियंवदा तां निरुध्य हस्तमाकृष्य बलादिव समुपवेश्य कथयामास-

प्रियंवदा- "सखि ! न युक्तमेवमसत्कृतसत्कारं पूजनीयातिथिजनं परित्यज्य गन्तुम्"।

शकुन्तला-"(क्रोधमभिनीय हस्तमाकर्षन्ती) त्वमेवात्रातिथिसपर्यां विधेहि ? न मे रोचन्ते तेऽसम्बद्धप्रलपितानि।"

प्रियंवदा-"नाहमधुना किञ्चिद् वदिष्यामि। परमनेन प्रकारेण न त्वमितो गन्तुं क्षमा"।

शकुन्तला-"(तिर्यगवलोक्य) कथमिव? कथं त्वं मां प्रतिरोधने क्षमा?"

प्रियंवदा-"मया ते द्वौ वृक्षौ सिक्तौ। अतस्त्वं वृक्षसेचने मे द्वे धारयसि। आत्मानमनृणं कृत्वैव त्वं गमिष्यसि"।

पराजिता विवशा शकुन्तला मुखमवनमय्य स्थिता सुमृदुकराङ्गुलिभिर्भूमिं विलेखितुमारेभे। तदैव शकुन्तलायाः हावभावविमोहितेन चक्रवर्तिना सव्यकरकनिष्ठिकाङ्गुल्याः राजनामाकिङ्तमङ्गुलीयकमवतार्य वामेतर-करतलनिहितं कृत्वा सम्मुखं प्रियंवदायाः तत्करतलं प्रसार्य कथितम्-

"भद्रे! वृक्षसेचनेनातितरां परिश्रान्तेयं संलक्ष्यते। कलशोत्क्षेपणादेवास्याः करतलेऽतिमात्रं लोहिते, वदनं श्रमसलिलबिन्दुभिर्निचितम्, स्कन्धौ स्रस्तौ, मूर्धजाः पर्याकुलाः, श्वासश्च प्रमाणाभ्यधिकः स्तनवेपथुं जनयन् प्रतिभाति। तनुपेलवशरीरधारिणीयं साम्प्रतं वृक्षसेचनश्रमाक्षमा प्रियसखी भवत्या मोचनीया। यदि चात्रभवती ऋणसमाहरणं विना नैनां मोक्तुमभिलषति, मदीयेनाङ्गुलीयकेनैवेयमनृणा भवतु"।

राजनामाङ्कितमङ्गुलीयकमवलोक्य प्रियंवदाऽनसूये महता विस्मयेना-भिभूते सञ्जाते। इयं तु राजकीयमुद्रिका सम्राजो दुष्यन्तस्य नाम्नाऽङ्किता।

हस्तिनापुरी च तस्य राजधानी। कण्वाश्रमस्तु तस्य शासनसीमान्तर्गत एवाऽवर्तत। ते उभे अपि परस्परं मुखावलोकनं चक्रतुः। तयोरन्तर्निहित-भावानवगम्य दुष्यन्तः प्रोवाच-

"राजनामाङ्किताामेनां मुद्रिकामवलोक्य भवतीभ्यां नान्यथा सम्भावनीयम्। राजपुरुष एवाहं धर्माधिकारे नियुक्तः। प्रसन्नेन राज्ञा प्रदत्तः परिग्रहोऽयं मन्तव्य :।"

परिहासपेशला प्रियंवदा प्रत्युवाच-

"राजपरिग्रहोऽयमिति नार्हत्येतदङ्गुलीयकं भवदङ्गुलिवियोगम्। भवतः कराङ्गुलिप्रणयास्पदमेवैतद् भवतु। भवतो वचनमात्रेणैवाहमेनामनृणां करोमि। तथापि यदि भवानेतदङ्गुलीयकप्रदाने दृढसंकल्प एव, उपहरणीयमिदमस्मत्प्रियसख्यै तनुपेलवशरीरधारिण्यै। अस्याः मृदुमनोहराया-मङ्गुल्यामेवैतदतिशयेन शोभिष्यते"। तदनन्तरं शकुन्तलामभिमुखीभूय सा प्रोवाच-

"प्रियसखि ! शकुन्तले ! मोचितासि त्वमार्येणानुकम्पिना महाराजेन ऋणादस्मात्। यदि त्वं गन्तुमेवेहसे, गच्छेदानीं यथेच्छम्। आर्येण प्रदत्तमिदमङ्गुलीयकमपि मया तुभ्यं प्रदत्तम्। गृहाण त्वमिदमपि।"

प्रियंवदायाः परिहासवचांसि निशम्य कृत्रिमक्रोधमभिव्यञ्जयन्ती मृदुपवनाहतविटपिविटप इव कम्पमानतनुगात्रयष्टिः विलोलतरलतारका शकुन्तला सहसैव समुत्थिता। सा प्रियंवदामूचे-

"का त्वं भवसि मे विसर्जितव्यस्य रोद्धव्यस्य वा? अस्मिन् विषयेऽहमेवात्मनः प्रभवामि। यदि च तुभ्यमिदङ्गुलीयकमतिशयेन रोचते, त्वमेव निजाङ्गुलिमनेन सुशोभय। नाहमसम्बद्धवचांसि ते सोढुं क्षमा। आत्मनैवाहं गच्छामि, न च त्वमत्र प्रभवसि"।

इति कथयित्वा सा चलितुमेव प्रवृत्ता।

परं कतिचित्पदानि गत्वा सा सीत्कृतिध्वनिना सह सहसा भूमावुपविष्टा। तस्याः वामश्चरणः कुशकण्टकाङ्कुरेण विद्ध इव। किञ्चिद् विवृत्तवदना साचिवीक्षणेन राजानमवलोकयन्ती कण्टकाकर्षणं साऽभिनिनाय। तदनन्तरं समुत्थाय कतिचित्पदानि गत्वा पुनः कण्टकस्तम्बशाखास्वसक्तमपि वल्कलं

मोचयितुं प्रवृत्ता। शकुन्तलाया इमामवस्थामवलोक्य स्मितविभूषितानने प्रियंवदानसूये अपि सहायतायै तत्र सम्प्राप्ते।

तेष्वेव क्षणेषु मालिन्याः परे पारे सन्निकट एव रजसां राशयो गगनमाच्छादयन्तोऽस्ताचलोन्मुखारुणभास्करप्रकाशेन आश्रमतरुषु पतन्तः शलभचया इव चकाशिरे। घोटकघटानां हेषानिनादाः ध्वनिप्रति-ध्वनिभिर्वनप्रान्तराणि निनादयन्तो वियदन्तरालान्यावृण्वन्त आश्रमपदं प्रवेष्टुमारभन्त। सर्वानितानुत्पातानवलोक्य दुष्यन्तेन विचारितम्-

"मामन्वेषमाणा सेनाऽऽश्रमं प्रत्यागच्छति। कदाचिन्मे सैनिकास्तपोवनं प्रविश्य शान्तिभङ्गं कुर्युः गुरुकुलवासिनश्च बाधेरन्निति विचार्य मालिनीपारे तपोवनस्याविदूर एव सैनिकान् प्रतिरोद्धुं कृतनिश्चयोऽसौ कोलाहलाकर्णनेन भयसम्भ्रमितास्तास्तापसकन्यकाः बभाषे-

"अधुना तु मया प्रस्थानीयमेव। सायंसमये सम्प्रवृत्ते सूर्योऽस्ताचलसमारूढः संलक्ष्यते। तमसः प्रसरणकालः सन्निकटमेव समायातः। प्रतीयते सहयायिनो मे राजकर्मचारिणः सैनिकाश्च मामन्वेषमाणाः मालिनीसरित्पारं समायाताः। कदाचिदिदमाश्रमपदं प्रविश्य तपोवनवासिनः पीडयेयुः शान्तिभङ्गं वा कुर्युरित्यहं तत्रैव गत्वा तान् प्रतिरुणध्मि। कुलपतिदर्शनाकांक्षी सन्नप्यहं तस्मात् सौभाग्याद् वञ्चितो महतीं पीडामनुभवामि। तथापि तत्रभवतां कण्वमहोदयानां दर्शनैरात्मानं पावयितुमहं पुनः शीघ्रमेवाऽऽगमिष्यामि"।

एतच्छ्रुत्वाऽनसूयया प्रोक्तम्-

"आर्य! अकृतयथोचितातिथिसत्कारास्तिस्रोऽपि वयमतितरां त्रपाभाजनानि सञ्जातानि। लज्जामहे च पुनः प्रेक्षणनिमित्तं भवन्तमामन्त्रयितुम्। तथापि गच्छतु भवान् पुनर्दर्शनाय ? कुलपतिः कण्वस्त्वागामिनि दिवसे प्रातःकाल एव समागमिष्यतीति सम्भाव्यते। सूर्यास्तङ्गमनवेलायां सञ्जातायां घनीभूततमसावृते गहनतरुलताक्षुपवल्लरीकण्टकाकीर्णवनमार्गे भवतो हस्तिनापुरयात्रा न सम्भवा। निशामिमामपनयतु भवानत्रैव मालिनीतीरवर्तिनि सैकतप्रदेशे संस्थापिते शिविरे विश्रम्य। मध्याह्नसमयं यावन्निवृत्तदैनिककृत्यस्य कुलपतेः दर्शनानि सम्भविष्यन्ति। आगच्छतु भवान्निश्चयेन। श्वस्तपोवनं समागताय भवते यथोचितामतिथिसत्क्रियां सम्पाद्य वयमपि निर्गत-

शङ्कुव्यथाहृदया: परमप्रसन्नताशालिन्यो भविष्याम: ।"

"नैवं नैवम् । नैवं कथनीयं भवतीभि: । भवतीनां दर्शनेन वाङ्माधुर्येण च कृतार्थ: कृतातिथ्योऽस्मि । तथाऽप्यहं भवतीनां शासनमङ्गीकृत्यात्रैव मालिनीतीरवर्तिनि सैकतप्रदेशे संस्थापिते शिविरे रजन्यां विश्रम्य पुन: कुलपतिदर्शनाय प्रयतिष्ये ।"

वचनमेतत् प्रोच्चार्य दुष्यन्त: पुनस्तथैव तपोवनवाटिकावृतिमुल्लंघ्य मालिनीतीराभिमुखो बभूव । साभिलाषं पश्यन्तीषु तापसबालासु साभिलाषं दृशं निपात्य मन्दं मन्दं गच्छन् स धर्माधिकारी कतिपयैरेव क्षणैस्तरुराजिष्वन्तर्हितो ऽनयनागोचरताङ्गत: ।

सरित्तीरमुपगतवति दुष्यन्तेऽस्ताचलशिखरमारूढ: सविता पश्चिमाकूपारापारपयसि निमङ्क्तुमिवाऽऽत्मानं तत्परोऽवालोक्यत । अस्तोन्मुखरश्मिमालिनो रक्तिमरश्मिसहस्रै: पश्चिमदिङ्मण्डलमतिताम्रवर्णतां प्रपेदे । सकलं दिवसं यावद् व्योममण्डलस्याधिपत्यमुपभुज्य सकलं च जगद् दीप्तिमता प्रकाशेनोपकृत्य दिवसावसाने प्रकृतिपरिणाममिवालोकयन् भगवान् भास्करो निर्वेदमापन्नो यतिरिव काषायवस्त्राणि धारयन्नस्तंगिरिगुहासु तपस्तप्तुकाम इवालक्ष्यत ।

रविरश्मय: शनै: शनै: मालिन्या: निर्मलसलिलरश्मिषु झिलमिलायमाना: चाञ्चल्यभावमवलम्ब्य जलक्रीडाकौतुकव्यसनिन: कल्लोलमिवापादयन् । अवलोकयितॄणां दृक्षु कुतूहलमुत्पादयन् अवरक्तमण्डलाकारो विवस्वानसंख्यसंख्यासु जललहरीषु प्रतिबिम्बमानोऽसंख्यसंख्यतामिवाभजत । तपर्तुसकलदिवसतीक्ष्णसन्तापव्याकुल इव तिग्मदीधिति: दीर्घयात्रापरिश्रान्त इव तस्मिन् सलिले निमज्ज्य श्रमविनोदमिव कर्तुमुद्यतो बभूव । रक्ताभेन पश्चिमदिक्क्षितिजेन निखिलमपि भुवनं रक्तवर्णेन रञ्जितम् ।

तपोवनोपवनोपवृतिमुल्लंघ्य नदीतीरमुपायान्तं सम्राजमवलोक्य सारथि: सत्त्वरमेव स्यन्दनं सैन्धवैरायोजितवान् । एतावत्कालपर्यन्तं मालिन्या: निर्मलशीतलाम्भसि पुन: पुन: परिलुठ्य सरित्तीरवर्तिनो वनप्रदेशस्य मृदुहरितशष्पाण्युपभुज्य सप्तयोऽपि विगतक्लान्तिश्रमा: रथं वोढुं सज्जा अभूवन् । तीरसमीपमागत्य दुष्यन्तो गण्डूषमात्रं जलमाचम्य राजकीयचिह्नानि

च पुनः सन्धार्य रथमारुरोह। सूतेन प्रचोदिताः वाजिनोऽपि मन्दगत्या मालिनीप्रवाहमुत्तीर्य परे पारे समवेतस्य महीपतेः सैन्यस्य मध्ये रथमानिन्युः।

दुष्यन्तं सम्राजं रथारूढमायान्तमवलोक्य प्रहर्षोत्साहभरेण तत्सैन्यमान्दोलितम्बभूव। तारस्वरेण सम्राजो जयघोषणां विदधतां सैनिकानां स जयध्वनिः सर्वा अपि दिश आपूर्य मालिनीप्रवाहमुल्लंघ्य आम्रोद्यानमागत्य वाटिकायां विहरन्तीनां कन्यकानां कर्णकुहराणि प्रविष्टः। परमौत्सुक्याक्रान्तहृदयास्तास्त्वरितं धावन्त्यो नदीतटसमीपं तपोवनसीमनि तटबन्धे स्थिरीभूताः। रत्नमण्डितस्वर्णकिरीटं सायंतनसूर्यरक्तिमरश्मिषु झिलमिलायमानं शिरसि धारयन्तं तं दीप्तिमदुज्ज्वलाननं धर्माधिकारिणं परिस्फुरता राजकीयध्वजेन शोभमानं रथं समारुह्य सैन्यमध्ये प्रविशन्तमवलोक्य ताः निष्कम्पाः निश्चलाः निश्चेष्टाश्च स्तब्धा इव बभूवुः। तैरवलोकितम्-

"मालिन्याः परे पारे पंक्तिषु व्यवस्थितानां शतशः सैनिकानां मध्ये स्यन्दनाधिरूढोऽसौ धर्माधिकारी अत्युज्ज्वलमणिजटितस्वर्णाद्यलङ्कारविभूषितो रत्नजटितकनककिरीटशोभमानमूर्धा सैनिकानामभिवादनानि वामेतरं हस्तमुद्यम्याङ्गीकरोति। तारस्वरेणोच्चारिताः सैनिकानां जयघोषणाध्वनयः ढक्काभेरीपटहादिसैन्यवाद्यानां वादनकोलाहलैः सम्मिश्रिताः वनतरुराजिभिः निकटवर्तिगिरिशृंखलाभिश्च संघट्टनं प्राप्य प्रतिध्वनिरूपेण द्विगुणिताः मुखरिताः भवन्ति"।

आश्चर्येण, उद्वेगेन, प्रहर्षेण कुतूहलेन च विह्वलहृदयानां तासां कन्यकानां गात्रेषु रोमोद्गमः सकम्पं प्रस्फुरितो बभूव। तपोवनसमागत-स्तासामतिथिस्तु न सामान्यो राजकर्मचारी, अपितु स्वयमस्य देशस्य शासकश्चक्रवर्ती दुष्यन्त एवेति तथ्यं स्वयमेवोद्घाटितं भवति। तस्य शौर्य-पराक्रम-राजनीतिकुशलता-विद्वत्ता-प्रजावत्सलतादिगुणानां कीर्तिः दिग्दिगन्तानुल्लंघ्य त्रिभुवनमाच्छादयति। सामान्यजन इवासौ ताभिः सह विनोदवार्तासु विनोदञ्चकार। ता अपि तं जनं सामान्यं राजकर्मचारिणं मत्वा हास-परिहासपराः समभवन्। ताभिरातिथ्येनापि न स यथोचितरूपेण सभाजितः। तासां धाष्ट्र्यं वा चाञ्चल्यं वा विचार्य स चक्रवर्ती न जाने किं विचारयति। श्वः कुलपतिं प्रणन्तुं समायाते तस्मिन् तत्रभवति सम्राजि......।

कतिपयक्षणं यावत्तास्तथैव नानाविधभावैश्चेतःस्वान्दोल्यमानाः जडीभूताः

स्थिता:। तदनन्तरं तासु तथा पश्यन्तीषु सतीष्वेव दिवाकरस्य लोहिताभमण्डलमस्तङ्गिरिशिखरस्य परे पारे पश्चिमदिशि कस्मिंश्चिदपि अकूपारापारपयसि निममज्ज। सन्ध्याकालीनो लघुप्रकाशोऽपि त्वरितगत्या समुपसर्पन्त्या: निशाया: श्यामिकायां विलयं गत:। दीर्घ सोष्णं च नि:श्वस्य ता: गहनतिमिरभयाकुलितचित्ता: स्वकुटीराभिमुख्य: सञ्जाता:।

शकुन्तलाया: मनोदशा त्वनिर्वचनीया बभूव। मनस्येव सा सकलामेव परिस्थितिं विचारयामास। सहसैव काचिदतितीव्रा शूलंकरा वेदना तस्य हृदयं करपत्रेणेव विच्छेदयन्ती वक्षसो वामपार्श्वे समुद्भूय सकलान्यङ्गानि सम्पीडयामास। द्वाभ्यामपि मृदुकिसलयकरतलाभ्यां वक्ष:स्थलं सम्पीड्य तया दीर्घोष्णोच्छ्वाससमुद्गमनानि केनापि प्रकारेण नियन्त्रितानि। एकमपि शब्दं स्ववदनादनुच्चारयन्ती सा निस्तब्धभावेन पदानि निदधती स्वकुटीरं प्रति प्रस्थिता। प्रियंवदाऽनसूये चापि शकुन्तलाया: हृदयगतान् भावान् संलक्षयन्त्यौ तूष्णीमेव सखीमनुसरन्त्यौ कुटीराभिमुख्यौ बभूवतु:।

(६)

दुष्यन्तस्य रथ: सैन्यस्य मध्यं सम्प्राप्य स्थिरताङ्गत:। पङ्क्तिबद्धस्थितानां जयजयध्वनिभिर्वियदपि निनादयतां सैनिकानामभिवादनानि स्वीकुर्वन् दुष्यन्त: प्रतीक्षाव्यग्रं समादेशपालनसमुत्सुकं सेनापतिं रैवतकं ददर्श। पश्चिमे दिग्विभागे क्षितिजे भूमिस्पर्शमवाप्य युद्धे पराजितसैनिक इव त्रपासमाकुलहृदयो विभाकरो धरायां गर्तं प्राप्य निमङ्क्तुं प्रारेभे। सत्वरं समायान्ती रजनी तिमिररूपश्यामलेनावरणेन भुवनमाच्छादयितुं सन्नद्धा बभूव। निशान्धकारसाम्राज्यसंस्थापनं यावद्धस्तिनापुरसमासादनसम्भावना नोपलक्ष्यते स्म। किं करणीयं भविष्यति – हस्तिनापुरनिवर्तनं वा मालिनीसैकततीरेऽत्रैव शिविरस्यायोजनं वेति द्वन्द्वभावसमाकुलां सोत्सुकां दृशं सम्राज आनने निपातयन्तं विनयभावं प्रकटयन्तं सेनापतिं रैवतकं शकुन्तलानिहितहृदयो दुष्यन्त: प्रोवाच–

"सेनापते ! अत्रैव मालिनीधारामुल्लंघ्य परे पारे कुलपतेरादरणीयस्य कण्वस्य तपोवनं वर्तते। तत्रभवतश्चरणवन्दनाय समागतोऽहमसफलप्रयास: प्रत्यायात:। केनचिदपि हेतुना प्रवासं गतोऽसौ सम्भवत: प्रातरेव निवर्तिष्यते।

अत्रागत्य, कुलपतेः दर्शनमकृत्वा तस्मै च प्रणामाञ्जलीन् न समर्प्य हस्तिनापुरनिवर्तनं न मे रोचते। अशोभनमेवैतद् भविष्यति। श्वः प्रातःकाल एवाहं कुलपतेः दर्शनायाश्रमं गन्तास्मि। तस्य प्रसादञ्च गृहीत्वा गृहप्रत्यावर्तनं श्रेयः। भवता तु सैन्यशिविरसन्निवेशोऽत्रैव करणीयः। सैनिकाश्च समादेष्टव्याः, यत् ते कथमपि कोलाहलं न कुर्वन्तु। आश्रमनिकटवर्तिप्रदेशेषु समुत्पन्नः कोलाहलोपद्रवस्तत्र निवासिनां तपस्विनां छात्राणाञ्च नियमपालनेषु व्याघातं जनयति। अथ च स शान्तिभङ्गस्य हेतुर्जायते।

सम्राज आदेशास्तत्क्षणमेव परिपालिताः। मालिन्यास्तटवर्तिसमतलसैकतप्रदेशेषु सैन्यशिविराणि सन्निवेशितानि। सघनतरुक्षुपवल्लरीलतासमवाकीर्णे वनप्रान्तरे सरित्तीरबालुकायां धवलपटगृहाणामनुपमं नगरमिवादृश्यत। घनीभूते तमसि तद्धवलप्रभायुतं नगरं नीलाकाशे विद्योतमानामाकाशङ्गामप्यतिशयानमलक्ष्यत। कृतेऽपि महति प्रयासे सैनिकानां मन्दमन्दवार्तालापानां प्रमोदहर्षध्वनयो मालिनीप्रवाहमतिक्रम्य तपोवननिवासिनां श्रोत्राणां गोचरीभूताः। गुरुकुलस्यानेके छात्राः कुतूहलाक्रान्तहृदयाः मालिनीतटं समागत्य सघनान्धकारेऽपि तच्छिविरावलोकनप्रयासांश्चक्रिरे।

शकुन्तलायाः दर्शनं समालभ्य दुष्यन्तस्य हृदयमनिर्वचनीयैर्भावैर्विह्वलतामवाप। सा तापसबाला विश्वविधातुरनुपमा सर्वसौन्दर्यसारसमुच्चयेन विरचिताऽतिकमनीया रचना प्रतीयाय। गहनेन प्रणयावेगेन दुष्यन्तस्य हृदयमालोडित्तम्। जननान्तरसौहृदं नियतमीदृशमेव भवति। जन्मजन्मान्तरपरिचितेव सा दुष्यन्तस्य सकलान्येव गात्राणि परिव्याप्य हृदयरञ्जना सत्यात्मनि प्रविष्टा। इन्द्रियाणि मनश्च नियन्तुं प्रयतमानोऽपि दुष्यन्तो न शशाकाऽऽत्मानं प्रतिरोद्धुम्। पौनःपुन्येन दुष्टमातङ्ग इव मनस्तस्यामेव द्रिशि प्रवर्तते। किमपि न रुरुचे तस्मै। सेनापतेरनुरोधेनानिच्छन्नप्यसौ स्वल्पमेवाहारमुपभुज्य विश्रामाय निर्धारितं पटशिविरकक्षं प्रविवेश। सर्वेषामेव जनानां प्रवेशं तत्र निषिध्य शकुन्तलामेव चिन्तयन् तद्गतमानसः शय्यायां शयालुर्निविष्टः। परं शकुन्तलागतहृदयं तं मानिनी नायिकेव सपत्नीजन्येर्ष्ययेव रुष्टा निद्रा परितत्याज। शकुन्तलाविस्मरणाभिलाषोऽप्यसौ सम्मिलनाभिलाषोऽवर्तत।

निशीथिन्याः निशीथसमयोऽतिक्रान्तः। सर्वतो गहना नीरवता निस्तब्धता च परिव्याप्ता। सम्राजो दुष्यन्तस्य सैनिकाः सकलदिवसश्रम-परिश्रान्ताः स्वस्वनिर्दिष्टशिविरकक्षेषु शयानाः जनन्या इव निद्रादेव्याः सुखदायिनि क्रोडे शिशव इव निविष्टाः सुखं स्वपन्ति स्म। कदाचित् परितो रक्षायै परिभ्रमतां रक्षापुरुषाणां जागरूकतासङ्केतिनस्तीक्ष्णाः निनादाः सर्वासु दिक्षु प्रसरन्तो नीरवतां भिन्दन्तो दुष्यन्तस्य कर्णकुहरगताः भवन्ति। ध्यानावहितमनसा तेन श्रुतं यद् वनप्रदेशान् गुञ्जरितान् कुर्वन्तो झिल्ली-झङ्कृतिमधुरध्वनयो वायुमण्डलं व्याप्नुवन्ति। अपरं भूयसा ध्यानावहिते तस्मिन् मन्दगत्या प्रवहन्त्याः मालिन्याः मन्दकलकलध्वनिः शुश्रुवे। झङ्कृतिध्वनिना सम्भूय सोऽतिनोहारी हृदयावर्जकश्च प्रतीयाय। कदाचित्तु मध्ये मध्ये वन्यहिंस्रमांसभोजिनां जन्तूनां भीरूणां भयप्रदानि घोराणि गर्जनानि नीरवतां खण्डशः कृत्वा दिगन्तान् निनादयन्ति। तासां मध्ये भोजनाय व्यापाद्यमानानां निर्बलमृगाणां चीत्कृतिध्वनयोऽपि श्रूयन्ते।

दुष्यन्तस्तु प्रयतमानोऽपि निद्रां नाधिजगाम। स्वामिनो हृदये निविष्टा शकुन्तला सपत्नीति जानन्ती न जाने सा किमीर्ष्ययेव तिरोहिता। यस्मिन् हृदयेऽनुपमसौन्दर्यशालिनी नवयौवनेन चाराध्यमाना शकुन्तला निवसति, तत्र निद्रायाः प्रयोजनं किम्? पार्थिवन सौन्दर्येण सम्मिश्रितेन दिव्यलावण्येन सुशोभितायाः अनुपमनैसर्गिकसौरभसम्पन्नायास्तस्यास्तापसबालायास्तन्वी कान्तिमती देहयष्टिर्हृदयें विराजमानाऽपि पुनः पुनः साकाररूपं प्रपद्य विद्युल्लतेव दीप्यमाना दुष्यन्तस्य समक्षं समुपस्थिता हृदयमुन्मथ्नन्ती विह्वलयति स्म। मधुकरोत्पातेन पीड्यमाना, हस्तपादं च व्याधुन्वती, इतस्ततो धावन्ती सा शकुन्तला विविधमुद्राभिस्तस्य चित्तं विध्यति स्म। विस्रम्भसंलपितेषु पुनः प्रच्छन्नरूपेण व्याजेन च केनचिन्निपातिताः शकुन्तलायाः दृष्टिपाताः नयनयोः सम्मिलने च लज्जया वदनस्यावनमनानि परिवर्तनानि च तस्य वराकस्य प्रणयपथप्रवर्तितस्य हृदयेऽनिर्वचनीयपीडया सम्मिश्रितं मधुरं सुखं सञ्चारयन्ति स्म।

सप्तपर्णवेदिकासमुपविष्टेन दुष्यन्तेन समन्तापसबालानां सखीनामति-शयस्नेहसंलपितेषु कामिन्याः शकुन्तलायाश्चेष्टितानि दुष्यन्तं प्रति प्रणयानुरागकामनामभिव्यञ्जयन्ति स्म। प्रियंवदां प्रति कृत्रिमरोषप्रदर्शनम्,

अनिच्छन्त्या अपि सहसैवोत्थाय प्रस्थानं, कानिचिदेव पदानि गत्वा कण्टकवेधनापदेशेन भूमावुपवेशनं, प्रच्छन्नकटाक्षैश्चाननं वारं वारं परिवर्त्य दुष्यन्तं निरीक्ष्याविद्धस्यापि कण्टकस्य समुद्धरणं, कण्टकस्तम्बविटपेष्वसक्तस्यापि वल्कलवस्त्रस्य व्यासज्जनप्रदर्शनमित्येते सकला एव प्रसङ्गाः निसर्ग-सौन्दर्यशालिन्याः प्रणयानुरागानुरञ्जितस्य मनसोऽवस्थां सूचयन्तो दुष्यन्तस्य विश्वासं द्रढयन्ति स्म। प्रस्थानकाले "मा गम्यतां मा गम्यता" मिति शकुन्तलायाः नयनयोर्निहितभावाः, सरिदुत्तरणसमये तस्या आश्रमस्य तटबन्धे स्थानं, निराशीभूय च सकरुणदृष्टिपातं निवर्तनं, सर्व एवैते व्यापाराः स्मृतिपथमवतीर्णाः दुष्यन्तचित्तमतिशयेनाशान्तमनसं विह्वलं विक्षुब्धं कातरभावापन्नमपि च केनचिदप्यविश्वसनीयेन विश्वासेन समाक्रान्तञ्चक्रुः।

दुष्यन्तस्तु शकुन्तलाहेतोस्तथा विह्वलमानसः शय्यायां नाधिकं स्वपितुं शशाक। प्रचण्डझञ्झावेगातिशायिनो हृदये समुच्छलन्त आवेगास्तमुत्थानाय बाधितञ्चक्रुः। शयनात् समुत्थाय विह्वलविक्षुब्धहृदयः स कतिपयक्षणं यावच्छयनकक्ष एव परिबभ्राम। तदनन्तरमसौ बहिरायातः। प्रहरिणः सुरक्षासैनिकास्तु निशीथे सम्राजमेवंप्रकारेण शयनकक्षाद् बहिरायान्तमवलोक्य सम्भ्रान्ताः स्तब्धाश्च भूत्वा सावधानतया पङ्क्तिबद्धरूपेण स्थित्वा शिरांस्यवनमय्य प्रणम्य आदेशं प्रतीक्षमाणास्तस्थुः। दुष्यन्तस्तु तान् मन्दस्वरेण जगाद-

"यूयं सर्वेऽत्रैव शिविरसुरक्षाहेतोः सावधानतया परिभ्रमत। अहन्तु नद्यास्तटमुपगम्य तत्रैव स्थित्वा कतिपयक्षणान् यावन्मनो विनोदयामि। न कश्चिदपि मामनुसरतु।"

एवमादिश्य प्रहरिणश्च तत्रैव प्रतिरुध्य दुष्यन्तो मालिनीतीरमुपागमत्। तत्र तटवर्तिन्यां समतलप्रस्तरशिलायामेकस्यां निषण्णश्चरणौ धारायाः स्वच्छसुशीतलसलिले विनिवेशयामास। प्रवहता मन्दसमीरणेन तपोवनतरुलताविटपसंलग्नकुसुमसौरभापहारिणा सरित्सलिलं दुष्यन्तस्य च हृदयं सममेव समाक्रान्तम्।

आसीदियं तिथिः कृष्णपक्षस्याष्टमी। गगनविहारी हरिणलाञ्छनो वियन्मध्यमलङ्करोति स्म। कनकमयैरेवाविरलैरंशुपटलैः सरित्तीरवर्तिनी सैकतभूमिः कनकद्रवैरभिषिक्तेवादीप्यत। कौमुदीसंलिप्तो दीप्यमानो मालिन्याः

न्दधारायाः निर्मलशीतलाम्भसां राशिरुच्छलन्तीभिर्लहरीभिः सकलमेव तत्कनकद्रवं समग्रेणैव समाजहार। स्वकीयैः प्रियरश्मिभिः सार्द्धं सरित्सलिले निमज्ज़ोन्मज्जनं कुर्वन्, क्रीडन्, विहसन् रजनीपतिः दुष्यन्तमपि जलक्रीडायै निमन्त्रयामास। तस्मिन्नेव काले दुष्यन्तस्य दृग्गगनं प्रत्युद्गता। इतस्तु धरायामेकः शशी नद्याः लहरीषु क्रीडति, अमुतश्च सुदूरे नीलगगने द्वितीयश्चन्द्रो ज्योतिषां मध्ये विहसति। दुष्यन्तेन विचारितम्-

"श्यामवर्णा निशा प्रियतमाङ्करूपे निशापतिवक्षसि गाढं समाश्लिष्टा तदालिङ्गनसुखमास्वादयन्ती शान्तभावेन निश्चिन्तं स्वपिति।"

अस्मिन्नेव समये मालिन्याः प्रशान्तसलिले कुत्रचिद् बुद्बुदा इव समुद्भूतास्तत्क्षणमेव प्रशान्ततां याताः। सम्भवतः केनचिन्मत्स्येन जलान्मुखमुन्नमय्य पुनस्तथैव सलिले निमग्नम्। सुदूरवर्तिनि तटप्रदेशे छप्छपेति विक्षेपध्वनिः समुदितः। कदाचित्कोऽपि कच्छपोऽम्भसि कूर्दितः स्यात्। सुदूराणि वनप्रान्तराणि केकिनां केकाध्वनिभिर्निनादितानि। परे पारे महर्षेः कण्वस्य तपोवनस्याम्रोद्याने पिकानां मृदुमधुरकुहूरवाः दीर्घं मार्गमुल्लंघ्य दुष्यन्तस्य हृदयमुन्मथ्नन्तस्तस्य कर्णेषु पीयूषधारामिव प्राच्यावयन्। विप्रकृष्टान्तरालाच्चक्रवाकप्रियायाः विरहार्तध्वनिः वारं वारं दुष्यन्तस्य चित्तं व्यथयितुं प्रवृत्तः। सहसा दुष्यन्तस्य दृष्टिः सरितः परे पारे आम्रोद्याने निपतिता। विस्मयोद्वेगोत्तेजनानन्दहर्षादिभावैः सम्पूरितमनाः समुच्छलद्धृदयगतिरसौ जडीभूत इव स्तम्भित इव निभृतनिश्चलसकलेन्द्रियव्यापार इव बभूव। दुष्यन्तेनावलोकितम्-

तपोवनतटबन्धवृतिद्वारमुल्लंघ्य आम्रोद्यानान्निर्गत्य द्वे आकृती मालिनीतीरमभिवर्तेते। निश्चयेन ते तापसकन्यके एव स्तः। किञ्चिदग्रे समागत्यैकयाऽऽकृत्या स्ववदनमुन्नामितम्। अष्टमीचन्द्रिकायामालोकितमिव तत्। चन्द्रकान्तमणिमिव प्रविशतो निशाकरस्य रश्मीनां कान्तिर्द्विगुणिता बभूव।

दुष्यन्तस्य हृदयमावेगेनोत्तेजनेन च वेगेन परिपस्पन्दे। इयं तु शकुन्तलैवासीत्। दुष्यन्तस्य भालपट्टं प्रस्वेदसलिलकणैर्निचितम्। श्वासोऽपि प्रमाणाधिको बभूव। द्वाभ्यामेव कराभ्यां वक्षःस्थलं दृढं पीडयित्वाऽसौ कथमपि हृदयमुद्वेलयन्तमावेगं प्रशान्ततामनयत्।

शकुन्तलायास्तस्याश्च सहगामिन्याः सख्याः सम्भवतो दुष्यन्तो न दृष्टिपथमागतः। न कश्चिदपि जनो विलोकयत इति विगतचिन्ते एवावर्तेताम्। अग्रेसरीभूय सख्या सह शकुन्तला सरित्तीरं समुपागता। एकस्मिन् स्थाने सुविशाला महती समतलप्रस्तरशिला तटवर्तिसैकतप्रदेशं विभिद्य सुदूरं यावन्नदीनीरेऽर्द्धनिमग्ना समलक्ष्यत। शिलामधिरुह्य द्वाभ्यामेव ताभ्यां चरणयुगले मालिनीनीरे निक्षिप्ते। सख्या सार्द्धं मुखमवनमय्य शकुन्तला सरित्तरङ्गसन्दोहं वामेतरकराङ्गुलीभिः कङ्कयितुमिव प्रवृत्ता। परस्परं च ताभ्यां संलपितुमारब्धम्। स्वरस्य मन्दत्वाद् विप्रकृष्टान्तरालत्वाज्जलधारायाः कलकलनिनादत्वाच्च महता प्रयासेन श्रवणसमुत्सुकदत्तकर्णोऽप्यसौ दुष्यन्तो न तयोर्वार्तावचसामाकर्णने साफल्यमवाप।

शकुन्तलां नातिदूरवर्तिनीं नदीपारस्थितां शिलामास्थितां निरीक्ष्य दुष्यन्तो हृदयमुपस्तम्भयितुमसमर्थ एवाभवत्। कृष्णपक्षस्याष्टम्याञ्चन्द्रमसो रश्मिभिः प्रकाशमानं तस्या आननमतिकान्तिमच्चकाशच्च त्रिभुवनेऽपि सुन्दरतमा चित्ताकर्षिका सा विभूतिरिव प्रतिभाति स्म। मनसि तेनानुभूतम्-

"तया सह न जानेऽनन्तकालजन्मजन्मान्तरपरिचयमसौ धारयति। इयमेव सा सङ्गिनी, यस्या अन्वेषणाय स संख्यातीतेषु जन्मस्वेवं परिभ्रमन्नस्ति। तां विना स अपूर्ण एव खण्डितहृदय एव।"

इयं शकुन्तला तु तस्य निजस्यैवात्मा। इयन्तस्य शरीराङ्गानामिन्द्रियाणां वांऽशधारिणी। इयन्तस्य जीवनस्य परिपूर्णता। दुष्यन्तस्य हृदयमशान्तं व्याकुलं विह्वलञ्च बभूव। निजगात्राणि समुत्थापयितुं प्रयतमानोऽप्यसौ विवश इव तत्रैव स्थितः। मनस्तु शकुन्तलामुपगम्य परिक्रान्तुमारेभे, परं शरीरं तत्रैव स्थिरीभूतम्। तथापि महता प्रयासेन कष्टेन परिश्रमेण च समुत्थितोऽसौ शनैः शनैः सैकततट एव पदचारणमकरोत्। कदाचिदिमे तापसकन्यकेऽसमये समागतं तमन्यथा सम्भावयेतामिति मालिनीपारगमनाय नितरां समुत्सुकोऽप्यसौ तत्र गन्तुं न साहसमकरोत्।

किञ्चित्कालं यावदेषा विचारसरणी दुष्यन्तस्य मन आन्दोलितं विधायालोडयामास। परमाकुलता तु धैर्यं विजिग्ये। सुदूरं यावत्स सरित्प्रवाहमानुकूल्येन गतः। एकस्मिन् समतलस्थले नद्याः धारा विस्तृता भूत्वाऽल्पगाधाऽवर्तत। गुल्फदध्नमेव तत्र जलमासीत्। कदाचित्त-

योस्तापसकन्यकयोर्विस्रम्भजल्पितानि सविघ्नानि भवेयुरिति मन्दं मन्दं पदानि विन्यसता, कथमपि चरणनिक्षेपध्वनिं परिहरता तेन नदीधारा समुत्तीर्णा। तदनन्तरं निःशब्दमेव तस्यां दिशि प्रतस्थे, यत्र ते बालिके शिलातले समुपविष्टे निःशङ्कभावेन मिथो विस्रम्भसञ्जल्पितेषु निमग्ने स्तः।

(७)

मालिनीतीरे सुदूरं यावज्जलाभ्यन्तःप्रविष्टायां यस्यां शिलायां शकुन्तला स्वसख्या सार्द्धं समुपविष्टा मन्दस्वरेण वार्तालापेषु निमग्ना, तस्याः पृष्ठभाग एव सैकतप्रदेशे शरकाण्डगुल्ममेकं, लतामण्डपाकारं सुशोभितमासीत्। ईषन्नीलवर्णशरकाण्डेषु शोभमानाः धवलकुसुममञ्जर्यो निशीथिनीनाथरश्मिभिः प्रसारितया स्वर्णकान्तिमत्या कौमुद्याऽभिषिक्ताः स्वर्णद्रवेणार्द्रा इव प्रतिभासन्ते स्म। दुष्यन्तस्तु निःशब्दं निभृतञ्च तच्छरकाण्डगुल्मं प्रविश्य निलीय तत्रोपविष्टः। अतिसमीपवर्तित्वादत्र द्वयोरेव सख्योर्विस्रम्भसंजल्पध्वनयः श्रूयन्ते स्म। निभृतान्येन्द्रियव्यापारः स हस्तिनापुरशासकः प्रणयोत्कण्ठितचित्तः कुतूहलविस्मयाक्रान्तहृदयस्तयोः सञ्जल्पान् श्रोतुं प्रवृत्तः। स्वरेण तेनावगतं यच्छकुन्तलया सह तस्याः सखी अनसूया वर्तते। तयोरेवंविधाः संलापाः समभूवन्-

अनसूया-"सखि ! शकुन्तले ! किमिवेदं तव सञ्जातम् ? केन हेतुना तवेयमत्युद्विग्नता विकलता च ? न त्वं स्वयं स्वपिषि न च सखीजननिद्रां सहसे। तव हृदयस्येदं वैकल्यमनुभूयाहमप्यतिशयं विकला सञ्जाता। निशीथिन्याः निशीथसमयो व्यतीतः। शिवशेखरोऽपि शशी वियन्मध्यमाक्रम्य प्रतीचीदिशं गन्तुमुत्सुकः संलक्ष्यते। कुटीरान्निर्गतयोरावयोर्महान् कालातिपातः सञ्जातः। आर्या गौतमी यदि प्रबुध्यावामपश्यन्ती अन्वेषयन्ती चेतः समागच्छेन्नजाने सा किं चिन्तयिष्यति? प्रश्नपरम्पराभिरावयोरवस्था कीदृशी भविष्यति" ?

शकुन्तला- "सखि अनसूये ! त्वमेवोपदिश, किमहं करवाणि? स्वयमेवाहमवगन्तुमक्षमा, किं मे जातमिति? सायंवेलानन्तरमेव मनसो हृदयस्येन्द्रियाणाञ्चानिर्वचनीया दशा वर्तते।

काचिदवर्णनीयरूपा वह्निशिखा वपुषि सन्तापं जनयन्ती दहति मामाचूडपादम्। मम वक्षस्तु क्रकचैर्विदीर्यत इव। व्योम्नि प्रकाशमानस्य रजनीपतेर्हिमगर्भरश्मयोऽपि मया प्रचण्डानलज्वाला इव समनुभूयन्ते।"

अनसूया-"अहं त्वरण्यवासिनी तापसकन्यका कथमवगन्तुं बोद्धुं वा समर्था एतादृशानुपद्रवान् ? न च मया कदाचिदपि श्रुतमनुभूतं वा यच्चन्द्रमसो हिमगर्भरश्मयोऽनलज्वाला: भूत्वा वपूंषि दहन्ति। तथापि मया काव्येषु नाटकेषु वाऽधीतं यन्मनोमोहकं युवानमवलोक्य सतृष्णकामोत्पीडितासु युवतिषु विकारा एतादृशा: समुत्पद्यन्ते। मध्याह्नोत्तरवेलायान्तस्य धर्माधिकारिणो, न हि न हि सम्राजो हस्तिनापुराधिपस्य समागमनकालपर्यन्तं तु त्वं सर्वथैव स्वस्थशरीरा स्वस्थचित्ता चाऽवर्तेथा:। सत्यं वद, कदाचित्तमवलोक्य सुरूपं मन्मथदत्तप्रहारायास्तवैतादृशी दशा सम्भवेत्?"

शकुन्तला-"(लज्जामभिनीय नयने चावनमय्य) सखि! त्वमेव कथय। किमहं कथयानि किञ्चाहं करवाणि? मध्याह्नकालं यावत्तु सर्वथैव स्वस्थशरीरा स्वस्थचित्ता चाऽहमभवम्। परन्तु यदारभ्य मम अधन्यतया मया स.......।

अनसूया-" सखि! अवगतं मया वृत्तान्तजातम्। यदारभ्य त्वया स धर्माधिकारी, न हि न हि राजा अवलोकितस्तदारभ्यैव तवेयमीदृशी दशा संवृत्ता। मनस्येव त्वं राजानं तं कामयसे। तस्मै स्पृहयसि। किन्तु विचारणीयमप्यत्र। किमेतत् सम्भाव्यते ? किं स त्वया वरयितुं शक्यते ? काऽपि सम्भावना परिणयस्य? क्व त्वसौ महतां कुरुजनपदानां सम्राट् महांश्चक्रवर्ती पौरवंवंशीय:, क्व च त्वमेकस्य तपोवननिवासिनस्तपसि सततं वर्तमानस्य तपस्विन: सुता। कुत: परिपोषमेष्यति तेऽभिलाष: ? शशविषाणमपि क्वचिल्लभ्यते?"

शकुन्तला- "अनसूये ! सत्यमभिधीयते त्वया। अहन्त्वाजन्मनो दुर्भाग्यशालिनी भाग्यहीना वा वर्ते। प्रसवसमकालमेव पितरौ मां परित्यज्य हिंस्रजन्तुसमाकुलेऽरण्ये, विधाय च नरमांसलोलुपानां श्वापदानामाहारं प्रस्थितौ। एकेन तपस्विना करुणार्द्रचित्तेनाऽहं

तपोवनेषु पालिता पोषिता च। क्व चाहं भाग्यरहिता मातृपितृपरित्यक्ता तपोवनेषु पालिता वराकी तपस्विकन्यका, क्व चासौ महतां कुरुजनपदानां स्वामी महांश्चक्रवर्ती सम्राट् पौरववंशीयो दुष्यन्तः? तस्य वरणाभिलाषो मे मध्याकाशे दीप्यमानस्य शिवशिरोभूषणस्य निशापतेः करयोर्ग्रहणमिव। तेन सह कुत्र मे संयोगसम्भावना ? तथापि मनस्तु मन एव। न कथमपि तस्य चञ्चलस्य प्रमाथिनो मन्मथशरप्रहारजर्जरितस्य निग्रहणं सम्भवति। अत एव सखि! मे ध्रुवमेव मरणम्। तदेव श्रेयस्करम्। अन्तिमः समय एव मे दरीदृश्यते"।

असहभावेन शकुन्तला द्वाभ्यामेव करकिसलयाभ्यामाननमावृत्य निजं वपुरनसूयायाः क्रोडे विनिक्षिप्तवती। सगद्गदं रुदत्यास्तस्या अश्रूणि स्थूलस्थूलैर्बिन्दुभिर्नयनाभ्यां परिस्रुत्य सख्याः परिधानभूतं वल्कलवस्त्रमार्द्रयाञ्चक्रुः। शकुन्तलायाः करुणयाऽवस्थयाऽऽर्द्रीभूतहृदयाऽनसूया सख्या उभावपि कपोलौ स्वकरयोर्गृहीत्वा, उन्नमय्य नयनसलिलक्लिन्ने चक्षुषी सुकोमलौष्ठाभ्यां परिचुम्ब्य जगाद-

"शकुन्तले ! सखि ! न त्वया दुःखमनुभवितव्यम्। त्वं मे प्रियसखी, प्राणेभ्योऽपि गरीयसी। सहोदरेव भगिनी त्वं मे। कस्मात् त्वमात्मानं मातृपितृविहीनां पालितां वा गणयसि, हृदये चैवमनुभवसि ? कुलपतिः कण्वः किं न स्निह्यत्यतिशयेन त्वयि, निजप्राणेभ्योऽप्यधिकां त्वां न गणयति? तथाविधो विद्वान्, मनस्वी, यशस्वी, तपस्वी, लोकानुग्रहकारी, प्रभावशाली चाचार्योऽन्यो जनो न विद्यतेऽस्मिन् सकल एव भूमण्डले। तच्चरणाङ्गुलिसंलिप्तरजोराशिस्पर्शानुग्रहाभिलाषिणो महान्तः सम्राजोऽपि तेन सह सम्बन्धं गौरवास्पदं सौभाग्यविषयं वा उत्प्रेक्षिष्यन्तेऽनुभविष्यन्ति मानयिष्यन्ति च। कुलपतिस्तु तवाभिलाषं निश्चयेन पूरयिष्यति। परन्तु प्रश्न एकोऽत्र समुद्भवति-किं सम्राड् दुष्यन्तोऽपि तवाभिलाषी सङ्गमोत्सुकः ? तथापि तस्य मुखोदिताः भावाः चेष्टाश्च त्वद्गतप्रणयाभिलाषमभिव्यञ्जयन्ति स्म।

शकुन्तला कथमपि निजहृदयमवलम्बयामास। उद्वेगं सन्निरुध्य अनसूयया प्रोञ्छिताश्रुनयना सा प्रत्यूचे-

"सखि ! साम्प्रतं मे जीवनं मरणञ्चापि त्वदायत्तमेव। त्वमेव कथय

किं मया करणीयम्? निरुध्यमानमपि मनो न चाञ्चल्यभावं जहाति। विबोध्यमानमपि च हृदयं न विबोधमायाति। तस्मिन्ननभिलषणीयेऽप्यभि-निबध्यमाणोऽभिलाषो महद्भिः प्रयासैर्हृदयान्मनसो वा निस्सार्यमाणोऽपि न निस्सरति। यथा यथा मया प्रयासाः विधीयन्ते मनसो निवर्तनाय, तथा तथा तेन तस्यामेव दिशि दुष्टघोटकेनेवानिर्बन्धं प्रधाव्यते। अदृग्गोचराभिरकल्पनीयाभी रज्जुभिर्बद्धमिव हृदयं तस्यामेव दिशि बलात्कारेण नेनीयते"।

अनसूयया शकुन्तलायाः शिरः पुनरपि क्रोडीकृतम्। अश्रूणि प्रवाह-यन्त्यास्तस्याः सुमृदुदीर्घानवमुक्तानलकान् शनैः शनैः कङ्कतिकाकाराङ्गुलीभिः परामृशन्ती सा उवाच-

"सखि ! शकुन्तले ! मा रोदीः। एवङ्गतायामवस्थायामस्माभिस्तु कश्चिदुपायश्चिन्तनीयः।"

शकुन्तला तु शिर उन्नमय्याश्रुजलपूरिताभ्यां लोचनाभ्यां कतिचित्क्षणं यावदनसूयां प्रेक्ष्य पुनरपि तस्या अङ्के शिरो निधाय सगद्गदं क्रन्दितुमारेभे। अनसूया तु तस्याः शिरः भुजयोरुत्थाप्य कपोलौ करतलाभ्यां गृहीत्वा चुम्बनैरेव नयनयोरश्रूणि प्रौञ्छत्। कथमपि चाश्रूण्यविरतं कपोलयोः प्रवाहयन्तीं तामाश्वास्य सा प्रोवाच-

"सखि ! मध्याह्नानन्तरं सखीभिरस्माभिः सह सम्प्रवृत्ते विस्रम्भालापे तस्य सम्राजस्त्वयि प्रणयाभिलाषो वा आकर्षणं वा सुव्यक्तमेवालक्ष्यत। त्वया सह मिलनकामनया सङ्गमाभिलाषस्तस्य नयनयोः प्रतिबिम्बितो बभूव। प्रातरेव कुलपतेरागमनं सम्भाव्यते। मध्याह्नसमयं यावत्तस्य चक्रवर्तिनो दुष्यन्तस्यापि महर्षये प्रणामाञ्जलीनर्पयितुं तपोवनाश्रमागमनं नियतमेव। प्रथममेवाहं तवाभिलाषं महर्षये निवेदयिष्यामि। त्वयि नितरां स्नेहशीलः कुलपतिस्तव कामनां पूरयिष्यत्येव। कुरुजनपदानां सम्राट् चक्रवर्ती दुष्यन्तोऽपि तेन सह सम्बन्धं गौरवमयं गणयिष्यति। परन्तु प्रथमं तावदस्माभिस्तस्य महीपालस्य मनोऽवस्था सम्यग्रूपेण सुस्पष्टं ज्ञातव्या। त्वं तु काञ्चित् प्रणयपत्रिकां लिख। प्रातरेव तस्यास्तत्र केनापि व्याजेन प्रेषणप्रबन्धो भविष्यति।"

अनसूयायाः परमर्शः शकुन्तलायै नितरामरोचत। सा तु विचारनिमग्ना

सञ्जाता। वामेतरङ्करमङ्के निधाय सव्यञ्च करं सा कपोलाधारञ्चकार। वपुश्च तदनुकूलं नमयामास। कतिपयक्षणं यावद् विचार्य साऽनसूयां बभाषे-

"सखि ! तस्मै भूपतये ममैष सन्देशः प्रेषणीयः-

कठिनचित्त ! हृदयहारक ! तव कृते विरहव्यंथितं मे हृदयं सततं सन्तपति, न च जानामि ते हृदयगतिम्"।

अनसूयया प्रेरिता शकुन्तला तस्य सन्देशस्य लिपिबन्धनाय निजवक्षसि निबद्धाद् वल्कलवसनादेकं भोजपत्रखण्डमुन्मोचयामास। तत्रैव सरित्तट-समीपवर्तिभृङ्गराजक्षुपगहनहरितश्यामलपत्राणि गृहीत्वा शिलायां जलेन सम्मर्द्य तत्रैव सैकतपतितं शुष्कतृणमेकं स्वाङ्गुलीषु धृत्वा, मन्मथशरासनगुणां भ्रुकुटिं तिर्यक्कृत्य सा प्रणयपत्रलेखनोपक्रमञ्चकार।

शरकाण्डमध्ये प्रस्तरफलके स्थितो ध्यानावस्थिततद्गतमनाः दुष्यन्तस्तयोस्तापसकन्ययोः विस्रम्भजल्पितान्यापिबन्नेवासीत्। स्वात्मानं प्रकटयितुमिममेवावसरं समुचितं विज्ञाय स झटित्येव मण्डपाद् बहिर्निर्गत्य तयोः सम्मुखं समासाद्य दक्षं करं वक्षसि निधाय स्नेहसिक्तवचोभिरित्थं बभाषे-

"सुन्दरि ! विरहानलस्त्वयं ते हृदयं तपति, परं मम हृदयं नितरां दहत्येव।"

(८)

सलिलनिधिमेखलायाः धरायाः भर्तारं शासकं चक्रवर्तिनं सम्राजं दुष्यन्तमेव पुरोऽवनमितवदनं प्रेक्ष्य ते तपस्विकन्यके ससम्भ्रमं तत्क्षणमेव समुत्थिते। जडीभूतसकलेन्द्रियव्यापारा शकुन्तला न किञ्चिदपि वक्तुं शशाक। सकलमेव वपुस्तस्याः मौक्तिकसन्निभैः श्रमबिन्दुभिस्तथा निचितं, यथा आवरणभूतानि वल्कलान्यप्यार्द्राणि सञ्जातानि। श्वासः प्रमाणाधिको बभूव। वेपथुश्च नितरां कायं जगृहे। कम्पमानानि गात्राणि कथमपि स्थिरीकृत्य साऽवनतानना मन्दं मन्दं प्रवहति मालिनीसलिले प्रतिबिम्बमाने शशाङ्के दृशं निबबन्ध। परमनसूया कथमपि स्वचित्तान्दोलनं स्थिरीकृत्य तं राजानमेवं बभाषे-

"राजन्! ज्ञात एवायं सकलः प्रणयवृत्तान्तो भवता। न भवतोऽप्यविदितं

किञ्चित्। अस्माकमियं सखी प्राणेभ्योऽपि गरीयसी न जाने केषां जन्मनां पुण्यप्रभावैरजानत्यपि स्वपरहृदयानि निजहृदयमधन्यतया भवच्चरणाभ्याम-र्पयामास। वयं वनवासिन्यस्तु प्रणयवार्तानां नितरामनभिज्ञाः सततं तपःस्वाध्यायसंसाधननिहितेन्द्रियचित्ताः। भवत्सदृशेन सम्राजा कस्यापि सम्बन्धस्य कल्पनामपि कर्तुं नोत्सहामहे।

परं विषमः खलु भगवान् कामदेवः सर्वसामर्थ्यशाली। न खल्वसौ प्रणयिनां विषमतामपेक्षते। सर्वानेव भ्रमरप्रत्यञ्चाधनुषो निक्षिप्तैस्तिग्म-नाराचैस्तथा विध्यति, यथा विस्मृतान्यकर्तव्यास्ते स्वहृदयप्रतिष्ठित-प्रणयपात्राण्येव चिन्तयन्ति। निश्चयेनाऽस्माकं प्रियसखी तेन तीक्ष्णशराघातैर्विद्धा। भवानेतस्याः हृदये प्रसह्य तेन मनसिजेनैव प्रवेशितः। कुसुमपेलवशरीरेयं शकुन्तलाऽतिभावुकहृदया। भवन्तमुपलक्ष्यैवेयं प्रहरमात्रेणैनां दशामनिर्वचनीयां समुपगता।

अधुना नेयं किञ्चिदपि सखीभिः सह संलपति वा, भुङ्क्ते वा, तिष्ठति वा, स्वपिति वा। परं केवलमुच्छ्वसिति, वेपते, नयनाभ्यामश्रूणि च प्रवाहयति। सर्वजनस्य विस्मृत्य भवन्तमेव हृदये प्रतिष्ठाप्य सततं व्यथामेव प्राप्नोति। वात्यया तृणमिवास्याश्चित्तं मन्मथेन भवद्दिशि नेनीयते। यतो भवन्तमुपलक्ष्यीकृत्यैवास्या ईदृशी शोचनीया दशा संवृत्ता, अतोऽस्याः रक्षणमपि भवता करणीयम्।

अपि च, निजाधिपत्यगते देशे निवसताञ्जनानां कष्टहरणं रक्षणञ्च भूपतीनामनिवार्यङ्कर्तव्यम्। राजरक्षितव्यः सकलः प्रजाजन इति धर्मशास्त्राणां निर्देशः। अतो भवति सन्निहितात्ममानसीं भवते समर्पितहृदयामनन्यचित्तामे-नां मम प्रियसखीं शकुन्तलां भवानेव परित्रायताम्।

अनसूयायाः वचांसीमानि समाकर्ण्य शकुन्तलायाः मनसोऽवस्थाऽ-निवर्चनीयैव सञ्जाता। दुष्यन्तनिहितप्रणयभावविह्वला परं कुमारीसुलभ-लज्जावरक्तवदना किमपि वक्तुमसमर्था सा मुखमवनमय्य शिलातलदत्तदृष्टिः सव्येतरपादाङ्गुष्ठनखेन भूमिं विलिखन्ती तस्थौ। रोमोद्गमेनाङ्गानि विषमितानि सञ्जातानि। पुरःप्रवृत्तैः श्वासैरतिगहना तीव्रता चाङ्गीकृता। सर्वातिशायिना वेपथुना गात्राणि विधूयोत्तरवस्त्रमीषदधः सारितम्। ललाटे कपोलयोः शंखयोश्च समुद्भवन्ती स्वेदसलिलसीकरमालिका प्रवहन्ती

स्तनाच्छादनं वल्कलवसनमार्द्रयामास। स्तनाग्रचूचुकौ स्फुरिताविव। सहसैव सकलमेव गहनतमोनीरवताच्छादितं वनोद्देशं विकचपुण्डरीकमयमिव विदधती शकुन्तला ईषद् दृष्टिमुन्नमय्य दुष्यन्तञ्च तिर्यग् विलोक्य पुनरप्यवनतमुखी बभूव।

शकुन्तलायाः मनोविकारान् संलक्ष्य अनसूयायाश्च कथनेन मनसि प्रहृष्टोऽप्युद्विग्नो विह्वलश्च दुष्यन्तः प्रथमं तावत् किञ्चिदपि वक्तुं न शशाक। द्विगुणीकृतमदनावेगस्य तस्य चित्तमिन्द्रियाणि गात्राणि च मनसिजो बलादाकृष्य शकुन्तलायामेव समाहितानि कर्तुमुपचक्रमे। परन्तु कथमपि सन्धार्योत्ताम्यदात्मनो मनः शकुन्तलाननिहितदृष्टिरसावनसूयाम्बभाषे–

"भद्रे ! भवत्याः वचनमिदं पीयूषरसधारेव मे श्रोत्रे मधुरसेन सिञ्चन्मय्यनुकम्पाभावमेवाभिव्यनक्ति। भवत्याश्चेयं सखी हृदये मां विनिवेशयन्ती परमनुग्रहातिशयमेव प्रकाशयति। भवत्या आदेशो मया शिरसि धारणीयः प्राणव्ययेनापि च पालनीयः।"

दुष्यन्तस्येमानि प्रणयभरगर्भाणि जीवनस्याशासञ्चारकाणि वचांसि मुग्धायास्तपस्विन्याः मातृपितृपरित्यक्तायाः शकुन्तलायाः हृदयमतिशयेनान्दोलयामासुः। तत्क्षणमेव सा प्रियतमस्य गात्रैः गात्राणि संयोज्य दृढभुजाश्लेषे प्रगाढनिबद्धमात्मानं समर्पयितुं समुत्सुका व्यग्रा च बभूव। परमनसूयाया एकेनैव तिर्यगवलोकनेन सङ्कोच्य निजगात्राणि सा तत्रैव शिलातलं समुपविश्य स्थिराऽवर्तत।

परमनसूया न तादृशी मुग्धा वा लोकव्यवहारेष्वनिष्णाता वाऽऽसीत्। कदाचिदयं राजाऽस्मिन् काले शकुन्तलाया रूपयौवनमोहवशंवदः सन्नेवं वदति, परं भविष्यति काले राजप्रासादसुलभविलासेषु विलसन्नन्तःपुरचरीवधूजनसङ्गमनेषु च संसक्तमानसः सखीमुपेक्षेत इति विचार्य, शकुन्तलामेकतस्तिर्यङ् निरीक्ष्य सा राजानं बभाषे–

"राजन् ! यदि सत्यमेव हृदयस्थितेयं मे सखी प्रणयगर्भहृदयं भवन्तं विदधाति, भवांश्च सर्वात्मनाऽस्यां स्निह्यति, स्वात्मीयाञ्च विधातुमभिलषति, आगम्यतामत्र शिलासनम्। मालिन्यास्तटवर्तिन्यां शिलायामत्राऽस्माभिः परस्परं किञ्चिद् विचारणीयम्। मया तु सखीमधिकृत्यास्याः भविष्यद्विषयकं किञ्चिन्निवेदनीयम्।"

अनसूयायाः वचनमाकर्ण्य त्वरितं स्पन्दमानं हृदयं दक्षिणकरतलेन सम्पीडयन् दुष्यन्तो मालिनीतटवर्तिसैकतनिगूढं शिलापट्टकमध्यतिष्ठत्। शकुन्तलानसूये चापि तत्रैव समीपमेवोपतस्थतुः। कतिपयक्षणं यावद् दुष्यन्ताननमेकाग्रदृशाऽवलोक्य प्रस्फुरिताधरौष्ठी अनसूया शकुन्तलाप्रियेण सह एवंविधं वार्तालापञ्चकार-

अनसूया- " बहुबल्लभाः खलु श्रूयन्ते राजानः। कदाचिदियं तपोवन-वासिनी अविदितलोकव्यवहारा मुग्धा मे सखी राजप्रासादानधि-गम्य शोचनीयामवस्थाम्प्राप्नुयात् ? "

दुष्यन्तः-"भद्रे ! किमिदमसम्भावनीयमचिन्त्यञ्च भवत्या निगद्यते ? अनेन वचनेन तु मदनबाणहतोऽप्यहं पुनः हतः। भवत्याः सखीयं मे प्राणेभ्योऽप्यभिमततरा। इयं तु मे हृदयबल्लभा स्वात्मनिर्विशेषा राज्यश्रीसपत्नी सर्वान्तःपुरस्वामिनी भविता। महादेवीपदमलङ्कुर्वाणा मया सहैवेयं सकलानि लौकिकसुखानि राज्यसुखानि चानुभविष्यति।

अनसूया- सदैव आशङ्काकुलानि भवन्ति हि नारीणाञ्चेतांसि। तथापि भवति दृढमहं विश्वसिमि। आकृत्यैव भवानस्माकं सखीनां विश्वासभाजनं वर्तते। किन्तु मानुषसुलभो लघिमा मां बलादिव वक्तुं व्यवसाययति। अधीरप्रकृतिरहं प्रागल्भ्यभावेन भवदनुग्रह-परिचयेन च प्रोत्साहिता किञ्चदिव निवेदयितुमुत्सहे।"

दुष्यन्तः- "निःशङ्कं निर्भयञ्च भवती मामादिशतु। आज्ञापालनं तु भवत्या अतिसौभाग्यकरं मे भविष्यति।"

अनसूया-"श्रूयतेऽधुनाऽप्यनपत्यो भवान्। सतीष्वनेकासु बल्लभासु न तु विधिना भवांस्तथा वात्सल्यरसानन्दभोगभाग् विहितः। अतो भवतो मे सख्याश्च प्रसूतिरेव युवराजपदमलङ्करिष्यति, भवति च वानप्रस्थधर्ममङ्गीकृतवति राजपदमधिकरिष्यतीति भवता प्रतिज्ञातव्यम्।

दुष्यन्तः-" (किञ्चिद् विचार्य) भद्रे ! अनपत्य एव खल्वहम्। सत्स्वप्य-नेकेषु कलत्रेषु न तथा विधिनोपकृतः। भवत्यास्त्वयमादेशः शिरोग्राह्यः। प्रतिज्ञायते च मया, भवत्याः सख्याः प्रसूतिरेव

ममोत्तराधिकारिणी भूत्वा राजपदमधिष्ठास्यति। इयमेव च मे कुलस्य प्रतिष्ठा।"

अनसूया-"(सन्तोषमानन्दञ्चानुभवन्ती) राजन् ! यद्येवं, ममेयं सखी भवतः प्राणबल्लभा सती भवदधिकारवर्तिनी वर्तते। अर्धरात्रं व्यतीतम्। याममात्रेणैव प्रातर्वेलायाः मन्दप्रकाशः सकलामेव धरित्रीं प्रकाशयिष्यति। प्रातःकरणीयविधीन् निर्वर्त्य भवता मध्याह्नकाले तपोवनमागन्तव्यम्। कुलपतिरपि तस्मिन् काले सुलभो भविष्यति। भवानिमां मे सखीं कुलपतिं याचताम्। अहं पूर्वमेव भवतः शकुन्तलायाश्च प्रणयप्रसङ्गं मनःकामनाञ्च कुलपतये निवेदयिष्यामि। समुचितयोग्यवराय भवतेऽसौ प्राणाधिकप्रियां दुहितरं शकुन्तलां समर्प्य शास्त्रोक्तविधिना पाणिग्रहणसंस्कारं सम्पादयिष्यति। तदनन्तरं भवतेयं मे प्रियसखी हस्तिनापुरं नेतव्या।"

दुष्यन्तः- "भद्रे ! क्षत्रियेषु गान्धर्वविवाहः प्रशस्यतमो गण्यते। प्रणयभावविह्वलौ परस्परमिलनाकांक्षिणावुत्ताम्यद्धृदयावावां न क्षणमपि विरहं क्षमावहे। भवत्याः प्रियसखीयमप्यधिकं विकला। यदि चावयोरधुनैवात्रैव गान्धर्वविवाहविधिना संयोगो भवेत् ततो नास्ति कश्चिदपि दोषः। तदेव श्रेयः।"

अनसूया- "राजन् ! बाल्ये पितुरधीनतायां वर्तमानः कन्याजनः कुतः स्वातन्त्र्यं लभते ? जनकेनैव प्रदेयास्ताः पतिगृहाय प्रतिष्ठन्ते। न च लोकव्यवहारः शास्त्राणामनुशासनं वा कन्यकाजनं स्वातन्त्र्यमवलम्बयितुमनुमनुते। न चेयं न चाहमत्र प्रभवामि। अतो भवता शकुन्तलया च धैर्यं धृत्वा मध्याह्नकालं यावत् प्रतीक्षा करणीयैव। प्रातरेव कुलपतिमहोदयाः निवर्तिष्यन्ते।"

परन्तु स धृष्टः प्रणयी नवप्रणयभावोत्ताम्यद्धृदयः क्षणमपि विरहं सोढुं नाक्षमत। तत्क्षणमेव शकुन्तलामिलनकामुकं तस्य हृदयमनिर्बन्धं बभूव। स पुनरप्यनसूयां परममाधुर्यसिञ्चितेन वचसा बभाषे-

"भद्रे ! धर्मशास्त्रेषु, ब्राह्मो, दैव, आर्षः, प्राजापत्यो, गान्धर्व, आसुरो,

राक्षसः, पैशाचश्चेत्यष्टविधाः विवाहाः प्रकीर्तिताः। तत्र प्रथमाश्चत्वारोऽपि द्विजजनैरनुमोद्यन्ते। परं क्षत्रियेषु गान्धर्वविवाहोऽप्यनुमतः। स च तैः प्रशस्यतमो गण्यते। नववयोरूपरमणीयाः परस्परगुणानुरागसमाकृष्टहृदयाः क्षत्रिययुवकाः क्षत्रिययुवतयश्चान्योन्यानुरागाभिलाषाः पितृजनैरविदितवृत्तान्ता अप्यन्योन्यं परिणयन्ति। विदितवृत्तान्तैः पितृभिस्ताश्चाभिनन्द्यन्ते। मनुना चापि गान्धर्वविवाहः प्रशस्यतमः प्रतिपादितः क्षत्रियाणाम्। अतोऽस्मिन्नवसरे परस्परमिलनोत्ताम्यद्धृदययोरावयोर्गान्धर्वविवाहविधिना सम्मिलनं नानुचितम्। मम च मदविह्वलायाश्च भवत्याः सख्या अन्योन्यानुरागः प्रत्यक्ष एव।"

दुष्यन्तस्य प्रणयगर्भगिरः समाकर्ण्य मनसि किञ्चिद् विचारयन्ती अनसूया पुनरपि प्रोवाच। अथ तयोरेवंविधा बभूव वार्ता–

अनसूया– "राजन्! कथनमिदं भवतः शास्त्रैरनुमोदितं समुचितमेव प्रतिभाति। तथापि लोकव्यवहारोऽप्यस्माभिर्नोपेक्षणीयः। शास्त्रवचनप्रमाणैर्लोकव्यवहाराणामुल्लंघनं सततमपवादकारणमेव भवति। शकुन्तलेयं कुलपतेः कण्वस्य प्राणेभ्योऽप्यभिमततरा। तदनुमतिमनपेक्ष्येयं परिणीतेति विज्ञाय दुःखदग्धहृदयः किन्न भविष्यत्यसौ? अनुतापातिशयेन क्रोधस्योद्भवः प्रज्ज्वलनहृदयत्वं च सम्भवेत्। तपःपूतात्मनां महर्षीणां कोपं सोढुं कः क्षमते?"

दुष्यन्तः– "भद्रे! गुणवतेऽनुरूपाय वराय कन्या प्रतिपादनीयेति कुलपतेः कण्वस्य प्रथमः सङ्कल्पः। तञ्च विधिरनायासमेव यदि साधयति, तत्रभवान्नसावात्मानं कृतार्थमेव मंस्यते। भवत्याः सखीं प्रति वात्सल्यगर्भहृदयः कुलपतिराशीर्वादानेव वितरिष्यति। न त्वत्र कोपस्य वा अप्रसादस्य वा कश्चिदवसरः। लोके च प्रसिद्धेयं लोकोक्तिः– "विजितकोपो हि महर्षिः कण्वः सकलजनानां कल्याणाभिलाषी"। पुनः किमत्राहितसम्भावना।"

अनसूया– "राजन्! समुचितमेव परामृशति भवान्। यदि च भवतोऽयमेवाग्रहः, शकुन्तलेयं च मे सखी तथैवाभिलषति, गान्धर्वविवाहविधिरेवात्र सम्पद्यताम्। गान्धर्वविवाहविधौ सम्पद्यमानेऽपि शास्त्रोक्तानां विधीनां किञ्चिदनुपालनमवश्यमेव करणीयम्। अग्निप्रदक्षिणादिविधीनतिक्रम्य स्त्रीपुरुषसंयोगो

लोकनिन्दाभाजनतां प्राप्नोति। विवाहविधिश्च प्रधानरूपेण वैश्वानरं साक्षीकृत्य सप्तपदीप्रदक्षिणादिभिः कार्यजातैः सम्पाद्यते। अहमत्रैव हुतवहं प्रदीपयामि। भवांस्तु शकुन्तलायाः करं गृहीत्वा वैश्वानरं साक्षीकृत्य यथोचितञ्च प्रतिज्ञाय प्रदक्षिणादिविधीन् निर्वर्तयताम्।"

सत्यं तथ्यञ्चाभिधीयते भवत्येति वचनमुच्चार्य दुष्यन्तस्तदा सहमतो बभूव। तदनन्तरं शुष्काणि शरकाण्डानि कानिचित् समाहृत्य, द्वौ पाषाणखण्डौ परस्परं संघट्याऽनसूया वैश्वानरं प्रदीपयामास। केषुचित् क्षणेषु शरकाण्डेषु स्वाहापतिः समुंज्ज्वलितो बभूव। तदनन्तरं हविषामभावेऽपि विवाहोचितहवनमन्त्रानुच्चारयन्ती अनसूया शकुन्तलायाः पाणिं दुष्यन्तस्य पाणौ ग्राहयामास। दुष्यन्तोऽपि सुकोमलसुकुमारारुणकमलपत्रशोभमानं प्रणयिन्याः करकिसलयं गृहीत्वा प्रमुदिमनाः प्रदीप्तमनलं सप्तकृत्वः प्रदक्षिणीचकार।

सम्पन्नेष्वेतेषु विधिविधानेषु ध्रुवदर्शनं कृत्वा ध्रुवप्रस्तरपदविन्यासविधिञ्च सम्पाद्य द्वाभ्यामेव पतिपत्नीभ्यां समयाः सशपथमुच्चारिताः। दुष्यन्तेन प्रतिज्ञातम्-

"शकुन्तला तस्य जीवनसहचरी मरणपर्यन्तमर्द्धाङ्गिनी वर्तते। तस्याः भरणस्य पोषणस्यान्यस्यापि सकलस्य लौकिकव्यवहारस्योत्तरदायित्वं स निर्वक्ष्यति। महादेवीपदप्रतिष्ठिता सा सकलस्यैव राजसम्मानस्य सहभागिनी भविता। शकुन्तलाप्रसूतिरेव युवराजपदमलङ्कृत्य राजसिंहासनस्था भूत्वोत्तराधिकारं भोक्ष्यते।"

शकुन्तलयापि प्रतिज्ञातम्-

"सा मनसा वचसा कर्मणा पत्युरनुगामिनी वर्तिष्यते। सदैव सा पत्युरनुकूलमेव समाचरिष्यति। मनसापि सा कदापि न परपुरुषं चिन्तयिष्यति। तत्तु महत्पापं सकलविधदुःखप्रदम्। पत्युरनुवर्तनं शुश्रूषा चैव तस्याः जीवनस्य कर्तव्यं वा लक्ष्यं वा वर्तते।"

नवयुगलेन प्रतिज्ञाते समयविधाने सुदूरवनप्रान्तरेषु समुत्थितेन मयूराणां समवेतकेकाध्वनिना तपोवनवाटिकायाञ्च चूततरुनिलीनानां कोकिलानां कर्णकुहरमधुरससन्तर्पणेन कुहूरुतेन च समर्थितानि शकुन्तलादुष्यन्तयोर्वचांसि। अस्मिन्नेव समये लब्धावसरेण मन्दसमीरणेन नवचूतमञ्जरी-

सौरभरसपरिप्लुतेन पवनेन शरकाण्डानां शुभ्रमञ्जरीकुसुमवृष्ट्या नवपरिणीतमिदं युगलं सभाजितम्। व्योम्नि विहसता चन्द्रमसा सर्वं जगत् कनकमयमिव विदधता सुवर्णरसोज्ज्वलैः रश्मिभिराप्यांयितं तन्नवविवाहबद्धप्रणयियुगलम्। शुभैः शकुनैरेतैरतिशयं प्रफुल्लितचिता स्मितशोभमानवदनाऽनसूया शकुन्तलां दुष्यन्तञ्च तस्मिन्नेव मालिनीसलिलधाराप्रविष्टे शिलातले समुपवेश्य प्रोवाच-

"शकुन्तले ! महान् समयोऽतिक्रान्तः कुटीरान्निर्गतयोरावयोः। कदाचिदार्यायाः गौतम्याः निद्राभङ्गोऽपि भवेदिति। शयनोत्थिता सा आवामनवलोकयन्ती चिन्तिता भविष्यति। पश्यामि तावत् तत्रत्यं वृत्तान्तजातम्। आर्येण चक्रवर्तिना सह त्वमत्रैव तिष्ठ। अहन्तु कुटीरङ्गत्वा, निवर्त्य झटित्येवागत्य त्वां प्रेक्षिष्ये। गता चैवागताऽहमिति।"

अनसूयां प्रस्थानोद्यतामवेक्ष्य किञ्चिदाकुलितचित्ता शकुन्तला तस्याः दक्षिणकरमवष्टभ्य प्रोवाच-

"अनसूये ! मा गच्छ मा गच्छ। मामेकाकिनीं परित्यज्य न युक्तं ते गमनम्। अशरणा खल्वहं बिभेमि।

"सकलभूमण्डलस्य शरणमेव ते सहायकः। कस्माच्च ते भयमुपपद्यते।" इति कथयित्वा, हस्तमुन्मोच्य अनसूया त्वरितगत्या कुटीराभिमुखं प्रतस्थे।

(९)

प्रस्थितायामनसूयायां तपोवनवाटिकातरुराजिभिरन्तर्हितायां च दुष्यन्तः सहसैव शकुन्तलायां नयने व्यापारयामास। लज्जावनताननना मालिनीनीरधारानिबद्धदृष्टिः सा स्वसव्येतरभुजवल्लरीशाखया कङ्कतिकया मन्दं मन्दं तीरवर्तिप्रस्तरफलकेन कल्लोलयन्तीषु लहरीषु क्रीडाविलासनिमग्ना समदृश्यत। समुन्नतकुचभारवहनाक्षमस्य काषायवर्णवल्कलवसनस्य ग्रन्थिका पृष्ठभागे दृढतरं निबद्धा हिमोज्ज्वलगौरवर्णशङ्खसमग्रीवायाः पृष्ठाधःप्रदेशे दीप्यमाना, शशिकरश्मिभिः शशिकान्तमणिरिव चमचमेति द्योतमाना वह्निशिखेव समुज्ज्वलन्ती दुष्यन्तस्य हृदयमदीपयत्। हृदयावेगं केनापि विधिना महद्भिरपि प्रयासैः रोद्धुमपारयन् दुष्यन्तो निभृतमेव निःशब्दमेव

सहसोत्थाय शकुन्तलायाः पृष्ठभागमुपेत्य किञ्चिदवनम्य तस्याः स्कन्धयोः स्वकीयौ करौ मृदुभावेनातिशयेन निहितवान् ।

दुष्यन्तस्य प्रियतमस्य नवे सङ्गमे समाहितचित्तस्य चेष्टितानि सकलानीमानि नयनयोरगोचरतां गतान्यप्यवगम्यमाना शकुन्तला तथैव क्षणं यावत् तस्थौ । तदनन्तरमीषदाननं परिवर्त्य समन्दस्मितं तं धृष्टं प्रणयिनं तिर्यङ् निरीक्ष्य पुनरप्यविरलं प्रवहन्त्यां मालिन्यामेव निबद्धदृष्टिरभवत् ।

शकुन्तलाया अनया मन्दस्मितसुशोभितया तिर्यग्दृष्ट्या स वराको दुष्यन्तस्तथा प्रहतो यथा विस्मृतसकललोकव्यवहारः सहसोत्थाप्यास्याः धरण्याः कस्मिंश्चिदप्यवर्णनीयं लोकं सम्प्रापितः ।

सर्वस्मादेव पर्यावरणाद् विगतचेतनो दुष्यन्तो व्योम्नि दीप्यमानं शशिनं हसन्तमिव व्यलोकयत् । सर्वतो हिमशुभ्राणां सन्तापहारिणां सुवासितानां कुसुमानां वृष्टिरिव तस्यानुभवविषयीभूता । सकलमेव चैतन्यं तस्य व्यपगतम् । सहसैव शीतलसुरभितसमीरणस्य मन्दप्रवाहस्तं कुतकूतयामास । किञ्चिल्लब्धचैतन्येन तेन मालिनीधारायां कश्चित् सरसर इति ध्वनिराकर्णितः । वनप्रान्तरेषु क्वचिच्चातकवधूनां ओ पी ओ पी इति निनादाः प्रियतमानाकारयन्त इव समुत्थिताः । रसालतरुषु च कोकिलानां कुहूरुतमप्यश्रूयत ।

किञ्चिदवनम्य, बलशालिनोर्भुजयोराबध्य शकुन्तलां प्रियतमां दुष्यन्तः स्वाङ्कगताङ्कर्तुं प्रायतत । शकुन्तलायाः सकलान्येवाङ्गानि साध्वसेनातितरामकम्पन्त, रोमाञ्चजालकेनोद्गतं, स्वेदेन च वपुरार्द्रीकृतम् । कुमारीसुलभलज्जया च सा जडीभूतेव सञ्जाता । यथा यथा दुष्यन्तस्तामुपर्युत्थापयितुं प्रायतत, तथा तथा सा स्वात्मानं भूमावेव सन्निविष्टामकरोत् ।

विफलप्रयासस्तु दुष्यन्तोऽन्ततस्तस्याः सव्येतरपार्श्वभागमागत्य शिलामेव तमुपविश्य, द्वाभ्यां कराभ्यां प्रियायाः कोमलकपोलौ गृहीत्वा केनाप्यनिर्वचनीयेन स्मितेन शोभमानं मुक्ताचयप्रस्वेदजालनिचितं प्रस्फुरिताधरं तन्मुखं बलादेव स्वाभिमुखं परिवर्तयामास ।

विवशेव, चित्रितेव, लिखितेव तत्कालाविर्भूतेनावष्टम्भेन निष्पन्द-

सर्वावयवा, स्वसंवेद्येनैव केवलेनानुभावेन निमीलितनयना सा मोहमुग्धा वराकी तपस्विनी मन्दध्वनिना सीत्कृतिमुच्चारयामास। गात्राण्यवष्टम्भयितुम-पारयन्ती सा वेपमानाङ्गयष्टिरेकेनैव प्रणोदनेन स्वकीयेनाननेन सह वक्षःस्थलं दुष्यन्तस्याङ्के निपातयामास।

तस्मिन्नवसरे प्रथमपुरुषसंस्पर्शशून्यचेननाया: शकुन्तलाया: कुचयुगलं स्फुरितमिव कुर्वन्तो विततसन्ताना: निरीयुर्दीर्घनि:श्वासमारुता: । कुमारीजनसुलभया त्रपया सा प्रियतमाङ्कादुद्गन्तुं प्रायतत। परन्तस्य राजाधिराजस्य बलिष्ठभुजालिङ्गनपाशान्मुक्तिर्न तथा सुकरा। यथा यथा सा स्वात्मानं मोचयितुं परिससार, तथा तथा दुष्यन्तस्य भुजयुगलगाढालिङ्गनं दृढ़ दृढतरं च सत् तस्या: प्रोन्नतकुचयुगलमतिशयेन सम्पीडयामास। परन्तु यदैव दुष्यन्तो मदनसन्तापप्रस्फुरितं ज्वालाचितमिवाधरं निजं तस्या: मोह-मुग्धनायिकायास्ताभरसबिडम्बकेनातिशयितबिम्बफलेन प्रस्फुरिताधरेण संयोजयितुमियेष, कम्पितस्वरेण सा जगाद-

"पौरव! रक्ष, विनयं रक्ष। अवष्टम्भयात्मानम्। अन्यथा नाऽहमात्मानं सन्धारयितुं पारयिष्यामि। मुञ्च मां मुञ्च।"

परं भुजबन्धने तस्या: वक्षःस्थलं प्रगाढं प्रगाढतरं निपीडयन् स धृष्टतम: प्रणयी सुमधुरगद्गदं प्रोवाच-

"भीरु! कथन्ते भयं वा व्रीडा वा? विनयमेवाऽहमानुकूल्येन रक्षामि। अलं शङ्काभि:। षट्पदेन नवविकसितरसस्येव पिपासाकुलेन मया परिक्षतकोमलस्य तेऽधरस्य रसो निपीयते"।

एतदुक्त्वा तेन धृष्टेन प्रणयिना शकुन्तलाया अंसविवर्ति मुखमुन्नमय्य स्वकीयकामसन्तप्तावोष्ठौ नवप्रणयिन्या: नवकिसलयकोमलयोररुणवर्णयो: प्रतिषेधाक्षरविह्वलताभिरामयोरङ्गुलिसंवृतयोरोष्ठयोरतिप्रगाढभावेन सन्नि-धापितौ।

धृष्टस्य मदनसन्तप्तस्य वासनाभिभूतस्य प्रियतमस्य गाढाश्लेषभुज-बन्धने दृढं निबद्धा प्रस्फुरितचूचुका शकुन्तला विस्मृतसकलान्यव्यवहारा मोचनायात्मानं प्रयतमाना परिसरन्ती क्रमश: शनै: शनै: अन्यां कामपि गतिमनवेक्ष्य चिन्तासन्तानरहिता निजशरीरं मन्मथवशंवदमपि तस्मै प्रियतमाय

समर्पयामास। प्रणयिनो वक्षसि निजं वक्षःस्थलं ततोऽपि प्रगाढतरं सन्निधापयन्ती सा निजं कपोलं तस्य कपोले संन्यवेशयत्। प्रणयभरनिमीलितनयनायास्तस्याः हृदये कामायावकाशमिव दातुं पुनर्निरीयुर्दीर्घनिःश्वासपरम्पराः । सुदीर्घं पौनःपुन्येन शीघ्रं निःश्वसन्ती सा वराकी तपस्विन्यसहायभावेन समुन्नतपयोधराभ्यां सुकोमलबाहुभ्याञ्च नवमालिका रसालतरुमिव नवप्रणयिनं समाश्लिष्टवती। तस्मिन्नेव समये लब्धावकाशेनोत्ताम्यद्धृदयेन प्रणयिना भुजबन्धनमतितरां दृढीकृतम्। सम्पीडनेनानेन तस्यास्तपस्विन्यास्तपोनवासिन्याः समुन्नतकुचभारोपस्तम्भयितृवल्कलवसनग्रन्थिः बिभिदे। कण्ठात् सुमृदुः सीत्कारनिःस्वन इवार्तरवः समुद्बभूव। रदनच्छदाभ्यां विस्फुरितम्। निर्मलस्वेदबिन्दुनिचितानि गात्राणि च परिपस्पन्दिरे।

अन्ततः सा तपोवनवासिनी असहायभूता प्रियतमस्याङ्के दृढनिबद्धा मनसिजविकारकम्पितसकलगात्रापि स्थिरा निभृता बभूव। व्योम्नि त्वविरलमंशुपटलैश्चकासच्चन्द्रो निजाननोपमितप्रमदायां तथाविधमकल्पनीयं निर्दयं बलात्कारमवलोकयन् किञ्चिदपि प्रतिकर्तुमक्षमो महत्या व्रीडया स्वकीयाननं निकटवर्तिनः परिसरतो जीमूतखण्डस्यैकस्य हिमखण्डश्वेतवर्णस्यावरणे तिरोदधौ।

न जाने कति क्षणाः व्यतीताः । अबोधितसमयगमनौ नवपरिणयनिबद्धौ शकुन्तलादुष्यन्तौ सर्वतोऽङ्गाङ्गसंश्लिष्टौ सकलस्यैव जगतो विस्मृत्य मालिनीसलिलसीकरग्राहिणा पवनेन परिशोषितमदनश्रमसीकरनिचयौ तत्रैव विततसमतलशिलायां प्रगाढनिद्रावशीभूतावास्ताम्।

सहसैव सरितः परे पारे वनप्रान्तरेषु शतशो मयूराणां समवेतः केकाध्वनिः समुत्थितः । सघनवनपादपानां स्कन्धविटपैः संघट्टनं प्राप्य द्विगुणतरं प्रतिध्वनितः स नवप्रणयियुगलस्यापि सहसा कर्णकुहराणि प्रविष्टः। तस्मिन्नेव काले मालिन्याः धारायाः परे पारे किञ्चिदुपरि प्रदेशेऽविदूरान्तराले कस्यचिद् वनराजस्य मृगाधिपतेः घोरगर्जनया साकं कस्यचिद् वराकस्य मृगस्यार्तरवोऽपि परितः प्रासरत्। शकुन्तला दुष्यन्तश्च द्वावपि चकितचकितौ नयनोन्मीलनञ्चक्रतुः । ताभ्यामवलोकितम्-

"लज्जावरक्ताभमण्डलश्चन्द्रः पश्चिमाकाशे क्षितिजप्रान्ते स्वात्मानं

प्रतीचीदिग्ववर्तिपयोनिधौ निमज्जयितुमीहते। पूर्वस्यां दिशि क्षितिजप्रान्तराणि सुतनुरक्तिम्णा अरुणवर्णत्वेन प्रकाशन्ते। उषसा किञ्चिदिव मुखान्नैपथ्यमपसार्य भास्करो जगदिदं प्रकशयितुमामन्त्रितः ।"

नयनोन्मीलनसमुपगतचैतन्या निधुवनविलासजनितश्रमक्लान्तशरीराऽपि मदविह्वलारुणनयना शकुन्तला इमानुपद्रवान् संलक्ष्य स्वात्मानं दुष्यन्तस्य सुदृढभुजबन्धनमण्डलाद् बलादिवोन्मोचयामास। समुत्थाय त्रपाभार-विनमितसकलगात्रा सा विशीर्णानि वल्कलवसनानि कथमपि संहृत्य सुस्थितानि चकार। तदनन्तरं गात्राण्युन्मोटयन्तीं प्रणयिनीं समुपगम्य दुष्यन्त उवाच-

दुष्यन्तः - "प्राणबल्लभे !"

शकुन्तला- "(सलज्जम्) आर्यपुत्र !"

दुष्यन्तः - "किमिदानीं त्वया मनसि चिन्त्यते ?"

शकुन्तला- "आर्यपुत्र ! मया स्वशरीरं, मन, आत्मा, प्राणाश्चेति सर्वमपि भवते समर्पितम्। परन्तु मम पालकः पिता कुलपतिरिमं वृत्तान्तं विज्ञाय न जाने किं प्रतिपत्स्यते? भयेन वेपते मे हृदयम्।"

दुष्यन्तः- "भीरु ! अलं गुरुजनभयेन। विज्ञायेमं वृत्तान्तं धर्मलोकव्यवहाराभिज्ञस्तत्रभवान् कुलपतिः नात्र दोषं द्रक्ष्यति। गुणवते कन्या प्रतिपादनीयेति तस्य प्रथमः सङ्कल्पः। बह्वीभिः क्षत्रियकन्याभिर्गान्धर्वविधिना परिणयनं कृतं पितृभिश्चानुमोदितम्।

शकुन्तला- "आर्यपुत्र ! प्रभातवेला समायाता। पूर्वस्यां दिशि प्राचीगिरिशिखरात् समुद्गच्छन् रक्ताभमण्डलाकारो भास्करो भगवान् क्षितिजरेखामनुरागमयीमिव विदधाति। कुलपतेः प्रत्यावर्तनसमयोऽपि सम्प्राप्त एव। नयतु भवान् मां कुलपतिनाऽनुमतामद्यैव।"

निभृतं गुरुजनानुमतिमनपेक्ष्य तापसकन्यां सङ्गम्य त्रपाभयादि-भावसमाक्रान्तहृदयः कुलपतिदर्शनपरिजिहीर्षुर्दुष्यन्तः कथमपि शकुन्तला-मुवाच-

दुष्यन्तः-"प्रिये ! मा शङ्कस्व। मयि विश्वासं भज। त्वमेव मे प्रिया,

प्रणयिनी, सखी, गृहिणी च। त्वमेव मे जन्मजन्मान्तरान्वेषणीया सहचरी, प्राणानां शक्तिः। अधुना तु मया सत्वरमेव स्कन्धावारः सम्प्राप्तव्यः।"

शकुन्तला–"भवत्वेवम्। मामाश्रमं निवर्तितुमनुजानीहि। आर्या गौतमी शयनादुत्थाय आश्रमप्रबन्धादिकार्येषु व्यापृता, शय्यागतां मामनवेक्ष्य न जाने किं विचारयिष्यति? प्रियंवदाऽपि विगतनिद्रा भविष्यति। अविदितवृत्तान्ता सा । मध्याह्नकाले तु पितरमभिनन्दितुं भवान् समागमिष्यत्येव।"

दुष्यन्तः– "आर्ये ! नैतत् सम्भाव्यम्। मयाऽधुनैव हस्तिनापुराय प्रस्थातव्यम्। मध्याह्नकाले तत्र देशविदेशेभ्यः समागतानां राजप्रतिनिधीनामेका सभा संयोजिता वर्तते। तत्र ममोपस्थितिर-निवार्या। अतो ममात्रोपस्थानं कठिनमेव। सैनिकास्तु मां प्रतीक्षन्ते। कमप्यनाख्याय विनैव कामपि सूचनामहमत्रागतः। कदाचिन्मेऽनुयायिनोऽत्र मामन्वेषमाणाः समागत्य तपोवन-मनुरुन्ध्युः।

शकुन्तला– " ततः ? "

दुष्यन्तः– " प्रिये ! कुतस्तवेदृशो व्यामोहः ? कतिपयैरेवाहोभिः कुलपतिदर्शनलालसोऽहमत्र समागमिष्याम्येव। राजकुलसमुचितेन, कुलपतिगौरवयोग्येन, तव च वयोरूपसदृशेन महता विभवेन समारोहेण चतुरङ्गिण्या सेनया सह वरयात्रारूपेण समागमिष्यामि। तत्र मे जननी, अन्ये च बान्धवाः, मन्त्रिणोऽमात्याः प्रमुखाः पौराः जानपदाश्च भविष्यन्ति।"

शकुन्तला– " ततः ? "

दुष्यन्तः– "तदनन्तरं शङ्खानां, दुन्दुभीनां, मृदङ्गानां, ढक्कानां, काहलानां, भेरीणामित्यादीनां वाद्यविशेषाणां निनादाः वनप्रान्तराणि, मालिन्यास्तीरं, तपोभूमीश्चानुनादयिष्यन्ति। जननी मे त्वामभिन-न्दिष्यति। तस्मिन्नेव काले कुलपतिचरणयोः प्रणम्य लोक-धर्मव्यवहारानुरूपं त्वामहं हस्तिनापुरं नेष्यामि।"

शकुन्तला- "(विरहाशङ्कया नयनाभ्यामश्रूणि क्षारयन्ती सगद्गद-
कण्ठस्वरा) आर्यपुत्र ! राजप्रासादं प्रविश्य राजकीयगुर्वीचिन्ताम-
निमग्नोऽन्तःपुरप्रमदाकर्षणनिबद्धहृदयो भवान् स्मरिष्यति किमपि
मे ? तपोवनवासिनी बाला न भवतोपेक्षणीया।"

दुष्यन्तः- " अपि सम्भावयति भवती इदमपि ? "

शकुन्तला- " अथ च कदा भवान् प्रत्यागमिष्यति ? "

दुष्यन्तः-"भीरु ! मा बिभेहि। मयाऽभिज्ञानरूपेणानेनाङ्गुलीयकेन ते दक्षिणमध्यमाङ्गुलिरलङ्क्रियते।"

एतदुक्त्वा दुष्यन्तः सव्यकरकनिष्ठिकाङ्गुलितः स्वनामाङ्कित-मङ्गुलीयकमादाय शकुन्तलायाः दक्षिणकरमध्यमाङ्गुलिं तेन सुशोभ्य प्रोवाच।

"प्रिये ! मन्नामाङ्कितेऽङ्गुलीयके त्वं प्रतिदिनमेकैकं नामाक्षरं गणय। यस्मिन्नेव दिवसे गणनेयमन्तं यास्यति, तस्मिन्नेव दिवसे त्वामानेतुमहमुपेष्यामि।"

एवं मधुरवचनैस्तामाश्वास्य, चरणयोः पतन्तीमविरलस्रवन्नयनसलिल-धाराभिर्नयने कपोलौ च क्लेदयन्तीं शकुन्तलां बलिष्ठविशालबाहुभ्यामुत्थाप्य चुम्बनैरेव नयने प्रमार्ज्य पुनरपि गाढं परिष्वज्य सगद्गदकण्ठं प्रोवाच-

"प्राणबल्लभे ! सत्यमेव प्रतिजाने, निर्धारितसमयेऽहमत्रागत्य त्वां निश्चयेन नेष्यामि।"

इति सशपथं तां विश्वास्य प्रस्थानायानुमतो दुष्यन्तः सैन्य-शिविरोन्मुखोऽभवत्। न जाने कुलपतिरेनं वृत्तान्तं निशम्य किं प्रतिपत्स्यते, कथं वा व्यवहरिष्यतीति चिन्तासन्ताननिमग्नमानसोऽसौ मालिनीधारामुत्तीर्य परं पारं सम्प्राप्तः। पुनः पुनः मुखं परिवर्त्य तस्मिन्नेव शिलातले निश्चलं निष्परिस्पन्दं च स्थितां तन्निहिताग्रनिर्निमेषनयनां शकुन्तलामेवावलोकयन् स मन्दगत्या प्रसर्पन्निव स्वस्कन्धावारं सम्प्राप्तः। सैन्यशिविरमध्ये पटगृहञ्च प्रविश्य प्रियानयनागोचरतां जगाम।

अन्तर्हिते च पटगृहे प्रणयपरवशे सम्राजि दुष्यन्ते तन्निहितहृदयायाः शकुन्तलायाः दुस्सहविरहव्यथायै दातुमवकाशमिव निर्जग्मुः दीर्घनिःश्वसनपरम्पराः। कथमपि हृदयावेगं निरुध्य बाहुभ्यां वक्षःस्थलं सम्पीड्य तपोवनोद्यानोन्मुखी सा तपोवनवासिनी शकुन्तला मन्दं मन्दं पदमादधाना वृतिमुल्लंघ्य स्वकुटीराभिमुखं जगाम।

तस्मिन् काले प्राचीदिक्क्षितिजप्रान्तभागं सम्प्राप्य ज्योतिरिङ्गणायितनक्षत्रमण्डलं मार्जन्येवापसार्य उषाः प्रेयांसं सवितरं भूयिष्ठमवलोकयितुमिव स्वकीयावरक्ताननान्नैपथ्यं पूर्णरूपेणापसारयामास। रागरञ्जितनभोमण्डलमध्य उदयतो बालदिनकरस्यासंख्यरश्मयः सुतप्तसुवर्णमिव दीप्तिमन्मण्डलं परिवारयन्तः सकलमेव भुवो मण्डलं सुतप्ततपनालोकेन प्रकाशयन्तश्चकाशिरे। रजन्यां विरहविकलतया सङ्कुचिताः नलिन्यः प्रियतमं भास्करं नभसि विद्योतमानमालोक्य पुनरपि विकासं भेजिरे। कोशगताः मधुकराः स्वातन्त्र्येण कमलरसास्वादनेन प्रहृष्यन्तः कलमधुरस्वरेण गुञ्जन्तो मधुकरीभिः सह समुत्पतन्तः समवालोक्यन्त।

क्षितिजस्याङ्कं परित्यक्तुकामं परिपूर्णरक्तमण्डलं भास्करं प्रणमन्ती, पितरं कुलपतिं महर्षिं कण्वं, गौतमीमार्यां, प्रियंवदामनसूयाञ्च विचिन्तयन्ती, कुटीराभिमुखी, चूततरुवाटिकामध्यपथेन शनैः शनैः प्रयान्ती शकुन्तला प्रकृतिजनन्या सम्भाविता। रसालपादपपल्लवकुञ्जेषूपविष्टाः मञ्जरीणामास्वादनेन सुमधुरकण्ठाः परभृतः कुहूरवगीतिभिस्तां समाभेजिरे। पादपस्कन्धविटपबाहुभिः समालिङ्गिताः लताः नवविकसितविविधवर्णसुमनोभिस्तां सद्यःस्नातामिव समापादयामासुः। पुष्पाणां सौरभं पश्यतोहरो मकरन्दरसक्लिन्नो नवप्रभातशीतलो मन्दसमीरणस्तदाननसुशोभितान्मुक्ताफलनिकरसदृशश्रमजलकणानपजहार।

कुटीरनिकटसम्प्राप्तामेव तां पालितो मृगशावकः स्कन्धनिकटमधोलम्बमानैर्वटजटामूलैः क्रियमाणां कूर्दनक्रीडां परित्यज्याभ्युपजगाम। उत्प्लुत्यासौ धर्ममातरमिव शकुन्तलामुपगम्य तस्याश्चरणयोः मस्तकं सम्मर्दयितुमारेभे। वपुरवनमय्य सुतवत्परिवर्धितकं मृगपोतकं वात्सल्यभावेन क्रोडे समुत्थाप्य कोमलविटपानुकारिभ्यां भुजाभ्यां वक्षसि परिष्वज्य

चुम्बनपरम्पराभिस्तस्याङ्गानि परामृश्य सा दुष्यन्ताहितचित्तवृत्तिः सप्तपर्णवेदिकामेवोपाविशत् । हरिणशावकपृष्ठनिहितवामकपोला सा चक्षुषी निमील्य मन्मथरिपुभालविभूषणरश्मिनिकरधवलिताया विगतरजन्याः घटनाचक्रं विचिन्तयन्ती महता वैकल्येन विह्वलत्वेनोद्वेगेन च सम्भृतहृदया बभूव। सहसैव मन्दपवनेन मन्दमन्दमान्दोल्यमानैः सप्तपर्णतरुविटपैः कानिचिज्जीर्ण-पाण्डुरपत्राणि शकुन्तलायां विकीर्णानि। मृगशावकोऽपि सहसा जननीं हरिणीमवलोक्य क्षुत्पिपासाकुलो दुग्धं पातुकामः शकुन्तलायाः क्रोडादुत्प्लुत्य मातरमुपगम्य पयोधरसंलग्नलपनो बभूव।

ससम्भ्रमं कुटीरनिहितशून्यदृक्पाता शकुन्तला शून्यतामेव तत्र व्यलोकयत् । न च तत्र कोऽपि जनः समुपस्थितः समलक्ष्यत । सम्भवत आर्या गौतमी प्रियंवदानसूयाभ्यां सह स्नानसन्ध्यावन्दनादिदैनिककृत्यानि सम्पादयितुं गता ।

कतिपयक्षणानन्तरमेव मेघाडम्बरातिशायिभ्य आजानुलम्बमानेभ्य उन्मुक्तकृष्णकुन्तलेभ्यो निःस्यन्दमानैर्निर्मलमुक्तामणिसमसमुज्ज्वलसलिल-बिन्दुभिस्तपोवनभुवं रेखाङ्किंतां कुर्वन्त्यौ प्रियंवदाऽनसूये तत्र समाजग्मतुः ।

मालिनीधारानिमज्जनविहितस्नानेन विशदपवित्रगौरदेहयोस्तयोरति-धवलवर्णमरुणाभचन्द्रचन्द्रिकारचितमिव मुखयुगलमलकसमूहैः किञ्चिदावृतं किञ्चिदनावृतं जलदमण्डलमध्ये निरीक्ष्यमाणं चन्द्रमण्डलयुगलमिव दीप्यमानं समलक्ष्यत । परं प्रियतमचिन्तानिमग्नमानसा शकुन्तला आत्मानमप्यजानन्ती न बुबोध, कदा ते प्रियसख्यौ तां निकषा समागत्य तस्थतुः । प्रथमं तावत्तु प्रियंवदाऽनसूये प्रियसखीं परब्रह्मणि निहितचित्तवृत्तिं निर्विकल्पसमाधिगतं मुनिमिव निवारितलोकव्यवहारामनिमिषनयनैर्लुलोकाते, तदनन्तरं च साट्टहासं जहसतुः ।

ससम्भ्रममेव सहसा शकुन्तला समुत्तस्थे । स्मितशोभमानवदने सख्यौ सतिर्यग्दृष्टिपातमवलोकयन्त्यौ वीक्ष्य विगतनिशीथिनीवृत्तान्तस्य च संस्मृत्य लज्जावरक्तनम्रवदना सा जागरणगुरुशूनपक्ष्मभारमुत्तोल्य चक्षुषोः सम्मीलनेऽप्यक्षमा न किञ्चिदपि कथयितुं शशाक। मुखे गाम्भीर्यभावं धारयन्ती सा दक्षिणचरणाङ्गुष्ठनखेन भूमिं विलिखन्त्येव तस्थौ। तदा शकुन्तलायाः हनुप्रदेशं मार्दवेन गृहीत्वा मुखमीषदेवोन्नमय्य कौतुकेन

चाञ्चल्यभावेन च परिहसन्ती प्रियंवदा तां बभाषे।

"प्रियसखि ! वर्धापनं तेऽस्तु। कथय कः समाचारः ? रजन्यां कुत्र गतासीः ? सततसङ्गिनीमपि मां विहाय प्रच्छन्नमेव कृतानि सर्वाणि कार्याणि। अयि, अहन्तव हृदयनिर्विशेषा सखी, हृदयान्तर्गतमपि रहस्यञ्जानामि। सदा सहायिका च तव सर्वेषु कार्येषु। न च ते भाग्येष्वहं सहभागाकांक्षिणी। भवतु, कुत्र ते स प्रियतमः ? "

श्रुत्वैव तत् प्रियंवदाजल्पितं, शकुन्तलायाः नयने चिरनिरुद्धाश्रुप्रवाहं प्रच्यावयितुमारेभाते। अतिकठिनतया महता प्रयासेनाऽवरुद्धकण्ठेन गद्गदवाचा सा केवलमेतदेवाचकथत्- "स तु गतः।"

द्वे एव सख्यौ सचकितमतिस्तब्धभावेन शकुन्तलायाः प्रचण्डविरहानलपरिशुष्काननं निर्निमेषं व्यलोकयताम्। स राजा तु मध्याह्नसमये समागत्य कुलपतिचरणयोः प्रणम्य, आशीर्वादग्रहणायात्युत्सुक इव प्रतिभाति स्म। परमिदानीं प्रियसखीमतिसन्धाय विलासानुपभुज्य किञ्चिदपि न सूचयित्वा राजधानीं निवृत्तः। औत्सुक्यचिन्तादुःखभराक्रान्तहृदयाऽनसूया शकुन्तलायाः सव्येतरं करं गृहीत्वा तां वेद्यां समुपवेश्य स्वयमपि च तस्याः दक्षिणपार्श्वे समुपविश्य सकलमेव घटनाचक्रं पप्रच्छ। प्रियंवदाऽपि तत्रैव वामपार्श्वे स्थिता। शकुन्तलया तु वामेतरकरमध्यमाङ्गुलिपरिधृतमङ्गुलीयकं संदर्श्य तथाभूतं वृत्तान्तजातं वर्णितम्। तया कथितम्- "तत्रभवान् सम्राट् कतिपयैरेवाहोभिर्मां नेतुमत्र तपोवनमागमिष्यति।"

किञ्चिदाश्वस्ते किञ्चिदनाश्वस्तेऽनसूयाप्रियंवदे प्रियवयस्यां शकुन्तलां मालिनीतीरं निन्यतुः, स्नानादिदैनिककृत्यानि च तस्याः निर्वर्तयामासतुः। तदनन्तरं कुटीरं समागत्य तिस्रोऽपि सख्यः, किं करणीयमिदानीमिति चिन्तासागरे निमग्नाः। सहसैव तत्र आर्या गौतमी कन्यात्रयस्य कुशलसमाचारजिज्ञासाकुलितचित्ता कुटीरं प्रविष्टा। शकुन्तलां प्रियंवदाञ्च समीपमेवोपवेश्यानसूया गौतमीं पितृभगिनीं समसूचयत्-

"शकुन्तलया निशायामेव पौरववंशीयश्चक्रवर्ती सम्राट् कुरुजनपदशासकः गान्धर्वविवाहविधिना पतिरूपेण वृतः। अनुमोदयितुमर्हेयं नवयौवनभराक्रान्ता शकुन्तला भवत्याऽत्रभवता च कुलपतिना कण्वमहोदयेन।"

स्तब्धीभूतसकलेन्द्रियव्यापारा गौतमी प्रथमं तावदप्रसन्नतामेव व्यानञ्ज। परं भविष्यति कोऽधिकारं भजते ? भवितव्यता खलु बलवती। न हि सा साध्यासाध्यमपेक्षते। विधिपरिपाकः केन लङ्घ्यते। किञ्चिदपि प्रतिकर्तुमक्षमा, क्षत्रियेभ्यो गान्धर्वविवाहविधिं धर्मशास्त्रसम्मतं विज्ञाय तस्याः मन्युर्व्यपगतः। प्रशान्तचित्ता सा जगाद-

"कुलपतिमपि सा साग्रहं याचिष्यते, विवाहस्यास्यानुमोदनाय।"

सहसैव सुदूराद् यज्ञशालाया वेदमन्त्राणामुदात्तानुदात्तस्वरित-स्वरसंविभागस्पष्टोच्चरितानां सुस्पष्टगीतिलयानुकूल्येन सङ्गीतितानां ध्वनयस्तपोवनान्तरालान् व्याप्नुवन्तोऽश्रूयन्त। गौतमी कथयामास-

"पुत्र्यः ! कुलपतिः कण्वमहोदयो मे भ्राता समागत एवेति प्रतीयते। तपोवनमनुप्राप्त एवासौ झटिति ब्रह्मचारिणां मध्ये यज्ञवेदीं गतः। प्रातरेव तस्यागमनं निश्चितमासीत्। प्रातःकालिकसन्ध्यावन्दनादीनामेवैष समयो गुरुकुलनिवासिनां छात्राणाम्। अतः कुलपतिमहोदयस्तत्रैव गतः। युष्माभिस्तिसृभिरपि सखीभिरत्रैव कुटीरे स्थेयम्। अहं यज्ञशालां गत्वा, हवनादिधार्मिककृत्येषु सम्पन्नेषु कुलपत्युपदेशे च सम्भाषिते तेन सह कुटीरं प्रति निवर्ते।

प्रस्थितायां चार्यायां गौतम्यां तिस्रोऽपि सख्यः परस्परं मुखावलोकनं विदधिरे। नैकस्यापि शब्दस्य समुच्चारणे कापि क्षमा तत्र बभूव। वृत्तान्तमेनं निशम्य कुलपतिर्न जाने किं प्रतिपत्स्यते ? तस्य का प्रतिक्रिया भविष्यति ? यदि च कुलपतिना परिणयोऽयं न स्वीकृतः , का गतिर्भविष्यति शकुन्तलायाः, अनुमोदिते सति च विवाहे शकुन्तलेयं पतिगृहं यास्यति। तदेयं दुर्लभदर्शना भविष्यति। आश्रमपदं परित्यज्य सुदूरवर्तिनी चेयमस्मत्साहचर्यपरित्यागिनी राजप्रासादे श्लाघनीये गृहिणीपदे प्रतिष्ठिता राजकार्यव्यापृता कदाचित् स्मरिष्यत्यपि तपोवनवासिनाम्। कदा तामावां प्रेक्षिष्यावहे? आजन्मन एवाऽस्माकं तिसृणां समवयोवस्थानां सततसाहचर्यं वर्तते। सकलेष्वेव नित्यकर्मसु, भोजनेषु, शयनेषु, क्रीडनेषु, पठनेषु, तरुसेचनेषु इत्याद्यन्येष्वपि कार्यजातेषु सहचारोऽस्माकं सर्वत्र प्रथितः।

अहो ! भविष्यति काले शकुन्तलासङ्गस्य का सम्भावना ? अकल्प-

नीयस्यापि वियोगस्य समयः समुपस्थितः। पतिगृहं प्रयान्ती कन्या केन निरुध्यते ? कन्या परकीय एवार्थः। तस्याः वियोगो बन्धुजनेन सहनीय एव। इति चिन्तासन्ताननिमग्नमानसे प्रियंवदाऽनसूये तूष्णीम्भावेन स्थिते शकुन्तला-मेवैकाग्रदृष्ट्याऽनिमिषलोचनैरालोकमाने आसाम्बभूवतुः।

कतिपयक्षणानन्तरमेव वेदमन्त्राणां ध्वनिः पवनपदवीमारुह्य तिरोहितः। कुलपतेश्चोपदेशानां गम्भीरस्वरास्तासां कन्यकानां श्रोत्रेष्वमृतप्रवाहमिव प्रवाहयामासुः। ब्रह्मचारिणस्तु सदाचरणतत्पराः सन्तः सत्यव्यवहार-मेवावलम्बेरन्निति तस्योपदेशस्य सारः।

सम्पन्ने कुलपत्युपदेशे शकुन्तलायाः हृदयगतिः ससम्भ्रममतितीव्रतां प्रपेदे। बाहुभ्यां कथमपि संस्तम्भितमुरःस्थलं तया। कथं गमिष्यति सा पितुः समक्षम्? न जाने स किं मंस्यते, किं वा कथयिष्यति ?

कुलपतिः कण्वस्तु शकुन्तलायां नितरां स्निह्यति। प्राणेभ्योऽपि गरीयसी सा तस्य वात्सल्यभाजनम्। अतः पूर्वं तु यदा कदाचिदपि स आश्रमपदं परित्यज्य कुत्रचित् स्वल्पावधिकायापि प्रवासाय गच्छति, प्रत्यागमनकाले शकुन्तला तपोवनस्य मुख्यद्वारि पितरं प्रतीक्षमाणा त्वरितगत्या धावित्वा, चरणयोश्च सस्पर्शं प्रणम्य अङ्काश्रयप्रणयिनी मधुरकलप्रलापिनी, प्रतनुभुजलताभ्यां तं परिष्वजति। पितरं स्वयमेव कुटीरे प्रवेश्य, आसने समुपवेश्य, चरणौ निर्मलसलिलेन प्रक्षाल्य, किञ्चिदप्याहारजातं साग्रहं भोजयित्वा सकलमेव यात्रावृत्तान्तं सकुतूहलं पृष्टं पृष्टं शृणोति। नावर्तत कोऽपि मोक्षस्ततस्तस्य।

अथ च, प्रतिदिनं सा वेद्यां समुपस्थिता, पितुः पार्श्वे स्थिता यज्ञकर्माणि सम्पादयति। परमद्य कुत्र सा शकुन्तला ? सा तु प्रियदुहिता मनसो रञ्जना प्रवासान्निवृत्तस्य कुलपतेः न दृष्टिपथवर्तिनी बभूव। तस्याः सख्यावपि नावलोक्येताम्। भगिनी गौतम्यपि न तेन दृष्टा। किञ्चिदघटितं घटितमित्या-शङ्कमानः घटनाचक्रमवगन्तुकामोऽपि स काश्यपः कण्वो, हवनवेला समुपस्थितेति प्रथमं तावद् यज्ञशालामेव जगाम। तत्र सर्वे ब्रह्मचारिणस्तं प्रतीक्षमाणा अतिव्यग्रा आसन्। हवनकार्येषु सम्पन्नेषु उपदेशश्रावणे च निवृत्ते स शकुन्तलावृत्तान्तान् द्रक्ष्यतीति तथा तेन विचारितम्।

ब्रह्मचारिभ्य उपदिश्य यज्ञवेदिप्रान्तसोपानमार्गेणावतरता कण्वेनावलोकितम्- "आर्या गौतमी यज्ञशालाया एकस्मिन् पार्श्वेऽवनतानना भूमावेवोपविशन्ती किञ्चिदिव विचारनिमग्ना वर्तते "। प्रस्थितेषु च सकलेषु छात्रेषु ब्रह्मचारिषु स कुलपतिः भगिन्याः सकाशमागत्य स्थिरोऽभवत्। विपरीतमिवाद्य सकलं व्यवहारं लक्षयामीति भ्रातुर्वचो निशम्य पुनरपि व्यावहारिकलोकं प्रविष्टेव गौतमी चकितचकितेव ससम्भ्रमं समुत्थिता। परं गभीरमौनवमलम्बमाना, भ्रातुर्दक्षिणभुजं गृहीत्वा, तं बलादिवाकर्षन्ती सा निजकुटीराभिमुखं निनाय।

कुटीरं गत्वा भ्रातरं कण्वं चासन्द्यां निवेश्य स्वयमपि सा भूमिमेवोपवेशनेनालञ्चकार। अथ अद्भुतेनानेन पुरा कदाप्यघटितेन वृत्तान्तेन चकितचकिते औत्सुक्यभराक्रान्ते नयने भगिन्यां विनिपातयन्तं भ्रातरं सा, मेनकाप्रसूतायाः शकुन्तलायाः कुरुजनपदाधिपस्य च पौरवस्य दुष्यन्तस्य सकलमेव गान्धर्वविवाहपरिणयनवृत्तान्तं विस्तरेण श्रावयामास। तदनन्तरं प्रत्यक्षप्रतिक्रियाविरहितं स्तब्धीभूतमिव निश्चलं निश्चेष्टं तं भ्रातरं पुनः सा प्रार्थयामास-

"भ्रातः! शकुन्तलाया अपराधाः भवता क्षन्तव्याः। अङ्गीक्रियतामेष गान्धर्वविवाहः। शकुन्तला न ब्राह्मणकन्या। राजन्येन विश्वामित्रेण देववाराङ्गनायां मेनकायां प्रसूतेयं क्षत्रियकन्यैव। क्षत्रियेषु गान्धर्वविवाहो धर्मशास्त्रैरनुमोदितः। अनुरूपाय वराय कन्यका प्रदेयेति भवतः प्रथमः सङ्कल्पः। तं दैवमेव यदि सम्यक् साधयति, तदा तत्र को दोषः? दुष्यन्तस्तु कुरुजनपदस्य सम्राड्, वासवस्यापि मित्रं, शकुन्तलायाः निश्चयेन योग्यो वरः। भवताऽपि दुहित्रेऽनुमोदनीयोऽसौ। भवांस्त्वधुना सुतायै शकुन्तलायै जामात्रे च दुष्यन्ताय आशीर्वादान् शुभकामनाश्च वितरतु।

सर्वथैवाऽसम्भावितं घटनाचक्रमेतत् स्वकीयस्वल्पसमयानुपस्थित्यां घटितं निशम्य स्तब्धचित्तो नयने निमील्य निरुद्धबाह्यकरणसकलव्यापारः कण्वो योगदृशा किञ्चिदिव ध्यात्वा, पुनरपि नयनोन्मीलनं विधाय गौतम्यां निहितसचिन्तदृष्टिस्तामुवाच-

"भगिनि! शकुन्तलया यद्विहितं तत् समुचितमेवावगन्तव्यम्। भविव्यतेदृश्येव। जन्मजन्मान्तर्गताः हि भवन्ति परस्परसंयोगस्नेहव्यापाराः।

पूर्वजन्मकृतकर्मणां फलानि भोक्तव्यान्येव। घटितं चक्रं न निवर्तयितुं शक्यते। कालगतिरनतिक्रमणीया। शकुन्तला मे पालिता कन्या धर्मपुत्री निरतिशयस्नेहभाजनं क्षत्रियकुलप्रसूतैव। क्षत्रियरुधिरं तु तस्याः धमनीषु प्रवहति। शरीरं मनो बुद्धिञ्च तदेव पुष्णाति। स्वाभाविकमेव तया कृतम्। क्षत्रियेषु गान्धर्वविवाहः समुचितो धर्मशास्त्रैश्चानुमोदितः। भवत्या सम्प्रति शकुन्तलाऽत्र समानेया। आशीर्वादानेव तस्यै वितरिष्यामि।”

भ्रातुर्वचांसि समाकर्ण्य सन्तोषानन्दपरिप्लुतसमाश्वासितहृदया गौतमी झटित्येव कण्वकुटीराद् बहिरागत्य शकुन्तलया सह पुनरपि तत्र समायाता। प्रियंवदया सह अनसूयाऽपि सखीमनुसरन्ती कण्वमुपजगाम।

अद्य पितुः कुटीरद्वारं समुपस्थिता शकुन्तला आशङ्काभयोद्वेगत्रपादिभावभराक्रान्ता विकलहृदयाऽकस्मादेव निरुद्धगतिः स्थिता। पितुः समक्षं कथं स्थास्यामीति लज्जानिगडनिगडितौ तस्याश्चरणौ तत्रान्तःप्रवेशाय न कथमपि गतिशीलौ बभूवतुः।

भ्राम्यच्छिरः, वेपमानां तनुदेहयष्टिं, कम्पमानौ च चरणौ, इति सर्वाण्येवाङ्गानि तया द्वारावग्रहणीमवलम्ब्य कथमप्येजमानाभ्यां कराभ्यां स्थिरीकृतानि। परं प्रियंवदाऽनसूये द्वे अपि वयस्ये तां बलादिव बाहुभिराकर्षन्त्यौ पितुः सकाशं कुटीराभ्यन्तरमानिन्यतुः।

“सम्मुखमेव वात्सल्यभावेन स्मितसुशोभितवदनं पितरमासन्द्यां स्थितमवलोक्य, कराभ्यां तस्य चरणौ परमविनयभक्तिभावेन संस्पृश्य कृतप्रणामा लज्जावनतमुखी सा एकस्मिन् पार्श्वे समुपविष्टा।

परं त्रपाभरविनमितवदना सा निभृतं निश्चलं निस्पन्दं स्थिता। पितरि दृष्टिपातोऽपि न सुकरो बभूव, नयने उन्नमय्य दर्शनस्य तु कथैव का ? सर्व एव जनास्तत्र कतिपयक्षणपर्यन्तं तूष्णीम्भावेनैवाऽऽसाम्बभूवुः। तदनन्तरं शकुन्तलायाः शिरः सव्येतरेण करेण परामृशन्, नीरवतां भिन्दन् आशीर्वादांश्च वितरन् महामुनिः कण्वः प्रोच्चारयामास वचांसीमानि–

“वत्से ! न्वहमद्य त्वां पूर्वमिव मधुरं जल्पन्तीं प्रेक्षे। क्व गतं ते तथाविधं बालसुलभचाञ्चल्यम्? परं सर्वमेव घटनाचक्रं मया विदितम्। न त्वया भेतव्यं, शङ्कनीयन्न च लज्जा विधेया लज्जनीयं वा। अहं ते पिता, पालकः,

पोषकः, संवर्धकस्त्वयि वात्सल्यस्नेहशीलः। त्वद्विषयकं वृत्तान्तमार्या गौतमी मह्यं निवेदितवती। परं न मया साकल्येन विस्तरेण वा तज्ज्ञायते। अतस्त्वं वा ते सखी वा वर्णयतु सकलं वृत्तान्तं विस्तरेण।"

पितुराश्वासनं लब्ध्वा विगतभयचिन्ता शकुन्तला समुत्थाय पुनरपि पितुश्चरणयोः प्रणनाम। परं नारीसुलभलज्जाभराक्रान्तहृदया सा नैकमपि शब्दमुच्चारयितुं क्षमा बभूव। समीपस्थमेवैकं तृणं सा सव्यकराङ्गुलिषु गृहीत्वा भूमिं विलेखितुमारेभे। तदाऽनसूया काश्यपं कण्वमेवं बभाषे

"कुलपते ! मध्याह्नोत्तरवेलायां पौरवः सम्राट् कुरुजनपदाधिपतिः दुष्यन्तोऽत्रभवते प्रणामाञ्जलीन् समर्पयितुं समाजगाम। भवतोऽनुपस्थितौ सखीभिरस्माभिः सह सप्तपर्णवेदिकायां स्थिताभिस्तस्य विस्रम्भवार्तालापाः बभूवुः। शकुन्तलायाः मनोरमं रूपं नवं वयः कान्तं वपुश्चावलोक्य बलादेवाकृष्यमाणे तस्य मनसि मन्मथविकारेण पदं निहितम्।

अथ समग्रगुणविभूषितमात्मनोऽनुरूपं च तमवलोक्य शकुन्तलायाः हृदयमपि तस्मिन्नेव सङ्गतम्। अनया स पतिरूपेण वृतः। गान्धर्वविधिना च परिणयोऽपि संवृत्तः। नारीसुलभचाञ्चल्यभावेन, नवयौवनस्य दुर्निवारतया, कामदेवस्य सर्वसामर्थ्यशालितया, तथाभूतया च भवितव्यतया तया यः कोऽपि दोषः समाचरितः, स सर्व एव महामहिमशालिना भवता क्षन्तव्यः। शकुन्तलेयमावयोः प्रियसखी, भवतो वात्सल्यभाजनं सस्नेहमाशीर्वादानेवार्हति।

पुनश्च, विजितदशेन्द्रियेण, वशीकृतमनसा, परमात्मनि रममाणेन, ध्यानावस्थितेन, निर्विकल्पसमाध्यवस्थां सम्प्राप्तेन भवता, तपसा सामर्थ्येन योगदृशा दिव्यचक्षुषा सकलमेव त्रिकालवर्ति जन्मजन्मान्तर्गतमपि घटनाचक्रमवबोद्धुं क्षम्यते।"

अनसूयायाः कथनमाकर्ण्य चिन्तासन्तानसमाक्रान्तचित्तोऽपि क्षणं यावन्नयने निमील्य, किञ्चिदिव ध्यात्वा, पुनश्च तथैव नयनोन्मीलनं कृत्वा स्मितपूर्वाभिभाषी कण्व एवं जगाद-

"वत्से ! अनसूये ! यद्यपि ममानुमतिमनपेक्ष्यैव शकुन्तलयाऽनया गान्धर्वविधिना स्वप्रणयी स पौरवः सम्राट् पतिर्वृतः, तथापि मया सोऽनुमोद्यते। दुष्यन्तस्तु स्वगुणैरस्याः योग्यो भर्ता, इयञ्च निजगुणैस्तस्य

योग्या भार्या। गुणानुरूपेण युवकेन स्वगुणानुरूपाया: युवत्या: सङ्गमो न विपत्तिहेतु:। सदैव स धर्मवृद्धिकारक:। शकुन्तलया न भेतव्यम्। अथ च नानवधानतया भाव्यम्। तथापि शुभस्य शुभं भद्रस्य भद्रं विधास्यत्येवाऽनतिक्रमणीयो विधि:।"

पुनश्चासौ शकुन्तलामभिमुखीभूय प्रोवाच-

"वत्से! मनसि त्वया न कोऽपि हीनताया: पश्चात्तापस्य वा भावनाऽऽनेया। तवेदमाचरणं लोकव्यवहारैर्धर्मशास्त्रैश्चानुमोद्यते। त्वं दुष्यन्तस्य योग्या भार्या गृहिणी च भविष्यसि। तव जन्म सार्थकं सुफलं च भविष्यति।

वत्से! पुरुवंशदीपकोऽयं दुष्यन्त: कुरुजनपदानां सम्राट्। तं सङ्गम्य त्वमत्यन्तं सौभाग्यशालिनी वर्तसे। अनेन संयोगेन त्वं चक्रवर्तिनं सार्वभौमं सम्राजं सुतं प्रसविष्यसे। स तु सागररशनां हिमगिरिमुकुटविभूषितां सकलामेव धरां प्रशासिष्यति।

वत्से! सुप्रसन्नोऽहमद्य त्वयि। सकलांश्च ते मनोरथान् पूरयितुं क्षम:। यथाभिलषितं वरं वृणीष्व।"

शकुन्तला प्रत्युवाच-

"पित:! मया तु पुरुषश्रेष्ठो दुष्यन्त: पतिरूपेण वृत:, भवता चाऽसावनुमोदित:। एतदेव मे यथेष्टम्। मम प्रसव: सार्वभौमचक्रवर्तिसम्राज: पदेन विभूषित: सकलां धरित्रीं प्रशासिष्यति, इति भवताऽऽशीर्वादा अपि वितीर्णा:। किमन्यद् कामयेय। तथापि परमप्रसन्नो यदि भवान् दातुमेवाभिलषति, आशीर्वादानिमान् वितरतु-

"पत्युर्मे वंशस्य सदा शं भूयान्मतिश्च मे सदा धर्मपरायणा वर्तिषीष्ट।"

पत्युरेव हितं कामयमानां शकुन्तलां परमप्रसन्न: सन्तुष्टश्च कण्वो महर्षि: पुनरपि जगाद-

"वत्से! तवेमा: शुभभावना: कामनाश्च विज्ञायाहमतिशयं प्रसादितहृदयो वर्ते। कुरुसम्राजस्त्वं गुणानुरूपा सर्वविधयोग्या महादेवी। पतिव्रतासु त्वां ललाटतिलकरूपां गणयिष्यन्ति सुविचारशीला: जना:।"

वचांसीमानि समुच्चार्य शकुन्तलाया: शिर: शिराजालग्रथितेन

सव्येतरकरतलेन परामृश्य, भास्वानुदयगिराविव व्याघ्रचर्मावृतपीठासने निषण्णः किञ्चिच्चिन्तानिमग्न इव कण्वो महर्षिर्ध्यानावस्थितमानसो निमीलितनयनो बभूव। शकुन्तलाऽपि प्रमुदितचित्ता उदयता अंशुमालिना विकासं भजमाना पद्मिनीव विकसितस्मितसुशोभमानानना, निर्मलविशदमन्दहासेन कण्वकुटीरं प्रकाशयन्ती प्रियंवदाऽनसूयाभ्यां सखीभ्यामनुगम्यमाना बहिरागत्य स्वपर्णशालाभिमुखी बभूव। आर्या गौतमी तु तत्रैव किञ्चिदिव विचारयन्ती कण्वसमीपं भूमावेवोपविशन्ती तस्थौ।

(११)

शकुन्तलां गान्धर्वविधिना परिणीय हस्तिनापुरीं राजधानीङ्गतवति दुष्यन्ते वासराणामगणिता संख्या व्यतीता। परं प्रत्यागमनकृतप्रतिज्ञो दुष्यन्तश्चक्रवर्ती शकुन्तलायास्तपोवनवासिन्याः वृत्तान्तमपि ज्ञातुमुत्सुक इति किमपि लक्षणं न प्रतीयाय। एकरजनीपरिचितं प्रियतमं प्रतीक्षमाणा शकुन्तला न कथमपि स्वास्थ्यं वा निर्वृतिं वा सौख्यं वाऽलभत। दुष्यन्तेनोपहृतस्याङ्गुलीयकस्य निजदक्षिणकरमध्यमाङ्गुलिपरिधृतस्यैकैकान्यक्षराणि प्रियतमनामाङ्कितानि प्रतिदिनं वाचयन्ती सा असंख्यसंख्यवारं गणयामास। परं न तु तस्य निर्दयसुकठोरहृदयप्रणयिन आगमनस्य कान्यपि लक्षणानि तया समवलोकितानि, न च राजधान्याः हस्तिनापुर्याः कश्चिदपि सन्देशवाहकस्तस्य सम्राजः सन्देशमादाय समायातः।

न ज्ञायते, अन्तःपुरं प्रविष्टो नवयौवनलावण्यशालिनीभिः कामिनी-दामिनीभिरन्तःपुरिकाभिः चित्तोन्मादयितृनागरजनगुणविशिष्टाभिः परिवृतो-ऽसावितोगतस्य वृत्तान्तस्य स्मरति न वा ? तथापि तथाविधा आकृतिविशेषाः गुणविरोधिनो भवन्तीति को विश्वसेत् ? एवञ्च तस्याः समभूवन् व्यापाराः।

"आशानिराशादोलाधिरूढा सततमान्दोल्यमानमानसा, प्रचण्डविरह-वह्निविदग्धहृदया शकुन्तला प्रातरेव दैनिककृत्यानि सम्पाद्य प्रतीक्षमाणा वञ्चकं प्रियतमं मालिनीतीरमुपगम्य तस्यैव पाषाणतलस्योपरि समुपविश्य सुकोमलौ पद्मताम्रौ चरणौ सलिलधारायां निवेश्य तामेव दिशं निर्निमेषमनवरतञ्च विलोकयति, यां सोऽसत्यवादी, वितथसन्धः प्रतारणा-कुशलः परातिसन्धाननिपुणमतिरुल्लंघितसदाचरणोऽसौ राजा तथाविधं

मधुरं संलप्य, त्वमेव मे प्रिया, त्वमेव मे हृदयसम्राज्ञी, त्वमेव महादेवी, त्वमेव मे वंशप्रसवकारिणी, त्वमेव मे कुलप्रतिष्ठेति वितथं प्रतिज्ञाय शीघ्रमेव प्रत्यागमनाय चाश्वास्य गतः।

कदाचिद् विप्रकृष्टान्तरालाद् वनप्रदेशाद् रथोद्घातोत्थापितानि रजांसि व्योम्नि संलक्ष्येरंस्तेषाञ्च मध्ये हस्तिनापुरात् समायातस्य प्रियतमस्य दर्शनं भवेदिति मिथ्याऽऽशाकिरणालोकितहृदयाऽनवरतं तामेव दिशं सा निरीक्षते। परं सकलमेव विफलं व्यर्थं भवति। प्रातरुदितो भानुः मध्याकाशमधिष्ठाय शकुन्तलायाः शोचनीयामवस्थामवलोक्य सायंसमये परिस्रस्तुमारभते। स वैराग्यमापद्य सन्ध्यारुणिमरूपाणि काषायवस्त्राणि परिधाय सुदूरं क्षितिजप्रान्तरमारक्तं विधाय पश्चिमसागराम्भसि स्वात्मानं निमज्जयति।

प्रगाढान्धकारे सकलमेव लोकमाच्छादयन्ती निभृतं पदमादधाना खद्योताली— विलसन्नक्षत्रजालमणिखचितनीलगगनशाटिकाविहितनैपथ्या-ऽभिसारिणीव रजनी कमपि प्रियमन्वेषमाणा समागच्छति। परं व्योम्नि पूर्वदिशि समुदयन्तं प्रियतमं शशिनं रोहिणीरमणं वीक्ष्य सपत्नीजन्ययेर्ष्ययेव गाढमुरसि तस्य शेते। अपि च शशी श्यामशरीरायाः बलादिव प्रणयप्रदर्शनव्यग्रहृदयायाः निशायाः भारमसहमान इव वैराग्याभिभूतः पाण्डुरवदनमण्डलो भूत्वा पश्चिमाचलमारुह्य प्रतीचीदिग्वर्तिपयोनिधिपयसि स्वात्मानं निमज्ज्य सन्तापशमनप्रयासतत्परोऽवलोक्यते।

शिवभालविभूषणस्यैनां दशां विलोक्य परिहासकुशला उषाः प्राचीदिगन्तरालान्धकारावरणनैपथ्यमपसार्य विलासविकलाऽऽरक्तमुखमण्डलं दिनकरमामन्त्रयमाणा संलक्ष्यते। दिनकरोऽपि सप्तवर्णरश्मिरूपसप्तसप्तिरथ-मारुह्य प्रियप्रणयिनीमुखमनुसरन् त्वरितगत्या गगनमारोहति।

परं शकुन्तला सकलानेवेमान् प्रकृतिघटितहृदयहरवृत्तान्तान्ननभिजानन्ती केवलं दुष्यन्ताहितचित्ता प्रातरेव मालिनीतीरमुपगम्य, सकलदिवसं प्रियतमं प्रतीक्षते। प्रसृते चाऽन्धतमसि कुटीरं प्रतिनिवर्तते।

शनैः शनैः दिवसाः व्यतीताः, सप्ताहाः व्यतिक्रान्ताः, मासाः व्यपगताः, ऋतवोऽप्यैकैकशो याताः। प्रचण्डघर्मसन्तापदायकं ग्रीष्मर्तुमवहेल्य वियत्युन्नमद्भिर्मेघैः धरातलसमविषमप्रदेशान् धारासारजलवर्षणैः समानिव

सम्पादयन्, जीमूतानां कडकडदिति घोरगर्जनैस्तडिताञ्च तडतडदिति निर्घोषयुतचमत्कृतिभिः मृदुलहृदयप्राणिनां चेतांसि कम्पयन्, सहस्रशः सरितां नवजलदजलपूरपूरितानां वृद्धिमापादयन्, नवकिसलयैः हरितपत्रैश्च विद्रुममरकतमणिखचितशोभान् तरुलताक्षुपादीन् सम्पादयन् क्षेत्रेषु धान्यादिसमृद्धिकरो वर्षर्तुः समायातः।

विगते च वर्षाकाले शरदृतुना गगनावरणभूताः जीमूताः विद्राविताः सुदूरं यावच्च विस्तृतनीलमणिसमा प्रभा वियति विस्तारिता। मध्ये च तस्य क्वचिदपि वर्षाजलविरहिताः धवलवर्णाः मेघा अदृश्यन्त। रजन्यां नक्षत्रखचितनीलमम्बरं रजनिरमण्याः स्वर्णसूत्रमणिजटितनीलशाटिकाम्बर-मिव प्रतीयाय। स्वच्छनीलनीरेषु सरोवरेषु विकसितपुण्डरीकारविन्देन्दी-वरतामरसशोभां सम्पादयन् हंसबकसारसकारण्डवजलकुक्कुटादिजलचरख-गवृन्दान्युल्लासयन् शरदृतुरपि हेमन्तर्तुना विद्रावितः।

शनैः शनैः दक्षिणायनीभूतस्य भगवतो मार्तण्डस्य मण्डलमचण्डमरीचीनां कोमलमुत्तापं प्रसारयद् बहुगुणरमणीयं सञ्जातम्। क्षेत्राणि परिपक्वकपिशशा-लिधान्यप्रसवैश्चितानि निबिडेक्षुदुर्गमाणि च कुर्वन्, दिशां सीमान्तराणि प्रफुल्लनीलोत्पलशोभितानि मनोहरक्रौञ्चसारसहंसरवनिनादितानि सम्पादयन् विलासिनस्तरुणजनान् पीनस्तनोरःसुशोभितसुन्दरीसंसर्गकामुकान् जनयन्नयं सततमभिमनोरमो हेमन्तर्तुः क्रमशः मदविकलकामिनीमानविद्राविणा महामहिमहिमाच्छन्नेन योषितां प्रियेण शिशिरर्तुना समाक्रान्तः।

तस्मिन् काले जगत्प्राणो मारुतोऽपि तुषारसङ्घातनिपातशीतलः, प्राणिनो शैत्येन जडीकुर्वन् गृहाणि निरुद्धवातायनानि चकार। गगनतलं प्रालेयपातैर्धूमधूसरितमिव प्रतिबभौ। दिनानां परिणाहाः रजनीनां च लघुताः लुण्ठिताः। सलिलेष्ववगाहाः सुदुष्कराः बभूवुः। क्षेत्राणि यवगोधूमादिशूक-धान्यहरितवालिराशिभिः सम्भृतानि अत्युन्नतैरतिमधुररसभरैरिक्षुभिरावृतानि, छिद्यमानमुद्गमाषवल्लाणि अतसीसर्षपादिस्वर्णपीतपुष्पसमाच्छादितानि शोभमानानि नयनप्रीतिकराणि बभूवुः।

एवञ्चर्तुपरिवर्तनेषु क्रमशः मासानां नव संख्या व्यतीता। परं दुष्यन्तस्य न कोऽपि समाचारः समायातः। प्रथममिलननिशीथिन्यामेव दुष्यन्तेनाहितं तेजो गर्भे दधाना सा वराकी तपस्विनी तपोवनवासिनी, क्रमशः प्रव-

र्भमानगर्भभरेणालसा, न जानीते स्म सुखस्य हेतुरयं सन्तापस्य वा। केवलं च तेन भरेण सम्पीडिता क्लेशिता, खेदिता, ग्लाना, म्लाना न कथमपि कायिकं, मानसिकं वा सुखमवाप।

एकतस्तु गर्भस्य भारो, द्वितीयो भर्तृवियोगस्तृतीयो दुष्यन्तस्यावहेलना उपेक्षा च, चतुर्थश्चाश्रमवासिनां सव्यङ्ग्याः दृष्टिपाता इति बहुविधैर्हेतुभिर्नास्ति क्वचिदपि तस्याः वराक्याः दुःखस्य निष्कृतिः। केवलमनसूया प्रियंवदा च तस्या आश्वासनभूते वयस्ये प्राणरूपायाः सख्याः मनोविनोदनाय सततं कृतप्रयासे वर्तेताम्। विरहव्यथाछलप्रवञ्चनाव्यङ्ग्यादिव्यथितं तस्याश्चित्तं प्रसादयितुं न कस्याप्यभावस्यावसरमानिन्यतुस्ते। पिता कण्वोऽपि दुहितुर्मनोव्यथामनुभवन् सर्वविधैः प्रयासैस्तस्याः सुखं, कल्याणं श्रेयो वा सम्पादयितुमुत्सुकोऽभवत्। आर्या गौतमी शकुन्तलायाः स्वास्थ्यं सदैवाचिन्तयत्। परं कुत्र तस्याः शान्तिर्वा सुखं वा स्वास्थ्यं वा ? प्रतिक्षणमहर्निशं दावाग्निदुःखदाहदग्धहृदया पुटपाकनिधापितेव सा न निर्वृतिमलभत।

शकुन्तला विचारयति स्म मनसि-

"कदाचित् प्रवञ्चना, छलनैवेयमासीत् तस्य नरपालस्य, यो नररूपधारी मोहनस्वरूपो मधुरमधुरं तथाऽऽश्वास्य मां मोहाभिभूतां समर्पितहृदयमनःकायामतिसन्धाय प्रतार्य स्वकीयां क्षणिकां वासनां परितोष्य मां च भ्रष्टाचारिणीं स्वातन्त्र्येण विधाय स्वनगरं प्रविष्टः।"

तथापि सा आत्मनैवात्मानं सान्त्वयामास-

"न मया कोऽपि पापाचारो विहितः। न कदर्यमाचरितम्। मे मनोभावनाः पवित्राः। तस्य शठस्य भावनाः कीदृश्योऽपि वर्तेरन्, मया तु सर्वान्तःकरणेन शुद्धहृदयेन स्वात्मा समर्पितः। अहं तु पवित्रान्तःकरणा पतिव्रता सती पातिव्रत्यधर्मं निर्वहामि।"

प्रायशो मालिनीतीरवर्तिशिलातलनिषण्णा हस्तिनापुरदिग्वर्तिकाननतरुपङ्क्तिमध्यगतपथनिहितनयना सा भर्तारं प्रत्यैक्षत। परन्तु दुष्यन्तस्य दर्शनं तु दुर्लभमेव। अनेकधा तपोवनवासिनो मुनयस्तपस्विनः प्राध्यापकाः सहाध्यायिनो छात्राश्च मालिनीतीरं समागत्य शकुन्तलामेकाग्रदृशाऽवलोकयन्ति स्म। तेषां दृष्टिर्न जाने कीदृशी मर्मभेदिनी शकुन्तलायाः हृदयस्यान्तःप्रविश्य

तामपीडयत्, यत्तया मालिनीतीरमपि परित्यक्तम्। तदा तस्याः ईदृशी दशा बभूव-

"प्रायशः स्वकुटीरे सन्निहितनिजतनुकाययष्टिः सा सखीभ्यामेवानुवास्यमाना समयं यापयति। कर्हिचिद् बहिरागत्य सप्तपर्णपरिवेष्टितां वेदीमुपगम्य पालितेन मृगशावकेन तस्याश्च जनन्या साकं क्रीडालवेन मनो विनोदयति।

कदाचित् सख्योः सान्निध्यमपि तस्यै न रोचते। तयोरागमने सा तूष्णीम्भावेन स्थिता संलपत्योरपि न किञ्चित् संलपति। शकुन्तलायाश्चौदासीन्यं परिलक्ष्य किञ्चिदपि प्रतिकर्तुमक्षमे ते अप्यौदासीन्यमवलम्ब्य प्रतिष्ठेते।"

कुलपतेः कण्वस्य गुरुकुले शकुन्तलाऽध्ययनप्रिया प्रतिभाशालिनी गुरुजनानां वात्सल्यपात्रं सहाध्यायिनां छात्राणां समादरभाजनमवर्तिष्ट। दुष्यन्तप्रणयप्रसङ्गनिरुद्धाध्ययना सा उच्चशिक्षायामेव मनः संयोजयितुमियेष। शनैः शनैः सा धर्मशास्त्राणां गहनाध्ययने निममज्ज। कुलपतिः कण्वोऽपि तदवस्थायां तस्याः सहायको बभूव। अन्येषामपि विषयाणां वेद-दर्शन-धनुर्वेद-राजशास्त्रादीनामध्ययनं तया कृतम्।

शिशिरर्तौ महामहिमहिमाच्छन्नस्य समयोऽवर्तत। प्रचण्डशैत्यमावहन्तोऽमर्षणाः वाताः सीत्कारवेपथुरोमोद्गमोत्पादकाः वराकाणां तपस्विनामधरान् व्रणितान् कपोलांश्च विपाटितांश्चक्रुः। स्फुटितचरणपार्ष्णितलाङ्गुलयश्छात्राः काठिन्येनैव कुशाङ्कुरितासु वनभूमिषु समिधामाहरणाय प्रययुः।

(१२)

माघमासस्य प्रारम्भे मकरसङ्क्रान्तिदिवसे रश्मिमालिनो मृदुसुकोमलकिरणैरप्युत्तापं कामयमाना शकुन्तला गर्भभरालसा मध्याह्नवेलायां सप्तपर्णवेदिकायां समासीनैकाकिन्येव क्रोडे निहितस्य पालितस्य चित्रचित्तिकानिचितस्य मृगशावकस्य वदने निहितवदना गहनान्धकारनिविष्टां भाविजीवनधारां विचारयन्ती ईषन्निद्रितेवाऽऽसीत्। सहसैवैकेन प्रचण्डशिशिरपवनाघातजनितेन वातावर्तेन समुत्थितो धूलिसमूहो गगनं

व्याप्नोत्। चकितचकितो भयभीतो मृगशिशुः शकुन्तलाया अङ्कात् परिप्लुत्य मातुरङ्कं प्रविष्टः।

आघातमेनमसहमाना गर्भभरखिन्ना शकुन्तला सहसैव प्रचण्डतीव्रोदरशूलेनातिव्याकुला वेदिकायां निपत्याशयिष्ट। उदरशूलमिदमसह्यं सोढुमक्षमा सा तारस्वरेण चीत्कारमकरोत्। प्रचण्डवातावर्तेऽपि वायुमण्डलं विभिद्य कुटीरेषु प्रविशन् चीत्कृतिरवोऽयं प्रियंवदया अनसूयया गौतम्या च श्रुतः। त्वरितगत्या समागत्य तास्तिस्रोऽपि शूलेन व्याकुलीक्रियमाणां वेदिकायां पादपाश्रयविच्युतां म्लानपुष्पां लतामिव, भूमौ शयानां विचेष्टमानां हस्तपादमितस्ततः प्रक्षिपन्तीं शकुन्तलामुत्थाप्य कुटीरमध्यमानिन्युः।

तस्यामेव निशीथिन्यां निशीथावसाने प्रहरमात्ररजनिशेषे ब्राह्मे मुहूर्ते पुण्येऽहनि प्रशस्ते लग्ने शुभवेलायां शकुन्तला सकललोकहृदयानन्दकारिणं सुतं प्रसुषुवे। मकरसङ्क्रान्तितः प्रारभमाणो नवजातचक्रवर्तित्वसूचकः समयोऽयमासीदुत्तरायणस्य। तस्मिन्नेव क्षणे मेघमालासु सौदामिन्येव स्फुरितम्। सहसैव प्रकृतेरसौ सकलोपद्रवो राजशासनभयादिव प्रशान्ततां गतः।

जात एव तस्मिन् राजसुते हर्षभरा नृत्यन्तीव प्रियंवदा कुटीरस्य दक्षिणभित्त्यवलम्बितपादपीठासनात् कम्बुमेकमादाय वदनमारुतेनाध्माय उच्चस्वरेण शङ्खध्वनिमकरोत्। ध्वनिश्चासौ तपोवनस्य कोणे कोणे विचरन् यज्ञशालानिकटवर्तिकुटीरे प्रबुद्धछात्रैः सह जल्पतः कुलपतेः कण्वस्य छात्राणाञ्च कर्णकुहराणि प्रविष्टः। कुतोऽयं मङ्गलाशंसनः शङ्खध्वनिरिति त्वरितस्पन्दमानहृदयः शकुन्तलायाः पिता सरभसं तानेव छात्रानादाय कम्बुरवानुसारी शकुन्तलाकुटीराभिमुखं प्रतस्थे।

जातकस्य महापुरुषलक्षणैरुपेतस्य श्रियेव समालिङ्गितस्य दौहित्रस्य तेजस्विनमतिरूपलावण्यसुशोभितं परिपूर्णमण्डलं शशिनमिव द्योतमानं विकसितारविन्दमिव शोभमानमाननं, विगतनिमेषपक्ष्मभ्यां सुदूरं विस्फारिताभ्यां स्नेहगर्भाभ्यां चक्षुर्भ्यां प्रेक्ष्य प्रमोदानन्दनिर्भरः प्रहृष्टवदनः कुलपतिस्तस्य शिशोर्मुष्टिकाबन्धनं व्यावृत्य शङ्खचक्रचिह्नितं प्रशस्तलेखालाञ्छितं जालग्रथिताङ्गुलिं चक्रवर्तिलक्षणोपेतं करतलमालोक्य विस्मयविस्फार्यमाणलोचन एवमवादीत्-

"निश्चयेन बालकोऽयं सार्वभौमचक्रवर्तिपदविभूषितः सकलमेव भुवनमण्डलं विजेष्यते। रूपे, बले, तेजसि, प्रतिभायां, विद्यायां, समृद्धौ च न कोऽपि दास्यस्याप्यधिकारित्वमस्य प्राप्स्यति। शताधिकैरश्वमेधावभृथस्नानैः पुण्यवपुरयमनेकान् राजसूययज्ञान् सम्पाद्य चतुरुदधिप्रत्यन्तशरणागतप्रणतभूपालशिरोमणिरञ्जितचरणाङ्गुलिरन्ध्रो देवाधिपतिं वासवमप्यतिशयिष्यते।"

पितुरिमानि प्रसादोत्साहजनकानि वचांसि निशम्य प्रसवजनितक्लान्तिशिथिलशरीरा चिन्तासन्तानम्लानहृदयाऽपि शकुन्तला कथमपि विद्युद्दीप्तमिव स्मितमोष्ठयोरानीय पितरमेकाग्रदृष्ट्याऽऽलुलोके। मनसि च सुदृढं निश्चिकाय, यदस्य बालकस्य जनकः सन्ततिं निजवीर्यप्रसूतिमङ्गीकरोति न वा करोतीत्यनपेक्ष्यैव साऽऽत्मनस्तनूजं तथा शिक्षितं विधास्यति, यथा स सप्तद्वीपं सकलं भुवनं विजित्य, प्रतारणकुशलं धर्मकञ्चुकप्रवेशिनं जनकमपि पराजित्य चक्रवर्ती सम्राड् भूत्वाऽप्रतिहतगतिरथो लोकं भरिष्यति।

शकुन्तला कुलपतिकण्वदुहिता प्रशस्तलक्षणं चक्रवर्तिरेखाङ्कितं तनयमसूतेति शुभसमाचारः सत्वरमेव सकलाश्रमवासिनां कर्णकुहरेषु पीयूषधारामिवाश्च्योतयत्। प्रहर्षनिर्भराः गुरुकुलाध्ययनरताः ब्रह्मचारिणो ब्रह्मचारिण्यश्च सहपाठिनः सहपाठिन्यश्च शकुन्तलां तत्प्रसूतिञ्च पुष्पाञ्जलिभिरभिनन्द्य सरभसमुच्चलितनृत्यचरणविकुट्टितकुट्टिमोद्भूतरवैराश्रमप्रान्तराणि निनादयामासुः। सर्व एव गुरुकुलस्याचार्या उपाध्यायाः महर्षयश्च आशीर्वादैरेनं शकुन्तलासुतं समायोजयन्। रक्तनीलपीतशुभ्रवर्णकुसुमपुञ्जपिञ्जरितमाश्रमप्राङ्गणं चित्रचित्रितमिव सञ्जातम्।

गुरुकुले प्रमुखाचार्यपदप्रतिष्ठितौ कण्वस्य शिष्यौ शार्ङ्गरवशारद्वतौ फलितज्योतिर्विद्यापारङ्गतावास्ताम्। शकुन्तलासुतवपुषि प्रशस्तानि चक्रवर्तिपदसूचकानि लक्षणानि निरीक्ष्य विस्मयविस्फारितनयनौ सुचकितौ तावघोषयताम्-

"शाकुन्तलेयोऽयं नियतमेव सर्वान् लोकान् विजित्यानुद्घातस्तिमितगतिरथेन सार्वभौमचक्रवर्तिसम्राडिति शब्देन विभूषित आहिमगिरिदक्षिणसमुद्रपर्यन्तां धरित्रीमेकचक्राधिष्ठितां करिष्यति। नानेन समः कोऽपि सम्राड् भूतकाले बभूव, नापि च भविष्यति भविता। देशोऽयमप्यस्यैव नाम्ना प्रसिद्धिं यास्यति।"

कण्वश्च महर्षिः सद्योजातस्य दौहित्रस्य जातकर्मसंस्कारं सोत्साहं सम्पादयामास। अथ समतिक्रान्ते षष्ठीजागरे सम्प्राप्ते च दशमे शुभे दिवसे, प्रशस्ते मुहूर्ते परिपूर्णचन्द्रमण्डलनिभाननस्य शाकुन्तलेयस्य नामकरणसंस्कार-समारोहव्यग्रमनाः सकलाः क्रियाः कृतवान्।

अस्मिन्नवसरे कुलपतिरसावन्येषामप्याश्रमाणां तपोवनानां गुरुकुलानाञ्च ऋषीन् मुनीन् आचार्यांश्च निमन्त्रयाञ्चक्रे। हस्तिनापुरे कुरुजनपदाधिपतिं सम्राजं दुष्यन्तमपि निमन्त्रयितुं प्रवृत्तोऽसौ, सततप्रतारणकपटापमानजनितदुःखदावदहनदग्धहृदयया शकुन्तलया सुदृढं सुकठोरञ्च निषिद्धः। अथ नामकरणसंस्कारे होमक्रियां सम्पाद्य शिशुरयं भविष्यति काले सकलानाततायिजनान्नुल्लंघितसदाचारानुपद्रवकारिणश्च प्रसभं दमिष्यति, इत्याकलय्य तं सर्वदमननाम्नाऽसावलञ्चकार।

एवञ्च कृतचूडाकरणादिसंस्कारस्य तस्य शाकुन्तलेयस्य शिशोः शैशवक्रीडाभिः शैशवमतिचक्राम। क्रमशश्चासौ शुक्लपक्षचन्द्र इव प्रतिदिनं वर्धमानः सुपुष्टसुदृढसकलावयवोऽनुपमं रूपलावण्यं दधानो, मधुरं कलस्वरञ्च पोषयन् तपोवननिवासिनां स्नेहातिरेकभाजनं बभूव। प्रतिभामपि स विलक्षणामेवालभत। अङ्कादङ्कं सञ्चरन्तं बालकं तमनिमित्तहासं हसन्तं क्रीडन्तञ्चावलोक्य शकुन्तलाया चित्तं सर्वेषामेव दुःखानां विगतप्रतारणाछलजनितानां विस्मृत्य पुत्राननदर्शनामृतवर्षया स्नातं विमुग्धमनिर्वचनीयभावनाभिः सम्भ्रियते स्म।

मृत्तिकाबहुलास्वाश्रमभूमिषु क्रीडाव्यापारेषु विलुठ्य रजोभिर्दिग्धसकलावयवः स शिशुर्यदा मातः मातरिति व्याहरन् जनन्याः क्रोडमधिरुह्य वक्षसा च संश्लिष्य, सुमृदुललघुभुजाभ्यां शकुन्तलायाः कम्बुकन्धरामावेष्ट्य दृढं सम्पीड्य स्वकीयं प्रफुल्लपुण्डरीकाननं तस्याः पयोधरमध्ये न्यदधात्, वात्सल्यहर्षनिर्भरानन्दहृदया शकुन्तला सुतमतिप्रगाढभावेन द्वयोरेव भुजयोर्मध्ये दृढमालिङ्ग्य चुम्बनशतेन तस्य कपोलावभिषिच्य विस्मृतसकलचिन्तासन्तानपरम्परा न कामपि निजसदृशीमजीगणत्। आश्रमवासिनश्चापि सर्वदा तं सर्वदमनं स्वेष्वङ्केषु लालयितुमुत्सुका अभवन्। इत्थमङ्कादङ्कं सञ्चरतस्तस्य सुमहान् कालो व्यतीतः।

कुलपतिः कण्वस्तु दुहितृमुखाभिलाषी दौहित्रस्य बालसुलभक्रीडा

समवलोक्य परमप्रहर्षसुखान्यनुबभूव। तथापि समयान्तरेणासौ शकुन्तलां पतिगृहं दौष्यन्तिञ्च पितृगृहं स्वयमेव प्रेषयितुमनेकवारमियेष। परन्तु सुदृढं स्वाभिमानिनी शकुन्तला आत्मनैव पतिगृह गमनाय न सहमता बभूव। तृणाच्छन्नकूपोपमेन कितवेन तेन विप्रलब्धा सा, इति भावना सततं तस्य हृदयं प्राहरत्। सा विचारयामास-

"यदि चासौ छलनापरः कपटपटुः स्वयमेवात्रागच्छति, आगत्य च स्वापराधेभ्यः शकुन्तलां क्षमां याचते, तदैव सा तेन सार्द्धं हस्तिनापुरं गत्वा राजप्रासादाधिकारिणी भविता। अथवा मूर्ध्नि वा सकललोकस्य सा स्थास्यति, वन एव वा विशरीष्यति।"

क्रमेण एकैकमनुसृत्य वत्सराणां षट् व्यतीतम्। दुष्यन्तेन क्षणमपि शकुन्तलायाः स्मरणं न कृतम्। एतस्मिन् समयान्तराले प्रियंवदाऽनसूये चापि तपोवननिवासिभ्यां तापसयुवकाभ्यां परिणीते। परं पतिविरहिणी शकुन्तला एकरजनिप्रणयिनी दिवसेषु कार्यव्यापारव्यग्रचित्ता तस्य वृत्तान्तस्य विस्मरन्ती निशासु सुतं वक्षस्यालिङ्ग्य शयाना तस्यैव वञ्चकस्य समस्मरत्। शय्यायां विवर्तनैरेव तस्याः रजन्यो व्यतीयुः। अपि च सा भौतिकसुखभोगेभ्यः पराङ्मुखी परब्रह्मणि मनः प्रणिदधती शास्त्राणाञ्चाध्ययनेऽभ्यासरता स्वसुतं पर्यपालयत्।

सुकोमलशरीरावयवा सुमृदुस्वभावाऽपि शकुन्तला स्वाभिमानिनी सुकठोरपरिश्रमे रता न तथा कातरभावमवललम्बे। भर्त्रा तिरस्कृताऽवहेलितोपेक्षिता सा सुतमेवावेक्ष्य कामपि मनसः शान्तिं लेभे। तत्पालनादिकार्यजाते च तस्याः समयो व्यतीयाय। सर्वदमनोऽयं चक्रवर्तिपदमलङ्कृत्य सकलामेव धरित्रीमधिकरिष्यति, भरिष्यति, पालयिष्यतीति कुलपतेः कण्वस्य आचार्ययोश्च शार्ङ्गरवशारद्वतयोर्वचसां सन्दोहः सदा तस्याः कर्णयोरगुञ्जीत्।

अथ सुतं तथा चक्रवर्तिपदयोग्यं विधातुं सा सुदृढं निश्चिकाय। सा तथाविधं तं शिक्षिष्यते, यथा सर्वदमनः पितरमनपेक्ष्यैव, तदुत्तराधिकारित्वाभावेऽपि स्वयमेव निजसामर्थ्येनैव तस्य गौरवस्याधिगमाय समर्थो भविष्यति। सकलशास्त्राणामभ्यासे सर्वविधशस्त्राणाञ्च सञ्चालने क्षमो भवेदयं सर्वदमन इति तस्याः मनःकामना। मया स्वयमेवायं शिक्षणीयः। माता सर्वेषां गुरूणामपि गुरुरिति मनसि निश्चित्य सा प्रथमं स्वयं

शास्त्राणामभ्यासे शस्त्राणां च सञ्चालने निहितबुद्धिव्यवसाया बभूव। क्रमशश्च सा स्वयमेव सर्वदमनस्य प्रथमशिक्षिका समजनि। सकलेयं धरित्री त्वया शासनीयेति संस्कारान् सर्वदमनस्य हृदये तथा सा समभरत्।


सर्वदमनोऽयं शाकुन्तलेयः षड्वर्षीयो जात इति मातामहः कण्वस्तस्योपनयनसंस्कारविधिं चिन्तयामास। यज्ञक्रियां सम्पाद्य हुतवहे विधिपूर्वकं हवींषि हुत्वा स "यज्ञोपवीतं परमं पवित्रम्" इति वेदमन्त्रोच्चारणेन सह सर्वदमनं व्यागुणितत्रिसूत्रनिर्मितेन ब्रह्मग्रन्थिनिबद्धेन वासन्तिकवर्णरञ्जितेन देवपितृगुर्वितित्रृणत्रयसूचकेन यज्ञोपवीतेन संयोजयामास। तदनन्तरं शास्त्रेषु च तस्य बालकस्य यथोचिता शिक्षा समारब्धा।

षड्वर्षीयः सर्वदमनो बालोऽप्यबालपराक्रमः, शक्त्या, सामर्थ्येन च किशोरान्नवयुवकांश्चाप्यतिशेते। प्रचुरबलशाली स विशालाकारान् पाषाणान् भुजाभ्यामुत्थाप्येतस्ततः प्रक्षिपति। पादपानां स्कन्धान् हस्तयोः गृहीत्वा सहसा बलेन कम्पयति। समीपवर्तिवनखण्डेभ्यो जलपानाय मालिनीतीरं समागतान्, सैकतप्रदेशेषु क्रीडानिर्भरान् कुतूहलवशाच्च तपोवनसीमाः प्रविष्टान् वन्यसिंहव्याघ्रचित्रकभल्लूकशूकरवृकादिजन्तूनां शावकान् बलेन गृहीत्वा रज्जुभिः ग्रीवासु बद्ध्वा कुटीरनिकटवर्तिभूरुहां स्थूलदृढविटपेषु बध्नाति। सिंहशावकान् गृहीत्वा मुखानि तेषां व्यावृत्य दन्तानां गणनं तस्यातिप्रिया क्रीडा भवति।

क्रमशश्च बालजनोचितक्रीडाव्यासङ्गे तस्य व्यपगते, अनन्यमनसं तमखिलविद्याः शिक्षयितुं कुलपतिः कण्वः शार्ङ्गरवप्रमुखाश्चाचार्याः स्वयमेव शकुन्तला चापि सुसमाहिताः बभूवुः। तत्रापि शकुन्तलायाः महान् प्रयासोऽवर्तत। सा स्वयं प्रथमं विद्यासु नैपुण्यं गृह्णाति स्म, तदनन्तरं च सर्वदमनं शिक्षयति स्म। शास्त्राणामध्यापनेन शस्त्राणाञ्च सञ्चालनाभ्यासेन सह सुतं व्यावहारिकराजशास्त्रेण तात्कालिकपरिस्थितिभिश्च सा परिचाययति स्म। सा तमेवमुपदिशति स्म-

(१३)

वत्स! त्वमस्य देशस्य चक्रवर्तिनः सम्राजो दुष्यन्तस्य सुतो दौष्यन्तिरेव। त्वं पितुरुत्तराधिकारं भजसे। हस्तिनापुरस्य राजसिंहासनस्याधिकारी त्वमेव



BHARATA AND THE LION CUB
(*Courtesy: Mahgraja Fatesingh Museum Trust, Laxmi Vilas Palace, Baroda*)

वर्तसे। आर्यावर्तं त्वमेव भोक्तासि। त्वमेवास्य राष्ट्रस्य चक्रवर्ती सम्राड् भवितासि। पित्रा जननी ते छलिता, वञ्चिता, परित्यक्ता च । त्वमपि तेनोपेक्षितः। पित्रा परित्यक्तेनापि सकलराजवैभवबलशक्तिविच्युतेनापि त्वया निजबाहुपराक्रमबुद्धिवैभवसामर्थ्येन पितुरनपेक्षत्वेऽपि राष्ट्रस्याधिकारित्वमधिकरणीयम्। सप्तसमुद्रपरिवेष्टिता सप्तकुलपर्वताधिरक्षिता, आकैलासाद् दक्षिणनीलनीरपयोनिधिपर्यन्ता विन्ध्यमणिरशनालङ्कृता धरा ते भुजबलरक्षिता शासनमङ्गीकरिष्यति।

वत्स ! भूखण्डोऽयं प्रायशो द्विविधाभ्यां लोकाभ्यामधिष्ठितः। एकतस्त्वार्यजातीयाः जनाः प्रतिवसन्ति, अपरतश्चात्र आर्येतराणां लोकानामपि निवासः। वयमार्यास्त्वत्र वैदिकीं संस्कृतिमनुसरन्तश्चतुर्विधवर्णाश्रमपरम्परां गुणकर्मानुसारिणीं परिपालयामः। अपि च आर्येतरान् जनानार्याः वशीकर्तुं सदा प्रयतन्ते। आर्याणां संस्कृतिः, सभ्यता, धर्मो, लोकव्यवहारश्च प्रायशः सर्वैरेव स्वीक्रियते। आर्येतरेषु जनेष्वपि देव-दानव-राक्षस-असुर-भिल्ल-कोल-किरातप्रभृतयो बह्व्यो जातयो वर्तन्ते। अनल्पा आर्येतरजातिजना आर्याणां धर्मं, संस्कृतिं लोकपरम्पराश्च स्वीकृत्य शासनं संरक्षणञ्चापि स्वीकृतवन्तः।

परमनेकैरार्येतरजातीयैर्जनैर्नेदानीमप्यार्यसंस्कृतिः समाद्रियते। आत्मनस्ते प्रशस्यतरान् मन्यमाना आर्यैः सह विरोधभावं शत्रुत्वञ्च मनःसु धारयन्ति। अस्मिन् विषयेऽसुराः दैत्याः दानवाश्च प्रमुखरूपेण गण्यन्ते। आर्यैः सह शाश्वतिकं विरोधभावं गणयन्तस्ते सदैव तेषामुत्पीडने संलग्नाः।

परमवैभवशालिनस्त्रिविष्टपदेशवास्तव्याः देवताः सुरा आर्याणां परमस्नेहभाजनानि समादरणीयानि मित्राणि वर्तन्ते। सहस्राक्ष इन्द्रो हि वासवस्तेषामधिपतिः। अमरावती तस्य राजधानी। अत इमेऽसुराः सुरेष्वाधिपत्यं स्थापयित्वा सदा अमरावतीमाक्रामन्ति। कदाचिद्देवेन्द्रोऽपि आर्यनरपतीनां साहाय्यमपेक्षते। ते जनकस्तु विशेषेण तस्य मित्रं सहायकश्च।

आर्यैः सह विरोधेनासुराणां दैत्यानां दानवानां राक्षसानाञ्च तपोवनवासिषु मुनिषु ऋषिषु च परमार्थतः शत्रुभावः। ऋषयो हि दृष्टधर्माः विदितसकलतत्त्वसाराः योगदृशा त्रिकालज्ञाः, शास्त्रकर्तारः शास्त्रव्याख्यातारो मन्त्रद्रष्टारश्च सकलाया एव आर्यव्यवस्थायाः प्रणेतारो व्यवस्थापकाः

नियन्तारश्च वर्तन्ते। आर्याणां शिक्षाव्यवस्था चापि ऋषिभिर्नियन्त्रितेषु सञ्चालितेषु तपोवनस्थितेषु गुरुकुलेष्वेव विधीयते। परं शस्त्रसञ्चालनशिक्षका अप्येते समराङ्गणेषु न शस्त्राणि गृह्णन्ति। एष एव तेषां परम्परागतो नियमः धर्मश्च। राजरक्षितव्यानि हि तेषां तपोवनानि। परं राजा तु न सदा समीपस्थितः। विप्रकृष्टान्तराला तस्य राजधानी।

अथास्मादेव हेतोस्ते आर्येतरा अवसरं लब्ध्वा ऋषीनुत्पीडयन्ति। हविषां सन्निपातैः सन्दीपितस्य हुतवहस्य केतुमिवोच्चैर्गगने स्फुरन्तं धूमं वीक्ष्य सञ्जातमदोत्साहास्ते यज्ञान् विध्वंसन्ते, छात्राणाम् ऋषीणामाचार्याणाञ्च हस्तेभ्यः शास्त्राण्याच्छिद्य तस्मिन्नेव हुतवहे धमन्ति। वेदान् विदारयन्ति, मृदुवपुषो बालकान् प्रसह्यापहरन्ति। कदाचिच्च तेऽतिभयानकरूपमास्थाय पाशविकीं वृत्तिमाचरन्तो विक्रोशतो विचेष्टमानान् इतस्ततः हस्तपादं प्रक्षिपतो मानवान् जीवितावस्थानेव सुदृढसुकठोरविकरालभुजाभिः प्रसभं गृहीत्वा सुकठिननखकुलिशैर्विदार्य विकरालव्यायतसुतीक्ष्णपीतवर्णमलिनदंष्ट्राभिश्चर्बन्त उदरसात् कुर्वन्ति। आर्तनादैर्दिशां प्रान्तराणि निनादयतां मानवानां, विशेषतः, सुकोमलवपुषां बालकानां शरीरेभ्यो निःसृताया रुधिरधारायाः पाने तेषां विशेषो निर्बन्धः। आममांस(पिशित) भोजनव्यवहारिण एते पिशिताशना अपि कथ्यन्ते।

परं क्रूरपशुतुल्याचरणानामपि तेषां बुद्धिवैभवं शारीरिकबलसदृशं वर्तते। अमानवीयेन यथा शारीरिकबलेन सम्पन्नास्ते तथैव बुद्धिबलेन समृद्धाः। वैज्ञानिकाविष्कारान् सम्पादयद्भिस्तैः प्रकृतिरहस्यानधिगम्य प्रचुरा भौतिकी समृद्धिः शक्तिश्च समासादिता। तेषां नगराणि स्थापत्यकलायाः चरमं विकासमभिव्यञ्जयन्ति। परमसंहारकाणामायुधानां तैराविष्करणं कृतम्। व्योमयात्रासम्पादकानि विमानानि तैर्निर्मितानि।

परमार्यजातीयस्त्वं प्रशस्यतमं धर्मं संस्कृतिञ्च धारयसि। शारीरिकबलेन बुद्धिवैभवेन, शस्त्रसञ्चालनदक्षतया, रणकौशलेन राजनयकुशलतया च त्वं सर्वानिवार्यजातीयान् आर्येतरजातीयांश्च जनान् विजित्य शासनाधिकारञ्च सुदृढीकृत्य आर्यसभ्यतायाः धर्मस्य च प्रचारङ्कुरु। अथ च चक्रवर्तिनः साम्राज्यस्य स्थापनां विधेहि। पित्रा परित्यक्तस्याऽपि तव पौरवस्य पितृवंशरुधिरप्रवाहयितृवाहिनीधारिणि वपुषि जनकमप्यतिशायिन्यः प्रतिभाबुद्धिशक्तयो

वर्तन्ते।

जननीमुखाद् बुद्धिविकासकरानुपदेशान् गृह्णन्, प्रशिक्षणकर्मणि सुकुशलेभ्यश्चाचार्येभ्यो विविधशस्त्रशास्त्रकलाकाव्यादिशिक्षामभ्यसन्नसौ दौष्यन्तिः शाकुन्तलेय आयुषश्चतुर्दशं वर्षं सम्प्राप्तः। एतस्मिन् स्वल्पीयस्यामेवावस्थायां स वेदादिशास्त्रेषु, आयुर्वेदे, ग्रहगणितज्योतिर्विद्यायां, गान्धर्ववेदविद्यायां, नृत्यगीतवाद्यत्रिविधसङ्गीतकलायां, चित्रकर्मणि, कलाशास्त्रप्रोक्तचतुःषष्टिकलासु, काव्यमर्मज्ञतायां, काव्यरचनासु, विविधदेशभाषासु, अन्यास्वपि च शिक्षासु परं प्रावीण्यमवाप। अथ च राजशासनसमुचितेष्वन्येष्वपि कलाविशेषेषु रथगजाश्वविद्यासु, मानवस्वभावपरीक्षणेषु, चारसमाचारग्रहणेषु, यन्त्रप्रयोगेषु, सुरङ्गोपभेदेषु, तरणेषु, लङ्घनेषु, प्लुतिषु, इन्द्रजालेषु च परमं कौशलमवाप्य तेन महज्ज्ञानमर्जितम्।

धनुर्वेदशिक्षायां शस्त्रसञ्चालनेषु च तेन अद्वितीया दक्षताऽधिगता। सकल एव गुरुकुले न कोऽपि तत्सादृश्यमपि भजते। शिक्षकानपि सोऽत्यशयिष्ट। धनुर्बाणप्रक्षेपणे, चक्रसञ्चालने, चर्मणा परिरक्षणे, वर्मणा संरक्षणे, खड्गप्रहरणे, शक्तिप्रक्षेपणे, तोमरप्रयोजने, परशुना हनने, गदाप्रहारे, कुन्तक्षेपणे चेत्यादिषु सर्वेष्वायुधविशेषेषु स परमदक्षो बभूव। तथा च तत्र-

"व्योम्नि समुत्पततः खगान्नसावेकेनैव शरसन्धानेनाधःपातयति। तस्यैकेन खड्गाघातेन पादपानामतिस्थूलस्कन्धा अपि खण्डशो भवन्ति। गदांप्रहारेणासौ विशालान् दृढान् शिलाचयान् चूर्णयति। शक्तिकुन्तादीनां प्रक्षेपेण स सुदूरस्थान् सत्वरं प्रधावतामपि श्वापदानां प्राणान् हरति। मुष्टिकायुद्धेऽपि स परमप्रावीण्यमलभत। तस्यातिसुदृढकठोरमुष्टिकाप्रहारं भल्लूकाः, व्याघ्राः, सिंहाः शूकराश्चापि न सोढुं क्षमन्ते। सत्येव तादृशे प्रहारे मुखेभ्यो रुधिरधारा उद्गिरन्तस्ते सत्वरं पलायन्ते।

एतादृशो वीरः, साहसी, पराक्रमी, विविधायुधसञ्चालनदक्षोऽयं सिंहकिशोरक इव प्रबलशक्तिशाली बालोऽप्यबालपराक्रमः सर्वदमनो यदा घोटकमारुह्य तपोवनेषु परिभ्रमति, तदा मलिनपरिधूसरवसनावृता, परिशुष्कलम्बालका, एकवेणीधरा, चिन्ताम्लानवदना, गभीरं रूक्षञ्चापि तेजस्वि मुखं दधाना शकुन्तला निजं सुप्रशिक्षितं सुतं वीक्ष्य औदासीन्य-

मावहन्त्यपि मन्दस्मितेन स्निग्धदीपशिखाभासमसमुज्ज्वलया कान्त्या रदनच्छदौ विभूषयति। कदाच्चिौष्ठयोर्मध्ये दीप्यमाना कुन्दकोरकधवलदन्तपङ्क्तिः प्रवालजटितमौक्तिकमालेव दिशो धवलयति।

सर्वदमनस्तु तपोवनरक्षायाः भारमुत्तरदायित्वञ्च स्वयमेव निजदृढस्कन्धयोरावाक्षीत्। तस्माद् भीताः वन्यहिंस्रमांसाहारिणो जन्तव आश्रमनैकट्यमपि कर्तुं न सहन्ते। ये च तत्र कदाचिदकस्मादेव समायान्ति, तांस्तु स वीरो बालकः प्रसभं प्रगृह्य रज्जुभिरासज्य तपोवनतरूणामेव सुदृढस्कन्धेषु दृढतया बध्नाति।

कण्वतपोवनसन्निकट एव गहनारण्येषु केषाञ्चिद् दैत्यानां दानवानां च दुर्गरूपाः निवासा आसन्। अवसरं लब्ध्वा ते तपोवनमाक्रामन्ति, तपस्विनश्चोत्पीडयन्ति। परन्त्वधुना सर्वदमनस्य नाम एव श्रुत्वा भयवेपमानाङ्गाः प्रस्वेदार्द्रवपुषस्ते तपोवननिकटागमनमपि नोत्सहन्ते।

(१४)

कुलपतिः कण्वो द्वादशाहं महदेकं सत्रमायोजयामास। आर्यावर्तस्य सकलेभ्योऽपि प्रदेशेभ्यस्तपोवनेभ्य आश्रमेभ्यो विद्याध्ययन-केन्द्रेभ्यश्च तपस्विनो मुनयः प्राचार्याः शिष्यैः सह तत्रामन्त्रिताः।

तत्र च तेऽसंख्यसंख्यैर्ब्रह्मचर्यव्रतपालनसमुद्दीपिततेजोविभूषितवदनपुण्डरीकैः, श्यामपट्टिकवनद्धकृष्णाजिनाधोवस्त्रधारिभिः, पीतपट्टांशुकसुशोभितस्कन्धैः, कनककान्तिकुञ्चितकेशराशिबद्धजटाजूटैः, शिरोमध्यदीर्घशिखावबद्धग्रन्थिभिः, दृश्यमानत्रिधावर्तितनवसूत्रयज्ञोपवीतसूक्ष्मसूत्रालङ्कृतस्कन्धकक्षैः, रुद्राक्षमालाविभूषितकण्ठैस्त्रिपुण्ड्रचमत्कृतसुविस्तृतभालपट्टैः पीतमृत्तिकास्थासकविराजितभुजदण्डवक्षोभिर्दीर्घपलाशदण्डदक्षिणकरैः, कुशालङ्कृतश्रोत्रकुण्डलिनीकैस्त्रिसन्ध्यव्रतपार ङ्गतैर्यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इति योगाङ्गाभ्यसनरतैरुदात्तानुदात्तस्वरितस्वरसंयोगसंस्कृतपटुकण्ठवेदमन्त्रोच्चारणदक्षैः सकलविद्याध्ययनावदातवपुर्मनोबुद्धिशालिभिरन्तेवसिभिः सार्द्धमागत्य यज्ञभूमिमशोभयन्।

यज्ञस्य सुचारु सम्पादनाय शास्त्रविधिमवलम्ब्य, सुविशालां भूमिं परिष्कृत्य निर्मितायाः बृहद्गोलाकारायाः परिधिष्वष्टस्तम्भसमवलम्बित-

पाण्डुरचन्द्रिकायाः यज्ञशालायाः मध्यभागे शुल्वसूत्रविहितमानं प्रमाणीकृत्य गोलाकारा यज्ञवेदी बभूव। तस्याश्चापि मध्यभागे चतुष्कोणप्रमाणं यज्ञकुण्डं याज्ञिकैर्निर्मापितम्। यज्ञकुण्डं परितो वेद्यामेव याज्ञिकानामृत्विजां चोपवेशनाय महती सुव्यवस्थाऽवर्तत। पश्चिमायां दिशि पूर्वाभिमुखो होता, उत्तरस्यां दिशि दक्षिणाभिमुखोऽध्वर्युः, पूर्वस्यां दिशि पश्चिमाभिमुख उद्‌गाता, दक्षिणस्यां दिशि उत्तराभिमुखो ब्रह्मेति तत्र यज्ञविधायकेभ्यः कुशासनान्यास्तीर्णानि ।

यज्ञविधायकांश्च परितः परमसम्मानास्पदानामामन्त्रितानां तपस्विनां मुनीनामृषीणामाचार्याणामुपाध्यायानामन्येषाञ्च गुरुवर्याणामासनव्यवस्थाऽवर्तत। पृष्ठतश्च तेषामन्तेवासिनः। वर्तुलाकारमुपविष्टानां तेषां पृष्ठभागे पूर्वस्मिन् दिग्विभागे कण्वाश्रमवासिन्यो ब्रह्मचारिण्यो बालिकाः युवतयो वृद्धयोषितश्चेति नारीवर्गः, प्रतीच्याञ्च ब्रह्मचारिणश्छात्राः बालका अन्ये चाश्रमवासिनः पुरुषवर्गीयाः जना अविद्यन्त।

कुलपतिः कण्वो ब्रह्मासनमलञ्चकार। तेन नियोजितः शार्ङ्गरवः कुलपतेः प्रमुखशिष्यस्तत्रत्यश्चोपाध्यायः सर्वविधव्यवस्थासञ्चालनहेतोः सर्वास्वेव दिक्षु परिबभ्राम। कदाचिदसौ यज्ञशालायां विराजमानो ददृशे, कदाचिद् विशिष्टातिथिजनमध्ये, कदाचिच्छात्राणां मध्ये कदाचिच्च परितः सुव्यवस्थां स्थापयन्नेवाऽऽलुलोके।

यज्ञरक्षायाः प्रबन्धः सर्वदमनस्याध्यक्षतायामवर्तत। धनुर्वेदाध्ययनशालिनामन्तेवासिनां स्वल्पीयसी छात्रसेना तस्य नायकत्वे वृतिं विधाय कासाञ्चिदपि विपत्तीनां निवारणाय सन्नद्धाऽतिष्ठत्। छात्राणां सव्येतरस्कन्धेषु लम्बमानानि धनूंषि, सव्यस्कन्धेषु संश्रिताः निशितवक्रधारनाराचनिचिततूणीराः, कटिबद्धचर्मपेटिकासु च लम्बमानाः केशानपि द्विधाकर्तुं विदारयितुं वा समर्थास्तीक्ष्णधाराश्चन्द्रहासास्तान् रिपुसंहारयज्ञदीक्षादीक्षितान्नभिव्यञ्जयन्ति स्म। सर्वदमनश्चापि नायकपदाधिरूढश्छात्रसेनां चक्रव्यूहबद्धामिव विधाय सततं तां निरीक्षाञ्चक्रे। परं कदाचिदवसरं प्राप्य मातामहस्य समीपं सन्निवेशितं स्वाश्रयभूतं कुशासनमपि समलञ्चकार।

होमसम्पादनाय सर्वासामेव सामग्रीणां सञ्चयस्तत्रावर्तत। वटाश्वत्थशमीविल्वपलाशाम्रादिशुष्कतनुविटपकाष्ठसमिधां, सुचिक्कणारणीनां,

गोघृतस्य जातीफलजटाकस्तूरीकेसरागुरुतगरचन्दनैलादिसुरभितद्रव्यचयसामग्रीणां, तिलमाषगोधूमतण्डुलयवादिहव्यान्नानां, कन्दमूलफलानां, रजतताम्रादिधातुपाषाणादिरचितस्रुवपुष्करकूर्चबभ्रोलूखलमुसलशूर्पशम्योपलशृतावदानप्राशित्रप्रोक्षणीपिष्टपात्रीशङ्कुरज्जुयोक्त्रचमसादिपात्रोपकरणानां कुशकृष्णाजिनादिमयानामासनानां सोमवल्लरीणाञ्च संग्रहस्तत्र गुरुकुलब्रह्मचारिभिः कृतः।

यज्ञशालायाः पूर्वोत्तरदिग्विभागे कृष्णरोहितवर्णाश्चित्रवत्यो रजतपत्रावृतसुविशालवक्रशृङ्गयुग्मसुशोभिताः ककुदोच्छ्रायवत्यः पीनोधस्काः समीपवर्तिवत्सैः सानुनयं साभिलाषमालोक्यमानाः, दर्शनमात्रेणैव त्रिविधतापहारिण्यः शतसंख्यिकाः धेनवो दुग्धघृतादियज्ञोपयोगिद्रव्यसम्पादनाय काष्ठयूपेषु रज्जुभिर्बद्धाः।

शनैः शनैः स्वस्वनिर्धारितस्थानेषु समाश्रितेषु सकलेष्वामन्त्रितजनेषु, समागतेषु गुरुगणशिष्यगणस्त्रीपुरुषबालवृद्धजनेषु, वियति समुद्गच्छति च किञ्चिदपि पूर्वक्षितिजे भास्करे, प्रातःकालिकारुणप्रकाशेन प्रकाशितेषु सर्वेषु दिग्विभागेषु ब्रह्मासनं सुशोभमानेन, सकलविद्यानिधानेन कुलपतिना कण्वेन शास्त्रोक्तविधिनाऽरणिद्वयं वामदक्षिणकरावलम्बि विधाय मन्थनं कृत्वा -

ओ३म् भूर्भुवः स्वः। ओ३म् भूर्भुवःस्वःद्यौरिव भूम्ना पृथिवीव वरिम्णा। तस्यास्ते पृथिवी देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ।।

इत्यग्न्याधानमन्त्रोच्चारणध्वनिना सह यज्ञकुण्डतलप्रदेशोऽनलेन सन्दीपितः।

अथ सामसङ्गीतपद्धतिमवलम्ब्य वेदविहितहोममन्त्रध्वनीनामुच्चगानस्वरेण सार्द्धमेव, वैश्वानरे प्रास्ताभिराहुतिभिः घृतसमित्सामग्रीचयसन्धुक्षिताभिरुल्लासिताः ज्वालाशिखाः व्योम्न्यूर्ध्वमूर्ध्वतरमुद्गन्तुमारेभिरे। पावककेतुरूपधूमपङ्क्तयो वियति बहुतरमूर्ध्वमुल्लसन्त्यः श्यामलरेखाङ्किता अपि शुभ्रवर्णा इव विराजमानाः कुलपतेः कण्वस्य यशःपताका इव दृश्यमानाः सर्वासु दिक्षु सर्वेषु च दिशां विभागेषु समलक्ष्यन्त। आहुतद्रव्यसमुच्चयदहनविशीर्णाणुसमुत्थितसौरभनिचयेन यज्ञकर्मफललाभोत्सुकानां यज्ञकर्मणि निरतानां जनानां सकलेन्द्रियमनः-प्राणबुद्धयस्तु पाविता एव, वनमध्यविहरणशीलानां श्वापदानामपि मनांसि वपूंषि च पवित्रीकृतानि।

यज्ञभागोत्सुकाः हविर्भुजो देवाः पावकं नेतारं विधाय, अग्निधूमनिचयावलोकनहर्षनिर्भरमानसाः हविसौरभग्रहणसन्दीपितबुभुक्षाः कण्वाश्रमं गन्तुं सौत्सुक्यव्यग्रमनसो बभूवुः। कण्वाश्रमं परितश्च वनप्रान्तराणि सकलब्रह्माण्डपावनेनानेन क्रतुना पवित्रीकृतानि। तत्रत्यानाञ्च सर्वेषामपि प्राणिनां मनःसु वचनेषु कायेषु मालिन्यं नाममात्रमपि लेशमात्रमप्यणुमात्रमपि नावकाशमलभत। ज्वलदङ्गारसमूहेन समिद्राशिरिव तेन यज्ञेन सकलमेव कलुषजातं प्राणिनां समदह्यत।

कण्वाश्रमात् पञ्चाशत्क्रोशान्तराले हिमालयस्योपत्यकायामेव पूर्वस्यां दिशि दितिसुतो नाम दैत्यराजो निवसति। तस्य राजधानीरूपं दितिपुरं नाम नगरं स्थापत्यकलाया अद्भुतमनुपमेयं सर्वविधसुरक्षाप्रबन्धसमन्वितं सुखसुविधासम्पन्नं जगति सकलान्येव पुराण्यतिशेते।

नगरं च परितः विशालप्रस्तरखण्डनिर्मितमत्युच्चं प्राकारमण्डलं, तदभितश्च गभीरा सुविस्तृ[illegible]ा परिखा। कलकलझरझरध्वनिसङ्गीतविराविणः पर्वतीयनिर्झरास्त्[illegible] [illegible]त्तरदिशः समागत्य [illegible]रिखामपरिमितस्वच्छनीरेणापूरयन्ति। परिखायाः दक्षिणदिशि लघीयसी खलु जलधारा परिखाप्रमाणाधिकानि जलान्यधः प्रवाहयति। परिखां परितो द्विसहस्रहस्तावच्छिन्नं गहनारण्यं वनदुर्गकार्यं सम्पादयति। तत्र शालोदुम्बरशिंशपाशाकतमालशिरीषप्लक्षखदिराम्रजम्ब्वादिगगनचुम्बिघनपादपानां [illegible]ध्ये मध्ये इङ्गुदीदीर्घकण्टकबदरीत्यादिकण्टकिनो लघुवृक्षास्तथा निविडत्वेन समारोपिताः, यथा तेषां मध्ये न कोऽपि मार्गः समलक्ष्यत। न च तत्र कोऽपि जनो विचरितुं निर्गन्तुं वा समर्थः।

अपि च तत्र भूमिभागाः क्षुपैः गोक्षुरस्वर्ण[illegible]कण्टकारीत्यादिसुतीक्ष्णकण्टकाञ्चितैस्तथाभूताभिश्चैव लताभि[illegible]चना अवर्तन्त। निविडवनस्पतिवानस्पत्याच्छन्नवनप्रदेशमध्यं [illegible] राजमार्ग एकः सुविस्तृतसुचिक्कणप्रस्तरफलकनिबद्धो [illegible]हस्त[illegible]यामः परिखासेतुमुल्लंघ्य नगरद्वारतोरणाधस्ताच्चतुष्पथं प्राप्यानेके[illegible] भागेषु सुविभक्तोऽवर्तत। न कश्चिदन्यो मार्गो नगरं प्रवेष्टुं नगराद् वा बहिर्गन्तुमासीत्।

नगररक्षापरिवृतिभूतस्य प्राकारस्यान्तर्वर्तिनी भित्तिस्त्वष्टहस्तप्रमाणस्थूला स्यन्दनसञ्चालनयोग्यप्रशस्तपथसुवि[illegible]सिताऽवर्तत। तत्र च शतघ्नी-

भुशण्डि-धनु-र्बाण-क्षुरप्र-भल्ल-तोमर-प्रास-गोष्पदाद्यायुधधारिणोऽसुर-सैनिकाः प्राकारभित्तिबाह्यद्वारविभागोत्तरोर्ध्वमुत्थितानां शृङ्गाणां व्यवधा-नेनात्मनो गोपायन्तः सततं जागरूकाः सन्तः दुर्गरक्षायै चेतस्ततः परिभ्रमन्तो गतागतं कुर्वन्ति स्म।

प्राकारस्यान्तः समीकृतभूमिभागेषु सुविस्तृताः राजपथाः महापथाः लघुपथाश्च चतुष्पथेषु त्रिपथेषु शृङ्गाटकेषु च परस्परमन्योन्यमुल्लंघयन्तो नगरस्य सुविभक्तरचनां प्रादर्शयन्। उभयतश्च तेषां विपणीनां प्रासादानां हर्म्याणां गृहाणाञ्च समृद्धयो समदृश्यन्त। विविधवैज्ञानिकाविष्कारैः सकलमेव भुवनं विस्मयेन चमत्कुर्वतामसुराणामिदं नगरं दितिपुरं नाम धनैर्धान्यैः समृद्धिभिरैश्वर्यैः कलात्मकसौन्दर्यैश्च सुमण्डितं सद् देवानां पत्युर्वासवस्यापि राजधानीममरावतीं सततं तिरस्करोति स्म।

कुलपतेः कण्वस्य तपोवने सत्रसमारोहे सस्वरं गानोच्चरितानां वेदमन्त्राणां ध्वनिभिः साकं होमाहुतहुतवहजग्धहव्याणुसौरभग्राहिणो वाताः दिशि दिशि प्रसरन्तः सकलमेव त्रिभुवनं पावयन्ति स्म। हव्यानां हुताशने निक्षेपेण सह सुदूरं गगनं यावदुत्पतन्तो धूम्रपताकाः कुलपतेः कीर्तिसौरभं प्रासारयन्। एवमेकादश दिवसाः व्यतीताः। द्वादशश्च दिवसः समायातः। तस्मिन्नेव दिवसे प्रातःसमये पूर्वस्यां दिशि उषोवदनपटावरणं विभिद्य उदयतः सवितुरविरलैरंशुपटलैर्दितिपुरप्राकारस्य स्फटिकमणिजटित-शिखराणि सितान्यपि तामरसरञ्जितानीव चकाशिरे। सहसैव दितिसुतो नाम दैत्यराजो मनसि भ्रमणेच्छया निर्भरः शतसंख्यैरसुरसैनिकैः सह यदृच्छयैव वनेषु पर्यटन् कण्वाश्रमं प्रति प्रतस्थे।

समागते च तस्मिन्नसुरराजे तपोवनसमीपवर्तिप्रदेशे मन्दं मन्दं प्रवहता पवनेन वेदमन्त्रोच्चारणध्वनिरसुरसैनिकानां कर्णेषु प्रच्यावितः। आहुतद्रव्यसु-गन्धश्च तेषां घ्राणेन्द्रियाणि प्रविष्टः। तदनुभवेन ते महदुन्मन्थनमनुभवन्तो मदविह्वलाः मदोन्मत्ता इव सञ्जाताः। सहसैव व्योम्नि प्रसरन्तीं धूम्रपताकामपि ते समवालोकयन्। महता आवेशेन सम्भरितहृदयानां कोपकषायितलोचनानां तेषामार्ययज्ञविध्वंसनप्रवृत्तिर्जागृता बभूव। शारीरिकबलस्य आयुधसञ्चालननैपुण्यस्य च मदेनोन्मत्ताः सन्तस्ते दितिसुतजयजयकारैस्त्रिभुवनं बधिरयन्तो मन्त्रध्वनिं हुतद्रव्यसौरभं यज्ञाग्नि-

धूम्रपताकाश्चानुसरन्तः कण्वस्य आश्रमं प्रति महता वेगेन अधावन्।

तपोवनं निकषा समागत्य वेदमन्त्रध्वनयः श्रोत्रेषु समापतन्तस्तेषां धमनीषु प्रवहन्त्यां शोणितधारायामुत्क्वथनमिव समुदापादयन्। यज्ञशालां समवलोक्यैव ते, प्रान्तरेषु विचरतां तपोवनेषु च सानन्दं भ्रमतां यज्ञोन्मुखानां हेतिप्रहारविध्वस्तप्राणानां विविधजन्तूनां रुधिरौघान् मांसनिचयान् अस्थिसञ्चयांश्च यज्ञवेद्यां प्रक्षेप्तुं प्रारभन्त। भयावहहुङ्कारैश्च त्रिभुवनमपि बधिरयन्तः केचनासुरसैनिकाः यज्ञवेदिनिकटस्तम्भरज्जुबद्धानां पीनपयोधराणां भीतिविस्फारितकपिलकनीनिकानयनानां धेनूनां शिरसां कर्तनाय खड्गानुदतोलयन्। अपरे च भयप्रदं गर्जन्तोऽभ्यागतानां मुनीनां वधं विधाय पिशितग्रसनलालसाः कवोष्णरुधिरपानाभिलाषिणश्च तान्प्रत्यधावन्। अन्ये च शस्त्रसन्नद्धान्, गृहीतक्रतुरक्षाव्रतान्, धनुर्वेदशिक्षाभ्यसनान्, ब्रह्मचारिच्छात्रान् प्रत्युन्मुखाः जाताः।

साक्षाद् यमदूतानिव भयानकाकारान् रुधिरमांसवसासंलिप्तकायान्, शस्त्रसन्नद्धान् आक्रम... ...वलोक्यासुरसैनिकान् ऋषीणां मुनीनाञ्च हृदयानि भयेन विकम्पितानि। तापसबालिका आश्रमवर्तिन्यश्चान्याः सर्वा एव वनिताः विभीषिकयाऽनया तीव्रस्वरेण क्रोशितुमारेभिरे।

भयानकानां मदोन्मत्तानां शोणितमांसवसासंलिप्तगात्राणां हुङ्कृतिगर्जनबधिरितदिङ्मुखानामसुरसैनिकानामाक्रमणावसरे यज्ञरक्षानिहितभारः सर्वदमनो ब्रह्मासनसमीप एव वामपार्श्वस्थितकुशासनमलङ्कुर्वन् वेदमन्त्रोच्चारणैः स्वाहाध्वनिभिश्च साज्यं हव्यानि हुतवहाय समर्पयन्नासीत्। असुरगणामनेनाक्रमणेन तस्य हृदयं तत्क्षणमेव क्षोभितम्। कोपकषायितलोचनोऽसौ सत्वरमुत्थाय समीपवर्तिनं शङ्खं द्वयोरेव करयोर्गृहीत्वा मुखवायुना सम्पूर्योच्चैः स्वरेणाध्मातवान्। स च सुतीक्ष्णः शङ्खध्वनिः यज्ञ... ...क्षणव्रतदीक्षितानां ब्रह्मचारिणां हृदयेषु महान्तमुत्साहं दितिसुतसैनिकाञ्च हृदयेषु महतीं भीतिमापादयत्।

शङ्खमाध्माय रिक्तहस्तोऽपि शस्त्रविहीनोऽपि सर्वदमनो ऽसुरसैनिकानामग्रभागे विद्यमानं हुङ्कृतिभिः सर्वजनहृदयेषु भीतिमापादयन्तं रुधिरमांसवसादिवर्षणं विदधानमुत्तोलितचन्द्रहासं मुनिवधव्यसनिनं दितिसुतमवलोक्यैकं सुदीर्घमास्फालनं विधाय तदुपरि केसरी सुदीर्घशुण्डादण्डशालिनं

वारणमिव समाचक्राम। सर्वदमनस्येदमप्रत्याशितमसम्भावितमकल्पनीयमाक्रमणं स सुदीर्घकायोऽपि दितिसुतः सोढुं न शशाक। सहसैवासौ भूमिचुम्बनपरः संजज्ञे। समीपवर्तिसोमाभिषवसाधनभूतप्रस्तरशिलायां निपत्य तस्य शिरो महान्तं सङ्घट्टनध्वनिञ्चक्रे। करगृहीतकरवालस्तस्य हस्ताज्झणज्झणद्ध्वनिना साकं दूरमपतत्। स्वकीयकरगृहीतमांसादिलिप्तशरीरोऽसौ द्वयोरेव हस्तयोः शिरः सन्धार्य तत्क्षणं समुत्थाय प्रबलं हुङ्कृतिध्वनिं समुच्चार्य हृदयविदारिगर्जनेन सङ्गर्ज्य सर्वदमनं प्रत्युन्मुखीभूयाक्रमणायोद्यतो बभूव।

परमतिप्रत्युत्पन्नमतिस्त्वरितगतिर्युद्धविद्याविशारदो मल्लयुद्धनिपुणो बालोऽप्यबालपराक्रमः कथं स तस्य हस्तवशंवदो भवति। झटित्येव कतिपयपदानि पश्चाद् भूत्वा, शरीरं विवर्त्य, दितिसुतस्य पृष्ठतः समागत्य तेन तस्य दैत्यराजस्य पृष्ठदेशे तथा पादप्रहारः कृतो यथाऽसौ व्यायतस्थूलकायः परमपराक्रमशाली दैत्यराजः स्वशरीरं संस्तम्भयितुमसमर्थः सन्नवाङ्मुखः क्षितितले निपपात। तस्य मुखं, वक्षः हस्तौ जघने, ऊरू, जङ्घे, पादाविति सकलान्येवाङ्गानि घनशोणितापविद्धरजःकणैः संलिप्तानि। स्वल्पमप्यवसरं संस्तम्भयितुमात्मानमुत्थापयितुमसुरराजाय न ददता सर्वदमनेन स्वसुपुष्टसुघटितकायोऽपि तस्योपरि निपातितः।

सर्वदमनस्तु स्वकीयेऽतिकठोरे बलशालिनि भुजपञ्जरे दितिसुतं निगृह्य प्रबलोत्पीडनेन तथा सम्पीडयामास, यथा तस्य वक्षःस्थलसुरक्षाविधायकानि पर्शुकास्थीनि मेरुदण्डसंधिनानि च कशेरुकास्थीनि चरमरेति ध्वनिना [illegible] भङ्क्तुमिव समारेभिरे। पीडयानयाऽतिविह्वलमार्तनादमुच्चारणपरं दैत्यराजं तथैवार्द्धमूर्च्छितमिव परित्यज्य स पादप्रहारैरतिशयेन प्राहरत्। तदनन्तरं तस्य गण्डस्थलं सुदृढकुलिशकठोरमुष्टिकाघातैस्तथा जर्जरयामास, यथाऽसौ दितिसुतो मुखादेव सार्तनादं शोणितवमनव्यापारपरोऽभवत्। तस्य कर्णाभ्यां चक्षुर्भ्यां नासिकारन्ध्राभ्यामपि च शोणितधाराः प्रावहन्। पृथगवस्थिते च सर्वदमने स दैत्यराट् पुनर्यदा उत्थानप्रयासचेष्टनपरोऽभवत्, तदैव सर्वदमनेन स्वकीयेन दक्षिणेन जानुना तस्य मांसादिभक्षणमांसलमुदरं प्रबलेन प्रयासेन निपीडितं, इतश्च हस्तयोर्दशाङ्गुलीभिः शिराजालग्रथितनाऽतिस्थूला ग्रीवा इक्षुराशिः इक्षुपेषणयन्त्रेणेव मडमडायिता।

पीडयाऽतिमहत्या विचेष्टमानो दितिसुतः सम्मूर्छितः प्रशान्तभाव

प्राप्तः। तथापि पुनश्चेतनां लब्धवतस्तस्य शिरः सर्वदमनः कराभ्यां स्वल्पमुत्थाप्य प्रस्तरशिलायां स्फोटयामास। द्विधाभूतं कपालं प्रस्फुटितरक्तवर्णकणदाडिमस्य शोभाञ्जगृहे। तस्य स्त्यानशोणितमांसादिसंलिप्तान्यङ्गानि निश्चेष्टानि सञ्जातानि। श्वासगतिः स्थिरा बभूव हृदयगतिश्चावरुद्धा। गतिरहितस्य पर्वतस्येव स्थितस्य तस्य सकलेभ्योऽप्यङ्गेभ्यः निस्सरन्त्यो गैरिकजलनिर्झरधारा इव शोणितधाराः सुदूरं यावत् प्रसृताः।

आपातस्थितिसूचकं समरारम्भविधायकञ्च सर्वदमनवदनाध्मातं शङ्खध्वनिं निशम्यैव तत्क्षणं धनुर्विद्याभ्यासपारङ्गताः दैत्यवधयज्ञदीक्षादीक्षिताः गुरुकुलस्य छात्रसैनिकाः आक्रमणकारिणः शोणितमांसवसादिवर्षणेन यज्ञविनाशनसंव्यग्रान् ऋषिमुनितपस्विजनहत्योत्सुकान् सुकोमलबालकबालिकामांसभक्षणरुधिरपानलालसान् दैत्यसैनिकान् यमलोकातिथ्यास्वादनाय तत्र प्रेषयितुं सुसन्नद्धाः समजायन्त। पङ्क्तिबद्धास्थिता एव दक्षिणान् पादान् पश्चात् कृत्वा सव्यांश्चाग्रे स्थिरान् विधाय, स्कन्धेभ्योऽवतारितेषु सज्येषु बाणासनेषु, तूणीरेभ्यो निष्कासितान् निशितवक्रधारान् नाराचान् सन्धाय प्रत्यञ्चाश्चाकर्णान्तमाकृष्य, चन्द्राहासानुत्तोलयत्सु तीव्रगत्या यज्ञशालां प्रति धावत्स्वसुरसैनिकेषु प्राक्षिपन्।

बाणाघातैरेभिः केचनासुरसैनिकाः मर्मसु विद्धाः व्यपगतप्राणाः भूम्यां निपतिताः। केचन महापराक्रमशालिनो महोत्साहवन्तश्च विद्धगात्रेभ्यो नाराचानाकृष्य पुनरप्याक्रमितुं प्रवृत्ताः। अक्षताङ्गाश्चैवापरे साहसैकव्यापारास्तत्रैव भीषणान् निनादान् निनादयन्तो ब्रह्मचारिच्छात्रेषु समापतन्।

कण्वाश्रमच्छात्राणां बाणप्रहारैरतिशयेन कोपाविष्टाः मरणावशिष्टा असुरसैनिकाः हुङ्कृतिगर्जनैर्जगद् बधिरयन्तो बालकानां वृद्धानां वनितानाञ्च हृदयानि विकम्पयन्तः सुविस्तृतव्यायतमुखाः लेलिह्यमानोत्सुकदीर्घशोणितरसनाः, करवालानुत्तोलयन्तः स्वभक्ष्यभूतेषु छात्रेषु समापतन्। परं कण्वगुरुकुलाधीतधनुर्विद्यास्ते छात्राः शरीरपरिमाणे न तथा विशालाकृतयोऽपि समरविद्यायामतिदक्षा अवर्ततन्त। असुरसैनिकेषु समीपस्थितेषु सत्सु धनुषां प्रयोगो न तथा सुकरो वाञ्छनीयश्चेति कटिबद्धचर्मपेटिकाभ्यः सुदीर्घनिशितवक्रधारान् करवालानाकृष्य तेऽसुरसैनिकान् परितो मण्डलञ्चक्रुः। विविधं पादन्यासं कुर्वद्भिस्तैस्तीव्रप्रहाराः कर्तुमारब्धाः। असुरसैनिकाश्चापि

यज्ञरक्षणसक्षणेष्वेतेषु छात्रसैनिकेषु प्रबलवेगेन समापतन्त: खड्गप्रहारानकुर्वन्। परं युद्धविद्याकुशलेभ्य आचार्येभ्योऽधीतधनुर्विद्येषु तेषु ते किञ्चिदपि न वशिनो बभूवु:।

छात्रसैनिकैरतितीव्रगत्या खड्गप्रहारैरेवासुरवधक्रतुसम्पादनकार्यं प्रारब्धम्। आक्रमणकारिणां दैत्यानां चन्द्रहासप्रहृतिजर्जरकायानां शिरांसि कन्धराभ्य: पृथक् कृत्य तै: सुदूरं निष्कृत्तानि। शिरोरहिता: कबन्धा: कन्धराधमनीभ्य उच्चैस्तरां रुधिरधारां वारिधारायन्त्रेभ्य: सलिलधारामिवोच्चै: प्रसारयन्त: कतिपयक्षणं यावत्तथैव गतिशालिन: समराङ्गणे नर्तनं चक्रु:। तदनन्तरञ्च धरण्यां पतित्वा विचेष्टमाना: शनै: शनै: प्रशान्तभावमगमन्।

असुरसैनिकाक्रमणयुद्धसमारम्भ: प्रहरमात्रेण परिणतिङ्गत:। सर्वतो यज्ञशालां परितस्तपोवनेऽसुरसैनिकानां हस्ता: पादा: स्कन्धा: शिरांसि च व्यशीर्यन्त। पर्वतेभ्य: समुद्भवन्तीनां गैरिकशोणसलिलधाराणां सदृश्य: श्यामवर्णानां दैत्यानां शरीरेभ्यो निस्सरन्त्यो रुधिरधारास्तपोवनभुवि प्रावहन्। यज्ञशालां परित: सर्वा एव भूमी रुधिरमांसवसाकर्दमवती बभूव।

सर्वदमनोऽपि दितिसुतवधं विधाय पुन: शङ्खमाध्माय तस्य ध्वनिभिश्च दिशां प्रान्तराण्यापूर्य स्वसहाध्यायिनां मध्येऽवस्थितो बभूव। दैत्यवधविजयप्रफुल्लचेतसां छात्राणां जयजयकारैर्विजयसूचकै: शङ्खध्वनिभिश्च कण्वाश्रमप्रान्तप्रदेशा: वनप्रदेशाश्च सुदूरं यावत् प्रतिध्वनिता:। दितिसुतसैनिकानां मध्ये न कोऽप्यसुरोऽसुरक्षासमर्थो बभूव। सर्वेषामप्यसुराणामसवो यमदूतै: पाशेषु बद्ध्वा यमालयं नीता:। परं गुरुकुलच्छात्रसैनिकानां मध्ये न कोऽपि गतप्राणो बभूव। केवलं केचन छात्रा: दैत्यचन्द्रहासप्रहारै: किञ्चिदिव क्षताङ्गा: बभूवु:।

दौहित्रस्य सर्वदमनस्येदमसुरविनाशनपराक्रममवलोक्य सुप्रहृष्टमनस: कण्वस्य हृदयमपरिमितेन सन्तोषेण प्रसादभावेन च संसिक्तम्। प्रहर्षरोमोद्गमेन पुलकिततनुरसौ महर्षिजनपरिवृत: सवैकल्यमहोत्साहं समरभूमिमेवागत्य सर्वदमनं सविनयं प्रणमन्तं शिराजालग्रथितमृदुभुजपाशनिबद्धं कृत्वा चिबुकमुत्थाप्य च ललाटे चुचुम्ब। यज्ञस्थलीं तां समरस्थलीरूपेण परिणतां निहतासुरहस्तपादशिर:कन्धराकबन्धादिसम्भृतामवलोक्य समादिष्टास्तेन सर्वे

गुरुकुलस्वाध्यायनिरताश्छात्रास्तस्याः प्रमार्जनाय। धनाद्गानाच्छात्राणां चिकित्सायाः समुचितः प्रबन्धोऽपि विहितः।

स्वल्पेनैव कालेन समस्तैश्छात्रैः स्वच्छीकृता सुप्रसादिता सुमार्जिता प्रोक्षणसलिलसंसाधिता सा यज्ञभूमिः पुनर्यज्ञीयप्रक्रियायोग्या सञ्जाता। तदनन्तरं शुभतिथौ प्रशस्ते लग्ने यज्ञावधिभूते द्वादशे दिवसे सम्पूर्णे सायन्तनसूर्यास्तङ्गमनवेलापूर्वमेव तस्य महतः सत्रस्य सर्वानपि क्रियाकलापान् कर्मकाण्डान् सम्पाद्य, हविर्भुजां देवानां यज्ञभागग्रहणानन्तरं सर्वेऽपि ऋषयो मुनयस्तपस्विनो ऽध्यापकाः, प्राचार्या, अभ्यागताः, सम्माननीया अतिथयश्च, छात्राः, बालकाः, बालिकाः, युवतयो वृद्धाश्च यज्ञान्तस्नानं सम्पादयितुं कण्वमनुसरन्तोऽनुमालिनीतीरं सम्प्राप्ताः। सत्रञ्चेदं महन्निर्विघ्नरूपेण सम्पन्नमिति प्रसन्ना अतिथयश्च कुलपतिना कण्वेन सादरं ससम्मानं सविनयं सोपहारञ्च विसर्जिताः।

(१५)

कण्वस्य धर्मदुहिता संरक्षिता शकुन्तला दुष्यन्तेन तथाकथितेन गान्धर्वविवाहविधिना परिणीता, पातिव्रतधर्मपरायणा, चतुर्दशसंवत्सराणामवधिं सुदीर्घं कथमपि यापयामास। परं स तु कपटाचरणो दुष्यन्तो न कदापि कदाचिदपि तत्र समायातः, न च कमपि सन्देशहरं तत्र प्रेषयामास। सम्भवतः कलकलनिनादिन्याः मालिन्यास्तीरे कस्यचिन्मुनेराश्रमं निकषा कामपि मुनिकन्यकां रूपनवयौवनसौन्दर्यादिगुणैः प्रलोभ्य तया सह एकस्यां निशीथिन्यां प्रणयरतिव्यापारसुखान्यनुभूय राजपदमदमोहाभिभूतेन तेन सकलोऽपि स वृत्तान्तः स्मृतिपथादपि बलान्निसारितः। परन्तु पतिव्रता सा शकुन्तला विश्वासघातिनमपि तं न कथमपि स्मृतिपथादपनेतुमक्षमत। तस्यां मधुप्रणयसम्पृक्तयामिन्यामनुभूता उन्मादयित्री प्रणयानन्दानुभूतिः सततं तस्याः हृदयमुद्विग्नं विक्षुब्धं विचलितञ्च व्यदधात्। एकां निशां प्रणयरससुखस्पर्शदायिकामतितरामनुभूय सा, प्रवञ्चकायापि तस्मै प्रियतमायापरिमितमनुपमेयं स्नेहमनुरागमादरञ्च मनसि न्यदधात्।

अपिच - "यदि कदाचिद् विजने स्थितायास्तस्याश्चेतसि पतिमुद्दिश्यान्यथा विचाराः समुद्भवन्ति, भयेनातङ्केनातिशयं सा कम्पते। अथ

चेदानीं सा पत्युः प्राणप्रियं सर्वस्वमेव प्रणयचिह्नं सर्वदमनं पालयति। सततं तं सन्निवेशयति शिक्षयति च। वत्सलं सुतमङ्के कृत्वा वक्षसा च समाश्लिष्य सकलस्यैव लौकिकपर्यावरणस्य विस्मृत्य, नयने निमील्य सा तास्वेव जाग्रत्स्वप्नधारास्वात्मानं निमज्जयति। कल्पनाश्च तस्याः भवन्ति-

"प्रणयवञ्चकः पृष्ठतः समागमिष्यति। पुनश्च नयने कोमलकराङ्गुलीभिरावध्य निमीलयिष्यति। वक्षसि कराभ्यां कुचौ दृढौ निपीड्य प्रणयगर्भसन्तप्तरदच्छदाभ्यां तस्याः नयने ललाटमोष्ठौ कपोलौ कन्धरां, पयोधरावित्यङ्गानि पुनः प्रभूतचुम्बनपरम्पराभिराच्छाद्य तां प्रणयनिर्मलसलिलस्रोतोभिः स्नपयिष्यति। स्नेहनिर्भराभ्यां करतलाभ्यां सकलान्येव तस्याः वि[illegible]ह्निसन्तप्तान्यङ्गानि सम्मृज्य सकलामेव महतीमसह्यां दीर्घविरहजनितां वेदनां हरिष्यति"।

"परन्तु कुत्रासौ परमवञ्चकः प्रणयाभिनयनटः ? कतिपयक्षणानन्तरमेव सा चमत्कृत्य नयनोन्मीलनं विदधाति। न विद्यते कुत्रचिदपि किञ्चिदप्यस्तित्वं तस्याः भावनानाम्। सर्वैव विफला वृथा कल्पना। केवलं सर्वदमन एव निमीलितनयनस्तस्या उरसि कुचमध्यान्तराले वदनमासज्य निश्चलो निस्पन्दस्तिष्ठति। महतोद्वेगेन विक्षोभेण मनसश्चाञ्चल्यभावेन सा वराकी विरहवह्निदग्धा शकुन्तला नयनजलसम्भृताभ्यां नयनाभ्यामार्द्रौष्ठाभ्याञ्च सर्वदमनस्य कपोलौ, नयने, भालपट्टञ्च चुम्बनैः सुकोमलैराच्छादयति। सर्वदमनोऽप्यङ्कारूढश्चमत्कृत्य नयनोन्मीलनं विधाय जनन्या अश्रुभिः पूर्णे विलोचने क्लिन्नञ्च वदनं सोत्त्रासं निरीक्ष्य सुमृदुभ्यामपि सुपुष्टाभ्यां करतलाभ्यां प्रवहन्तीमश्रुजलधारां प्रोञ्छति।"

तेष्वेव क्षणेषु सा वराकी शकुन्तला कदाचित् कोपमानक्षोभादिभावपरवशाऽप्यजायत। "अहो! कीदृशस्तस्य वाचि मधुरिमा? प्रणयवाचां सशपथं सत्यवादिता, प्रोत्साहना, सकलजीवनं यावत् सहभावकथनम्। परं सकलमेवैतत् प्रवञ्चकत्वमेव। स तु वञ्चको विश्वासघातकोऽसत्यपरायणो, मृषावादी, कुटिलहृदयश्च वर्तते। अपि चाऽहं तस्य क्षणदा प्रणयिनी। मम स्मरति वा न वा स्मरतीत्यपरैव कथा। अयं सर्वदमनस्तस्यैव सुतः।, तस्याङ्गेभ्य एव जातस्तदङ्गजः। वञ्चकोऽसौ राजा स्वाङ्गसम्भूतसुतस्यापि न स्मरति। अहो कीदृशोऽयं मे सुतोऽमितपराक्रमशाली, अनुपमेयप्रतापवान्, परमौजसा

दीप्यमानवदनः, सकलविद्यानिष्णातो, राजनयविशारद आयुधाभ्यसनशीलः समरदक्षश्च सकलगुणगणान्वितो वर्तते। यदि चायं राजसिंहासनारोहणावसरं लभते, तदा .... तदा .... । शकुन्तलायाः सकल एव कोपः, रोषः क्षोभश्च पवनविलुम्पितकर्पूर इव, सुतप्तलोहपात्रपतितसलिलबिन्दुरिव विलीनो जायते।

दुष्यन्तं प्रणयिनं प्रति तस्याः कः कोपः, कः क्षोभः, का वाऽभिमानिता? सा तु तस्य प्रणयिनी, पत्नी, भार्या, सेविका, दासी। स वञ्चकः स्वधर्मं पालयति न वा पालयति, स एव जानातु। शकुन्तला तु स्वपातिव्रतधर्मं पालयिष्यत्येव। यद्यद्याप्यसौ दुष्यन्तोऽत्रागच्छति, शकुन्तलाञ्च पत्नीरूपेण सम्मानयति, सा सकलमेव कोपं वाऽभिमानं वा परित्यज्य भर्त्रा सार्द्धं यास्यत्येव। परन्तु कुत्र तस्यास्तदपि सौभाग्यम्"?

हृदये विवर्तमानां महतीं व्यथां कृपणधनमिव हृदये सङ्गोप्य सा तत्सन्ततिपरिपालनरता सुतस्य सर्वविधविद्याभ्यसन एवात्मानं निमज्जयामास।

सुदीर्घसमयावच्छिन्नपीडादुःखचिन्तावेदनाभिः शकुन्तलाया आननस्य सुकोमलोज्ज्वलकान्तिमय्यरुणवर्णाभा शोभा पाण्डुरवर्णा विहिता। ग्रीष्म-सन्तापम्लानलतासदृश्यास्तस्याः विरहपीडितेषु पेलवेषु गात्रेषु मृदुलता तु परिलक्ष्यते, परं नैव प्रफुल्लता। दुष्यन्तं राजानं भर्तृरूपेण वृत्वा मत्वा च सा विरहिणी लोकविहितधर्मव्यवहारान् पालयन्ती लौकिकसुखभोगव्यवहारान् परितत्याज।

अथ च "दुहितुरेनां मनोवेदनां सा धर्मपिता कण्वो नानुभवतीति न। सोऽपि सततं हृदि क्लिश्यते। शृङ्गारसज्जाविहीना पाण्डुरवर्णा कृशकाया दीनवदना मलिनवसना शकुन्तला यदा आनने समाच्छन्नान् लम्बमानान् सुदीर्घान् स्नेहशून्यान् कुञ्चितानलकान् सव्येतरकराङ्गुलिभिरपसार्य घनाडम्बरविमुक्तं शशिनमिव वदनं प्रकाशयति, तदा तद् वीक्ष्य, तपोधनस्यापि, संसारासक्तिविमुक्तस्यापि कण्वस्य चेतः सततं वेदनातिशयेन सम्पीड्यते। अन्तर्गतगहनदुःखं हृदय एव निवेशयन्त्याः शकुन्तलायाः सुकोमलौष्ठयोर्हठादेवाभिव्यज्यमानं स्मितं पितृहृदयमतिशयेन विह्वलयति उद्वेजयति च।

"कण्वस्तु न जाने कतिवारमभ्यलापीत् प्रास्तावीच्च, यदि शकुन्तला परिणेत्राऽनाहूताप्यनामन्त्रिताऽपि पतिगृहं गच्छेत्, तदेव श्रेयः। परन्तु प्राणाधिकस्नेहभाजनायाः सुतायाः मानं हठञ्च जानन्नसौ किमपि करणे सर्वथाऽसमर्थः।

अधुना सर्वदमनं शस्त्रेषु च शास्त्रेषु च सर्वास्वेव विद्यासु तथाभूतं सुदक्षमवलोक्य, तस्य शारीरिकं मानसिकञ्च विकासमनुभूय कण्वो निश्चिचाय, यत्पितृपुत्रयोः संयोगः कथमपि संसाधनीय एव । एषैवेयं तस्येतिकर्तव्यता। अयं सर्वदमनः सर्वसामर्थ्ययोगी राजोचितगुणैः सुसम्पन्नः पितुरुत्तराधिकारमधिरुह्य राजधूर्वहने सर्वथा समर्थः। दारा अपि पतिगृहचारिणो भवेयुः। पत्युः प्रभुता सर्वतोमुखी। पतिस्तु स्वकीयामूढां, धर्मशास्त्राणि प्रमाणीकृत्य स्वीकृतां भार्यामामन्त्रयति न वाऽऽमन्त्रयति, तस्याः स्मरति न वा स्मरति, तां संधरति न वा संधरति, ता सम्मनुते न वा सम्मनुते, सा कथमपि पतिगृहं न त्यजति। पतिगृहपरित्यागः नारीभ्यो महत् पातकम्। दुहितृजनकस्येदमेव कर्तव्यम्, यदसौ स्वकीयां दुहितरं निश्चयेन पतिगृहं प्रेषयेत्।

एवं विचार्योहापोहञ्च कृत्वा कण्वः शकुन्तलामाहूय, प्रणतायाश्च तस्याः शिरः परमस्नेहेन स्ववामेतरकराङ्गुलिभिः परामृशन्नेवमुवाच-

"वत्से ! मे कथनं सावहिता शृणु। पातिव्रतधर्मपरायणाया अङ्गनायाः कर्तव्यं धर्मश्च, यत् सा मनसा वचसा कर्मणा पतिशुश्रूषापरायणा भवेत्। यदि पतिः कदाचिदन्यथाऽप्याचरति, विप्रकरोति, नानुकूलं व्यवहरति, कठोरमाचरति, तदाऽपि सा रोषणतया न विप्रतीपमाचरेत्। तच्च न मनसि कुर्यात्। विवाहितायाः नार्याः न पितृगृहे निवासः समुचितः। पतिगृहपरित्यागिनी नारी सर्वदा लोकनिन्दाभाजनं भवति। अथ च पितृगृहमपयशसो भाजनं विदधाति। मया तु प्रथममेव दुष्यन्तस्तव वररूपेण सङ्कल्पितः। तव पुत्रोऽप्यधुना सकलविद्यापारङ्गतो राजसिंहासनारोहणयोग्यतया सम्पन्नः। सर्वविधायुधसञ्चालने निपुणोऽसौ व्यावहारिकराजनयेऽपि परमप्रवीणः। शारीरिकमानसिकविकासेनासावात्मानमलङ्करोति।

अतो मनसि वचसि काये पुण्यपीयूषपूर्णया त्वया पुत्रेण सार्द्धं पतिगृहं गन्तव्यमेव। यदि चासौ महाराजो दुष्यन्तः केनापि कारणेन न समायाति,

न वा प्रेषयति कमपि जनं तवाऽऽनयनाय, न त्वया कोपः करणीयो न च सोऽवमन्तव्यः। सम्भवतीदं यल्लज्जावशाद् वा मत्तो भयहेतोर्वा, बहुराजकार्यविवशत्वाद् वा स नाऽत्रागन्तुमुत्सहते। परं ते तत्रैव निवसनाधिकारो यत्र ते पतिर्निवसति। सर्वविधगुणगरीयसीं परमलावण्यशालिनीं नारीषु रत्नमिव त्वामुपलभ्य, शौर्यपराक्रमराजनयनिपुणत्वादिगुणगणसमलङ्कृतं सुतञ्च परिष्वज्य सोऽतिशयं निश्चयरूपेण परमहर्षमधिगमिष्यति। प्रथितवचनपरिपालनव्रताः हि चन्द्रवंशीयाः राजानः। स्वकीयां प्रतिज्ञां परिपालयन्नसौ सर्वदमनं युवराजपदेऽभिषेक्ष्यति। श्रूयते, न कोऽप्यन्यः पुत्रस्तस्मिन् राजकुले जातः।"

पितुरेतानि वचांस्याकर्ण्य तदङ्कनिहितशिरस्का शकुन्तला सगद्गदं रोदितुं प्रवृत्ता। प्रस्फुटितस्तस्याः क्रन्दनावरोधसेतुः। चतुर्दशसंवत्सरावधिसञ्चिता तस्या हृदयप्रकोष्ठे सुगूढान्तर्निहिता व्यथाऽश्रुधारारूपमवलम्ब्य प्रवहन्ती पितुर्वल्कलाच्छन्नं क्रोडं क्लेदयितुमारेभे। महदनुरोधैः समवबोधनैः प्रसादनैश्च साऽन्ततः पुत्रेण सार्द्धं स्वयमेव परिणेतृगृहङ्गन्तुं सहमता बभूव।

तदनन्तरं कण्वः सर्वदमनमाहूय तं तत्रोपस्थातुमनुरुरोध। मातामहस्यादेशं प्रमाणीकृत्य तस्य चरणावुपस्पृश्य स शाकुन्तलेयः समीपमेवोपविष्टः। दौहित्रं चतुर्दशवर्षकल्पमपि वयस्कयुवकसदृशवपुषं सुकोमलमपि सुकठोरं प्रोन्नतमप्यवनतं भुजयोरुत्थाप्य स्वाङ्के निवेश्य चिबुकं समुन्नमय्य भालञ्च परिचुम्ब्य कण्वो मातामहः स्नेहार्द्रकण्ठेन प्रोवाच-

"वत्स ! जानास्येव यत्त्वं चन्द्रवंशदीपकः, पौरवस्य च दुष्यन्तस्यौरसः सुतः। इयं ते जननी शकुन्तला तस्य धर्मशास्त्राविरुद्धा भार्या। गान्धर्वविवाहविधिना तं वृत्वा त्वामियं प्रसूयाऽत्रैव पितुर्गृहे चतुर्दशवर्षावच्छिन्नमवधिं न्यवसत्। अधुना त्वियं पतिगृहगमनाकाङ्क्षिणी। त्वयाऽपि जनन्या सार्द्धं जनकगृहगमनाय प्रवर्तितव्यम्। कुरुजनपदस्य सम्राड् दुष्यन्तस्तव पिता त्वां युवराजपदे प्रतिष्ठितं करिष्यति। तदनन्तरं त्वं पितृपितामहपरम्पराप्राप्तां राज्यधुरं वहन् राज्याधिपत्यमुपलभ्य समुचितराजसुलभसुखान्युपभुञ्जानः प्रजानां पालनं करिष्यसि।"

मातामहस्येमानि कर्णकटूनि वचांसि श्रुत्वैव सुतप्तलोहशलाकालब्धस्पर्श इव सर्वदमनस्तदङ्कादुत्प्लुत्य पृथगेवाऽतिष्ठत्। पितुः स्मरणेन

तस्य हृदयं रोषानलेन प्रज्ज्वलितमिवाभवत्। चक्षुषी ज्वलदङ्गारप्रतिमे सञ्जाते। रदच्छदौ प्रस्फुरितुमारेभाते। सकलमेव वपुः महतोद्वेगेनासहनीयेन भावेन चकम्पे। मातरि संविहितान् दुष्यन्तस्यान्याचारव्यवहारान् स कथं सोढुं समर्थः? नरपतिरसौ कीदृशस्तस्याः भर्ता तस्य च जनकः? कदाचित् कश्चित् पतिरित्थमेवाचरति धर्मशास्त्रानुकूलविहिताचरणायां भार्यायाम् ? एकवारं तां परिणीय तां संस्पृश्य प्रगाढानुरागं प्रदर्श्य विविधं प्रतिज्ञाय पावनञ्च पुत्रं सम्प्राप्यापि न तस्याः पुनः स्मरति। असत्यभाषिणा तेन मिथ्याचरणमेव कृत्वा वञ्चिता तस्य जननी। कोपविकम्पितप्रस्खलितवाण्या स शाकुन्तलेयः सगद्गदं प्रोवाच-

"कुलपते ! महर्षे ! मातामह ! भवानेव मे पिता, पोषको रक्षको गुरुराचार्यश्च। भवानेव मे गतिः। भवदतिरिक्तं न कमप्यहं जानामि। कोऽसौ चन्द्रवंशीयः पौरवो दुष्यन्तो, यो भवता मे जनकत्वेनाभिधीयते ? येन राज्ञा मम माता परिणयदिवसादेव परित्यक्ता, यो मयाऽऽजन्मन एव नावलोकितः, येन मे भरणपोषणस्याप्युत्तरदायित्वं न स्वीकृतं, कर्तव्यच्युतं तं वञ्चकं जनं कथमहं जनकं मन्ये ? न जानाम्यहं कथमपि तं विश्वासघातिनं जनम्। भवतु स चक्रवर्ती राजाधिराज एवाऽस्याऽऽर्यावर्तस्य।

कुलपते ! भवन्तं परित्यज्याऽहं कथमपि गन्तुं नोत्सहे। नैव यास्याम्यहं जनन्या सार्द्धं हस्तिनापुरम्। यदि च मम जननी स्निह्यत्यतिशयं तस्मिन् धूर्तवञ्चके, यदि चाभिलषति तच्चरणसेवायै, यातु सा पट्टमहादेवीपदभाजनं भवितुम्। परमहं त्वत्रैव भवच्चरणयोः सेवां कृत्वा सर्वोच्चशिक्षापारङ्गतो भविष्यामि। मया त्वस्याश्रमस्य सुरक्षायाः व्रतं गृहीतम्। तदेव पालनायाऽहमत्रैव निवसन्नाश्रमवासिनो जनान् महर्षींस्तपोधनाञ्छात्रानाचार्यानुपाध्यायांश्च सकलाभ्य एव विपत्तिभ्यो विघ्नेभ्यो बाधाभ्यश्च परित्रास्ये। न कामयेऽहं तथा पितृप्रसादाद् राज्याधिकारम्। भुजयोः पराक्रमेण, बुद्धिबलेन, भवत्प्रसादेन च यन्मया प्राप्यते, तदेव मम प्राप्यम्।"

एवमुक्त्वा स सर्वदमनः कुलपतेः कण्वस्य चरणयोर्निपत्य तौ च भुजयोराबध्य तारस्वरेण विलपितुं प्रवृत्तः।

पुत्रस्येमानि सुकठोराणि हृदयविद्रावणानि वचांसि निशम्य शकुन्तला न कथमप्यश्रूण्यवरोद्धुं पारयामास। कथमपि महता प्रयासेन कष्टेन

ह्यात्मनैवात्मानं संयम्य समुद्द्रवन्त्यश्रुजलान्युत्तरपटप्रान्तेन प्रोञ्छ्य गद्‌गदस्वरेण सा इत्थं बभाषे-

"पितः ! जगत्यस्मिन् विपरीतभाववर्तिनि पापं तु कश्चिदन्य आचरति फलं तस्य कश्चिदन्यो भुनक्ति। मम भाग्यानामेव प्राक्तनकर्मणामेष दुर्विपाकः। अयं सर्वदमनोऽपि, यो मया दशमासं यावद् गर्भे धृतः, पालितः, पोषितः, सकलासु च विद्यासु शिक्षितः, न मम वचसामादरं करोति। सदैवायमाश्रमनियमवृत्तिविरुद्धमाचरति। सततमेव निरुध्यमानोऽपि ममायं धृष्टः पुत्रो नित्यमेव वन्यान् श्वापदान् निगृह्णाति। कदाचिद् व्याघ्रं, कदाचिच्चित्रकं, कदाचित्तिन्दुकं, कदाचिद् वन्यं शूकरं कदाचिच्च वृकमेव भुजयोराबध्य, तपोवनसमीपमानीय सुदृढतरुस्कन्धपरिवृतिरज्जुभिः गोपालको गामिव बध्नाति। इमान् श्वापदान् वीक्ष्य तपोवनवासिनो मुनयो बालकाः वनिताश्च बिभ्यति।

कुलपते ! यद्यहमेनं स्वयमेव परित्यज्य गमिष्यामि, तदाऽयमतोऽप्य-धिकानुपद्रवानाचरिष्यति। भगवन् ! अहमत्रैव पितुर्वा पालकस्य वा मुनेर्वा कुलपतेर्वा भवतश्चरणयोराश्रयेण निवसन्ती जीवनं यापयिष्यामि। यस्तु भवता मम भर्तृरूपेण गण्यते, यश्च चतुर्दशसंवत्सरावच्छिन्नावधिभूतेषु वर्षेषु व्यतीतेष्वपि न मम कदाचित् स्मरति, मम कीदृश्यवस्था, किमहं जीवामि न वा जीवामि, किमहं करोमि किं वा न करोमि, इति सर्वस्यैव यो विसस्मार, तमहं न कथञ्चिदपि कामये। स्वात्मन्येव तत्र गत्वा नाहं स्वात्माभिमानं परित्यक्तुमुत्सहे।

शकुन्तलायाः शाकुन्तलेयस्य च तादृशानि सकरुणं सदैन्यं तारस्वरेण प्रोक्तानि वचांसि निशम्य सर्व एवाऽऽश्रमवासिनस्तत्र समवेता अभवन्। कण्वस्य हृदि महत्या हृदयविदारिकया वेदनया परमास्पदत्वं प्राप्तम्। तथापि स्वकीयं मनः कथमपि संयम्य द्वाभ्यामेव कराभ्यां वक्ष आपीड्याऽसौ एवमुपदिदेश-

शकुन्तले ! मया हितकारीण्येव वचांसि कथ्यन्ते। नारीषु पतिव्रता श्रेष्ठा। सर्वे देवास्तस्यां तुष्यन्ति, सदा तां कृपया स्नेहेन दयया अन्यैश्च बहुविधैः प्रकारैरुपकुर्वन्ति, या पतिं देववत् सेवते। पत्युः प्रभावेणैव नारीणां सकलाः मनःकामनाः पूर्यन्ते। अतो नार्याः परमिदं कर्तव्यं यत् पतिः प्रसन्नो

वा अप्रसन्नो वा, सन्तुष्टो वा असन्तुष्टो वा, कीदृशोऽपि गुणगणविशिष्टो वा भवेत्, तया स सततं सम्माननीयः सर्वविधञ्च सेवनीयः।"

ततः कुलपतिः सर्वदमनमप्येवं जगाद-

वत्स ! त्वं महतः पुरुवंशप्रदीपस्येललस्य पौत्रो दुष्यन्तस्य च पुत्रः। श्रेष्ठक्षत्रियकुलसन्ततिस्त्वम्। राजसिंहासनमधिरुह्य शासनधुरमङ्गीकृत्य, प्रजानां पालनमेव तव धर्मः। इदमेव कर्तव्यम्। ऋषीणां तपोवनेषु आजीवनमध्ययनं तपसश्च पालनं न तव योग्यम्। नैतत् सम्पादयितुं त्वया पृथिव्यामवतीर्णम्। पितरं दुष्यन्तमार्यावर्तचक्रवर्तिनं हस्तिनापुराधीशमुपगम्य युवराजपदमलङ्कुरु। पितुश्चोत्तराधिकारी भूत्वा प्रजानां हितं विधेहि। त्वमस्य देशस्य चक्रवर्ती सम्राड् भविता। तव रथोऽप्रतिहतरयो विघ्नबाधादिरहितश्च सकल एव लोके सञ्चरिता। अस्मिन्नवसरे त्वया मात्रा सार्द्धं निश्चयेन हस्तिनापुरं गन्तव्यम्।

कण्वेनैवं समवबोधितौ शकुन्तलाशाकुन्तलेयौ हस्तिनापुरगमनमङ्गीचक्रतुः। तदनन्तरं कुलपतिस्तयोः मार्गादिप्रबन्धं कर्तुमुपचक्राम। शार्ङ्गरवः शारद्वतश्च तस्य द्वौ प्रियशिष्यौ गुरुकुल एवोपाध्यायपदप्रतिष्ठितौ चावर्तेताम्। तावेव शकुन्तलया सह गमनाय स आदिदेश।

सान्ध्येनाऽरुणमन्दालोकेन प्रतीचीदिग्वर्तिक्षितिजान्तरालानि लोहितवर्णरञ्जितानि विहितानि। सकलं दिवसं यावद्धरित्रीं प्रखरालोकेन तापेन सन्ताप्य परिश्रान्तो दिवसपतिः विश्रमाभिलाषी धरण्या एवाङ्कमाश्रयितुमुपचक्रमे। पृथिव्याः स्वर्णकिरीटमिव लक्ष्यमाणं तस्य सुतप्तं पिङ्गलवर्णं मण्डलं शनैः शनैरुत्सेधवतामनोकहानां पृष्ठतोऽदृश्यभावमभजत। परं तस्य साहचर्याभिलाषिणी सन्ध्या प्रतीचीदिगन्तरालानि इदानीमपि लोहितवर्णानि विदधाति स्म। अस्यां गोधूलिवेलायां शफाघातसमुत्थितैः रजःकणैः सर्वमिदं लोकं रजोमयमिव कुर्वन्त्यो वनचरणनिवर्तनपराः गोष्ठेभ्यः समुत्सुकाः धेनुपङ्क्तय आश्रमप्रान्तरेषु समलक्ष्यन्त। शिशुदर्शनलालसाः नीडोत्सुकाः विहगराजयः कलमधुरं गायन्त्यो व्योममण्डले दरीदृश्यन्ते स्म।

एतस्यां सकलजगद्विमोहिन्यां सान्ध्यवेलायां शकुन्तला स्वकुटीरान्निर्गत्य चिन्ताभाराक्रान्तं हृदयं कथमपि स्थिरं विधाय एकाकिन्येव मन्दपादचारैरनु-

मालिनीतीरमाजगाम। कुटीरोद्यानवर्तिचरणवीथिपथमभितः समुन्नततरु-स्कन्धैरालिङ्गिताभिः घनकुसुमाचिताभिः यूथिका-शेफालिका-मालती-मल्लिकादिवल्लरीभिर्मन्दपवनान्दोलितविटपभुजैः सङ्केत्य शुभ्रपाण्डुर-सुमवर्षणं कृत्वा सा शकुन्तला सन्निकटवर्तिनीभवितुमामन्त्रिता। परं भविष्यति किं भविष्यतीति चिन्तासन्ताननिमग्नमानसा सा तपोवनवासिनी तासामामन्त्रणमवहेल्यैव मालिनीसरितं प्रति प्रस्थिता।

अथ रसालवनमुल्लंध्य, उद्यानबहिरुपवृतिं चोत्क्रम्य सा नद्याः सैकततीरमगच्छत्। नदीतटवर्तिशुभ्रसमतलसैकतं स्वकोमलचरणतल-चिह्नालङ्कृतं विदधती सा मालिन्याः कूले तच्छिलातलालङ्कृतं स्थानं प्राप्ता, यत्र चतुर्दशवर्षपूर्वं दुष्यन्तेन सङ्गता बभूव।

तच्छिलातलं पूर्ववत् तथैव मालिनीतटसंसक्तप्रवहज्जलान्तर्गनम-विप्रकृष्टान्तरालमवर्तत। अस्ताचलगमनोन्मुखस्य मरीचिमालिनो हेमाभप्रकाशे द्रवरूपपरिणतकनकराशय इव चमत्कृतिवत्यः मन्दं मन्दं प्रवहन्त्यः सरिल्लहर्यः सुकठोरप्रस्तरतलसंघट्टनं प्राप्य मन्देनार्तध्वनिना साकमतिलघुसलिलकणान् प्रियतिरस्कृतकामिनीकपोलप्रवहदश्रुबिन्दूनिवोर्ध्वमुद्धूय विशीर्णतां प्राप्नुवन्ति स्म।

शकुन्तलावदनपाण्डुरं तच्छिलातलमुच्छलद्भिः निर्मलनीरकणैस्तस्या अश्रुबिन्दुनिचितकपोलप्रान्तरमिवार्द्रं सञ्जातम्। मन्दसमीरणेनान्दोलिताः शरकाण्डाः वानीरलताश्च शुभ्रपरागसुरभितानि पुष्पाणि सर्वतः समाकीर्य मालिनीतटप्रान्तप्रदेशं शुभ्रपुष्पमयमिव आप्यायितमिव कुर्वन्ति स्म।

निस्तब्धनिशेव निस्तब्धा सा तपस्विनी कतिपयक्षणं यावद् वञ्चितेव स्थागितेव तत्र निःस्पन्दाऽनिर्वचनीयभावसम्भृता निश्चलाऽतिष्ठत्। सुदीर्घं निःश्वस्य तया द्वाभ्यामेव भुजवल्लरीभ्यां समुच्छलद्धृदयं कथमपि निपीड्य संस्तम्भितम्। ततश्च शिलातले समुपविश्य द्वावेव तामरससमौ चरणौ मालिनीसलिले सन्निवेश्य वपुरीषदधोऽवनमय्य सा दक्षिणकराङ्गुलीभिस्तत्सलिलं कङ्कयितुमिवारेभे।

शकुन्तलायाः मानसचक्षुषोः पुरतः सकलान्येव तानि चतुर्दश-वर्षपूर्वघटितानि दुष्यन्तसङ्गमननानुभूतानि दृश्यानि साकाराणीव समुपस्थितानि

बभूवुः। सप्तपर्णविटपिपरिवेष्टिन्यां वेदिकायां निषद्य सखीभिः सार्द्धं हास्यजल्पितानि, लघुप्रमाणान् कलशान् सलिलैरापूर्य आश्रमोपवनस्य पादपानां क्षुपानां वल्लरीणां लतानाञ्च सेचनं, वनज्योत्स्नायाः पुष्पस्तबकेषु तस्याः कराघातः, ततो भ्रमरेण बहिरागत्य तदुपर्यभिवर्तनं, तस्या इतस्ततः प्रचरणं सहायतायै चाक्रन्दनं, सहसैव दुष्यन्तस्याविर्भावः, दुष्यन्तेन सह वेद्यां निषद्य सखीनां हासपरिहासाः, द्वयोरेव तयोः परस्परसंवीक्षणादिजन्यमाकर्षणं, तस्याः प्रबलो दुर्निवारो दुष्यन्ताभिलाषो, निशीथेऽनसूयया सह मालिनीतटं समागत्य शिलातलनिवेशनं, सहसैव तत्रापि दुष्यन्तस्यावतरणं, वैश्वानरं साक्षीकृत्य तयोः गान्धर्वविवाहोऽन्योन्यञ्च शपथग्रहणम्, अनसूयायाः सव्याजं तस्मात् स्थानात् प्रसरणं, तदनन्तरं तदनन्तरं ....। शकुन्तलायाः हृदयं महतोद्वेगेन परिपूरितम्। सकलान्यङ्गानि वेपथुना कम्पितानि स्वेदेन चार्द्राणि समभूवन्।

शनैः शनैरनुरागमयी सन्ध्या स्वकीयामनुरक्तामाभां संजहार। दिवसरूपं यं प्रणयिनं प्रचण्डाकांक्षयाऽभिषमाणा सेयं प्रणयिनी स्वकीयमनुरागं सर्वतो विकिरन्ती प्रदर्शयन्ती प्रतीक्षणरता बभूव, स तु समागत्यापि तामुपेक्ष्य विनैव सम्मिलनं प्रस्थितः। सन्तप्तहृदया निराशाभिभूता सन्ध्याऽपि क्षितिजप्रान्तेभ्यः प्रस्थिता। प्राच्यामुदयन् रजनीपतिः विरहिणीनां प्रणयिनीनां हृदयानि प्रकर्षेण दग्धुं व्योमान्तरालेषु साम्राज्यस्थापने व्यग्रमनाः बभूव। धवलाऽतिपाण्डुरवर्णा कौमुदी वनप्रान्तराणि सरित्सैकतानि चाप्लावयन्ती कनकद्रवक्षालितानीव कर्तुं प्रावर्तत।

व्योममध्यमार्गमारूढवति च शशिनि, पूर्वं स्वर्णमयमिव भूत्वा सकलं त्रिभुवनं सम्प्रति रजतमयमिव भवितुं प्रवृत्तम्। मालिनीरश्मयो रजतद्रवमिव प्रवाहयन्ति स्म। सैकतञ्चापि तारप्रच्छदपटेनाच्छादितमिव सञ्जज्ञे। मन्दं मन्दं प्रसरन् समीरणस्तपोवनोपवनसुरभितसुमनसामुन्मादयितृकं सौरभं परागचयञ्च सरितस्तीरमानिनाय।

परन्तु सर्वाभ्योऽप्येताभ्यो मनोरमप्रकृतिनटीपटपरिवर्तनरूपाभ्यः घटनाभ्योऽपरिचितेवोपेक्षितेव किमप्यजानन्ती भविष्यच्चिन्तासन्तान-निमग्नमानसा शकुन्तला समयगतिं कामपि न पर्यलक्षयत्। तस्याश्चित्तं त्वेवंरूपैर्विचारसन्तानवितानैरालोडितमभवत्-

"अहो ! मालिनीसरित्तटे स्थानमिदं तदेव यत्र चतुर्दशवर्षपूर्वं वञ्चकेन तेन सह परस्परावलोकनं सञ्जातम् । स एव तपर्तुः सैव च कृष्णपक्षस्याष्टम्याः निशीथिनी । तस्यां रजन्यामयं रजनीपतिरष्टकलाविशिष्टो व्योम्नि निरभ्रे दीप्यमानो मम मनो हर्षातिरेकेणाप्याययति स्म । अथ च मां प्रहर्षानन्दनिर्भरां वीक्ष्य सोऽप्यानन्दसम्भृतविकसितहासविलास इव संलक्ष्यते स्म । परमिदानीन्तने समये कथमिव मां क्लेशयन्निव मनः सम्पीडयन्निव हृदयमयःकीलकैः पीडयन्निव गात्राणि ज्वलदङ्गारप्रतिमैः रश्मिभिर्दहन्निव निरर्थकं [illegible]दुर्जन इव परमप्रहर्षनिर्भरः संलक्ष्यते । तस्मिन् काले कथन्तेन वञ्चकेन विश्वासघातकेन निर्दयेन अयस्कान्तहृदयकठोरेण प्रणयिनम्मन्यमानेन मधुरमधुरैः मृदुलमृदुलैः संजल्पनैः मम मनः सम्मोहितम् । स सशपथं तथा-विधं प्रतिज्ञाय आमरणान्तमन्यस्मिन् जन्मन्यपि सहचरणपालनगृहीतव्रतो बभूव । मम मध्यमकराङ्गुलिं स्वनामधेयाङ्कितया मुद्रिकया सुभूषितां विधाय सोऽकथयत्-

"प्रिये ! मम नामाङ्कितायां मुद्रिकायामस्यामेकैकमक्षरं प्रतिदिनं गणय । समापितायाञ्च गणनायां त्वां नेतुमहं ससमारोहमागमिष्यामि ।"

चतुरधिकदशसंवत्सरेषु न जाने मया कतिवारमसंख्यमयं नामाक्षरसमूहो गणितः । परमागमनस्य तु का वार्ता, स तु वञ्चकः सन्देशवाहकेनापि न मे कुशलवार्ता पप्रच्छ । अयं सर्वदमनस्तु तस्यैवौरसः सुतस्तस्या एव एकस्या रजन्याः प्रणयप्रमाणम् ।

मे पिता पालकः कण्वस्तु कथयति - विवाहिता दुहिता पितृगृहे वसन्ती लोकनिन्दायाः हेतुर्भवति । परं को मम पतिः ? स वञ्चको विश्वासघातको दुष्यन्तः ? राजभवनेषु तस्य संख्यातीताः महिष्यस्तं सततं परिवारयन्ति । क्षणं यावत्तु मां निजयौवनेन परमसौन्दर्येण मधुरवचनेनातिशिष्टमृदुलव्यवहारेण च प्रलोभ्य, मया सह सङ्गमसुखमनुभूयासौ गतः । स्मरत्यपि किं स तस्याश्चतुर्दशवर्षपूर्वं घटितायाः प्रणयानुरागमधुरमय्याः घटनायाः ? कदाचित्तेन तपर्तावेकस्मिन् मुनिजनतपोवने समायातं, काचिच्च लोकव्यवहारानभिज्ञा मुग्धा तपोवनवासिनी कन्यका विमोहिता । कृष्णपक्षस्याष्टमीचन्द्रचन्द्रिकायां द्योतमानायां निशायां निशीथदीपं व्योम्नि विहसन्तं प्रकाशमानं चन्द्रमसमेव साक्षीकृत्य सुरनायकं वैश्वानरं प्रमाणीकृत्य

सप्रदक्षिणं सा मुग्धा विश्वासं भजमाना तपस्विकन्यका पत्नीरूपेण परिणीता स्नेहसलिलैरभिषिक्ता च विहिता। साऽपि तस्मिन् विश्वसन्ती निजाङ्गार्पणं सर्वस्वसमर्पणञ्च विदधौ। अहो ! तृणाच्छन्नकूपोपमे गरलगर्भहृदये जने विश्वसितम्।

अहो ! भवतु या काचिदपि भवितव्यता। मया तु स भर्तृरूपेण वृतः स्वीकृतश्च। अहं तु तमेव पतिरूपेण जानामि। पितुरादेशं प्रमाणीकृत्य मयाऽनेन पुत्रेण सर्वदमनेन सार्द्धं तदन्तिकमेव गन्तव्यम्। हस्तिनापुरं गत्वा तस्य वञ्चकस्य सम्मुखं स्थित्वाऽहमेवं वदिष्यामि-

"राजन्! अयं भवतः सुतः। भवत [illegible] सन्ततिः, भवदीयाङ्गजः। निजभार्यायां गान्धर्वविधिना परिणीतायां शकुन्तलायां निहितेन तेजसा भवान् एनमजीजनत्। [illegible] भवत एषा सन्ततिः पालिता। भवन्निक्षेपः रक्षितः। निजवक्षःस्थपयोधरस्रवत्पयांसि पाययित्वा पोषितो भवतः सुतः। अथ बहुविधासु विद्यासु निष्णातः कृतः। मया तु स्वयमेव शस्त्राण्यभ्यस्य शास्त्राणि चाधीत्य विविधविद्याविशेषविहितसंस्कारेयं भवत्सन्ततिः आन्वीक्षिकी-त्रयी-वार्तादि- विद्यासु शस्त्रसञ्चालनादिव्यापारेषु परमप्रावीण्यं प्रापिता। अहमेनां भवते समर्पयापि। निजसन्ततिः भवता स्वीकरणीया। भवत एवोत्तरदायित्वमिदम्। निजप्रतिज्ञायाः समयस्य च स्मरणं कुर्वन् भवानिदानीन्निजं सुतं युवराजपदेनालङ्करोतु।"

एतासु विचारसरणीषु निमज्जनोन्मज्जनं कुर्वाणा शकुन्तला न च स्थानन्न च समयं किञ्चिदप्यपेक्षयामास। सहसैव द्वयोरेव स्कन्धयोः जल-धारावनमितयोः कमप्यनिर्वचनीयानुभूतिदायकं स्पर्शमन्वभवत्। चमत्कृत्य दक्षिणं कन्धरां परिवर्त्य तयाऽवलोकितम्- अनसूया द्वावेव भुजविटपौ तस्याः वामेतरे स्कन्धे निदधती कुतूहलगर्भस्नेहसम्भृतनयना तिष्ठति। वामञ्च कन्धरायां परिवर्तितायां तया तथैव स्थिता वामस्कन्धे सन्निहितभुजा प्रियंवदाऽवलोकिता।

परमोच्छ्वासवती सा सुदीर्घं निःश्वस्य झटिति समुदतिष्ठत्। तस्याः हृदयमतिवेगेन प्रस्पन्दितुमारेभे। निजं संस्तम्भयितुमक्षमाऽपि सा हृदयावेगं कथञ्चिदपि महता प्रयासेन निरुध्य द्वाभ्यामेव प्रसारिताभ्यां भुजवल्लरीभ्यां सख्यौ सममेवालिङ्गनपाशे निबबन्ध। हर्षगर्भितविषादेन परिपूरिताः

नयनजलबिन्दवस्तपोवनवासिन्याः नयनाभ्यां प्रवहन्तुं प्रारभन्त। अश्रुसलिलपृषताश्चेमे तपस्विन्याः कपोलावार्द्रयन्तः, टप्टपेति समुन्नताभ्यां वल्कलचोलिकानिगृहीताभ्यां कुचाभ्यां सङ्घट्टनं प्राप्यातिसूक्ष्मं कणशो विशीर्य मालिनीसैकतबहुलतटसिकतास्वेव प्रविलयतां प्राप्ताः। क्रन्दन-ध्वनिरपि स्वरयन्त्राद् बहिः निस्सरंस्तत्क्षणं केनाप्यलक्ष्यविधिना तत्रैव कीलितः।

शरकाण्डमध्यात् कोऽपि शशिकरनिकरपाण्डुरसकलगात्रो लोमशः सहसैव निर्गत्योदग्रप्लुतिं विधाय मालिनीप्रवाहमुल्लंध्य अपरपारसैकतं लघुपदनखमुद्राङ्कितमिव कुर्वन् बदरिकाक्षुपगहनानि प्रविष्टः। सुदूराद् गगनचुम्बिवटाश्वत्थशिंशपातमालाशोकशाकशाल्मल्यादितरुषण्डस्कन्ध-विटपकोटरान्तर्गतनीडेषु स्थितानां निभृतेन्द्रियव्यापाराणां वनमध्यान्तर्गत-हिंस्रजन्तुगर्जनध्वनिचमत्कृतिविगतस्वप्नानां वयसां विरावा अश्रूयन्त। तेषामपि तरूणां पृष्ठतः कस्यचिदपि हिंस्रप्रकृतिकस्य व्याघ्रस्य भयावहो गर्जनध्वनिः मृगशावकाक्रन्दनानुगम्यमानः श्रुतिगोचरो बभूव।

परं वननिवासाभ्यासशीलास्तिस्रोऽपि युवतयः क्षणं यावच्चमत्कृत्य भयाक्रान्ता अपि साहसं मनःसु सन्निधाय तथैवान्योन्यालिङ्गनपाशे तत्रैव स्थिताः। हृदयवेगे च किञ्चित् प्रशान्ते तास्तस्मिन्नेव शिलातले निषद्यैवं कथनोपकथनं जगदुः-

अनसूया-"सखि! शकुन्तले! पतिगृहगमनायादिष्टा त्वं कुलपतिनेति, आर्यया गौतम्या विदितवृत्तान्ते, त्वदन्वेषणसंविग्नमानसे भ्रमाव आवामितश्चामुतश्च तपोवनप्रान्तरेषु। परमावयोः प्रिया सखी तु सर्वस्य सखीजनस्य विस्मृत्यैकाकिनी विजनम्मालिनीतीरं निषेवते। अहो! महद्भिः प्रयासैरेव त्वमावयोर्दृष्टिपथं समायाता। श्रमक्लान्तिपीडाभिः पादानामपि कीदृशी दुरवस्था सञ्जाता। परन्तु प्रियतममेव ध्यायन्ती आत्मविस्मृता भवती पट्टमहिषी कुरुजनपदस्वामिनी समयं स्थानमात्मीयजनमपि च सकलमेवैकपदे समुपेक्षाञ्चक्रे।"

प्रियंवदा- "हला प्रियसखि! राजप्रासादान् प्राप्य प्रियतमसङ्गमम-धिगम्य राजोपभोगसुलभान् भोगानुपभुज्य प्रहर्षानन्दजलसंसिक्ता

त्वं विहिततपोऽनचर्यस्य बाल्यादेव सकलेषु व्यापारेषु सहचरभूतस्य तपोवनवासिनः सखीजनस्य स्मरिष्यस्यपि किम्?"

शकुन्तला-"सख्यौ ! अलं परिहासेन। मे हृदयं न जाने पवने नान्दोलितपुष्पस्तबकमिव कथं कम्पते ? अनिर्वचनीयैरकल्पनीयैश्च भावैः सम्भृतं सत् सततं विह्वलतामवाप्नोति। कथयतीवान्तःकरणम्- मा गच्छ मा गच्छ हस्तिनापुरम्। निश्चयेन तवानिष्टमेव भविता। त्वं तत्र नादरं, न गौरवं, न सम्मानं, न स्नेहं, न सौख्यं, न दयां, न चानुग्रहं प्राप्स्यसि। स तु प्रियो वा भर्ता वा पतिर्वा परिणेता वा वञ्चकश्छलनामय एव वर्तते। तथापि कुलपतेः पितुः कण्वस्यादेशेन मया पुत्रेण सर्वदमनेन सार्द्धं हस्तिनापुरं गन्तव्यमेव। कुलपतेस्तु निर्देशः - नार्यः पतिगृह एव शोभन्ते।"

प्रियंवदा-"सखि ! नात्र त्वया कश्चिदपि वितर्कः करणीयः। मयैकान्ते गुरुजनानुमतिमनपेक्ष्यैव परमादरास्पदस्य सकलजगद्वन्दितचरणस्य कुलपतेः कण्वस्य दुहिता गान्धर्वविधिना परिणीतेति त्रपाचिन्तादिभावविह्वलीभूतहृदयो महाराजो दुष्यन्तो नात्रामगनमुत्सहते। अथ च न कमपि जनं प्रेषयति। अधुना तु त्वां वीक्ष्य त्वया सहैनं सर्वदमनं स्ववीर्यप्रसूति-मवलोक्यापरिमेयहर्षनिर्भरः सन् सिंहासनस्थ एव निजं सुतमङ्कमारोप्य त्वामभिनन्दिष्यति।"

शकुन्तला- "सखि ! मधुना स्नातु ते रसना। सत्यमेव त्वयाऽभिधीयते। परन्तु चतुर्दशवर्षदीर्घावधिं यावच्छा-स्त्रानुमोदितविवाहविधिना परिणीतायाः भार्यायाः यो विस्मरणे पटुः, स्वकीयायाः प्रतिज्ञाया अपि यो न स्मरति, कुलालङ्कारभूतामपि निजवीर्यप्रसूतिमवलोकयितुं न कामयते, कथमहं तस्मिन् जने विश्वसेयम् ? तथापि पितुरादेशो-ऽनुपेक्षणीयोऽनुल्लंघनीय एव। मया तु गमनीयमेव।"

अनसूया- सखि ! चतुर्दश वर्षाणां दीर्घोऽवधिर्व्यतीतः। सम्राजो नयनगोचरतामपि न त्वं प्राप्ता। कथं त्वां राजा परिचेष्यति।

यदि तेन न त्वमभिज्ञाता, न वा स्वसहधर्मिणी स्वीकृता ?

शकुन्तला-"सखि ! ममापि मनसि एतादृशी विकल्पना। तथापि निश्चयो मे सुदृढः यास्याम्यहं प्रतिज्ञाभीरुं राजानं निकषा। कथयिष्यामि च- "राजन् ! स्मरतु भवान् तस्याः स्वकीयायाः प्रतिज्ञायाः, या भवता चतुर्दशवर्षपूर्व मालिन्यास्तीरे विहिता। स्मरतु तस्य ग्रीष्मर्तोः कृष्णपक्षस्याष्टमीचन्द्रचन्द्रिकालोकितायास्तस्याः निशीथिन्याः, यदा भवान् हविर्भुजां नायकं वैश्वानरं प्रमाणीकृत्य मां प्रणयिनीं विधाय, गान्धर्वविवाहविधिना सखीसमक्षं सहधर्मिणीरूपेण जीवनसहचरीरूपेणाङ्गीचकार। भवता प्रतिज्ञातं यदामरणान्तं भवान् मे भरणादिकभारवहनोत्तरदायी, धर्मपालनादिकार्येषु सहचरश्च भविता। भवान् मयि यं सुतं जनयिष्यति, स एव युवराजपदमलङ्कृत्य राजपदभाग् भविष्यति।"

अनसूया- "यदि च न तेन राज्ञा चक्रवर्तिना स्वीकृतम्?"

शकुन्तला- "यदि च तेन वञ्चकेन पाणिग्रहणकारकेण नाहं सहधर्मिणीरूपेणाङ्गीकृता, कथयिष्याम्यहम्- राजन् ! भवान् मां स्वीकरोतु न वा करोतु, अयं सर्वदमनस्तु भवद्वीर्यप्रसूतिः। अयं पुरुवंशदीपकः। एनमेव स्वसुतं भवान् रक्षतु, पालयतु, युवराजपदाधिष्ठितञ्च विदधातु। यदि च स राजा स्वकीयमेनं सर्वदमनं सुतं स्वीकरोति, तत्र तं तस्मै समर्प्याहं निवर्तिष्ये, न च निजभारवहनयाचनाभिमुखी भविष्यामि। मरणमेवेहन्ते स्वाभिमानिजनाः, न तु याचनम्।

अनसूया-"यदि च स राजा निजसुतमपि नाङ्गीकुर्यात् ?

शकुन्तला -"यदि च स राजा न च मां न च निजां सन्ततिं परिचेष्यति, नाङ्गीकरिष्यति, पुत्रेण सार्द्धमहं तस्माद् राजभवनाद्धस्तिनापुराच्च निर्गत्य किञ्चिदप्यज्ञातप्रदेशं, किञ्चिदपि विपिनं वा नगरं वा ग्रामं वा तपोवनं वा यत्र विधिर्मां नेष्यति, गमिष्यामि। भर्त्रा तिरस्कृता कथमहं पितरमपि स्वकीयं कलङ्कितं मुखं दर्शयितुं क्षमा ? स्वाभिमानिनी स्वावलम्बिनी च पुत्रस्य स्वात्मनश्च भविष्यन्मार्गनिर्धारणेऽहं समर्था। सर्वदमनस्य भविष्यन्निर्मितिर्मयैव

निर्धारणीया। मयाऽसौ सर्वविधविद्यासु शिक्षितः, विशिष्टो विहितः। स तु वीरः, पराक्रमी, साहसी, नीतिज्ञः, प्रत्युत्पन्नमतिः, सकलशास्त्रपारङ्गतः, विविधायुधसञ्चालनदक्षश्च वर्तते। शस्त्राणां शास्त्राणाञ्च अतोऽप्यधिकोच्चशिक्षयाऽसौ मया शिक्षणीयः। तदनन्तरमसौ सर्वदमनो न तु जनकस्य कृपया वा दयया वा अनुग्रहेण वा, अपितु निजबुद्धिविद्यापराक्रम-साहसादिगुणैरेव सकलां धरित्रीं विजित्य सार्वभौमचक्र-वर्तिपदमलङ्करिष्यति।"

शकुन्तलाया इमानि दृढता-गौरव-स्वाभिमानितादिगुणसम्भृतानि वचांस्याकर्ण्य ते सख्यौ विस्मयविमुग्धे कतिपयक्षणं यावदेकाग्रदृष्ट्या तामपश्यताम्। तदनन्तरमनसूया दक्षिणकरं प्रसार्य तां निजाङ्के समाचकर्ष। तस्याः मृदुलकपोलं स्नेहगर्भचुम्बनेनालङ्कृत्य सा प्रोवाच-

"शकुन्तले! तवैतानि दृढसङ्कल्पगर्भितानि वचांसि श्रुत्वाऽऽवां द्वे अपि सख्यौ - अहं च प्रियंवदा च, प्रहर्षगद्गदे सञ्जाते। नारीषु त्वमनुपमं श्रेष्ठं रत्नम्। ते दृढतायाः स्वाभिमानस्य स्वावलम्बनस्य अध्यवसायस्य च न किमप्युपमानम्। येन दृढसङ्कल्पेन परिश्रमेण च त्वयेयं निजगर्भप्रसूतिः शिक्षिता, तेन निश्चितमिदं, यदयं सर्वदमनो निजपराक्रमेण बुद्धिबलेन च सकलं जगद् विजित्य त्वच्चरणरजःस्पर्शैरात्मानं पावनीकृत्य राजसिंहासन-मधिकृत्य चक्रवर्तिपदस्याधिकारी भविष्यति।"

तदनन्तरं तिस्र एव सख्यो न जाने केषुचिद् रहस्यालापेषु निमग्नाः। विस्मृतान्यसकलव्यापाराः परस्परकरग्रहणस्पर्शसुखमेव परमं मन्यमानास्तत्र शिलातलमधितस्थुः। सहसैव जलदखण्ड एकः कुतश्चिदागत्य व्योम्नि प्रकाशमानं शशिनमाच्छाद्य विद्योतमानां कौमुदीं निरुध्य लोकं घनतिमिरावृतञ्चक्रे। तिसृणाममि सखीनां ध्यानभङ्गः सञ्जातः।

प्रभातवेलायां सवितरि नभसि क्षितिजान्तराल आविर्भूते सत्येव शकुन्तलया हस्तिनापुराय प्रस्थानीयमिति। निशीथेऽविरलैरंशुपटलैस्तमो-विदारकैर्मध्याकाशे प्रकाशमानो मृगाङ्को जीमूतखण्डेन आवृत आसीत्। प्रस्थानात्पूर्वं काचिद् विश्रान्तिरप्यनिवार्या। इति मनसि कृत्वा तास्तिस्रोऽपि सख्यः सरित्तीरं परित्यज्य शकुन्तलायाः कुटीरमेव प्राविशन्। शकुन्तलेयं सखी

सुदूरा, दर्शनातिक्रान्ता, अप्राप्या भविष्यतीति प्रियंवदाऽनसूये परमविह्वलतास्पदतां गते। निजकुटीरं न गत्वा ते द्वे अपि तत्रैव शकुन्तलया सहैकामेव शय्यामध्यशयाताम्।

(१६)

रजनीं पृष्ठतः कृत्वा प्रभातेन समायातम्। उदयाचलशिखरान्तरालादुद्गच्छन् मरीचिमाली स्वकिरणैरुषस अरुणिमानमादाय सकलमेव लोकमनुरञ्जयितुं कार्येषु च प्रवर्तयितुं प्रवृत्तः। अद्य शकुन्तला पतिगृहं यास्यतीति सर्वेषां तपोवननिवासिनां हृदयानि पीडयाऽतिशयितान्यवेदनया समुत्कण्ठितानि बभूवुः। कुलपतिः कण्वः सामर्थ्यगौरवानुसारं स्वपदयोग्यञ्च यौतुकसामग्रीसमूहं प्रस्तुतमकरोत्।

असावकस्य गुरुकुलविश्वविद्यालयस्य कुलपतिरवर्तत। तस्यास्मिन् गुरुकुलाश्रमे दशसहस्रसंख्यावच्छेदकाः विद्यार्थिनो ब्रह्मचर्यव्रतं पालयन्तः शिक्षामभ्यसन्ति स्म। तेषां शिक्षा- ऽध्ययन-भोजन-वस्त्र-निवासादिसुविधानां प्रबन्धस्योत्तरदायित्वं कुलपतिकण्वाधीनमेवाविद्यत। सकलस्य च तस्य प्रबन्धस्य निःशुल्कत्वाद् विद्यार्थिनो धनादिचिन्ताविरहिताः सततं विद्याभ्यासनिरता अवर्तन्त। महताऽऽध्यात्मिकैश्वर्येण सम्पन्नोऽपि स कुलपतिः सुसमृद्धया लौकिकसम्पत्त्याऽपि समवेतोऽवर्तत। काचिदपि न्यूनता हीनता वा तत्र नाऽऽसीत्। परन्तु तया सर्वलोकातिशायिन्या समृद्ध्या युतोऽपि स तपस्वी सलिलमध्यवर्तिसरसिजपत्रमिव सर्वथा तत्र निर्लिप्त एवाऽऽसीत्।

"दुष्यन्तो राजा चक्रवर्ती सम्राट् सकलस्यैवार्यावर्तस्य शासकः। परमैश्वर्यवतस्तस्य प्रासादं गच्छन्ती, राजप्रासादं राजमहिषीरूपेण प्रविशन्ती शकुन्तला तदनुरूपालङ्करणालङ्कृता प्रसाधनविभूषिता पितृप्रदत्तयौतुकादिकेन सह सर्वजनप्रशंसनीया भवेदिति कुलपतेः कण्वस्याऽऽकांक्षा स्वाभाविकी एव। अस्मादेव हेतोः कुलपतिः सुतायै राजकीयवैभवसमुचितानि सामग्रीजातानि प्रबबन्ध। कौशेयपट्टवस्त्राणि, हेमरजतनिर्मितानि हीरकमुक्तामणिक्यवैदूर्यनीलमरकतादिमणिजटितानि विविधान्यलङ्करणानि कुङ्कुमकस्तूरिकामलयजकर्पूरपरागादिविनिर्मितानि प्रसाधनद्रव्याणि तत्रावर्तन्त। जामात्रे दुष्यन्ताय, राजभवनवर्तिसम्बन्धिभ्यः, सचिवादिपदाधिकारिभ्यश्चाप्यल्पेतराणामुपहाराणां सञ्चयस्तत्राऽवर्तत। सर्वे च त

उपहाराः समुन्नतककुदैः स्वर्णपत्रजटितवक्रतीक्ष्णविषाणाग्रैः शशिकरनिकरसितवर्णैर्बलीवर्दैर्योजितेषु शकटेष्वारोपिताः।

शकुन्तलायाः शाकुन्तलेयस्य च यात्रायै सिन्धुदेशोद्भवैः काषायवर्णैश्चतुरश्वैः संयोजितः स्यन्दनस्तत्र तपोवनस्य बाह्यद्वारि मालिनीतीरे विविधमण्डनमण्डितोऽत्युच्चकेतुदण्डसुशोभितः स्थितः।

परमन्त्वन्तर्निहितवेदनाविह्वला शकुन्तला तस्य महनीयस्य सामग्रीजातस्याऽवलोकनमपि न सोढुं शशाक। सकलेषु द्रव्येष्वतितुच्छं दृष्टिपातमेकं विधाय सोच्छ्वासं दीर्घमुष्णञ्च निःश्वस्य तया नयने निमीलिते। भर्त्रे तत्सम्बन्धिभ्यश्च सङ्गृहीतानुपहारान् सा दूरादेव तत्याज। यात्रायै राजवैभवमण्डितः स्यन्दनोऽपि न स्वीकृतः। पुत्रेण सह सा तपस्विजनोचितेन पादचारेण पतिगृहं गमिष्यति। पितुः, गुरुजनानां, सहाध्यायिनां, सखीनामिति कस्याप्यनुरोधं वाऽऽग्रहं वा सा नाङ्गीचकार। स्नानादिभ्यो नित्यकर्मभ्यश्चान्येभ्यो निर्वृतां कुटीरं प्रविशन्तीं तां प्रसाधयितुं विविधान्यलङ्करणानि कौशेयवसनानि प्रसाधनानि च सञ्चित्य प्रियंवदाऽनसूयाप्रमुखाः सख्यस्तां प्रतीक्षन्ते स्म। ताः वीक्ष्य शकुन्तला प्राह-

"सख्यः ! पुरुवंशकुलवधूरहमार्यावर्तचक्रवर्तिसम्राजो महनीयाय राजभवनाय यद्यपि प्रतिष्ठे, तथापि मणिजटितैरेभिरनर्घैः कनकालङ्कारैर्हेमाभैः कौशेयवसनैः कस्तूरिकाकेसरचन्दनलाक्षारसप्रभृतिभिः प्रसाधनैरात्मानं प्रसाधयितुं न साधु मन्ये। अस्यां पतिगृहगमनशुभवेलायामपि एतत्सामग्रीजातं मह्यं न रोचते। तापसबालाऽहं तपोवनवासिनी अस्मिन्नेव रूपे सम्राजा परिणीता।

चतुर्दशवर्षपूर्वं पावकं साक्षिणं विधाय, मां परिणीय विविधाभिश्च प्रतिज्ञाभिर्मामाश्वास्य, प्रलोभ्य, मम पाणिं गृहीत्वा, स्वैरं रमणं विधाय, मयि गर्भं निवेश्यासौ गतः। न च मम कुशलसमाचारमपि पृच्छति। स्वौरससुतमप्युपेक्षते। किमहमेतैरनर्घालङ्करणकौशेयवसनप्रसाधनादिद्रव्यैः सुसज्जिता प्रसाधिता तत्र गन्तुमुत्सहे ? नाऽहमेतैर्द्रव्यैरात्मनो वपुः प्रसाधयिष्यामि। नैतान्युपयोक्ष्ये। तपोवनवासिनी तापसबालारूपेणैवाऽहं तस्य सकलजगत्स्वामिनश्चक्रवर्तिनो राजधानीं हस्तिनापुरीं प्रवेक्ष्यामि। मम पुत्रोऽयं सर्वदमनोऽपि तापसकिशोररूपेणैव पितुः समक्षमुपस्थास्यति। स

महाराजो जानातु, भर्तृविरहवेदनाव्यथिता शकुन्तला, पितृस्नेहवञ्चितेन सुतेन सर्वदमनेन सह कथमेतं कष्टकरं दीर्घं चतुर्दशसंवत्सरावच्छिन्नमवधिं व्यतीतमकरोत्।

शकुन्तलायाः कथनमेतदाकर्ण्य सखीजनस्य नयनान्यश्रुजलार्द्राणि समभूवन्। बहुशोऽनुरुध्यमानाऽपि प्रियंवदाऽनसूयाभ्यां सा तथैव दृढनिश्चयाऽवर्तत। आर्यायाः गौतम्याः कुलपतेः कण्वस्य च साग्रहं हार्दिकमनुरोधञ्चापि सा नाऽङ्गीचकार।

शकुन्तलया तथाविधान्येव तपोवनसमुचितानि वसनानि गात्रेषु समारोपितानि, यानि तस्य दुष्यन्तस्य प्रथमदर्शनावसरे परिहितान्यासन्। वल्कलवसनैरात्मनो वपुरलङ्कृत्य सर्वदमनः गुरुकुलोचितब्रह्मचारिवेशेनाभूषितः। लोहितकाषायवर्णवल्कलनिर्मितेनोत्तरस्त्रेण वक्षःस्थलं समाच्छाद्य तस्य ग्रन्थिका वामेतरस्कन्धपृष्ठतो निबद्धा। चित्रवर्णरुरुमृगचर्म, गौरवर्णमपि तस्य शरीरं चित्रत्वमापादयदधोवस्त्ररूपेण सन्धार्य कटिप्रदेशे मूर्वामेखलया निबद्धम्। पादौ च तस्य पादत्राणविरहितावेव। दक्षिणेतरांसपृष्ठभागस्तूणीरेणाशोभत दक्षिणांसश्च कार्मुकेण। कोषनिहिततीक्ष्णधारफलकः दीर्घश्चन्द्रहासः मूर्वामेखलासुनिबद्धः दक्षिणकटिप्रदेश[illegible]मवललम्बे। तपोवनवासिभिरुत्प्रेक्षितं यदत्र तापसवेशधारिणी हिमाचलसुता पार्वत्येव कुमारेण सहातिष्ठत्।

तपोवनस्य गुरुकुलस्य सर्व एव आचार्याः गुरवो ब्रह्मचारिणश्च यज्ञवेद्यां समुपस्थिताः बभूवुः। हवनकुण्डस्य पूर्ववर्तिनि दिग्विभागे सन्निहिते त्वासने कुलपतिः कण्वो व्यराजत। दक्षिण वर्त्यासनं गौतम्या सुशोभितम्। उत्तदिक्पश्चिदिग्वर्तिनी चासने रिक्त एवाऽऽस्ताम्। कतिपयक्षणानन्तरमेव वल्कलवसनालङ्कृता शकुन्तला समवनतमुखी मन्दं मन्दं पदमादधाना सर्वदमनसुशोभितदक्षिणपार्श्वा समागच्छन्ती समुन्नतवदनौत्सुक्यगर्भनयनैः यज्ञवेदिसमुपविष्टैः जनैरवलोकिता। वामं तस्याः प्रियंवदाऽनसूये अपि तन्निहितनयने समागच्छतः स्म। सविलासं वेदिसोपानसमारूढपदन्यासा सा स्वनिर्धारितासने कुलपतिकण्ववामपार्श्वे उत्तरवर्त्यासनेसमुपविष्टा। सर्वदमनोऽपि मातुः समक्षं दक्षिणवर्त्यासने समुपविष्टः। सख्यावपि निकटमेव समुपविष्टे।

हवनकर्मणि सम्प्रवृत्ते वेदमन्त्रोच्चारणपुरस्सरं स्वाहेतिध्वनिभिः सह वैतानो वैश्वानरः घृतसामग्र्यादिहविषामाहुतिभिः समुज्ज्वलन् उद्दीपिताभिः शिखाभिः परितः स्थितानां याज्ञिकानां वदनानि प्राकाशयत्।

पावके हुतानां हविषां सौरभैः सह वेदमन्त्राणामृचां यजुषां साम्नाञ्च स्वरसमूहाः सकलमेव तपोवनमाश्रमञ्च पावयन्तो वायुमण्डलं प्रापूरयन्। सलीलं प्रवहता पवनेनापि वेदमन्त्रोच्चारणनिनादा अमी सर्वतो दिशां प्रान्तभागेषु सुदूरं यावत्प्रसारिताः। सम्प्राप्ते च पूर्णाहुतिमन्त्रे शिखाभिरुन्नमन्तीभिश्च याज्ञिकानां मुखवृन्दं प्रकाशयति भगवति वैश्वानरे महर्षिः कण्वः सस्वरमुच्चैः जगौ-

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

तदनन्तरं हवनकुण्डं परितः समुपविष्टाः सर्वे याज्ञिकाः समुदतिष्ठन्। कुलपतिर्हव्यवाहनायाहुतिं समर्प्य जगाद-

"हे ! वैतानाः वह्नयः ! आहुतहविषां सुगन्धैरेनां शकुन्तलामिमञ्च शाकुन्तलेयं भवन्तः पावयन्तु।"

ततो हवनसमाप्तिसूचकं सर्वाहुतिमन्त्रं पठित्वा शान्तिमन्त्रगाने सन्निवृत्ते सर्वैराश्रमवासिभिराशीर्वादैः संयोज्यमानाभ्यां कृतहोमाग्निप्रदक्षिणाभ्यां शकुन्तलाशाकुन्तलेयाभ्यां सह महर्षिः कण्वस्तपोवनाम्रवाटिकामतिक्रम्य वृतिमुल्लंघ्य तत्स्थलं प्राप्तो यत्र हस्तिनापुरगमनमार्गोऽवर्तत। सर्वे तपोवननिवासिनो बालकाः, बालिकाः, ब्रह्मचारिणो, ब्रह्मचारिण्यः, शकुन्तलायाः सख्यः, सर्वदमनस्य सहाध्यायिन, आचार्याः, गुरव, उपाध्यायाः, महर्षयस्तपस्विनोऽन्ये ये च केचनापि तत्राऽऽसन्, कुलपतिमनुजग्मुः। शकुन्तला पतिगृहं प्रयातीति सर्वेषां लोचनानि लोचनसलिलैरार्द्रीकृतानि। सगद्गदकण्ठं कण्वो गौतमीं जगाद-

"गौतमि ! पश्य तावत्। अद्य शकुन्तला पतिगृहं प्रयातीति मम हृदयं दुःखेनातितरां पीड्यते। नयने प्रबलवेगेनोन्नमद्भिरश्रुजलैरार्द्रीक्रियेते। वाष्पस्तम्भवृत्तित्वात् कण्ठोऽपि कलुषायते। जगतो विरक्तस्य मम तपस्विनोऽपि दुहितृवियोगकल्पनाजन्येदृशी दशा, सपरिवारं निवसतां तु गृहिणां कीदृशी भविष्यतीति कल्पनाऽपि सुदुष्करा।"

तदनन्तरमसौ महर्षिराश्रमभूरुहान् सम्बोध्योवाच-

"हे वनस्पतस्य: ! युष्माकं पालयित्री शकुन्तला पतिगृहं प्रयातीति पश्यत। युष्मास्वपीतेषु पिपासाकुलाऽपि या कदापि जलं पातुं न व्यवस्यति, युष्माकं प्रथमे पुष्पप्रसवे यस्या: सततमुत्सवा: भवन्ति, शृङ्गारप्रियाऽपि या युष्माकं पत्रपुष्पादिग्रहणायं न प्रवर्तते, सेयं शकुन्तला पतिगृहं प्रयातीति सर्वे यूयमनुमन्यध्वम् ।"

अस्मिन्नेव समये रसालतरूणामुच्चशिखरभागेषु पिकानां कुहूरुत-ध्वनयोऽश्रूयन्त। सुदूरेषु वनप्रान्तरेषु मयूराणां समवेत: केकारवोऽपि श्रुतिगोचरो बभूव। सहसा मन्दं मन्दं प्रवहताऽनिलेन सुशीतलेन मृदुस्पर्शेण रसालानां मञ्जर्यो वल्लरीणाञ्च पाण्डुरकुसुमराशय: शकुन्तायां शाकुन्तलेये च विकीर्णा: ।

पित्रादिष्टा प्रियवंदाऽनसूयाभ्याञ्चोभयत: प्रदत्ताश्रया शकुन्तला सुतं पुरस्कृत्य शनै: शनै: पदानि निदधती मालिनीतीरं प्रति प्रचलिता। सहसैव तस्या: दृष्टिर्वृतिपारे आम्रोद्याने चूतेन सह सङ्गतायां वनज्योत्स्नायां निपतिता। अतिविह्वला सर्वानपि जनान् विस्मयविस्फारितलोचनान् कुर्वन्ती सा सरभसं धावित्वा वृतिमुल्लंघ्य तन्किटं प्राप्ता। अनुजारूपा सा वल्लरी शकुन्तलाविरहोत्कण्ठिता शुभ्रपुष्परूपाण्यश्रूणि मुञ्चन्ती शाखाबाहुभिस्तामालिलिङ्गिषन्तीव समवालोक्यत। शकुन्तलाऽपि वेगेन गत्वा लतां भुजालिङ्गननिबद्धां कृत्वा प्रोवाच-

"भगिनि वनज्योत्स्ने! अद्याऽहं त्वत्तो सुदूरवर्तिनी विरहिता भवितास्मि। त्वया त्वस्य चूतपादपस्याऽऽश्रयोऽधिगत:। परमहं स्वाश्रयं प्राप्स्यामि वा न वा प्राप्स्यामीति संशयपदवीमेव स्थितास्मि।

तदनन्तरं सा पितरमभिमुखीभूयाकथयत्-

"पित: ! प्रतिदिनं मयेयं भगिनी वनज्योत्स्ना जलपानादिभिर्वर्धिता। सोदरायां भगिन्यामिवास्यां स्निह्याम्यहम्। मद्विरहितेयं भवता सदा रक्षणीया।"

लताभगिनीं वनज्योत्स्नां विसर्ज्य शकुन्तला यदैव कानिचित्पदानि निदधौ, केनचित्तस्या: वल्कलं गृहीतम्। विवर्त्य तयाऽवलोकितम्-

एको मृगपोतकस्तस्यास्त्वग्वस्त्राञ्चलं दन्तैर्गृह्णाति। अथ च

मार्गमवरुणद्धि। वाष्पार्द्राभ्यां नयनाभ्यां सुनिपुणं निरीक्ष्य स्वकरपोषितं मृगपोतकं साऽङ्के जग्राह, मुखञ्च परिचुम्ब्य प्रोवाच-

"वत्स ! प्रसवानन्तरं तव जननीं पाशेषु बद्ध्वा यमकिङ्कराः यमालयं निन्युः। त्वं तु मया स्वसुतनिर्विशेषः पालितः। पयःपीयूषबिन्दुभिः सुकोमलदूर्वाङ्कुरैश्च त्वं मया वर्धितः। त्वं तु मामेव मातरं गणयसि। अधुना को जनस्त्वां पर्यवेक्षिष्यते। साधु, मम सख्याविमे एव त्वां पालयिष्यतः। त्वमनयोरङ्कं समाश्रयस्व।"

इति कथयित्वा पृष्ठतः समायातायाः प्रियंवदाया अङ्के स मृगशावकस्तया निहितः।

शकुन्तला पुनः वाटिकावृतिमुल्लंघ्य पितुरन्तिकं मालिनीतीरमाजगाम। तदैव शार्ङ्गरवः कण्वमाह-

"आचार्यप्रवर ! मालिनीसरित्तीरमिदम्। ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति शास्त्राणां वचांसि। लोकपरम्पराऽपि चेयम्। अतो भवानत्रैव मालिनीतीरे शकुन्तलां निजाशीर्वादैः संयोज्य निवर्तताम्। प्रखरकिरण-सन्तापदायको भगवान् भास्करो वियन्मध्यमारोढुकामो वर्तते। शीघ्रमेव प्रचण्डतापेनावृतोऽयं लोकः सन्तप्स्यति। अस्माभिरपि सुदीर्घा यात्रा करणीया। अतो हस्तिनापुरगमनाय विलम्बो नोचितः।"

शार्ङ्गरवस्य युक्तिगर्भाणि वचांस्याकर्ण्य सर्वे जनाः मालिनीतीरमेव सम्प्राप्य स्थिताः बभूवुः। महर्षिः कण्वः शकुन्तलामवोचत्-

वत्से ! अस्यां पतिगृहगमनवेलायां तव किमुपदिशामि ? त्वं स्वयमेव बुद्धिमती, विदुषी सकलशास्त्रपारङ्गता, लोकाचारनिपुणा च वर्तसे। तथापि ममेमानि वचनानि सदैवान्तःकरणनिहितानि करणीयानि।

पतिगृहं प्राप्य त्वं गुरुजनानां शुश्रूषां कुर्याः। पत्युः सर्वेषु कार्येषु सहगामिनी सहयोगिनी च भूयाः। अपकृताऽपि तिरस्कृताऽपि कदाचन रोषणतया न भर्तुर्विपरीतमाचरेः। यदि कदाचित्ते पतिः भर्ता रुष्टः कुपितोऽपि भवति, तदा निजावेगं विजित्य मधुरवचनैस्तस्य प्रसादनाय सचेष्टा भूयाः। सेवकानाश्रितजनांश्च प्रति उदात्तभावेन वर्तेथाः। त्वया राजमहिष्या कदाचिदपि चञ्चलस्वभावेष्वस्थिरेषु धनेष्वैश्वर्येषु च सगर्वया न भवितव्यम्। पत्युः कुलस्य यशसि समृद्धौ चैव ते यशः समृद्धिश्च। वत्से ! यास्तु युवतयः

पतिगृहं प्राप्यैवमाचरन्ति, ता एव गृहिणीपदशोभां प्राप्नुवन्ति। ता एव भर्तृकुले सम्मानिताः भवन्ति। विपरीताचरणवत्यस्तु युवतयः पतिकुलं पितृकुलञ्च दुःखानामपयशसाञ्च गर्तेषु निपातयन्ति। वत्से ! भर्तुः शुश्रूषा पातिव्रतधर्मपालनञ्चैव स्त्रीणां परमो धर्मः। पतिव्रता नारी सततमेव लोके यशः प्रशंसां समृद्धिमभिनन्दनञ्च प्राप्नोति। सैव नारी श्रेष्ठं रत्नम्।

पितुरुपदेशैरभिभूता शकुन्तला तस्य चरणौ संस्पृश्य वाष्पगद्गदकण्ठेन प्रोवाच-

"पितः! सम्प्रत्यहं भवता आश्रमादस्माद् विसृष्टा पुनः कदा तपोवनेऽस्मिन् पदं निधास्यामि ?"

कण्व उदतरत् -

"वत्से ! अधुना त्वं पतिगृहस्वामिनी वर्तसे। तत्र राजभवनोचितेषु महत्सु व्यापारेषु व्यापृतायास्ते न कश्चिदपि पितृगृहवर्ती जनः स्मृतिपथमागमिष्यति। तवायं सुतः सर्वदमनस्तेजसाऽभिभूतसकलजगत्प्रतापो युवराजपदमधिकरिष्यति। तदनन्तरं सम्पूरितगृहस्थाश्रमोचितसकलधार्मिककृत्य उपभुक्तराजपदसुखस्ते भर्ता दुष्यन्तः प्रवृद्धावस्थो भविष्यति। तदा केशेषु पाण्डुरत्वमापन्नेषु सुते च राज्याभिषेकेन सह राजसिंहासनमधिष्ठिते सति भर्त्रा सह त्वमाश्रमेऽस्मिन् पदं करिष्यसि।

अथ शकुन्तला प्रियंवदाऽनसूययोः निहितैकाग्रदृष्टिर्बभूव। आशैशवात् तिसृणामपि सततसाहचर्यशालिनीनां बालसखीनां न कदापि पारस्परिकवियोगदुःखानुभवो बभूव। साक्षात् समुपस्थितस्य वियोगस्य तु कथैव का, तस्य कल्पनमप्यसहनीयम्। अहो, शकुन्तला पतिगृहाय प्रस्थानोन्मुखी कदा दृग्गोचरीभविष्यतीति भीत्या शङ्कया चाऽतितरां विह्वलतां गताभ्यां ताभ्यां सा समकालमेव परस्पराऽऽलिङ्गनपाशे दृढं निबद्धा। तया तपस्विन्याऽपि मृदुलभुजवल्लरीभ्यां ते युगपदेव द्वे अपि परिवेष्टिते। तिसृणामपि सखीनां चक्षूंषि नयनजलनिर्झराणि सन्ति तासां हृदयसन्निहितामसहनीयां वेदनामभिव्यञ्जयन्ति स्म। न च वाष्पावरुद्धवचोवृत्तयस्ताः किमपि वक्तुमपारयन्।

कतिपयक्षणानन्तरं प्रशान्ते कथञ्चिदपि चित्तावेगे समालिङ्गन-बन्धनमुक्तासु च तासु प्रियंवदा शकुन्तलायाः दक्षिणकरमध्यमाङ्गुलि-

निहितराजमुद्रिकाङ्कितां मुद्रिकां निजकोमलकरशाखाभिः परामृशन्ती प्रोवाच-

"सखि ! देशरक्षकेण तेन भूभृता या दिवसगणना नामाक्षरानुसारं विहिता, तत्संख्यातो द्विगुणिताधिकान्यपि संवत्सराणि व्यतीतानि। परं तेन निष्ठुरेण गृहाऽऽनयनस्य तु का वार्ता, सख्याः स्मरणमपि न विहितम्। उपालम्भनीयः खलु स राजा।"

एतस्मिन्नेव समये सवितरि किञ्चिदपि समारूढे गगनं, सन्तापे च वर्धितुं प्रवृत्ते, शार्ङ्गरवशारद्वतौ त्वरायमाणौ बभूवतुः। परन्तु शकुन्तला तावुपेक्ष्यैव सखीभ्यां पृथग्भूय पितरमुन्मुखीभूय तरसा धावित्वा कृशीभूतकायं तं भुजाभ्यां परिवेष्ट्य प्रवहदश्रुक्लिन्ननयना सगद्गदं प्रोवाच-

"पितः ! तपःपूतशरीरमिदमतिशयकृशीभूतं शिराजालसन्ततं लक्ष्यते। मय्यसन्निहितायां को भवन्तं द्रक्ष्यति ? मम स्मरणं कृत्वा भवान् मा निजं शरीरं मनश्च कृशत्। मा च मत्कृते तथा उत्कण्ठितो भवत्।"

कण्वस्तु शकुन्तलां शिरसि परामृशन् पुनः जगाद -

"वत्से ! त्वया सिक्ताः पादपाः लताश्च, पालिताः मृगपोतकाश्च सततं मम दृष्टिपथमागमिष्यन्ति। दर्शं दर्शं च तान् कथमहं तव विस्मरणे समर्थो भविष्यामि ?"

तदनन्तरं कण्वः सर्वदमनमालिङ्गनपाशे निबध्य जगाद-

"वत्स ! त्वमप्रतिहतरथगतिश्चक्रवर्तिपदमवाप्स्यसि। आहिमालया-द्दक्षिणसागरपर्यन्तं विस्तीर्णा विन्ध्यरशना पूर्वापरसमुद्रावगाढा धरा तवैकच्छत्रशासने स्थास्यति। पुत्र ! त्वया मातरि पितरि च विनीतभावेन शिष्यत्वेन च वर्तनीयम्।"

एतेषु वार्तालापेषु महान् समयो व्यतीतः। अरुणसञ्चोदितसप्तिभिरुह्यमानो भास्कररथो व्योम्नि मध्यमिव गन्तुं प्रवृत्तः। तस्य प्रातःकालिकाऽरुणाभा श्वेतिमानं प्रपद्याऽतितरां सन्तापदायिनी सञ्जाता। शार्ङ्गरवशारद्वताभ्यां प्रेर्यमाणा शकुन्तला सुतं पुरस्कृत्य मालिनीं प्रति पदान्यादधौ। कण्वशिष्ययोः मालिनीपारं गतयोः शकुन्तलाऽपि सुतस्य दक्षिणकरं गृहीत्वा नद्याः पारं गता।

अथ सहसैव सा तपोवने सुतीक्ष्णां मार्मिकाञ्च दृष्टिं न्यपातयत्।

आशैशवादिदानीन्तना: सर्वे वृत्तान्ता: सकला: घटना अहमहमिकया स्मृतिपथं समायाता: मूर्तिमत्य इव समुपस्थितास्तस्या: हृदयमालोडयामासु:। कतिपयक्षणं यावत् पितरं, गौतमीमार्यां, सखीजनमन्यांश्च सर्वानाश्रमवासिनो वीक्ष्य, शार्ङ्गरवेण सकठोरं निर्दिष्टा सा वनपंक्तिषु गमनाय बाधिता बभूव।

अनसूयया, प्रियंवदया, गौतम्या, सर्वैश्चाश्रमवासिभिरन्यै: सह मालिन्यास्तटे स्थितो महर्षि: कुलपति: कण्वो विस्मृतान्यव्यापार: शैशवादेवाङ्के क्रीडनव्यसनिनीमधुना पतिगृहं गच्छन्तीं दुहितरं तावत्कालपर्यन्तमालोकयामास, यावत्सा वनवनस्पतिराजिभिर्न तिरोहिता। तदनन्तरमसौ भग्नहृदयो बलादेव प्रवहदश्रुपरम्परामन्त: निरुध्य शनै: शनै: पादौ चारयन्नाश्रमं प्रति निवृत्त:।

(१७)

विविधवनस्पतिवानस्पत्यक्षुपलताजालगहनानि वनानि लङ्घयन्तौ सुदीर्घं मार्गमुत्क्रम्य शकुन्तलाशाकुन्तलेयौ शार्ङ्गरवं शारद्वतञ्चानुरसन्तौ, सूर्यास्तङ्गमनवेलायां भगवत्या: भागीरथ्या: पूर्वीयन्तटं समाजग्मतु:। अत्र शक्रावताराभिधेयं प्रसिद्धं तीर्थमासीत्। प्रथितेयं किंवदन्ती सर्वत्र, यद् देवराज: (शक्र:) सुकठोरं तपस्तप्त्वाऽत्र पुलोम्नोऽभिधानस्यासुरराजस्य सुतां शचीम् (इंद्राणीम्) पत्नीरूपेण परिणीतवान्। अत: स्थानमिदं शचीतीर्थनाम्नाऽपि लोके प्रथितम्।

तीर्थेऽस्मिन् समागतेषु तेषु तपस्विजनेषु जगत्प्रकाशको भास्करो वियत्यस्ताचलोन्मुखो ददृशे। शीघ्रमेव सकलं जगत्तमसा व्यापृतं भविष्यतीति ते रजन्यां तत्रैव निवासं समुचितं निर्धारयामासु:। गङ्गाया: निर्जने सैकतप्रदेशे निरापदं शोभनञ्च स्थानमवलोक्य, तदेव विश्रामस्थलं तैर्निर्धारितम्। सन्ध्यावन्दनादिकं सम्पाद्य, आश्रमात् सहैवाऽऽनीतं फलमूलादिकं पाथेयं स्वल्पाहारमुपभुज्य ते तत्रैवास्वपन्।

विगतदिवसपदचारयात्राप्रसङ्गेन परिश्रान्तेषु गहननिद्रावशङ्गतेषु तेषु तपस्विजनेषु प्रभातवेला निजं जपाकुसुमाभं प्रकाशं प्रासारयत्। पीयूषमधुरेण स्वरेण चहचहेति गायद्भि: पक्षिभिस्ते व्यपगतनिद्रा: विहिता:। पूर्वस्मिन् क्षितिजाकाशे रश्मिमालिनमुद्गच्छन्तमवलोक्य चमत्कृत्य ते ससाध्वसमुत्थाय दैनिककृत्यानि सम्पादयितुं त्वरयामासु:। सर्वदमनं पुरस्कृत्य शकुन्तला स्नानार्थं गङ्गास्रोतसि समवतीर्णा। स्नानं

विधाय भगवते सवित्रे कमलमुकुलाकारेणाञ्जलिनाऽर्घ्यं समर्प्य सा पुत्रेण सहैवं भागीरथीसलिलधारायाः बहिरायाता। परन्तु दुर्भाग्यमेवासीत्तस्या-स्तपस्विन्याः। दुष्यन्तेनोपहारीकृतमङ्गुलीयकं जलमवगाहमानायाः शकुन्तलाया अङ्गुल्याः प्रस्खलद् धारायामेव पतितम्। परन्तु त्वरापरवशया शकुन्तलया न किञ्चिदप्यवहितम्।

क्षितिजमुल्लंघ्य सवितरि नभसि समारूढे ते तपस्विनो हस्तिनापुरं प्रत्युन्मुखीभूताः। गङ्गायाः परे पारे पश्चिमदिग्वर्तिनीषु तटभूमिषु हस्तिनापुरं नाम नगरमवस्थितमासीत्। तत्र नद्यवतरणस्थानमप्सरस्तीर्थनाम्ना प्रसिद्धमवर्तत। लोके प्रथितेयं किम्वदन्ती यदप्सरसो देवाङ्गना एवास्य तीर्थस्य रक्षिकाः भक्तानामुपासकानां मनसां कामनाः पूरयन्ति। अस्य तीर्थस्य पर्यवेक्षणाय क्रमश आनुपूर्व्येणैकाऽप्सरा [illegible] निर्वहति।

ते तपस्विनश्चत्वारोऽपि गङ्गातटावस्थिता नौकामारुह्य नाविकेन नीयमानाः भागीरथीमुत्तीर्याप्सरस्तीर्थे नावं परित्यज्य घट्टस्थानमधिरुह्य सैकतमतिक्रम्य शुष्कभूमिस्थलं संप्राप्ताः। तत्रैव सम्मुखे हस्तिनापुरनगरद्वारतोरणं समलक्ष्यत। दिवसस्य मध्यवेला समायाता। प्रखरकरनिकरैः लोकं सन्तापयन् महसां राशी रविः ज्योतिषामपि ज्योतिर्मध्याकाशमारूढोऽतिशयं सन्तपति स्म। शकुन्तलां सर्वदमनञ्च पुरस्कृत्य शार्ङ्गरवशारद्वतौ दुष्यन्तराजधानीं प्रविष्टौ।

लावण्येन सकलमेव पुरं दीपयन्त्या तपस्विन्यैकया युवत्या, साक्षादिव कुमारकार्तिकेयसमतेजस्विना शस्त्रधारकेण तापसकिशोरकेण च सार्द्धं राजमार्गेषु विचरन्तौ द्वौ तपस्विनाववलोक्य आश्चर्योद्भ्रान्तमानसाः चकितचकिताः पौरास्तान् पर्यवारयन्। शकुन्तलायाः सर्वदमनस्य च शारीरसौष्ठवसौन्दर्येणाऽभिभूतहृदयाः विस्मयेनान्दोलितचेतसस्ते परस्परं वार्तालापान् चक्रुः :-

"अहो, अद्य भगवती स्वयमेव गौरी, स्वसुतेन स्कन्देन सहैतन्नगरं पावयितुं समागच्छति। अथवा तापसवेशधारिणी शची स्वसुतं जयन्तं पुरस्कृत्य हस्तिनापुरं प्रविशति।"

एतत्कथयित्वा ते शिष्टनागरिकाः स्वस्वप्रणामाञ्जलिभिस्तस्यै नमश्चक्रिरे।

परं केचन खलस्वभावाः दुष्टनागरिका अतिशयं दुष्टमानसा अवर्तन्त।

मृगचर्ममये अधोवस्त्रे, वल्कलमये चोत्तरवसने धारयन्तौ, विशालपिङ्गलवर्ण-जटाभिर्जटिलौ समुन्नतनीलशिराजालग्रथितगात्रौ शार्ङ्गरवशारद्वतावलोक्य परिहासकुशलास्ते सङ्केतान् विधायेत्थं व्यङ्ग्यवक्रोक्तिकटाक्षैस्तौ विद्धौ कर्तुमारेभिरे। तैः कथितम्-

"अहो पश्यत पश्यत। जनाः! पश्यत पश्यत। अद्यास्माकं शोभने नगरे पिशाचाभ्यामेवावतीर्णम्। अहो, कथमेतौ विडालविकरालाक्षौ वर्तेते। काषायवर्णाः केशाः शोणितेन रञ्जिता इव परिलक्ष्यन्ते। रूक्षाः, मलिनाः, रक्तवर्णाः केशाः न कदाचिदपि स्नानादिना प्रक्षालनावकाशं लभन्ते। अहो, परिधानान्यप्येताभ्यां न लभ्यन्ते। शरीरस्य पूर्वाङ्गानि च निहतमृग-त्वग्भिर्निबद्धानि। आहारजातमपि सम्यग्भोक्तुं दुर्लभम्। अत एवैतयोः शरीरे कृशे काष्ठवच्छुष्के च स्तः। तदुपरि नीलस्थूलशिराजालान्यद्भुतं स्वरूपं दर्शयन्ति। एतयोः शरीरयोरस्थिचर्मनाडीनामेव सञ्चयः।"

दुष्टनागरिकाणामेतानि परिहास वचांस्याकर्ण्य व्यङ्ग्यगर्भाः वक्रोक्तीश्च निशम्य शार्ङ्गरवशारद्वतौ कोपकषायितलोचनौ बभूवतुः। नागरिकाणां किञ्चिचदप्यपकरणे प्रतिरोधने च सामर्थ्यरहिताभ्यां मन्त्रकीलितभुजगाभ्यामिव विवशाभ्यां ताभ्यां सा वराकी शकुन्तला सकोपं साधिक्षेपञ्च प्रोक्ता-

"शकुन्तले! आवाभ्यां त्वं राज्ञो दुष्यन्तस्य, तव भर्तुः नगरं प्रापिता। आवाभ्यामेतदेव करणीयमासीत्। तपस्विभिर्नगराणि न गन्तव्यानि, शास्त्राणामित्येव विधानम्। निषिद्ध एव तेषां नगराभिनिवेशः। अतः कथमप्यावयोर्नगरस्थितिर्न सम्भवा। गन्तव्यमेवेदानीमावाभ्याम्। एतेषां दुष्टनागरिकाणां दूषितगर्हितनिन्दास्पदानां कटुव्यङ्ग्योक्तीनां श्रवणमावयोरन्तःकरणे दावदहनदग्धे करोति। त्वया सर्वदमनं पुरस्कृत्य स्वयमेव राज्ञः स्वभर्तुः समक्षं गन्तव्यम्।

एतदुक्त्वा शकुन्तलां सर्वदमनञ्च तत्रैव नागरिकजनसम्मर्दमध्ये परित्यज्य, तयोः किञ्चिदपि वचनावसरं परिहरन्तौ शार्ङ्गरवशारद्वतौ कुलपतिकण्वान्तेवासिनौ गुरुकुलाध्यापकौ तरसा नगरान्निष्क्रान्तौ।

हुतवहपरीतगृहादिव तस्मात्पुरान्निर्गत्य तरसा पलायमानाविव ताववलोक्य पुत्रस्य करं दृढं पीडयन्ती शकुन्तला तत्रैव राजमार्गमध्ये पौरजनैः परिवृता नीरवा निस्तब्धा निर्निमेषा किङ्कर्तव्यविमूढा तावेवावलोकनपरा

बभूव। परमगतिका, निरुपाया, विवशा सा किं कुर्यात् ? पुत्रं पुरतः कृत्वा साऽवनतनयना नागरिकान् राजभवनमार्गं पृच्छन्ती शनैः शनैः पदमादधाना राजमार्गे प्राचलत्।

शकुन्तलां सर्वदमनञ्च परितो नागरिकाणां महान् समुदाय एकत्रितो बभूव। सोऽपि तया सह प्राचलत्। तदद्भुतं लोकनयनविस्मयकरं दृश्यमवलोकयितुं राजपथमुभयत आपणेषु क्रयविक्रयरता आपणिकाः क्रेतारश्चोत्थायौत्सुक्येन विस्मयेन च तन्निकीलितनयनाः सञ्जाताः। आपणानामुपरितनगृहबलभीषु छदिःपटलेषु च विराजमानानां बालयुवतिप्रौढवृद्धवनितानां कुमारीणां वधूनां च महान् समुदायः समजनि। तासामित्थम्भूताः वार्तालापाः समभूवन्-

"अहो, केयं सौन्दर्येण त्रिभुवनमहिलासंहत्यतिशायिनी कान्त्या सकलं नगरमुद्दीपयन्ती रतिरिव तापसवेशधारिणी उमेव वल्कलवसनपरिधाना वनाय निर्वासिता जानकीव तरुत्वग्विभूषिता राजमार्गेष्वटन्त्यवलोक्यते। नैतादृशं सौन्दर्यं, लावण्यं, रूपराशिः, कान्तिः, रामणीयकं, सौकुमार्यं, सौभाग्यं वा क्वचिदपि कदाचिदपि कस्यचिदपि नयनगोचरीभूतम्। प्रभातरलमिदं ज्योतिः न वसुधातलवर्ति, दिव्यमेवैतत्।

अहो, वल्कलवसनावृता, परमुज्ज्वलकान्तिमत्सौन्दर्येण त्रिभुवनमपि दीपयन्ती तापसीयमाकृत्या साक्षाद् धरावतीर्णा विष्णुपत्नीव संलक्ष्यते। परं तत्रापि महान् भेदः। इयं केवलं पादचारिणी हस्तद्वयमेव दधाति, न चात्र कमलम्। अपि च, अस्याः प्रभोद्दीप्तवदनस्यौपम्ये सकलमेव त्रिभुवनं दरिद्रमिव वर्तते। स्मितेन पुष्पविकासमपि त्रपास्पदं विदधत्या अस्याः रदाः कान्त्या कुन्दकलिकानामपि तिरस्करणे समर्थाः।

अथ च तामरससवर्णस्याधरस्यास्याः रक्तिमा बिम्बफलपराजयहेतुः। अरुणाभा अरुणकमलपटलमनोरमा। आकर्णान्तविस्तृते विलोचने विकचपुण्डरीकदलसमनिशिते। वक्षःस्थलपिनद्धा वल्कलचोलिका यौवनभारोद्भिन्नसुघटितपीनोन्नतकुचयोः नियमनेऽसफलतां सूचयति। उरःस्थलाधस्तादुदरमध्यभागे गभीरा नाभिस्तदधस्ताच्च त्रिवलयमापादयन्त्यो रेखाः कामदेवमपि भ्रामयितुं समर्थाः सलिलावर्ता इव प्रतिभान्ति। कटिरियमेकमुष्टिग्राह्या। कटिसंयतं वल्कलनिर्मितमधोवसनं पिण्डलिकापर्यन्तमः-

ा लम्बते। तदन्तश्च त्वग्वस्त्रसूत्रमध्यात् स्वर्णाभमिश्रितगौरवर्णे पिचण्डिके भूयो भूयो विद्युन्माले इव भासेते। पादत्राणाभावात् स्वल्परजोराशिसंलिप्तावपि चरणौ तामरसारुणवर्णं व्यञ्जयन्तौ धरां रक्तवर्णस्थलकमलराशिमिव प्रकटयतः। इतस्ततो विकीर्णाः सुमृदुकुञ्चिताः कृष्णवर्णेन श्यामपट्टतिरस्कारिणः सीमन्तविभाजिताः दीर्घालकाः पृष्ठतः क्षिप्ताः सक्थिनी स्पृशन्ति। हंसीसमानया गत्या महत्स्वाभिमानं गौरवं चेयं प्रकटयन्ती मन्दं मन्दं पदमादधाना हस्तिनापुरराजपथं समुज्ज्वलेन लावण्येन प्रकाशयति।

अहो, धन्योऽसौ पुरुषो य एतस्याः साहचर्यसौभाग्यभाग् भविता। धन्यं च तद् गृहं, यदस्याः कान्त्या ज्योतिषा वा आलोकितं भविता।"

सर्वदमनस्य ब्रह्मचर्यतेजोदीपितं प्रभावातिशयसमेधितं वदनमपि सर्वेषामाकर्षणपात्रमवर्तत। तपस्विजनोचितब्रह्मचारिवेशधारिणोऽपि तस्य कायः पराक्रमं शक्तिं प्राणसारत्वञ्च स्फोटं स्फोटमभिव्यनक्ति। सर्वजनाह्लादकारकः प्रभावः सततमेव सर्वगात्रेभ्यः प्रसरति। तं वीक्ष्य पौरजनमहिलासमुदायस्यैवंविधानि जल्पितानि बभूवुः-

"अहो, स्वल्पायुषोऽपि किशोरकस्याप्यस्य कायः पराक्रमशक्तिसत्त्व-शालित्वान्महद्गौरवं धारयन्निव लक्ष्यते ऊर्ध्वौष्ठनवोद्भिन्नश्यामलरेखया साम्प्रतमपि न शोभमानोऽयं किशोरकः स्वपराक्रमेण वीर्येण सत्त्वेन च पराक्रमशालिनमपि यौवनसम्पन्नमपि महान्तं योद्धारं पराजेतुं समर्थ इव प्रतिभाति। धनुःखड्गादिधारणेनायं धनुर्वेदविद्याकुशलः गौरीसुतकार्तिकेयस्तारकासुरगणमिव सकलं वीरसमूहं विजेतुं क्षमते।

विशाले चक्षुषी, पृथु वक्षःस्थलं, कृशोदरा कटिः, सुदीर्घौ भुजौ, मांसले जघने, सुघटिते पिचण्डिकेऽस्यान्तर्विद्यमानं वनराजकेसरिकिशोरतुल्यं प्राणसारं प्रकटयन्ति। अनुद्धता गतिरस्य वनराजस्यापि विजेतुर्भद्रात्मनो गजराजस्य तुल्यतां बिभर्ति। आजानुलम्बिनो भुजयुगलस्य करतलगतारुणत्वं तामरसजपाबिम्बफलविडम्बिभूतमद्भुतामेव शोभां प्रसारयति। अतोऽपि विस्मयकरमेतद् यदयं किशोरको ज्योतिर्विद्योक्त-हस्तपादाङ्कितलक्षणरेखाभिश्चक्रवर्तित्वं धारयन्निव लक्ष्यते।

अतोऽप्यधिकस्याश्चर्यस्येयं वार्ता, यदस्य किशोरकस्य मुखाकृतिरस्माकं

सम्राजो दुष्यन्तस्य मुखस्य सादृश्यं भजते। मुखस्याकृतिरेखाभी. रूपेण, तेजसा, शरीरसंगठनसौष्ठवेनायं सम्राजः प्रतिकृतिरेव। प्रतीयते, सम्राडेव बालरूपं तपस्विब्रह्मचारिवेशं धृत्वा राजमार्गेषु प्रचलति। कान्त्या सौन्दर्येण च दिशः प्रकाशयन्त्या जनन्या सार्द्धं गच्छन्नयं किशोरको जगन्मात्रा पार्वत्या सह व्रजता देवसेनापतिना स्कन्देन सममेवोपमातुं योग्यः।

नागरिकाणां प्रशंसा-सम्मान-कुतूहलौत्सुक्यगर्भिताभिर्दृष्टि-वृष्टिभिरभिषिक्तेव, स्तुतिगर्भितजल्पनैराप्यायितेव शकुन्तला पुत्रेण सार्द्धं तूष्णीम्भावेन राजपथे प्राचलत्। कदाच्चितुष्पथे समायाते मार्गभ्रान्तिभ्रमे च सञ्जाते कमपि नागरिकं राजमार्गं पृष्ट्वा तथैवाग्रे पदन्यासं करोति स्म। सहसैव तयाऽवलोकितम्- "राजमार्गोऽतिविस्तीर्णः सञ्जातः।" उन्नामिते वदने प्रोन्नत्या गगनमपि भेदयदेकं सुविशालभवनं समक्षमवस्थितम्। नागरिकाः प्रोचुः - "अयमेव राजप्रासादः।"

राजप्रासादस्य विशालतोरणसुभोभिते द्वारि राजकीयचिह्नधारिणोऽनेके द्वाररक्षाधिकृताः राजपुरुषाः प्रहरिणो विविधायुधधारिणो द्वाररक्षायै गतागतं कुर्वन्ति स्म। तानवलोक्याकस्मादेव स्तब्धा, निश्चेष्टा, निरुद्धगतिका सा तत्रैव स्थिता। अङ्गानि तस्याः लज्जया जडीभूतानि। चेतस्येवंविधाः विचारा आन्दोलिता अभूवन्।

"अहो, कथं मया तस्य प्रणयिनो महाराजस्य वृतवरस्य समक्षं स्थातुं शक्यते ? तमहं किं वदिष्यामि ? अहं भवतां भार्या, चतुर्दशवर्षपूर्वं मालिनीतीरे महर्षिकण्वतपोवनं निकषा निशीथस्यैकान्ते पावकं साक्षीकृत्य सखीजनसमक्षं गान्धर्वविवाहविधिना परिणीता, इति। परं स्वयमेव निजमुखादुच्चारणमतीव लज्जावहम्। अयं सर्वदमनो भवतां प्रसूतिस्तन्निशारतिकेलिप्रणयपरिणाम, इति शब्दानामुच्चारणमतीव दुष्करम्। पित्रा तु शार्ङ्गरवेण शारद्वतेन च सार्द्धमहमत्र प्रेषिता। परन्तु भीरुस्वभावौ तौ द्वावेव दुष्टनागरिकाणां परिहासवचोभिः कुपितौ मां मार्गमध्य एव एकाकिनीमसहायां परित्यज्य प्रतिनिवृत्तौ। यदि तावत्रोपास्थास्यतामहमेतां लज्जास्पदतां विडम्बनाञ्च नान्वभविष्यम्। तथापि निरुपायाऽहं, न च कोऽपि सहायकः। अयमल्पवयस्कः सर्वदमनोऽप्यस्मिन् विषयेऽसमर्थः। अहमत्र हस्तिनापुरं समागतैव। मया राजप्रासादं प्रविश्य सकलो वृत्तान्तः स्वयमेव

निवेदनीयः।"

इति विचार्य सर्वदमनं पुरस्कृत्य शकुन्तला राजप्रासादमुख्यद्वारसमक्षं गत्वा प्रासादान्तः प्रवेशायोद्योगशालिन्यभवत्। तस्याः परमदिव्यसौन्दर्य-समन्वितं कान्तिमदाननं सर्वदमनस्य च तेजस्वि प्रभावशालि वदनं विलोक्य द्वाररक्षकाः सैनिकाः हतप्रभाः किंकर्तव्यविमूढाश्च सन्तः तयोरवरोधनेऽसमर्थाः मार्गं परित्यज्यैकपार्श्वेऽतिष्ठन्। शकुन्तलायाञ्चान्तःप्रविष्टायामनुयात्रिणो नागरिकास्तैर्निरुद्धाः। अथ च द्वाररक्षकैः हस्तस्थितप्रलम्बदृढदण्डप्रहारैस्ते तस्माद् द्वारदेशाद् विद्राविताः। शकुन्तला चापि प्रहरिणोऽनपेक्ष्य पुत्रेण साकं सुविस्तृते मार्गे प्रचलन्ती राजसभाभवनं प्रविष्टा।

(१८)

राजसभाभवनं त्वतिविशालमवर्तत। शकुन्तलयाऽवलोकितम्-नीलसुधाद्रवेण संलिप्ताऽत्युत्सेधवती छदिः। सुविस्तृतासु भित्तिषु प्रत्यन्तरेषु स्फुटकान्तिभासमानमणयो हीरकमुक्ताप्रवालमरकतनीलवैदूर्यादयस्तथोत्खचिताः, यथा निशीथे नीलाभव्योम्नि नक्षत्राणि तरलायन्ते। छदिःप्रान्तरेभ्यो दीर्घलोहशलाकाधारमाश्रित्य दीपाधाराः लम्बन्ते। चतसृषु दिक्षु भित्तिषु षड्हस्तकल्पोच्छ्रायेष्वयोनिर्मितनागदन्तेष्वपि दीपाधाराणां पंक्तयः संयोजिताः वर्तन्ते। गवाक्षवातायनद्वारमार्गैः प्रविष्टेऽपि मन्दालोके दीपाधारेषु तैलगर्भबृहदाकाराः दीपकाः प्रलम्बप्रज्ज्वलितवर्तिकाभिः कान्तिमत्प्रकाशं प्रसारयन्ति। तैलवर्तिकोपहित बृहदाकाराणां भित्त्यादिखचितविविध-वर्णरत्नराशीनां दीपकानां प्रकाशेन द्विगुणितमिव राजसभाभवनमतिशयेन चमचमेतिचाकचक्येन सुपरिचितानामपि राजदर्शनसमुत्सुकजनानां नयनानि चमत्करोति।

उत्तरदिग्विभागे सकलमेव परिणाहमाच्छाद्य सभाभवनमध्ये निर्मितायामुच्चवेद्यां रत्ननिचितं कनकमयं भव्यं राजसिंहासनं स्थापितम्। तच्च महाराजश्चक्रवर्ती सम्राड् दुष्यन्तोऽलङ्करोति। सिंहासनस्य पृष्ठतो द्वयोः पार्श्वयोः स्थिते द्वे परमसौन्दर्ययौवनसम्पन्ने अष्टादशवर्षदेशीये चामर-धारिण्यौ सेविके राजानं चामरव्यजनाभ्यां वीजयतः। वीजनात्कम्पशालिनां कराणां कङ्कणानां मधुराकर्षकमन्दशिञ्जितानि तद् विशालं सभाभवनं मुखरितमिव कुर्वन्ति।

राजसिंहासनाधारभूताया: वेद्या: पुरतोऽपरप्रान्तं यावदासन्दीनां पंक्तिद्वयं स्थापितम् । द्वयो: पंक्त्योर्मध्ये सरल: सुविस्तृत: सुखस्पर्शकोमलाच्छादनयुतो मार्गोऽपरप्रान्तादारभ्य वेदिपर्यन्तं विद्यते। आसन्दीषु निजनिजपदानुक्रमेण क्रमश: मन्त्रिमण्डलसदस्या:, प्रमुख: सेनापतिरन्ये च प्रमुखा: राजसभासदस्या: समुपविष्टा: वर्तन्ते। राजसिंहासनस्याध:प्रदेशे स्थितौ द्वौ वैतालिकौ पुरुवंशगौरवपराक्रमाभिव्यञ्जकानि गीतानि गायत: ।

वेद्या: पृष्ठतो भित्तिमध्ये एकमपावृतकपाटं द्वारं वर्तते। तन्मध्यादन्तर्वर्तिप्रमदवनवाटिका, तत्परतश्च राजभवनानां पंक्तयोऽवलोक्यन्ते। अनेनैव मार्गेणागत्य सम्राड् वेद्यां स्थापितं राजसिंहासनमधितिष्ठति । अनेनैव मार्गेण च प्रतिनिवर्तते।

रक्षापुरुषाणामवरोधपरम्परामनपेक्षमाणा शकुन्तला सहसैव राजसभाभवनं प्रविष्टा। केयं धृष्टा तपस्विनी, विनैवानुमतिमेवं धाष्ट्र्यं प्रदर्शयन्ती केनचिदपरिचितेन किशोरकेण सह समागच्छतीति बहव: सभासद: कुतूहलकोपक्षोभभराक्रान्ता: समुदतिष्ठन् । परं शकुन्तलाया: वदनात् प्रसृतया कान्त्या, सौन्दर्येण, तेजस्वितया, गौरवेण चाभिभूता: किमपि वक्तुमसमर्था: सन्त: तामवरोधयितुं न क्षमा: बभूवु: ।

इतस्तत: कुतूहलगर्भदृशा चाञ्चल्यभावेनाऽवलोकमानं सर्वदमनं वामकरेणाऽऽकर्षन्तीव सा आसन्दिपंक्तिमध्यगतसुखस्पर्शसुकोमलाच्छादनसुशोभितं मार्गं पदन्यासै: सम्पीडयन्ती त्वरितगत्या केनाप्यनवरोधिता वेद्या अधस्तादेव दुष्यन्तसमक्षं स्थिताऽभवत्। केयं तपस्विनी साहसिका केनाप्यनवरोधिता सकलमेव सुरक्षाप्रबन्धमतिक्रम्य मम पुरत: समायातेति कुतूहलेन, विस्मयेन क्षोभेण चाक्रान्तमना: दुष्यन्तस्तां निर्निमेषदृष्ट्याऽवलोकयामास ।

राजसिंहासनाधिष्ठितां वेदीं निकषा समागत्य दुष्यन्ताय प्रणामाञ्जलिञ्च निवेद्य शकुन्तला कम्पमानसकलगात्रा स्वेदसलिलबिन्दुनिचितनिखिलावयवा गद्गदस्वरेण सर्वदमनमादिदेश–

“वत्स ! अयमेव समादरणीय:, परमपराक्रमशाली, अप्रतिहतरथरयस्ते जनकश्चक्रवर्ती सम्राड् हस्तिनापुराधिपति: । त्वया पितृचरणयो: प्रणामाञ्जलयो निवेदनीया: ।”

एतत् कथयित्वा शकुन्तला त्रपावरक्तमुखी वदनमवनमय्य एकपार्श्वे स्थिता बभूव। सर्वदमनोऽपि सम्मुखमागत्य राज्ञे नमस्कृत्य हर्षौत्सुक्यविस्मयादिभावसम्भृतमना: एकतानदृशा तं राजानं पितरं व्यलोकयत्।

शकुन्तलया सह सुगुप्तरूपेण गान्धर्वविवाहविधिं सम्पाद्य, प्रणयकेलिं विरच्य, तस्य यौवनं सौन्दर्यञ्चोपभुज्य दुष्यन्तो राजधानीं प्रति निवृत्त:। सुदीर्घकालं यावदसौ शकुन्तलामानेतुं विचारपरम्पराधारासु निमग्नोन्मग्नो बभूव। परमसौ महर्षिस्तपोधन: किं वक्ष्यतीति भयहेतो: पुनस्तपोवनो-न्मुखीभवितुं साहसन्न चक्रे। न च स कमपि जनं प्रेषयितुं समर्थो बभूव।

बह्वीषु तिथिषु व्यतीतासु सतीषु राजकार्यव्यग्रचित्तो राजवैभव-मुग्धाविलासासक्तोऽसौ कालान्तरेण शकुन्तलाया: स्मरणं नाऽकरोत्। विस्मृतिगर्भे पतिता शकुन्तला पुनस्तस्य स्मृतिपथं नाऽऽयाता। बहुवल्लभा: ननु राजान इति बहुभार्यावतो दुष्यन्तस्याऽन्त:पुरे नवयौवनमदशालिनीनां लावण्यमयीनां रतिसौन्दर्यतिरस्कारिणीनां प्रणयिनीना कश्चिदप्यभावो नावर्तत। ताभि: सह रतिविलाससुखनिमग्नोऽसौ सम्राड् दुष्यन्तो न पुन: शकुन्तलां मनसि चकार।

सहसैवैकामनन्यरूपलावण्यसमलङ्कृतां तेजसा दीप्यमानां यौवनसम्पत्सुशोभितामेकेन शस्त्रास्त्रसुसज्जितेन चतुर्दशवर्षदेशीयेन पराक्रमशालिना, ओजस्विना किशोरकेण सहितां तन्वीं तपस्विनीं समक्षं स्थितां विलोक्य स कुतूहलेन विस्मयेन च पराभिभूतो बभूव। स्मृतिपथमपि न समारूढा तस्य सा रजनी, यदा प्राणेभ्योऽप्यधिकं परमं स्नेहानुरागमाकर्षणं प्रदर्शयन्नसौ तस्या: यौवनेन सौन्दर्येण च सह चिक्रीड। अजानन्नसमरंश्चासौ सकलं पूर्वं घटनाचक्रं मृदुमधुरमन्दस्वरेण तां तपस्विनीमपृच्छत्-

"भद्रे ! का त्वं कस्माच्च कारणादत्र समायाता ? कतमो राजर्षिवंशो ब्रह्मर्षिवंशो वाऽनेन तेजस्विना किशोरकेणालङ्क्रियते? कश्चाश्रमो भवत्या स्वविरहेणौत्सुक्यनिर्भरो विहित:?"

असम्भावनीयानि कल्पनातीतानि कुलिशकठोराणि दुष्यन्तमुख-नि:सृतानीमानि वचनानि श्रुत्वैव सोढुमशक्यया वेदनया असह्यया लज्जया च पीड्यमाना शकुन्तला द्विधाविदीर्णधरागर्भप्रवेशमेवैच्छत्। सा मनसि

कदाचिदपि न सम्भावयति स्म, न च जानाति स्म, न चाप्याशङ्कते स्म, यदयं जनस्तथाविधस्नेहानुरागप्रदर्शयिता, तां प्राणेभ्योऽपि गरीयसीं मन्यमान एवंविधमाचरन्नभिज्ञानमपि निषेत्स्यति। तथापि मनोवृत्तिं संयम्य हृदयञ्च साहसेनापूर्य सा सुमृदुलवचसा जगाद–

"राजन् ! बहुतिथ: कालो व्यतीत:। सम्भवतोऽनेनैव कारणेन विस्मरणहेतुत्वाद् भवान् मां नाभिजानाति। यदियमेव वार्ता, भवन्तमहं प्रतिबोधये। प्रायश: चतुर्दशवर्षपूर्वं भवान् मृगयायै परिभ्रमन् हिमालयस्योपत्यकासु मालिनीसरितस्तीरेऽवस्थितं कुलपते: कण्वस्याश्रमं समायात:। आश्रमे भवतैका तपोवनवासिनी तापसकन्यका शकुन्तलाऽवलोकिता। मुग्धो भवानाग्रहातिशयेन तां कन्यकां गान्धर्वविवाहविधिना भार्यारूपेणाङ्गीचकार। प्रतिज्ञातञ्च भवता, सा भवतो महादेवी भविता, तत्प्रसूतिश्च युवराजपदमधिकृत्य राजसिंहासनाधिकारिणी भूत्वोत्तराधिकारिणी भविता। भवति परमविश्वासमादधाना सा तपोवनवासिनी कन्या स्वकीयं मन:, शरीरं, यौवनं, सौन्दर्यं सकलमेव भवते समर्पयामास।

अथ मालिन्यास्तीरे निशीथवेलायां कृष्णपक्षस्याष्टम्यां तिथौ शशिज्योत्स्नावितानान्तराले भवानित्थं प्रतिज्ञाय तस्या: सौन्दर्येण शरीरेण यथाभिलषितां रतिक्रीडां कृत्वा विलासानन्दानुपभुज्य तस्यां गर्भं निवेशितवान्। समुदितायामुषसि पूर्वस्यां दिशि मरीचिमालिमण्डलमुद्गतं वीक्ष्य सैन्यशिविरं प्रति भवान् निवृत्त:। प्रस्थानोद्यतो भवान् नवपरिणीताया उपभोगलज्जाभरविनमितवदनाया: प्रणयिन्या: दक्षिणकरमध्यमाङ्गुलिं स्वकराङ्गुलिभिराकृष्टेन निजनामाङ्कितेनैकेनाङ्गुलीयकेन समलङ्कृत्य कथितवान्–

"प्रिये ! अस्मिन्नङ्गुलीयकेऽङ्कितानि मे नामाक्षराणि प्रतिदिनमेकैकं गणय। समाप्तायां गणनायां तस्मिन्नेव दिवसेऽहं त्वां हस्तिनापुरं स्वगृहमानेतुमागमिष्यामि। चतुर्दशवर्षपर्यन्तं सा मुग्धा तपोवनवासिनी एकरजनिपरिचित प्रणयिनं प्रतीक्षमाणा तस्मिन् विश्वासमापन्ना गणनातीतमसंख्यवारं मुद्रिकाङ्कितानि नामाक्षराणि गणयामास। परन्तु तद्गणनमविधिसम्पादितमग्निहोत्रमिव निष्फलमवर्तत। वञ्चकोऽसौ विश्वासभञ्जकोऽसत्यवादी निष्ठुरो हृदयभावनाविमुख: प्रियतमो निर्विकल्पकसमाधिगतचित्तवृत्तिर्योगीवाऽद्यापि न निवर्तते।

सततं प्रतीक्षमाणा तस्य प्रणयिनी प्रणयक्रीडापरिणामरूपं सुतं प्रसूय तं तेजस्विनं बालकं पालयन्ती, पयोधरनिःसृतपयोरूपरुधिरपानेन पोषयन्ती सर्वविधशस्त्रास्त्रशास्त्राणि शिक्षयन्ती चतुर्दशवर्षं यावत् पितुराश्रय एव स्थिता। तदनन्तरं पितृगृहजनव्यङ्ग्योक्तिपीडिता पतिप्रेमपातिव्रतधर्मपरायणा पितुरादेशेन विवशीकृता निजेनानुरागेण च विमोहिता सुतं पुरस्सरं कृत्वा पतिगृहाय प्रस्थिता।

राजन् ! सैवाहं तपोवनवासिनी तापसकन्यका शकुन्तला। भवत्प्रणयविलासपरिणामोऽयं बालकः सर्वदमनो भवत एवापत्यम्। चतुर्दशवर्षावधिकं कालं प्रतीक्ष्याऽहं निरुपाया भवतः प्रणयस्य परिणयस्य प्रतिज्ञायाश्च स्मारयितुमत्र राजसभाभवनं समायाता। यदि च भवान् तस्याऽतिशयप्रणयस्य वा हृदयानुरागस्य वा न स्मरति, तथापि स्वकुलगौरवमनुचिन्त्य प्रतिज्ञायाश्च स्मृत्वा स्ववीर्यप्रसूतिमेनां सन्ततिमेव स्वीकरोतु। अतिशयपराक्रमी, शूरो, वीरः, शत्रुविनाशनविचक्षणः, परमौजस्वी, कृतविद्यो, दर्शनीयश्च भवतोऽयं सुतः नियतमेव सर्वगुणैर्युवराजपदयोग्यतां दधाति।"

शकुन्तलाया इमानि वचांसि समाकर्ण्य सर्व एव ते मालिनीतीरे कण्वतपोवने विलसिताः विलासास्तस्य दुष्यन्तस्य स्मृतिपथं समायाताः। तत्क्षणं तामभिज्ञायाऽप्यनुरागवात्सल्यसम्भृतहृदयोऽपि, सहसैव तौ मातृपुत्रौ सर्वजनसमक्षं परिचेतुमात्मीयत्वेन चाङ्गीकर्तुं स नोत्साहितो वा समर्थो वा बभूव। एकतस्तु सङ्कोचजनिता लज्जा, अपरतः प्रजास्वपयशोभीतिः, अन्यतश्च राजपदमदः, तेन चक्रवर्तिना सम्राजा, तपोवनवासिन्या तपस्विन्या सह परिचयसम्भावनाऽपि निराकृता। तां वराकीं तर्जयन्निवासौ बभाषे-

"हे तपस्विनि ! त्वं मया कस्मिन्नपि काले परिणीता, किमपि प्रतिज्ञाता, गान्धर्वविवाहविधिना स्वीकृता, रतिविलासक्रीडाभिरुपकृतेति कथमपि न मया स्मर्यते। त्वं तपस्विनी, ब्रह्मर्षिदुहिता, तपोवनेषु पालिता तपोवनवासिनी। अहञ्च राजवैभवभवनैश्वर्यभोगवान् सकलकुरुदेशाधिपतिश्चक्रवर्ती सम्राट्। कथन्त्वया सह मम सम्बन्धः। त्वया सह समागतोऽयं दीर्घवंशसमो बालको मम सन्ततिरिति कथं सम्भवति ? त्वमस्मात् स्थानाद् यथेष्टं गन्तुमर्हसि।"

दुष्यन्तस्य परमप्रणयिनः कुलिशकठोराणि हृदयवेधकानि वचनानीमानि

शकुन्तलायाः श्रोत्रयोः सन्तप्तरक्तद्रवीभूतमयःपिण्डमिव प्राच्यावयन्। लज्जादुःखोद्वेगपश्चात्तापादिभावास्तस्याः हृदयमुन्मथितुमारेभिरे। कतिपयक्षणं यावत् कोपकषायितलोचना प्रस्फुरिताधरा वेपमानकृशगात्रा सा तपोवनवासिनी हृदयमुन्मथ्नन्तमाकुञ्चन्तं व्यावर्तमानं सन्तापमिश्रं क्रोधावेगं संयम्य, तिर्यगवलोकनेन च राजानमुपकृत्य पुनः सगद्गदं निवेदयामास-

"हे राजन् ! मामभिजानन्नपि भवान् परिचयसम्भावनामपि कथं निराकरोति ? सामान्यजनानामिव भवतामेष व्यवहारो न समुचितः। लोके कीर्तितस्य महनीयस्य प्रथितयशसः पुरुवंशस्य भवान् प्रसूतिः। सदाचार एवास्य धर्मः। सत्यभाषणमेवास्य व्रतम्। देशस्य राजा, प्रजानां पालको, रक्षको, धर्मधुरीणानामग्रणीश्चापि यदि भवान् सदाचारं न पालयति, प्रतिज्ञां न रक्षति, धर्मं नाऽऽचरति, धर्मः कुत्र निवत्स्यति। धर्म एव मनुष्याणां सदा हितसाधकः। रक्षितो धर्म एव सकलान् रक्षति। अत एव मनुष्येण सदैव धर्मो रक्षणीयः। धर्मं कदापि न त्यजेत्।

राजन् ! सत्यमेव परमो धर्मः। प्रतिज्ञापालनं प्रथमं कर्तव्यम्। दशसु यमनियमेषु योगाङ्गेषु सत्यमेव प्रथमं स्थानं भजते। असत्यवादी जन आत्मानमेवाभिसन्धत्ते। आत्मवञ्चकस्तु पापतमो गण्यते। नैतादृशमन्यन् महत् पापम्। सत्यमेव परमं तपः, सत्यमेव परमं ब्रह्म। अतः सत्यं पालयता, प्रतिज्ञां रक्षता, धर्ममाचरता भवता स्वधर्मो रक्षणीयः, प्रतिज्ञा च पालनीया।

हे राजन् ! अग्निसाक्षिकां प्रतिज्ञां कृत्वाऽहं गान्धर्वविवाहविधिना भवता परिणीता। अहं भवतो धर्मपत्नी, सातत्येन धर्मकार्यसहायिका च वर्ते। भवतोऽहं भार्या भरणयोग्या, भवतोऽहं जाया निवेशितस्य गर्भस्य जनयित्री, प्रसवित्री। पत्न्याः साहाय्येनैव जनो लौकिकधर्मान् निर्वहति। धर्मे, अर्थे, कामे च पत्नी सदा पत्युः सहायिका भवति। सा सदा पत्युर्मनसोऽनुकूलं व्यवहरति। अत एव सा पत्नीपदवाच्या भवति। सा विपद्ग्रस्तमपि पतिमनुसरति। तस्य सदा सहायिका, सखी, सचिवो भवति। मरणेऽपि न तं जहाति। तमनुगच्छति। भर्तुः पूर्वं स्वर्गं वा गता तत्र तं प्रतीक्षते।

राजन् ! भार्या तु भर्तुः गृहस्य स्वामिनी गृहिणी भवति। सा गृहप्रबन्धिका गृहकार्याणि सम्पादयति, सुखसुविधाकरोपकरणानां प्रबन्धं कृत्वा मधुरमधुरैः संलापैः भर्तुर्मनो रञ्जयति। रतिसुखं प्रयच्छति। प्रसूतिं

प्रसूते। गृहे समागतान् अतिथीन् सत्कृत्यातिथियज्ञस्य साधिका भवति। अत एव जनाः मनोऽनुकूलां गृहिणीं भार्यां प्राप्तुं प्रयतन्ते। ये जना एतादृशीं गृहिणीं भार्यां प्राप्नुवन्ति, पुण्यशालिनस्तेऽस्मिंल्लोके परलोके च सदा सुखभाजो भवन्ति।

हे राजन् ! पत्न्यो भार्या एव पतिपदवाच्यान् जनान् सुखयन्ति, प्रीणयन्ति। अतः पतिः कदापि भार्यां न तिरस्कुर्यात्, नावहेलयेन्न च तामुपेक्षेत। सर्वेषु समयेषु प्रियां वाचं व्याहरन्तीं पत्नीं न कटुवचनैः पीडयेत्। पत्युः सुखं, स्नेहोऽनुराग, आनन्दो धर्मश्चेति सर्वे व्यवहाराः पत्न्यधीनाः भवन्ति।

हे राजन् ! पत्न्येव पत्युः कुलं रक्षति। सा जाया। जायायां गर्भं निवेश्य पतिः स्वयमेव पुत्ररूपो भूत्वा जायते। अत एव पुत्रस्तस्य आत्मा, पत्नी च जाया कथ्यते। सुतस्य प्रसूतिः सकलेभ्योऽपि परिवारजनेभ्यो मित्रेभ्यश्च परमानन्दहेतुः। सुतस्तु पुन्नाम्नो नरकात् पितरं त्रायते, अत एवासौ पुत्र इत्यभिधीयते।

राजन् ! सुतस्य संस्पर्शमवाप्य कस्य जनस्य चित्तमानन्दभरेण नान्दोल्यते ? स्वकार्याणि सम्पाद्य गृहमागतस्य कस्य पितुर्हृदयं द्वारदेशे बालजनोचितक्रीडारतं रजःसंलिप्तगात्रं द्वावेव करावुद्यम्य जनकक्रोडलालसमनिमित्तहासैर्लक्ष्यमाणदन्तमुकुलं सुदृढालिङ्गनेषु बद्ध्वा हर्षभरेण न सम्पूर्यते ? सुतनुभुजाभ्यां कण्ठमावेष्ट्य वक्षस्यालिङ्गितः सुतः जनकस्य हृदयं सन्तापकदर्थितमपि शीतलयितुं क्षमः। कुलनन्दनस्य सुतस्याव्यक्तवर्णवचांसि जनकस्य श्रोत्रे पीयूषद्रवेणेव निषिञ्चन्ति। न च सुखस्पर्शसुकोमलवसनानि, न च सुरभितमृदुसुमनांसि, न च सुयौवनसम्पन्नलावण्यवतीनां युवतीनां मदस्पर्शाः, न च तपर्तावतिसुशीतल-मलयजसलिलसंसर्गास्तथा सन्तापहारकाः सुखदायिनश्च यथा मृदुलकायस्य जीवनसर्वस्वभूतस्य सुतस्य संस्पर्शो भवति। पुत्रस्पर्शादधिकं सुखं न विद्यते क्वचिदप्यस्मिन् जगति। पुत्रस्तु पितुरङ्गादङ्गाज्जायते। स तु तस्य हृदयस्याविकलः खण्डः। स तु तस्यात्मनो रूपमास्थाय जायते।

राजन् ! मानवस्येदं कर्तव्यं, यत्पुत्रस्य पालनं कुर्यात्। पिपीलिकादयः क्षुद्रजन्तवोऽपि स्वसन्ततीः पालयन्ति। मानववंशीयोऽपि भूत्वा, आर्यावर्तस्य

चक्रवर्ती, कुरुजनपदस्य शासकोऽपि भवान् पौरवो न कथं पुत्रं पालयिष्यति?

राजन् ! मे पिता महर्षिः कण्वो मामाचचक्षे, यदयं बालकश्चक्रवर्ती सम्राड् भूत्वा देशमेनं प्रशासिष्यति। अप्रतिहतगतिरस्य स्यन्दनः सकलायां धरायामप्रतिबन्धं विचरिष्यति। निजेनैव पराक्रमेण शौर्येण वीर्येण शस्त्रसञ्चालननैपुण्येन राजनयकौशलेन बुद्धिसामर्थ्येन चायमश्वमेधयज्ञशतं यक्ष्यति। राजन् ! महर्षेः कण्वस्य वचः कदाप्यन्यथा न भवति। भवता तु स्वसुतो न तिरस्करणीयः। अङ्कमारोप्य भवानेनं यथार्हमभिनन्दयतु।

राजन् ! तपोवनवासिनी नारी स्वयमेव भवदन्तिकमागत्य याचिका भवतीति नाहं तिरस्करणीया। अस्यां राजसंसदि धर्मासनारूढो भवान् साधारणजनसदृशमसत्यभाषणन्न करोतु। यस्तु निरपराधां प्रणयपरवशां पातिव्रतधर्मैकरतां भार्यां प्रार्थिनीमपि परित्यजति, याचमानामपि जहाति, तस्मात्पापतरो न कोऽप्यन्यः। तादृशः पापनिरतो जनो न कुत्रापि कस्मिन्नपि समये शान्तिं समादरं यशो वा लभते।"

शकुन्तलायाः जल्पितानि हृदयविद्रावणानि कर्णयोः कृत्वाऽपि स दुष्यन्तः सदौर्जन्यं हसितुमारेभे। स प्रोवाच-

"हे तपोवनवासिनि ! का त्वमित्यहं न जाने। त्वमात्मानं शकुन्तलाभिधानां तपोवनवासिनीं कथयसि, वदसि च - मया त्वं मालिनीतीरे विजने गान्धर्वविवाहविधिना पाणौ गृहीता। प्रतिज्ञातञ्च त्वत्प्रसूतिर्युवराजपदमलङ्करिष्यति। परमिदं सकलमसत्यमवितथमविश्वसनीयञ्च वर्तते। तपोवननिवासपवित्रा जगद्वन्दनीयस्य महर्षेः कण्वस्य सुता केनापि दीर्घदण्डकायेन किशोरकेण सह राजसंसद्येकाकिनी समागत्य कथयति - अहं राज्ञो दुष्यन्तस्य भार्या, अयं किशोरकश्च राजकुमारः, कस्त्वां विश्वसिष्यति? सकलमेतत् खलु सत्यात् सुदूरमेव। न मया त्वं कदापि पुराऽवलोकिता।"

दुष्यन्तस्येदं प्रजल्पनमाकर्ण्य सुतप्तलोहद्रवनिःस्यन्दनिपीडितकर्णाया इव शकुन्तलायाः हृदये क्रोधवह्निः प्रजज्ज्वाल। तथापि कथमपि साऽऽत्मानं संयम्यौष्ठयोः स्मितमानीय पुनस्तं भूपालं बभाषे-

"राजन् ! साम्प्रतमपि यदि भवान् मां नाभिजानाति, किञ्चिद् विस्तरेणाहमात्मानं परिचाययामि। देवाङ्गनास्वप्सरःसु षडप्सरसः प्रशस्यतमाः

गण्यन्ते उर्वशी, पूर्वचित्तिः, सजन्या, मेनका, घृताची, विश्वाची च। तत्रोर्वशी भवतः पूर्वजेन पुरुरवसा परिणीता। तया आयुर्नाम कुलदीपकः पुत्रः प्रसूतः। स च भवद्वंशे परमप्रतापी राजा बभूव। अपि चाप्सरःसु मेनका स्वरूपलावण्यशीलादिगुणैः प्रशंसनीया गण्यते।

विश्वामित्रो नाम मुनिः सकलजगद्वन्दनीयः सुप्रथितयशाः गाधिकुले जातः। राजसिंहासनारूढोऽपि स राजर्षिर्वसिष्ठाद् द्वन्द्वयुद्धे पराजयमवाप्य सुकठोरं तपस्तप्त्वा क्षत्रियभावं परित्यज्य ब्राह्मणत्वमवाप्य ब्रह्मर्षिपदविभूषितो बभूव। तेनैव विश्वामित्रेणाहं नडपितवने देवाङ्गनायाः मेनकायाः गर्भे निहिता। प्रसवोत्तरमेवाचिरान्मां सा मेनका विश्वामित्रस्य महर्षेरङ्के निधायामरावतीं गता। मम पिता विश्वामित्रोऽपि मां हिमालयस्योपत्यकासु परित्यज्य तपोभङ्गलज्जितः सुकठोरतपःसाधनायै गहनान्यरण्यानि प्राविशत्। तदनन्तरं शकुन्तैः(पक्षिभिः) पालिता रक्षिता चाऽहं शकुन्तलेति नाम्ना प्रथिता। वने निपतितां क्रन्दनेन सकलमेव वनप्रदेशं निनादयन्तीं करुणावशंवदो महर्षिः कण्वस्तपोवनं मामानिनाय। तेनाहं संरक्षिता, पालिता, पोषिता, सर्वविधविद्याध्यापनेन च योग्या विहिता। पितृस्नेहसम्भृतहृदयोऽसावेव पालनधर्मेण मम पिता।

हे राजन्! मयि युवावस्थायां सङ्गतायां भवानेकस्मिन् दिवसे मृगयायै पर्यटन् कण्वाश्रमं प्राप्तः। तत्र निजेनैव दौर्भाग्येनाहं भवद्दृष्टिपथमायाता। त्रिभुवनविमोहनकरं मम सौन्दर्यं परिलक्ष्य मुग्धोऽसंयमितेन्द्रियो भवान् मां प्रार्थयामास। अहमपि भवन्तमतिरूपसौन्दर्यपराक्रमशालिनमवलोक्य मोहाच्छन्ना भवन्तमेव कामयमाना अभूवम्। तत्रैवाश्रमप्रान्ते मालिनीतीरे निशीथे भवान् वैश्वानरं साक्षीकृत्य गान्धर्वविवाहविधिना मम पाणिञ्जग्राह। अनसूया, मम सखी बालमित्रं तस्मिन् काले तत्रैवाऽवर्तत। भवता तस्मिन्नवसरे प्रतिश्रुतम् - "संयोगस्यैतस्य फलं शकुन्तलाप्रसूतिः युवराजपदमलङ्कृत्य ममोत्तराधिकारी भविष्यति"।

तदनन्तरं गतायामनसूयायां विजने मालिनीतीरवर्तिसुचिक्कणशिला-फलके मम रूपयौवनसंसर्गसुखान्युपभुज्य दक्षिणकरमध्यमाङ्गुल्याञ्च स्वनामाङ्कितमङ्गुलीयकं परिधाय भवान् स्वराजधानीं हस्तिनापुरीं निवर्तितुकामो नवपरिणयनानन्तरमेव विरहजन्यदुःखकातरभावमापन्नां मां

प्रतिबोधयन्नचकथत्-

अङ्गुलीयकाङ्कितानि नामाक्षराणि प्रतिदिनमेकैकं गणनीयानि। समापितायां तु गणनायां तस्मिन्नेव दिवसेऽहं त्वामानेतुमागमिष्यामि।

परं भवतस्तत्सर्वा स्नेहानुरञ्जना किं क्षणिका वासनैवासीत् ? निश्चयेन भवान् मामतिसन्धातुं छलितुं वञ्चयितुमेव तथाऽनुरागं निजकामवासनातृप्त्यै प्रादर्शयत्तानि च वचनानि प्रददात् तथा च प्रत्यजानात्। चतुर्दशवर्षावधिप्रतीक्षणं विधायाऽहं स्वयमेव भवतः प्रतिज्ञायाः संस्मारयितुं स्वाधिकारांश्चाधिगन्तुं भवतश्च सुतं भवते समर्पयितुमत्र समायाताऽस्मि।"

शकुन्तलाया इमानि सुदृढमुच्चरितानि विश्वासोत्पादकानि वचनानि श्रुत्वाऽपि स वञ्चको दुष्यन्तः पुनः परमदौर्जन्येन साट्टहासं जहास। हसन्तं तमवलोक्य सर्वेऽपि राजसंसद्युपस्थिताः राजसभासदो हसितुमारेभिरे। तेषां तथाभूतेनोपहासेन स्वात्मन्यतिशयमपमानमनुभवन्त्यपि शकुन्तला, महता प्रयासेन कथमपि मनः सन्नियम्य सक्षोभमिदमूचे -

"हे राजन् ! दुष्यन्त ! जानाति भवान् - मया विजने प्रदेशेऽस्यास्तपस्विन्याः वपुषो रूपयौवनोपभोगो विहितो, रतिविलासक्रीडाभिश्च क्रीडितम् ? न चास्य कृत्यस्य पापस्य मे कश्चिदपि साक्षी ? परं न भवता तथा चिन्तनीयम्। पापकर्म कृत्वा न कोऽपि जनो विधिना प्रमुच्यते। स तु तस्य फलं ध्रुवं भुङ्क्ते। व्योम्नि भासमानो ज्योत्स्नया सकलमेव लोकमाप्लावमानो रजनीपतिः, मन्दं मन्दं प्रवहन् सुरभिरजसां वाहकः सुरभितः शीतलः पवनो, मालिन्याः शीतला जलधारा, त्वयाधिष्ठितं मालिनीतीरं, सर्वेऽपि भवतः कृत्यस्य साक्षिणः। भवतो मनो वा हृदयं वा आत्मा वा भवतः कृत्यस्य साक्षी। हे दुष्यन्त ! स्मरणीयमिदं भवता सर्वदा।

सर्वेषु कालेषु मनुष्याणां हृदयेषु यमो देवता निवसति। स तस्य सर्वेषामेव सुकृतानां दुष्कृतानां वा कर्मणां साक्षी। स दुष्कर्मकारिणो जनान् दण्डयति। ये जनाः पापकर्मनिरता अनाचारं व्यवहरन्ति, देवतास्तेषां कदापि कल्याणं न कुर्वन्ति, तान् दण्डयन्ति।

हे दुष्यन्त ! भवानिदमेव जानाति किं, यदेतत्पापकर्म कृत्वाऽहं सदा सुरक्षितो भविष्यामि ? अहं सर्वशक्तिसम्पन्नः सर्वविधैश्वर्यसमायुक्तश्चक्रवर्ती सम्राडस्मि ? न कोऽपि मामपकर्तुं समर्थः ? भवच्चिन्तनमिदमनुचितं

निरुपयोगि च। स्मरतु विचारयतु च भवान्।

दिव्यरुधिरजातायां मयि दिव्या शक्तिः। यदि भवान् याचमानायाः सविनयं प्रार्थयमानाया अपि मम याचनां प्रार्थनां वा नाङ्गीकरिष्यति, मम दृष्टिमात्रेण, सङ्केतमात्रेणैव च भवच्छिरः खण्डशो धरायां निपतेत्। मयीयं दिव्या शक्तिर्नूनं वर्तते।

तथापि मया भवान् भर्तृरूपेण स्वीकृतः। भवतोऽनिष्टकामना न मया कदापि करणीया। परमहमाजन्मनो भाग्यहीना। धरायामवतीर्णां मां सद्योजातां पितुरङ्के निधाय मम जननी देवनगरीं गता। जनकोऽपि मां हिंस्रमांसलोलुपश्वापदावृते गहनेऽरण्ये सघनस्यैकस्य पादपस्याधस्तादुत्सृज्य गतः। शैशवे न मया मातुः स्तन्यं पीतं, न च जनकस्याङ्कोपलालनमधिगतम्। सम्प्रत्यपि मे पालको धर्मपिता कण्वस्तपोवनान्मां प्रस्थाप्य वञ्चकस्यापि भवतोऽन्तिकमागन्तुं बाधिताञ्चकार।

अहो, इदानीं भवान् मम पतिः, मम भर्ता, मम पाणिग्रहीता, मम स्वामी, मम प्रभुः, मम प्रियतमो, मम रमणोऽपि मां परित्यजति। भवतु। भवता परित्यक्ताऽहं क्वचिदप्यविज्ञातं विजनं वनं तपश्चर्यायै गमिष्यामि। तपःसाधनायामेव स्वजीवनयात्रां पूरयिष्यामि। परमस्य बालकस्य कोऽपराधः ? को दोषः ? भवद्वीर्यप्रसूतिरेवायं भवदात्मजः। भवता स्वसुतः स्वीकरणीयः।

शकुन्तलाया एतेषामपि करुणार्द्राणां वचसां न कोऽपि प्रभावो दुष्यन्तस्य मनस्यलक्ष्यत। उपहसन्नसौ तामुवाच-

"हे तपोवनवासिनि ! व्यर्थाभिरेताभिरसत्यकथाभिर्न मां त्वं वञ्चयितुं समर्था। त्वं प्रलपसि- यन्मया त्वं चतुर्दशवर्षपूर्वं मालिनीतीरे विजने गान्धर्वविवाहविधिना परिणीता। यदि किञ्चित् प्रमाणं ते वर्तते, दर्शय तावदेतत्। अन्यथा त्वं मिथ्याभाषिणी वर्तसे। अहं तव दक्षिणकरमध्यमाङ्गुल्यां तदङ्गुलीयकमपि नैव पश्यामि, यन्मया तव कथनानुसारं तुभ्यमुपहृतम्, यस्य च नामाक्षराणि त्वया, चतुर्दशवर्षावधिपर्यन्तं गणितानि।"

"राजन् ! यदि तदङ्गुलीयकमेव प्रमाणं, तच्च प्रेक्ष्यैव भवान् मयि विश्वसिष्यति, दर्शयामि तावदेतत्।" इति कथयित्वा शकुन्तलया स्वकीया दक्षिणकरमध्यमाङ्गुलिरुन्नामिता। परन्तु कुत्र तदङ्गुलीयकमवर्तत ? सर्वसमर्थोऽप्रतिकरणीयो बलवान् विधिस्त्वन्यामेव क्रीडां प्रदर्शयन्नासीत्।

तदङ्गुलीयकं प्रातरेव शचीतीर्थे गङ्गामवगाहमानाया: शकुन्तलाया अङ्गुलित: प्रभ्रश्य जलप्रवाहे परिभ्रष्टम्। अङ्गुलीयकविरहिताङ्गुल्यवलोकनेन वराकी सा तपोवनवासिनी सर्वदमनजननी शकुन्तला जडीभूतेव, निस्तब्धेव, निश्चलेव, नि:स्पन्देव तिरोहितसकलेन्द्रियव्यापारा शून्यमेवावालोकयत्। दुष्यन्तस्य दौर्जन्यसम्भृतं, क्रूरं, नृशंसं स्मितं राजसभासदाञ्च निर्निमेषास्तिर्यग्दृष्टयस्तस्या अङ्गानि सकलान्यपि निशितप्रासाणिविद्धानीव पीडितानि चक्रिरे। ता: सूचयन्ति स्म–

"हे मिथ्यावादिनि ! तपस्विनि ! वञ्चनशीले ! किमियमेव तव सत्यवादिता ? यदि त्वं सत्यपरायणा धर्मचारिणी वर्तसे, कुत्र तदङ्गुलीयकं, यत्तुभ्यं राज्ञा दुष्यन्तेनोपहारीकृतं, तव मध्यमाङ्गुल्याञ्च परिधापितम्। त्वं दुराचारिणी, व्यभिचारिणी, स्वेच्छाचारिणी, तपोवनवासिनी न जाने केन व्यभिचारेण जातमेनं बालकं गृहीत्वाऽत्रैनं धर्मपरायणं प्रजापालकं राजानं वञ्चयितुं दूषयितुञ्च समायाता।"

कतिपयक्षणं यावच्छकुन्तला निस्तब्धेव कथमप्युच्छलदुत्प्लवमानं हृदयं द्वाभ्यामेव कराभ्यां निपीड्य प्रोवाच–

"हे राजन् ! अत्राऽपि विधिना दौर्भाग्येण च दर्शितमेव स्वप्रभुत्वम्। सम्भवतस्तदङ्गुलीयकं हस्तिनापुरमार्गे शक्रावतारतीर्थे भागीरथीमवगाहमानायामेव मयि जलप्रवाहे प्रभ्रष्टम्।"

परन्तु शकुन्तलाया: कथनमेतन्निशम्य सर्वेऽपि सभासदस्तामसत्यभाषिणीं छलकारिणीं वञ्चिकां व्यभिचारिणीञ्च मन्यसाना: सोच्चै: साट्टहासं जहसु:। तदा दुष्यन्त: प्रोवाच–

"हे तपस्विनि ! त्वमत्र यदेवमसत्यमनर्गलञ्च प्रलपसि, तदहं त्वां क्षमे। स्त्रियस्तु स्वभावत एव प्रवञ्चनशीला: प्रतारणकुशला: मिथ्याभाषिण्यश्च भवन्ति। अहं त्वां विजने मालिनीतीरे निशीथे परिव्यवोढम्, प्रस्थानावसरे च निजनामाङ्कितेनाङ्गुलीयकेन तव दक्षिणकरमध्यमकरशाखामलङ्कृतवान्, इति विवाहस्य प्रमाणभूतं तदङ्गुलीयकं कुत्र वर्तते ? यस्या: नामाक्षराणि गणयन्त्या त्वया चतुर्दशवर्षावधिर्यापित:, या च तवाङ्गुल्यामेतदवधिपर्यन्तं सुरक्षिता बभूव, सा मुद्रिका स्नानावसरे गङ्गासलिलप्रवाहे, प्रभ्रष्टा, इति तवासत्यभाषणे को विश्वसिष्यति ? सर्व एव जनास्त्वां मिथ्याभाषिणीं

वञ्चिकाञ्च गणयिष्यन्ति।

त्वमात्मानं धर्मपरायणां पतिव्रताञ्च धर्मपत्नीमुद्घोषयसि। परं तव कुले कदाचिदपि काऽपि पतिव्रता धर्मपरायणा बभूव ? त्वं देवाङ्गनाया अप्सरसो मेनकायाः सुता। सा तु विश्वविख्याता पुंश्चली। देवानां मनोरञ्जनं, देवराजस्य च वासवस्यादेशेन मुनीनामृषीणां तपस्विनाञ्च तपोभञ्जनमेव तस्याः सततमितिकर्तव्यता। सुप्रथितयशसं तपोधनं विश्वामित्रं निजकलेवररूपलावण्ययौवनसुशोभमानैरङ्गैर्विकृतचेष्टाभिश्च प्रलोभ्य मोहयित्वा छलयित्वा च सा तस्य तपसो भङ्गं विधाय त्वां निजगर्भनिविष्टाञ्चकार।

स्वेच्छाचारिणी पुंश्चलीव सा सद्योजातामेव त्वां निजगर्भप्रसूतिं मातृममत्ववात्सल्यविहीना हिमालयोपत्यकावर्तिगहनारण्येषु मृदुमांस-लोलुपश्वापदसमाकीर्णेषु निराधारां परित्यज्य स्वर्गीयदिव्यानन्दानुपभोक्तुं प्रस्थिता। किं काऽपि धर्मे रता वात्सल्यम्भरी गौरवमयी जननी एवंविधं जघन्यं दुष्कृत्यं कर्तुं समर्था, या स्वाङ्गेभ्यो जातां रुधिरेण पोषितां सन्ततिं पिशितग्रसनरसिकैर्जन्तुभिराकीर्णेषु वनेषु तेषामेवाऽऽहारीकृत्य परित्यज्य विषयविलाससुखान्युपभोक्तुं गमनमप्यभिलषेत् ?

अपि च, त्वमात्मानं महर्षेर्विश्वामित्रस्य सुतां गणयसि। किमर्थं त्वया सोऽपि महर्षिरपयशोभाजनं क्रियते ? तस्य तपसो, ब्रह्मचर्यस्य च गौरवं जगति प्रथितम्। अथ च सोऽपि किमात्मानं तव पितरं जानाति ? त्वयैव सूचितम् यदसौ सद्योजातामेव जनन्या परित्यक्तामेव त्वां तत्रैव पादपस्याधो निधाय, सुदूरं गहनारण्येषु तपस्तपनाय प्रस्थितः। सम्प्रति च येन महर्षिणा, कुलपतिना कण्वमहोदयेन त्वं पालिता, पोषिता, शिक्षिता, यं त्वं स्वपितरं मन्यसे, निजाचरणैस्तमेवाकीर्तिभाजनं विधातुं कथमुत्सहसे ?

हे तापसि ! कामिन्यः स्वभावादेव कामक्रोधादिविकारवत्यो भवन्ति। तदायत्तास्ताः सर्वदा दुराचरणक्रीडाभिः पुरुषाणां हृदयैः सह कन्दुकक्रीडां कुर्वन्ति। दुराचरणन्तु ता अन्यैः पुरुषैः कुर्वन्ति, परमेतत् कृत्यमन्येषु पुरुषेष्वारोपयन्ति। प्रणयगर्भितैः स्नेहिलशरकटाक्षैरन्यान् पुरुषान् व्रणयन्ति, प्रणयरतिक्रीडाभिश्चान्यान् पुरुषान् कृतार्थयन्ति। सन्ततिञ्चाप्यपरपुरुषसंयोगेन जनयन्ति, ताञ्चान्यपुरुषस्यैव प्रचारयन्ति।

सम्मुखस्थितमेनं सर्वदमनं नाम किशोरकं त्वं मम सुतं वदसि, चतुर्दशवर्षदेशीयञ्च कथयसि। एनमेतादृशवयोऽवस्थं को वक्तुं शक्त: ? विशालकायोऽयं ते सुतोऽधिकतरं बलशाली प्रतीयते। एतावता स्वल्पेनैव वयसाऽयं सालपादप इव कथमेतावतीमुत्तुङ्गतामवाप्त:। नूनमयमधिकवया:, परं लोमविहीनवदनो वर्तते।

हे दुष्टे तपस्विनि ! यदि त्वं किञ्चिदपि धनं वाञ्छसि, पट्टवसनानीच्छसि, मणिजटितान्यलङ्करणान्यभिलषसि, तानि तुभ्यमहं ददामि। तान्यादाय त्वमित: प्रयाहि। न त्वामहं सम्प्रत्यत्र स्थितां द्रष्टुमपि पारयामि।"

सम्राजो दुष्यन्तस्येमानि तिरस्कृतिवचनानि निशम्य शकुन्तला स्वकोपावेगमवरोद्धुं न पारयामास। रोषारुणायितलोचनाया: प्रस्फुरिताधरायास्तस्या: सकलैव देहयष्टि: रक्तकुसुमधारिणी पवनविकम्पिता वल्लरीव प्राकम्पत। तीक्ष्णस्वरेण सा जगाद-

"हे दुष्यन्त ! सर्षपसदृशमतिलघुदोषमपि त्वं मम पश्यसि, गिरिसदृशञ्च महान्तमात्मनो दोषं नावलोकयसि। त्वमात्मानं महति गौरवास्पदे क्षत्रियकुले जातं मन्यसे। अस्य कुरुजनपदस्य महान् शासकोऽहमिति मत्वा विचारयसि, यदियं मातृपितृविहीनाऽनाथाऽशरणा तपस्विनी किं मे विप्रकर्तुं समर्था ? एवमेव मन्यमानस्त्वं मामय:कीलकैरिव तिरस्करणवचनै: कीलयसि। परं मम सामर्थ्यमजानतैव त्वयेदृशमाचरणं विधीयते। न काचिदपि समता तव च मम सामर्थ्ययो:। अप्सर:सु श्रेष्ठा प्रशस्यतमा मम जननी मेनका यम-वरुणा-ऽग्नि-पवन-कुबेरादिभिर्महनीयैर्देवै: पूज्यते। देवराजो वासवोऽपि मम मातुश्चरणसेवां कृत्वाऽऽत्मानं धन्यतमं कृतकृत्यञ्च मन्यते। मातु: प्रभावेणाऽहं पृथिव्यां दिव्यन्तरिक्षे च सर्वत्र भ्रमणे समर्था, परं तव गतिस्तु पृथिवीलोक एव सीमिता।

हे दुष्यन्त ! त्वया मम जननी पुंश्चली व्यभिचारिणी वेति गण्यते, यत: सा देवाङ्गनासु श्रेष्ठा। परन्तु किं त्वं निजवंशीयानां नरपतीनां पूर्वजानां वृत्तान्तान्न जानासि ? तव पूर्वज आयुर्नामा नरपतिरप्सरस उर्वश्या एव गर्भाज्जात:। तदप्सरस: शोणितमधुनाऽपि रुधिरवाहिनीषु ते प्रवहति। अनेनैव त्वं जीवसि, वंशस्य प्रतिष्ठाञ्च वहसि।

हे नरराज ! यावत्कश्चिज्जन: निजं वदनं दर्पणे न पश्यति, तावदात्मानं

स सुरूपतमं मन्यते। दृष्टे च निजमुखप्रतिबिम्बे दर्पणे तस्य स रूपमदस्तत्क्षणमेव विलीनो जायते। तथैव तवेयमवस्था। वपुषा त्वं यथा सुन्दर आकर्षको मोहकश्च दरीदृश्यसे, अन्तःकरणेन तथैव कुरूपः, कुत्सितो, बीभत्सश्च विद्यसे।

हे अनार्य ! आर्यमर्यादाधर्मपरित्यागकारिभ्यो जनेभ्यः सततं भेतव्यम्। विषगर्भदन्ताः कृष्णसर्पा इव भयानकाः विनाशकाश्च ते यमदूतरूपा एव। कुत्सितवृत्तिजनाः पुरुषाः स्वभावत एव परनिन्दकाः भवन्ति। दुर्जनाः परनिन्दां कृत्वा परेषाञ्च निन्दां श्रुत्वा प्रसीदन्ति। परेषां प्रशंसावचनानि तेषां हृदयानि ईर्ष्ययेव क्रोधेनेवासूययेव विदग्धानि कुर्वन्ति। परं साधवो जनाः परेषां गुणानां प्रशंसामाकर्ण्य प्रसीदन्ति, परनिन्दाञ्च न ते श्रोतुं पारयन्ति।

हे दुष्यन्त ! त्वमस्य देशस्य शासकः, सम्राट्, प्रजापालको राजा वर्तसे। त्वया तु सततमेव धर्मस्य, सत्यस्य च रक्षणं विधेयम्। परन्तु त्वया दुष्कर्मभिः राजपदमपि कलङ्कितम्। यो जनः शास्त्रविधिं परिपालयन् स्वकीयां प्राणेभ्योऽपि गरीयसीं प्रियतमां परिणीय, निजां पत्नीं भार्यां परित्यजति, धर्मशीलाः जनास्तस्य नामग्रहणमपि पापमाचक्षते। यो जनः परिणीतायां पत्न्यां जातं सुतं नाभिनन्दति, तिरस्करोति, देवतास्तस्य सम्पदोऽपहरन्ति।

शास्त्रेषु पुत्रः कुलदीपको वंशप्रतिष्ठा च प्रतिपादितः। शैशवेऽसौ शिशुसुलभक्रीडाभिः पितरावानन्दयति, यौवनं प्राप्य पितुः कार्येषु सहायको भवति, तदनन्तरमुत्तराधिकारं भजते। वंशपरम्परां संरक्ष्यासौ पितरं पुन्नाम्नो नरकात् त्रायते। स्ववीर्यप्रसूतं परिणीतायां पत्न्यां सञ्जातं सुतं तिरस्कृत्य, हे दुष्यन्त ! त्वया सत्यधर्मस्य लोकपरम्पराणाञ्चाऽवहेलना विहिता। नूनं त्वं सुखं नाधिगमिष्यसि !

धर्मसञ्चुकं परिधाय, धर्मासने विराजमानेनापि त्वया, हे अनार्य ! धर्मस्य परित्यागः कृतः। ऐश्वर्यमदविभ्रष्टबुद्धिस्त्वं मदोन्मत्तः सञ्जातः। ध्रुवं त्वं शोभनीयासनाच्छन्नकूपसमः। यस्तत्रोपविशति, कूपे निपत्यासंशयं विनश्यति।

हे मूर्ख ! मे पराक्रमं शौर्यं शस्त्रसञ्चालनदाक्ष्यं चाऽजानन् मामबलां मृदुकायामनाथिनीञ्च मन्यमानस्त्वमीदृशमसत्याचरणरूपं साहसं कुरुषे। परन्तु ममेच्छयैव, मे सङ्केतेनैव तवेदं राजमुकुटसुशोभितं शिरः शतशः

खण्डेषु विभज्य धरायां निपतेत्। तवेयं मिथ्याभाषिणी जिह्वा मुखाद् विच्छिद्येत, तवैष विशालो राजप्रासादः सभाभवनसहितो धूलिसाद् भवेत्। तव सर्वस्वं समृद्धिरैश्वर्यं राज्यञ्च ममैकेन सङ्केतेन त्वत्तोऽपगच्छेत्। परन्तु मया त्वं पतिरूपेणाङ्गीकृतः। पातिव्रतधर्मपालिनी नाऽहं तवानिष्टं कामये। त्वया तु भार्यां जायां प्रति स्वकर्तव्यपालनं परित्यक्तं, परं नाऽहं स्वपातिव्रतधर्मं त्यक्ष्यामि।

हे धूर्त ! अहं स्वसुतस्य राजसिंहासनारोहणलोभेनेहागता इत्येव त्वं मन्यसे। परन्तु तथा न। नाऽहं तथा तुच्छहृदया पदैश्वर्यलोलुपा च। नाऽहं ते कृपां दयां वा मनागप्याकाङ्क्षामि। अयं बालकोऽतुलनीयं वीर्यं सामर्थ्यं बलं साहसं राजनयं च बिभर्ति। देवतानां वरप्रभावेणायं सम्राजामपि सम्राट् भविता। अयं चक्रवर्तिनामपि चक्रवती वर्तिष्यते। महर्षिणा कुलपतिना कण्वेनाऽऽशीर्भिरयं सौभाग्यशालितां प्रापितः। रत्नगर्भायाश्चतुरुदधिमेखलायाः धरायाः सर्वे राजानश्चतसृभ्यो दिग्भ्य आगत्याऽऽगत्याऽस्य चरणरजोभिः निजोत्तमाङ्गानि पावयिष्यन्ति। अथ च ते निजचूडारत्नांशुभिरस्य पादाङ्गुलिरन्ध्रभागाननुरञ्जयिष्यन्ति। करतलयोः, पादतलयोश्चायं चक्रवर्तिरेखाभिरङ्कितः। अयं मे सुतस्तव कृपया वा, दयया वा, अनुकम्पया वा, प्रसादेन वा, अनुग्रहेण वा न राजसिंहासनमलङ्करिष्यति, अपितु निजपराक्रमेण, बलेन, शौर्येण, बुद्ध्या, नयेन च सकलां धरित्रीं विजित्य चक्रवर्ती सम्राड् भविता। त्वां विनाऽप्ययं मत्तः समुचितां शिक्षामधिगम्य सप्तसागरपरिवेष्टितां धरां पालयिष्यति। अस्य रथोऽप्रतिहतगतिस्त्रिषु भुवनेषु विचरिष्यति।

ऐश्वर्यमदमदोन्मत्त ! हे मिथ्याभाषिन् ! कुलपतेः कण्वस्य विश्वविद्यालयस्याचार्यैरयं सर्वदमनः शस्त्रेषु शास्त्रेषु च शिक्षितः। मया सकला एव विद्याः स्वयमधीत्य शस्त्रविद्याञ्चाऽभ्यस्यायं सकलविद्यावदातः शस्त्रसञ्चालननिपुणश्च विहितः। अस्मिन् राजसभाभवने सर्वेषामेव सभासदां समक्षं, ये च तव मौर्ख्यजाड्यधौर्त्यादिगुणपरिपूर्णोपहासे त्वया सह मामुपहसन्ति, अहं सशपथं प्रतिजाने, यदेकस्मिन् दिवसेऽयं मे सुतः सर्वदमनः शस्त्रप्रयोगैस्त्वां विजित्य रज्जुभिर्बद्ध्वा मम चरणयोर्निपातयिष्यति। देवा एव मेऽस्याः प्रतिज्ञायाः साक्षिणो भवन्तु।

हे अनार्य ! त्वं मामेकां विवशां निर्बलामनाथां निर्धनां तपस्विनीमेव गणयसि ? परं मम सामर्थ्यं शक्तिः प्रभावो वा न ते विदितः अत एव त्वं मां तिरस्कर्तुमुत्सहसे। त्वया तिरस्कृताऽहं स्वपुत्रेण सार्द्धमसंशयमेवेतो गमिष्यामि ! परं प्रस्थानात् पूर्वं त्वया मे सामर्थ्यं शस्त्रविद्याचमत्कृतिश्चावश्यमेव साक्षात्करणीया।

एवमुक्त्वा रोषेणावेगेन च कम्पमानतनुकाययष्टिः शकुन्तला त्वरितगत्या सर्वदमनस्कन्धाद् धनुरादाय, तूणीराच्चैकं निशिताग्रं नाराचं निष्कास्य, धनुषि संयोज्य, आकर्णान्तं प्रत्यञ्चामाकृष्य, राज्ञो दुष्यन्तस्य मस्तकं लक्ष्यं विधाय, तं नाराचं प्रचिक्षेप। केनाप्यलक्षितवेगः स नाराचो राज्ञः शिरसि निहितं रत्नजटितं स्वर्णमयं समुज्ज्वलत्प्रभाभास्करं किरीटमादाय वेद्याः पृष्ठभागे विद्यमानं द्वारमतिलंघ्य न जाने कुत्रोत्पतितः, क्षणमात्रेणैव च नयनागोचरः सञ्जातः। सकला एव घटना निमिषमात्रेण घटिता। कोऽपि जनो लक्षयितुमपि न शशाक, कदा सा तपस्विनी धनुः शरञ्च हस्ते जग्राह, कदा शरसन्धानमकरोत्, कदा च प्रत्यञ्चामाकृष्य शरं चिक्षेप। दुष्यन्तेन सहिता सकला एव राजसभा चित्रलिखितेवावर्तत। विस्मयेन, कुतूहलेन, आतङ्केन, भयेन च न कोऽपि जनः शब्दमेकमप्युच्चारयितुं समर्थोऽभवत्।

सर्वानेव राजसभासदो राजानञ्चैतस्यामेव विमूढावस्थायां परित्यज्य सा वीराङ्गना स्वाभिमानिनी नारी शकुन्तला,सर्वदमनस्य वामं करं गृहीत्वा बलादेवाकर्षन्ती त्वरितगत्या सभाभवनान्निर्गता।

शकुन्तलागमनानन्तरं व्यतीतेषु कतिपयेषु क्षणेषु निस्तब्धगात्रेन्द्रियाणां सर्वेषामेव राजभवनस्थितानां जनानां चैतन्यं प्रतिनिवृत्तमिव, प्रतिबुद्धमिव। विहतवदनप्रभास्ते सभासदः प्रश्नसूचकदृष्ट्या महाराजं दुष्यन्तं ददृशुः। कतिपयक्षणं यावदसौ दुष्यन्तो मुकुटविरहिते शिरसि दक्षिणं करं विन्यस्य राजसिंहासनमधिष्ठितः किमपि चिन्तयामास। तदनन्तरं शकुन्तलाविषयकं किमप्यनादिश्य सभाञ्च विसर्ज्याऽसौ गहनविचारनिमग्नोऽन्तःपुराय प्रतस्थे।

(१९)

सभाभवनाद् गतायां शकुन्तलायां पञ्चदशदिवसानामवधिर्व्यतीतः। परन्तु दुष्यन्तो मनसि क्षणमात्रमपि शान्तिं वा प्रसादं वा न लेभे। शकुन्तलासम्बन्धिनी घटना तस्य हृदयं गभीरमाजघान। असौ राजसंसदि तां

प्रियामतिशयेनापमानिताञ्चकार। तामर्धचन्द्रमिव दत्त्वा निस्सारयामास। परं सम्प्रति तस्यान्तःकरणं स्वयमेवात्मानं धिक्करोति स्म। शकुन्तलां विजने परिणीय, तत्सङ्गत्यां रतिसुखविलासाननुभूय, बहुविधं प्रतिज्ञाय, हस्तिनापुरमानेतुं प्रतिश्रुत्यासौ तस्याः कुशलसमाचारावगमनेच्छुकोऽपि न बभूव। स्वयं समायाताया अपि तस्या अभिज्ञानमपि निसिषेध।

बहुपत्नीकस्य दुष्यन्तस्यान्तःपुरं बह्वीभिर्नवयौवनशालिनीभिर्लावण्यमयीभिः सुन्दरीभिर्विलसितवर्तत। बहुकालपर्यन्तं यौवनसुलभविविधरतिक्रीडा-विलासानन्दाननुभवन्तमपि तं काऽप्यन्तःपुरिका सुतलालनोल्लासेन न कृतार्थयामास। परमियं शकुन्तला यं कुलवर्धनं सुतमादाय राजसभाभवनं समुपस्थिता, स तु पुरुवंशीय एवाऽऽसीत्। तद्वीर्यप्रसूतिश्चाभवत् तदात्मजः। तस्य वदनेऽन्येषु च गात्रेषु दुष्यन्तस्याकृतिः सङ्क्रान्तेव परिलक्ष्यते स्म। दुष्यन्तस्यैव प्रतिमूर्तिं दधानः, वदने महौजसा, भुजयोश्च बलेनातुलनीयेन, पराक्रमेण च शोभमानोऽसौ प्रतीयते स्म। कैशोरवयस्येव महत्तेजोऽपरिमितं बलं सुपुष्टं सुघटितं च वपुः दधानं तं, तिरस्कृतमपि निष्कासितमपि सुतमालिङ्गननिबद्धं विधातुं दुष्यन्तस्य हृदयमतिशयेन विह्वलीभूतम्।

शकुन्तलां शाकुन्तलेयञ्च पुनरपि नयनगोचरीकर्तुं पुनरप्यासादयितु-मतितरामधैर्यशालिहृदयेन दुष्यन्तेन तयोरन्वेषणाय चतसृष्वेव दिक्षु कार्पटिक-सन्यासि-भिक्षु-नट-वणिजादिविविधवेशधारिणो गुप्तचराः प्रहिताः। अन्ये च सेवकास्तथैव समादिष्टाः। परं कुत्रचिदपि तयोः समाचारो नाधिगतः। कण्वतपोवनं गताश्चाराः बहुविधप्रयत्नैरन्वेषणं विधायाऽपि न कामपि सफलतां प्रापुः। अथ सकलायां धरण्यां भ्रान्त्वाऽपि सर्वत्र विविधं पृष्ट्वाऽपि ते न कामपि सूचनां प्रदातुं समर्थाः बभूवुः।

शकुन्तलाविरहो दुष्यन्ताय दुस्सह एव जातः। तस्य हृदयवेदनया धैर्यमर्यादोल्लंघिता। किमपि भोग्यं न तस्यानन्दप्रदायकमभूत्। नवयौवनमृदुलललितवपुर्विलसिता अपि, सततं तदाराधनप्रसादनैक-व्यापारवत्योऽप्यन्तःपुरिकाः सर्वभोग्यजातोपरामं तं न प्रमोदयाञ्चक्रिरे। पूर्वं मनोविनोदकारीण्यपि वस्तूनि सम्प्रति सन्तापदायीनि बभूवुः। हिमगर्भकरनिकरशैत्यसन्तृप्तिकारको हिमकरोऽग्निगर्भज्वालाभिरिव सन्तापयामास। शीतल आह्लादक इन्द्रियमनःसन्तर्पणो दक्षिणमलयमारुतः

सततं हृदयमुत्क्वथयामास। शशाङ्कमृदुतूलकोमला शय्या कण्टकचयनिचितेव च्छेदयामास। तस्य रजन्यो निद्रारहिता: जागरणैरेव व्यतियन्ति स्म।

दुष्यन्तेन राजभवनसुलभा: भोगा: परित्यक्ता:। शकुन्तलाशाकुन्तलेयौ निश्चयेन क्वचिच्छ्वापदैस्तीक्ष्णकण्टकाञ्चितघनकटङ्कटै: लतापरिवेष्टित-गगनचुम्बिशिखरनिविडविटपिभिश्च समाकुले विजने गहनेऽरण्ये दु:खपीडितौ भवेतामिति चिन्तासन्तानरश्मयस्तस्य गात्राणीन्द्रियाणि मनश्च सकलेभ्य एव लोकसुलभविलासेभ्यो हठादाकृष्येव विमुखयन्ति स्म। स तु पट्टकौशेयमृदुलवस्त्राणि स्वादुसुरभितरुचिररसद्रव्यसुसिद्धान्याहारजातानि, सुमृदुसुखदस्पर्शानुकूलानि भोग्यानि, शयनासनरत्यादिकान् सकलानेव च विलासांस्तत्याज। सा तपोवनवासिनी तापसी बाला तस्य प्रणयिनी सुतस्य च जननी यदि जीवति, नियतं तपोमयं कष्टं जीवनं जीवतीत्यवधार्य दुष्यन्तोऽपि सततं विसृष्टसकलराजसुखभोगस्तपसि वर्तमानो रात्रिजागरणैरति-कृशतनुरष्टमीचन्द्रशोभां प्रपेदे।

औदास्यं वा विरक्तत्वं वा दौर्मनस्यं वा प्रपन्ने दुष्यन्ते प्रजाजनानामपि मनोदशा तथैव सञ्जाता। हस्तिनापुरे राजकार्येषु लौकिकव्यवहारेषु च पूर्ववत् सम्पद्यमानेषु सत्स्वपि न क्वचिदप्युल्लासस्य प्रमोदभावस्य वा स्थिति: समलक्ष्यत। धर्मशासनस्य प्रजापालकस्य नरपालस्य मनोविरागहेतुना राज्यधिकारिण: पौरजनाश्च कर्तव्यपालनमेव निर्वहन्ति स्म। ऋतवस्तु क्रमेण प्राकृतिकसौन्दर्यं प्रसारयन्ति प्रतिष्ठन्ते च। विविधपर्वोत्सवानां तिथय: समागत्य विनैव प्रहर्षप्रमोदं विसर्ज्यन्ते। हस्तिनापुरे कथमप्युत्साहानामुल्लासानां प्रसन्नतानां मेलकानां जनसम्मर्दानां साजसज्जानां परिकल्पनानाञ्च न लेशमात्रप्यलक्ष्यत।

शनै: शनै: दशमासानामवधिर्व्यतीत:। सकलजनचित्तोन्मादकरो मनोरागप्रमोदनो हृदयपुण्डरीकविकासनो मधुकारी वसन्तर्तुराविर्बभूव। उपवनेषु क्षुपतरुलतावल्लरीवीथयो नवोद्गतकिसलयैरनुरागातिशयं प्रकटयन्त्य: शुभ्रपीतारुणलोहितनीलविविधपुष्पस्तबकनिचयैरद्भुतां चित्रविचित्रतां दधु:। पलाशाशोकशाल्मलिकाञ्चनारपाटलादितरुषु विकसितानां पीतरक्तारुणप्रसूनस्तबकानां विकासेन दिशां प्रान्तराण्यप्यरुणायितानि। आरग्वधतरव: पीतवर्णमञ्जरीभिर्वासन्तिकशोभां

प्रसारयामासुः। नवमल्लिकामल्लिकायूथिकाशेफालिकादिवल्लर्यो नवकैशोरवयःप्रपन्नरमणीजनाचिरोद्गतकुचग्रन्थिसमगौरकुसुमस्तबकशोभिताः भुजविटपैर्निकटस्थिततरुस्कन्धालिङ्गनलालसा इव वर्धमानाः बभूवुः।

बहुदूरं यावद् विस्तृतेषु क्षेत्रेषु कनकाभपीतपुष्पराशिविभूषित-सर्षपक्षुपान्तरालेषु यवगोधूमादिशूकधान्यानां शूकराशयः समदृश्यन्त। शोणवर्णप्रसूनाङ्कृताशोकतरुगर्भेषूपवनेषु मधुमासेन सर्वत्रोन्मादस्य साम्राज्यमिव स्थापितम्। प्रस्फुटतां प्रसूनानां सौरभं परागञ्चापहृत्य दक्षिणमलयसमीरणो दिशि दिशि स्पर्शसुखं विकिरन् बालकबालिकासु क्रीडनोत्साहं, युवकयुवतिषु यौवनोन्मादं, प्रौढवृद्धजनेषु चाह्लादं वितन्वन् मन्दं मन्दमप्रतिबन्धं प्रावहत्।

वनेषु, वाटिकासु, सरोवरेषु च विकसत्सु कुसुमेषु पुण्डरीकेषु, नीलोत्पलेषु तामरसेषु च कोषमध्याविर्भूतमधुपरागकणलोलुपानां षट्पदानां विरावाः विरहिजनदर्शनकुपितरतिपतिरोषाहुङ्कृतय इच समश्रूयन्त। रसालपादपाः मदिरसुरभिचयं दधानाभिर्मञ्जरीभिः समाच्छादिताः। चूतमञ्जरीणामास्वादनेनोन्मत्तकोकिलानां कुहूरवाः सर्वत्रोन्मादभावेन परिक्रमतां द्विरेफानां गुञ्जनरवानतिक्रम्य पथिकजनहृदयानि विदारयन्त इव लोकानां श्रवणकुहराणि बधिरयन्ति स्म। रसालतरुविटपाश्लेषेण मदोन्मत्ताः बिम्बफलवल्लर्योऽतिशयितकामिनीजनरदच्छदरक्तवर्णफलनिचयं दधानाः सर्वत्रानुरागमिव प्रासारयन्।

स्थाने स्थाने बृहदाकारेषु लघ्वाकारेषु च मन्मथरिपुप्रियेषु बिल्ववृक्षेषु समवलम्बमानानां पचेलिमानामपचेलिमानां पीतहरितवर्णानां मालूरफलानां मनोरमैः सौरभैः समाकृष्टाः मधुकराः मधुकरीभिः सार्द्धं मधुर-सास्वादाभिलाषिणस्तत्र समागत्य, अतिकठोरावरणं भेत्तुमपारयन्तो निराशा एव परावर्तमानाः मृदुविटपखरकण्टकैः संघट्टन्तः क्षता इव भवन्तः पुनः स्मितविभूषितप्रियतमाकृपाकटाक्षनिशितनाराचैर्निहन्यन्ते।

सकलमेव हर्षनिर्भरं विश्वं वासन्तिकरजोभिरुमत्ततां नीतम्। परं दुष्यन्तस्य राजभवनमुल्लासशून्यं वैराग्येणौदासीन्येन च समावृतमासीत्। कामदेवोत्सवसमायोजनाभावान्मनसिजोऽपि प्रबलप्रहारैः पञ्चभिरप्यरविन्दा-शोकचूतनवमल्लिकानीलोत्पलकुसुमबाणैराकर्णान्ताकृष्टमौर्वीनिर्मुक्तैर्दुष्यन्तं सततं प्राहरत्।

राजभवनस्य सेवकाः सेविकाश्चाऽतिनिभृतपदैः प्रचरन्तश्चरणनिक्षेपध्वनिं परिहरन्तः कार्यवशादितस्ततो गच्छन्तः स्वाधिकृतनित्यनैमित्तिककार्याणि कथमपि सम्पादयन्ति स्म।

तथाभूतोल्लासोन्माददायिन्यपि वसन्तसमये प्रबलविरहचिन्तानलम्लान-हृदयपुण्डरीको मारनाराचप्रबलप्रहारक्षतविक्षतमानसो दुष्यन्त एकस्मिन् दिवसे मध्याह्नवेलायां प्रमदोद्याने प्रस्तरफलकनिर्मितामासन्दीमेकाकी समध्यतिष्ठत्। मन्दपवनेनान्दोलितेभ्यः कुरबकेभ्यो बन्धूकेभ्यश्च क्षरद्भिः वायुना नीयमानैः कुड्मलैर्दुष्यन्तस्य स्वागतमिवाक्रियत। परं गौरवादस्मादपरिचित इव दुष्यन्तः शकुन्तलाशाकुन्तलेयौ हृदये दधानश्चिन्तानिमग्नमनाः द्वाभ्यामेव कराभ्यां शिरः सन्धार्य स्थितः। अस्मिन्नेव समये द्वाराधिकृतेनागत्य दुष्यन्तं प्रणम्य कराञ्जलिं विरच्य निवेदितम्-

"देव ! मत्स्यजीविनमेकं रज्जुभिर्बद्धकरमाकर्षन् नगरपालो द्वाभ्यां रक्षापुरुषाभ्यां सह द्वारि स्थितो भवद्दर्शनाकांक्षी वर्तते।"

तदवलोकनोत्साहपराङ्मुखोऽपि दुष्यन्तः राजधर्ममनुस्मरन् प्रोवाच-

"गच्छ, पृच्छ चैनं, केन कारणेन मां द्रष्टुमभिलषतीति।"

राजानं शिरसा प्रणम्य, बहिर्निर्गत्य पुनरागत्य तेन विस्तरेण निवेदितम्-

"देव ! नगरपालेनैको मत्स्यजीवी स्तेयापराधदोषमारोप्य निगडितः। स तु मत्स्यजीवी नगरस्य रत्नवीथ्यां मणिकारापणेषु महाराजनामाङ्किताामेकां मुद्रिकां विक्रीणीते स्म। महाराजनामाङ्कितेयं मुद्रिका निश्चयेन महाराजस्यैव वर्तते, चौर्येण वा साहसेन वाऽन्येन वा केनचिज्जघन्येनोपायेन मत्स्यजीविना प्राप्तेति विचार्य मणिकारैरस्मिन् विषये नगरपालो विज्ञापितः। द्वाभ्यां रक्षापुरुषाभ्यां सह तत्राऽऽगत्य नगरपालस्तं मत्स्यजीविनं चौर्यापराधिनं निगडितवान्। परं रक्षापुरुषाभ्यामनिर्बन्धं ताड्यमानोऽपि चौर्यापराधमसौ चौरो नाऽङ्गीकरोति।"

राजा- "पुनस्तदङ्गुलीयकविषये स किं भणति ?"

द्वारपालः- "देव ! स कथयति, यन्नासौ चौर्यकारी। शक्रावतार-तीर्थवास्तव्योऽसौ केवलं भागीरथीसलिलेषु जालं प्रसार्य मत्स्यान् सङ्गृह्य तांश्च हस्तिनापुरे मत्स्यवीथ्यां विक्रीय निजपरिवारस्य

सदस्यानामुदराणि बिभर्ति। एकस्मिन् दिवसे रोहितजातीयो विशालाकृतिरेको मत्स्यस्तस्य पाशे पतितः। विक्रयार्थं मत्स्यवीथ्यां तं नाऽनीयासौ तदाहाराभिलाषी गृहमनयत्। मत्स्योदरे च विदीर्णे तदान्त्रमध्ये दीप्यमानं तदङ्गुलीयकं तेनावलोकितम्। अङ्गुलीयकं विक्रीय किञ्चिद् धनं प्राप्स्यामीत्यभिलाषेणासौ हस्तिनापुरमागतः। परन्तु रत्नवीथ्यां मणिकारैरसौ चौर्यापराधदोषेण लाञ्छितो नगरपालेन निगडितः। तच्चाङ्गुलीयकं नगरपालेन भवन्निरीक्षणार्थं मह्यं प्रदत्तम्।"

वृत्तान्तमेनं निवेद्य द्वारपालः किञ्चिन्नम्रीभूय स्वकरनिहितमङ्गुलीयकं राज्ञः करतले निहितवान्। शुभ्रचाकचक्यदीप्यमानहीरकजटितस्य तस्याङ्गुलीयकस्य प्रकाशरेखाः सर्वतो व्यसरन्।

करतलनिहितमङ्गुलीयकमवलोक्यैव दुष्यन्तस्य मनो विस्मयेन वेदनयोद्वेगेनाऽवेगेन च सहसैव पूरितम्। आकर्णान्तविस्फारितनयनः स पक्ष्मणोर्निमेषस्यापि विस्मृत्य तत् प्रेक्षाञ्चक्रे। तदेवेदमङ्गुलीयकमासीत्। अनेनैवाङ्गुलीयकेन कण्वतपोवनात् प्रस्थानवेलायामसौ शकुन्तलायाः दक्षिणकरमध्यमाङ्गुलिमलञ्चकार। सत्यमवितथं चाऽऽह शकुन्तला, यत्तदङ्गुलीयकं स्नानावसरे भागीरथीसलिले तस्या अङ्गुलितोऽलक्षितमेव प्रभ्रष्टम्। निश्चयेनैतत् केनचिन्मत्स्येन निगीर्णम्। स च मत्स्योऽस्य मत्स्यजीविनः पाशे पतितः। क्रकच्यमाने च तस्योदरे सहसैवाङ्गुरीयकमुदर-मध्यात्तेनाऽधिगतम्।

अहो, अङ्गुरीयकाभावादेव सा वराकी तपस्विनी तपोवनवासिनी मम प्रिया प्रियतमा शकुन्तला तस्मिन् समये राजसंसदि सर्वेषामेव सभासदां समक्षं तथा तिरस्कारमभजत। सर्वैरेव जनैरुपहासास्पदतां नीता सा मिथ्याभाषिणीति व्यभिचारिणीति कृत्वा राजसभाभवनान्निस्सारिता। द्वारपालेन प्रदत्तं करतलनिहितं तदङ्गुलीयकं भालपट्टे संस्पृश्य साग्रहानुरागमोष्ठाभ्यां परिचुम्ब्य दुष्यन्तेन वामकरकनिष्ठिकायां परिहितम्। तदनन्तरमसौ मन्दस्वरेण द्वारपालमवादीत् -

"द्वारपाल! गच्छ। गत्वा च नगरपालं मम वचसा ब्रूहि यन्निरपरा-धोऽयं मत्स्यजीवी ससम्मानं मोचनीयः। सत्यमेवाऽयं ब्रवीति। मत्स्य-

गन्धत्वादिदमङ्गुलीयकं मत्स्योदरादेव निर्गतमिति प्रतीयते। अथ चैतदङ्गुलीयकमूल्यसम्मितं धनमप्यस्मै मत्स्यनीविने स्वर्णराशिरूपेण राजकोषात् प्रदेयम् ।"

प्रणम्य बहिर्निर्गते द्वारपाले दुष्यन्तः निर्निमेषनयनाभ्यां तदेवाङ्गुलीयकमवलोकयन् चिन्तार्णवे निमग्नः। तेन विचारितम् -

"यद्येषा मुद्रिका तस्मिन् काले शकुन्तलाकराङ्गुलिवर्तिन्यभविष्यत्, सा चैतस्याः प्रस्तुतीकरणे समर्थाऽभविष्यत्, तदा न कोऽपि जनस्तां मिथ्याभाषिणीमकथयिष्यत्। न कोऽपि जनश्चेतःस्वास्थ्योपपन्नस्तस्यास्तिरस्करणे क्षमोऽभविष्यत्। अस्मिन्नङ्गुरीयके प्रमाणरूपे वर्तमाने तस्याः कथनमविकलरूपेण सत्यमिति सिद्धमेव। अमात्यमण्डलसदस्यैः राजसंसत्सदस्यैश्च महादेवीरूपेण तस्याः सत्करणं सर्वदमनस्य च युवराजरूपेण स्वीकरणं सुनिश्चितमासीत्। न काऽप्यत्र बाधस्याशङ्का। प्रजास्वपि न काचिदपवादसम्भावना। सर्व एव मामनिच्छन्तमपि तत्स्वीकरणे बाध्यमकरिष्यन्। अथ चैवंविधायाः किंकर्तव्यविमूढकारण्याः मानसिकवेदनायाः क्रकचच्छेदनहृदयविदारणोत्पीडनस्य भाजनमहं नाऽभविष्यम्। परं विधिना लिखितान्यक्षराणि प्रमार्ष्टुं कः क्षमते ?"

कतिपयक्षणानन्तरमेव द्वारपालेन पुनरागत्य निवेदितम् -

"देव ! अमात्यो देवरातो निवेदयति - धर्मासनग्रहणस्य भवतः समयः समुपस्थितः। केचनावश्यककार्याणि भवताऽवलोकनीयानि। तानि च भवन्निर्णयमपेक्षन्ते। यदि च भवान् .... ।"

दुष्यन्तस्तु द्वारपालकथनं मध्य एव निवार्य प्रोवाच -

" न हि न हि, सम्प्रत्यहमत्यधिकमस्वास्थ्यमनुभवामि। राजसभां गत्वा धर्मासनोपनिवेशनं न मे सम्भवम्। मद् वचनात् त्वममात्यं देवरातं ब्रूहि- येषु व्यवहारेषु स निर्णेतुं क्षमते, तत्र स्वयमेव निर्णेतव्यम्। अथ च येषु व्यवहारेषु मे निर्णयस्यापेक्षा, आवश्यकता वा, तानादाय स स्वयमेवागच्छतु।"

किञ्चित्कालानन्तरं द्वारपालेन सह समागत्य देवरातो राजानं प्रणम्य तत्समक्षमतिष्ठत्। प्रश्नसूचकदृष्ट्याऽवलोकितो दुष्यन्तेनासौ निवेदयामास-

"महाराज ! अस्मिन् हस्तिनापुरे धनमित्रो नाम सार्थवाहो न्यवसत्। तस्य व्यापारकरणसहायः पोतनिकरः सप्तस्वपि सागरेषु सकले जगति

परिभ्रमति, क्रेय-विक्रेयवस्तूनि चेतस्ततो नयति। व्यापारनिमित्तेन सोऽपि पोतनिकरमारुह्य समुद्रयात्रासु सुदूरद्वीपद्वीपान्तरेषु परिभ्रमति। दौर्भाग्यादेकस्मिन्नवसरे पोतारूढः सार्थवाहो धनमित्रः सुदूरं सागरमध्यगतः समुद्रीयझंझावातेऽतिप्रचण्डे महज्जलावर्तसङ्कुले समापतितः। प्रचण्डमुन्नमन्तीभिः सततं सवेगं प्रवर्धमानाभिर्भयानकहाहाकारध्वनिभिर्नाविकान् भाययन्तीभिर्लहरीभिस्तस्य पोतनिकरः चञ्चलप्रकृतिबालकेन क्रीडनकमिवासंख्यखण्डेषु खण्डशो विधाय गहनजलगर्भे निमज्जितः। पोतेन सार्द्धमसौ धनमित्रः सार्थवाहोऽपि सागरसलिलमध्यान्तर्गतो बभूव।

अपि च महाराज ! सन्ततिविहीनस्य तस्य सार्थवाहस्य धनमित्रस्य न कोऽप्युत्तराधिकारी वर्तते। धर्मशास्त्रमर्यादामङ्गीकृत्य राजशासन-नियमानुसारमपुत्रस्य प्रजाजनस्य सम्पत्तिः राजकोषमधिगच्छति। अतोऽपुत्रस्य वसुमित्रस्यापि सम्पत्तिः राजकोषमधिगच्छत्विति मे मतिः। अथवा यादृशो निर्णयो भवेत् तत्र भवानेव प्रमाणम्।"

अमात्यस्य देवरातस्य वचांसि श्रुत्वा दुष्यन्तस्तमुवाच –

"अमात्य ! पुत्राभावो महत्कष्टकरो हृदयोन्माथयिता च। परं न वयं तथा धनलोभकारिणः। प्रचुरैश्वर्यवत्वाद् बहुपत्नीकेन वसुमित्रेण भाव्यम्। गत्वा जानातु भवान्, यदि तस्य भार्यासु काचिदन्तर्वत्नी भवेत् ? तासु च कस्याञ्चित् सगर्भायां सत्यां स एव गर्भ उत्तराधिकारं प्राप्स्यति। अन्यथा, परिवारजनस्य भरणपोषणप्रबन्धं विधाय सार्थवाहधनं राजकोषे निक्षेपणीयम्।"

यथाऽऽज्ञापयति महाराज इति राजशासनं स्वीकृत्य प्रणम्य गतवति देवराते, द्वारपाले च निर्गते दुष्यन्तस्य हृदयवेदना वर्षर्तौ जलौघनीरनिचय इव सहाहाकारं प्रवर्धमाना बभूव। शकुन्तलासर्वदमनयोः सुतीव्रा स्मृतिः निशितचन्द्रहासधारेव तस्य हृदयं छेत्तुमारेभे। शकुन्तलायाः स्नेहौत्सुक्यप्रणयगर्भसवाष्पदृष्टीनां, सर्वदमनस्य च स्नेहाऽऽकांक्षाऽऽग्रह-सम्मानौत्सुक्यभरसम्भृतानामवलोकनानां संस्मृत्य दुष्यन्तोऽतितरां विह्वलतां प्रपेदे। परं भर्त्रा भार्यायाः, जनकेन च सुतस्य तथा तिरस्कारो विहितो, यथा न तस्य कोऽपि प्रतीकारो दुष्यन्तेन लक्षितः।

तदनन्तरं सांसारिकसुखभोगविलासान् प्रति दुष्यन्तस्यौदासीन्येन सह विरक्तिभावः सततं वृद्धिं गतः। सकलेभ्य एव व्यवहारेभ्य उपरतोऽसावनेकदिवसं

यावन्नान्तःपुरमप्युन्मुखीबभूव। आवश्यकान्यनिवार्याणि राजकार्याणि स कर्तव्यभावनाविवशो निश्चयेन निरैक्षत, परं तदतिरिक्तासु वार्तासु न कामपि रुचिं प्रादर्शयत्। सकलमेवान्यत् तस्मै नारोचत।

अस्यामेव विरक्तावस्थायां दुष्यन्तस्य दिवसाः रजन्यश्च व्यतियन्ति स्म। शनैः शनैः दिवसेभ्यो दिवसाः, सप्ताहेभ्यः सप्ताहाः, मासेभ्यो मासाः, ऋतुभ्यो ऋतवः, संवत्सरेभ्यश्च संवत्सराः व्यतीताः। परं दुष्यन्तस्य मनसि न कस्यचिदप्युत्साहस्य सञ्चारः समजनि।

एकस्मिन् दिवसे तस्यामेव विरक्तौदासीन्यदशायामसौ महाराजो दुष्यन्तोऽन्तःपुरोद्याने सरोवरस्य तीरे प्रस्तरशिलारचितशोभासने निषण्णः शकुन्तलासम्बद्धदृश्यानां चित्रफलके चित्रणस्याभिलाषी समवतत। तदैवाऽन्तःपुराधिकारी कञ्चुकी निकटमागत्य प्रणम्य निवेदयामास-

"देव ! त्रिविष्टपाधीशस्य देवराजस्य वासवस्य दूतो मातलिर्भवद्दर्शनमभिलषति।"

मातलेः परममित्रस्य वासवस्य दूतस्यागमनसमाचारं श्रुत्वैव सचैतन्येन सावधानेनौत्सुक्यभावसम्भृतेन च दुष्यन्तेनादिष्टम् -

"देवराजदूतो मातलिस्त्वरितमत्र सादरमानेयः।"

(२०)

कुरुदेशस्योत्तरवर्ती पर्वतीयो भूभाग उत्तरकुरुनाम्ना प्रथित आसीत्। हिमालयस्योत्तुङ्गशिखराण्यस्य देशस्योत्तरीयं सीमानं निर्धारयन्ति स्म। एतानि शिखराण्युल्लंघ्योत्तरदिग्विभागे कैलासगिरिश्रेणयो मानससरः-सलिलविस्ताराश्चावर्तन्त। अस्मादेव स्थानात् त्रिविष्टपप्रदेशस्य सीमान आसन्। अयं देशः नाकनाम्ना स्वर्गनाम्ना चाऽपि लोके प्रथितो बभूव। अमरावती चास्य राजधानी।

त्रिविष्टपदेशस्य राजधानी धनैर्धान्यैश्चातितरां समृद्धाऽवर्तत। सर्वविधानि लौकिकसुखभोगविलासव्यवहाराणि द्रव्याणि साधनानि च तत्र प्राचुर्येणोपस्थितान्यासन्। अत्रत्याः निवासिन आत्मनः सुरदेवदेवतादिपदैर्व्यवहरन्ति स्म। व्यक्तिशस्तु ते देवाः, परं समूहरूपेण देवताः। बहुविद्यानिष्णातैराविष्कृतिपटुभिस्तैर्महान्तो वैज्ञानिका आविष्कारा आविष्कृताः। वैज्ञानिकप्रयोगैस्ते सकलभौतिकसुखसुविधासाधनानि समुपालभन्त।

स्वास्थ्यविज्ञान-चिकित्साशास्त्रप्रयोगैस्ते रोगभयेभ्योऽपि विमुक्ता: दीर्घायुषो भवन्ति स्म। बहुतिथं यावद् यौवनावस्थायामेव विद्यमानास्ते यौवनसुलभविलासाननुभवन्तस्तथा प्रसिद्धिं गता:, यथैते देवा: न तु कदाचिज्जरावस्थां, न च मरणं प्राप्नुवन्ति। इति अजरा अमरा ह्येते। अतस्ते अजरा-अमरा इत्यादिभिरभिधानैरपि लोकै: कथ्यन्ते स्म।

त्रिविष्टपदेशस्य नारीणां सौन्दर्यं लावण्यञ्चानुपमेयमासीत्। ब्रह्मणा ज्योत्स्नाया: कोमलकान्तिं, मधुमासोद्भिन्नप्रसूनस्तम्बकेभ्य: सौकुमार्यं, मल्लिकायूथिकाकेतकीवनस्पतिपुष्पराशिभ्य: सौरभं, निर्मलनीलनीर्-परिपूरितसरसीभ्यो नयनविशदत्वविशालत्वं, गगनाच्छादकेभ्यस्तुङ्गश्यामल-जीमूतपङ्क्तिभ्योऽलकराशिसघनत्वं, चन्द्रकलाया: ललाटगौरकान्तिं, कामदेवकार्मुकप्रत्यञ्चातो भ्रूविलासं प्रत्यूष आविर्भूताया उषस: कपोलकरतलारुणत्वं, बिम्बफलराशिभ्य ओष्ठयोस्ताम्रभावं, शंखेभ्य: कण्ठतनुसौन्दर्यभावं, गिरिसानुभ्यो वक्ष:पयोधरोन्नतत्वं, विटपिमृदुविटपेभ्यो भुजमार्दवं, कमलपत्रेभ्य: कराङ्गुलिकोमलत्वं, केसरिकटिभ्य: कृशोदरत्वं, सरिच्चञ्चललहरीभ्यस्त्रिवलिवक्रत्वं, नागेन्द्रहस्तेभ्य ऊर्वोरूष्मत्वं, कदलीस्तम्भेभ्य: त्वग्गौरमसृणत्वं, स्थलकमलिनीभ्यश्च चरणतललोहितत्वं गृहीत्वा तासां त्रिविष्टपनारीणां वपुषां रचना विहिता।

त्रिविष्टपस्य नार्यो द्वयोर्वर्गयोर्विभक्ता आसन् – देवाङ्गना अप्सरसश्च। देवाङ्गनास्तु देवै: परिणीता: सत्य: पातिव्रतधर्ममनुपालयन्त्यो गृहस्थजीवनमङ्गीकुर्वन्ति स्म। परं न तथा तत्र स्वातन्त्र्याभाव:। अतिशयरूपलावण्यसम्पत्तिशालिन्यो देववनिता: कैशोरवयस्येवाप्सरसां वर्गे सम्मिलिता: भवन्ति स्म। पाणिग्रहणाधिकारस्तेषां सर्वथा वर्जित:। सामान्यरूपेण सर्वदेवजनमनोरञ्जनहेतवस्ता: न केनचित्पुरुषविशेषेण देवविशेषेण वा नित्यसम्बद्धा अवर्तन्त। नाकाधिपतिर्देवराज एव तासां भर्ता, स्वामी, नाथ इति स्वीकृत:। स च विशेषावसरेषु विशिष्टकार्यसम्पादनार्थं ता: प्रयुङ्क्ते स्म। तासां कायिकसौन्दर्यं लावण्यं तारुण्यञ्च चिरस्थायि कर्तुं विशिष्टवैज्ञानिक-प्रयोगविधय आविष्कृता अवर्तन्त।

तत्राप्सरसां चतुर्दशकुलानि प्रथितानि बभूवु:। तेषाञ्च समुत्पत्ति: ब्रह्मणो मनसो, वेदेभ्योऽग्ने:, पवनान्मथ्यमानात्समुद्राज्जलादर्ककिरणेभ्य:

सोमरश्मिभ्यो, भूमेर्विद्युद्भ्यो मृत्योर्मकरकेतोर्दक्षसुताभ्याञ्च बभूवेति पुराणेषु प्रसिद्धम्। तत्र च घृताचीमेनकारम्भोर्वशीतिलोत्तमासुकेशीमञ्जुघोषाद्या अप्सरसः पुराणेषु प्राचीनाख्यानेषु च प्रसिद्धाः।

त्रिविष्टपस्य राजानः परम्परागतरूपेण इन्द्रपदवाच्याः भवन्ति स्म। मरुत्वन्-मघवन्-विडौजस्-पाकशासन-वृद्धश्रवस्-सुनासीर-पुरुहूत-पुरन्दर-जिष्णु-लेखर्षभ-शतमन्यु-दिवस्पति-सुत्रामन्-गोत्रभिद्-वज्री-वृत्रहन्-पूषन्-वृषन्-वास्तोष्पति-सुरपति-बलाराति-जम्भभेदिन्-हरि-हय-स्वाराज्-नमुचिसूदन-संक्रन्दन-दुश्च्यवन-तुरासाह्-मेघवाहन-आखण्डल-ऋभुक्षन्-वासव-शचीपति-शक्र-सुरपति-देवराजेत्यादिनामभिरपि ते प्रथिताः। अतुलनीयेन पराक्रमेण तपसा चैतत्पदं प्राप्यते स्म। दुष्यन्ते कुरुदेशं प्रशासति कश्यपप्रजापतिसुतः सहस्राक्षस्तदिन्द्रपदाधिकारमभजत। चारचक्षुषो हि राजान इति शास्त्रवचनमनुसृत्य तस्य सहस्रशो हि चारास्त्रिषु भुवनेषु विचरन्तो मक्षिकान्तर्गत वृत्तान्तं तस्मै निवेदयन्ति स्म। अतोऽन्वर्थनामा स सहस्राक्षः प्रजापतिसुतायाः अदित्याः गर्भाज्जातः। आर्यावर्तीयैर्भूमिपालैः सार्द्धमिन्द्राणां घनिष्ठसम्बन्धा आसन्। केषुचिदवसरेषु इन्द्रस्यानुपस्थितिप्रसङ्गे देवा आर्यावर्तीयं कमपि पराक्रमशालिनं नयज्ञं राजानमस्थायिरूपेणेन्द्रपदमलङ्कर्तुं प्रार्थयन्ति स्म। पूर्वस्मिन् समय एकदा देवैः दुष्यन्तस्यैव पूर्वजो नहुषोऽस्थायि-रूपेण निर्वाच्येन्द्रपदेन विभूषितः।

त्रिविष्टपनिवासिनो देवाः स्वात्मन आर्यावर्तीयेभ्यो जनेभ्यः प्रशस्यतरान् मन्यन्ते स्म। तेषामिदमेव मन्तव्यम्-

देवकुललब्धजनुष एव जनास्त्रिविष्टपदेशनिवासाधिकारं भजन्ते। अन्येषां पृथिवीलोकवास्तव्यानां न कोऽप्यधिकारस्तत्र निवासस्य। अस्मिन् जन्मनि महत्तपस्तप्त्वा, पुण्यकर्मणाञ्च सञ्चयं कृत्वा देवकुले जाता एव जनाः स्वर्गनिवासाधिकारं लभन्ते।

त्रिविष्टपदेशे लौकिकसुखभोगविलासपदार्थानां प्राचुर्यभावाद् आर्यावर्तीयजनानां तत्र निवासस्पृहा प्रबलाऽऽसीत्। सुस्वादुभोजनानां रसनार्द्रकारिणां पेयपदार्थानां जितेन्द्रियाणामपि संयमिनां चित्तोन्मादकारिणीनां लावण्यमयीनामङ्गनानां सर्वविधसुविधासम्पन्नानामभ्रंलिहाग्राणां हर्म्याणां तस्मिन् देशे प्राचुर्यमासीत। तत्र नन्दनकानने कल्पवृक्षप्रसादात् सर्वे पदार्थाः

देवेभ्यः सुलभाः। देवानां प्रियपेयपदार्थेषु सुरायाः सोमरसस्य वा महन्महत्त्वमवर्तत। अत एव ते सुरनाम्नाऽपि प्रसिद्धाः बभूवुः।

उत्तरकुरुत्रिविष्टपदेशमध्यवर्तिपर्वतोत्तुङ्गभूभागेषु सोमवल्लरीति वनस्पतिरनेकेषु स्थानेषु प्राप्यते स्म। ऋग्वेदे मुञ्जवति पर्वते सोमवल्लर्याः समुपलब्धिर्वर्णिता। अस्याः स्वरसस्तु पीयूषोपमः शक्त्युत्साहवर्धनः प्राणशक्तिप्रदश्चावर्तत। ओषधायास्मै देवा अत्यधिकं स्पृहयन्ति स्म। देवानां प्रीणनाय आर्यावर्तीयाः महर्षयोऽपि सोमाभिषवं कृत्वा स्वादिष्टं पेयं प्रस्तुतं विधाय देवानामाह्वानं कुर्वन्ति स्म।

उत्तरकुरुजनपदोत्तरीयप्रान्तसीमानमुल्लंघ्य त्रिविष्टपप्रवेशो नातिसुकरः। स तु कष्टकरोऽसम्भव एव वाऽवर्तत। मार्गाश्चातितुङ्गपर्वतशृङ्खलाभिरत्युच्छृङ्खलानुत्तरणीयसरिद्गहनोपत्यकासङ्कटबाधाभिश्चाऽनभिगमनीया अवर्तन्त। यत्र क्वचिदपि पर्वतशृङ्खलानां मध्ये गिरिद्वाराण्यासन्, तत्र देवसेना सततं जागरूका रक्षायै भ्रमति स्म। न कोऽप्यनधिकारी तत्र गन्तुमक्षमत। देवेभ्यो भिन्नजातीयाः मुनयस्तपस्विनो महर्षय आमन्त्रिताः जनाश्चैव त्रिविष्टपसीमासु प्रवेशायाऽनुमतिमलभन्त।

नाकाधिपतिर्देवराज इन्द्रोऽतिपराक्रमी, नीतिज्ञो, बुद्धिमान्, तपस्वी चाऽभवत्। शस्त्रास्त्रादिविविधायुधप्रयोगेषु स निश्चयेन नितरां दक्षोऽवर्तत। केनचिदिन्द्रपदाधिष्ठितेन, त्रिविष्टपाधिपतिना कुलिशाभिधानं बज्राभिधानं वातिभीषणमायुधमाविष्कृतम्। तच्च यथाशक्ति सुगोपनीयमासीत्। परम्परागतरूपेण देवराज एव तस्य रहस्यं जानाति। न कोऽपि तस्यायुधस्य प्रतीकारोऽवर्तत।

त्रिविष्टपदेशस्य शासनसंविधाने व्यस्थैवंविधाऽवर्तत, यदिन्द्रपदाधिकारं देवराजः स्वशक्त्या तपोबलेन च लभते स्म। आर्यावर्तीयास्तपस्विनः सुकठोरतपोबलेनेन्द्रपदमधिगन्तुं क्षमन्ते स्म। अश्वमेधयज्ञशतयाजकश्चक्रवर्ती सम्राडपि तत्पदाधिकारी बभूव।

अतो देवराजोऽस्मिन् विषये सतत जागरूकः प्रयत्नपरश्चासीद् यन्न कोऽपि आर्यावर्तीय आर्यजातीयस्तपस्वी सुकठोरं सुकठिनं तपस्तप्त्वा स्वर्गाधिपतिपदावाप्त्यै स्वत्वाधिकारं प्रदर्शयेत्। अत एव सुकठोरतपश्चर्याव्रतपारगाणां तपस्विनां तपोभङ्गायासौ प्रवञ्चनं वा बलं वा नीतिं

वा विविधोपायान् प्रयुङ्क्ते स्म। तपस्विनां ब्रह्मचर्यव्रतभङ्ग एव सरलतमः प्रयोग आसीत्। एतत्प्रयोजनसम्पादनाय बहुधाऽप्सरसः प्रयुज्यन्ते स्म। विश्वामित्रतपोभङ्गाय देवराजेन मेनकानाम्नी अप्सरा प्रहिता। शकुन्तलायाः भुवि प्रादुर्भावएतस्यै वेन्द्रप्रयोगस्य परिणाम आसीत्। चक्रवर्तिनः सम्राजोऽश्वमेधयज्ञशतनिर्वहणे समर्थाः न भवेयुरिति देवराजः सततं स्वयं जागर्ति स्म।

त्रिविष्टपाधीश्वराणामार्यावर्तीयनरपतिभिः सार्द्धं सम्बन्धाः प्रायशोऽतिप्रगाढा अवर्तन्त। आर्यावर्तीयाः भूमिपालाः देवराजमिन्द्रं प्रशस्यतमं मन्यमानाः सततमपूजयन्। आर्याणां यज्ञपरम्परासु देवानां विशिष्टं स्थानमविद्यत। वैदिकमन्त्रध्वनिभिः सह तेभ्यो हवींषि हूयन्ते स्म। आहूताः देवाः हविरूपबल्युपभोगाय यज्ञफलभागान् भोक्तुं समागच्छन्ति स्म। सोमरसस्तु तेभ्योऽतिस्पृहणीयोऽवर्तत। अवसरेषु समुपस्थितेषु सत्सु ते नृपतयो देवान् भावयन्ति स्म, उपकृताश्च देवा अपि यज्ञकर्मरतान् तान् भावयन्ति स्म। इत्थं परस्परं भावयन्तो देवा आर्याश्चापि परमश्रेयसोऽधिकारिणः समभूवन्। देवराजमिन्द्रं प्रशंसावचनैः स्तुतिभिः प्रीणयन्त आर्यजनाः बलिरूपेण विविधोपहारान् तस्मै प्रायच्छन्। इन्द्रोऽप्येतेषां प्रसादनाय सततं प्रायतत।

दुष्यन्ते कुरुजनपदं प्रशासति, तस्योत्तरवर्तिसीमानस्त्रिविष्टपजनपदं यावत् सुविस्तृता आसन्। कुरुजनपदोत्तरवर्ती कुरुजाङ्गलजनपदः, ततोऽप्युत्तरवर्त्युत्तरकुरुजनपदश्च दुष्यन्तसाम्राज्यान्तर्गतोऽवर्तत। तदनन्तरं गन्धमादनादिशिखराण्यतिक्रम्य त्रिविष्टपजनपदसीमा। परं सीमासम्बन्धिनो विवादाः कदाऽपि न समुपस्थिताः बभूवुः। कुरुदेशाधिपतिभिः सहेन्द्रस्य प्रगाढसौहार्दसम्बन्धा अतिप्राचीनकालादेवावर्तन्त।

अनेकशः कुरुदेशाधिपान् प्रीणयितुं, तेषां भोगविलासायेन्द्रेण निजदेशीया अतिरूपवत्यो यौवनशालिन्योऽप्सरसोऽप्यनुमताः। बह्वीभिः सौन्दर्यरूपशालिनीभिरप्सरोभिः कुरुदेशस्य भूमिपतीनामन्तःपुराणि समलङ्कृतानि पावितानि च। स्वर्गनिवासिनी, रूपयौवनादिगुणैः सकलजगद्विमोहिनी उर्वशी पुरुरवसः कुरुवंशीयस्य नराधिपस्य प्रणयिनी बभूव।

उत्तरकुरुदेशस्योत्तरवर्तिसीमासु यक्ष-किन्नर-विद्याधर-गन्धर्वादिजानयो

निवसन्ति स्म। विविधगुणगणसमृद्धिशालिनीनामेतासां जातीनां विस्तारस्त्रिविष्टपसीमास्वति सुदूरं यावदवर्तत। एतासां जातीनां सम्पर्क आर्यैः देवैश्च सह मधुरः प्रगाढ एवासीत्। देवाधिपेनेन्द्रेण ते जनास्त्रिविष्टपान्तर्गतप्रदेशेषु विहाराय तत्रत्यान् भोगांश्चोपभोक्तुमनुमताः। त्रिविष्टपजनपदप्रवेशाधिकारभावाद् विशिष्टगुणबलशालित्वाच्चार्या एतान् जनान् अर्धदेवरूपेण समामनन्ति स्म।

त्रिविष्टपजनपदस्योत्तरवर्तिप्रदेशेषु हिमालयस्य परे पारे पर्वतानामपरे पार्श्वेऽसुरजातीयजनानां निवासोऽविद्यत। स्थूलशरीरमेवात्मेति विजानन्तो वेदविरुद्धमताननुसरन्तस्तेऽसुराः पार्थिवसुखभोगविलासानेव परमं सुखं मन्यमाना अतिबलशालिवपुषोऽवर्तन्त। प्रचुरप्रतिभासमन्वितैस्तैः सुखभोगानन्दप्रदायीनि बहूनि वैज्ञानिकसुखसाधनान्याविष्कृतानि। व्योमयानान् विरच्य तैराकाशगमनसामर्थ्यमधिगतम्। वास्तुविद्यायां पारङ्गतानां तेषां पुराणि सर्वविधभौतिकसुखसुविधायुतानि सप्तभूमिकप्रासादैरशोभन्त।

देवैः सहासुराणां सततं काकोलूकीयं वैरमासीत्। प्रसिद्धिरियमेवाविद्यत कदाचित् प्राचीनसमये त्रिविष्टपजनपदाऽधिपतयोऽसुरा एवावर्तन्त। असुरनरपतय एनं देशं प्रशासन्तो विविधान् भोगानुपभुञ्जते स्म। परमिन्द्रसैनापत्ये दक्षिणदिशः समागता आक्रमणकारिणी देवसेना असुरानुत्तरदिशि प्रणुद्य विद्रावयामास। इन्द्रेणासुरेभ्यस्त्रिविष्टपभूमिर्बलादाच्छिद्य तत्र प्रभुत्वं संस्थाप्य तत्रैव देवानां निवासो विहितः। असुरास्तु सदैव वैरं निर्यातयितुमुद्योगशालिनः सन्त उत्तरदिश आक्रम्य देवांस्त्रिविष्टपभूमिभ्यो निस्सारयितुं प्रायतन्त।

एवमनेकेष्ववसरेषु परमपराक्रमशालिभिरसुरसेनानायकैः पराजिताः देवास्त्रिविष्टपान्निसारितास्तत्र च तैः स्वप्रभुत्वं स्थापितम्। परमिन्द्रस्य नायकत्वेऽत्युत्साहसम्पन्ना देवसेना कदाचित् स्वयमेव, कदाचिच्चाऽऽर्यभूमिपालानां साहाय्येनासुरान् पराजेतुं समर्थाऽभवत्। कुरुजनपदशासकैः सह प्रगाढमैत्रीसम्बन्धभावात्ते देवराजस्येन्द्रस्य सदा सहायका आसन्।

आर्याः सततं देवानां सहायका, इति असुरैः सह परमं वैरभावं प्रापुः। अवसरं लब्ध्वा असुरसैनिका आर्याणां ग्रामान्, पुराणि चाक्रमन्तः परमं विनाशं कुर्वाणा, आर्यस्त्रीपुरुषाणां वधं कुर्वन्तस्तेषां धार्मिकसमारोहेषु विघ्नान्

उपस्थापयन्ति स्म। तेषां निष्ठुर-निर्दय-क्रूर-नृशंसात्याचारैः सर्वत्र किंवदन्तीयं प्रसिद्धा, यत्ते आर्यजनान् व्यापाद्य तेषां रुधिरमांसवसाद्युपभोगेन संतृप्ताः भवन्ति। असुरैः सह वैरभावादार्याणां निवासा असुरक्षिता अभवन्। कैश्चिदप्यसुराधिपतिभिरार्यावर्तभूमिभागान् बलात् प्रविश्य केषुचित् स्थानेषु वसतयः स्थापिताः दुर्गाश्च निर्मिताः। अवसरं लब्ध्वा ते आर्याणां वसतीः, ग्रामान्, पुराणि चाक्रम्य कांश्चिद् आर्यस्त्रीपुरुषबालयुवकवृद्धजनान् व्यापाद्य, कांश्चिच्च रज्जुपाशैर्निबध्य दासान् विधाय तरसा स्वदुर्गानेव प्रविशन्ति स्म। आर्याणामुत्पीडनमेव तेषां परमं ध्येयमवर्तत।

(२१)

हस्तिनापुराच्छकुन्तलायाः प्रस्थानानन्तरं पञ्चवर्षकल्पोऽवधिर्व्यतीतः। प्रतिवर्षमिवास्मिन्नपि वर्षे वसन्तर्तोराविर्भावो बभूव। हेमन्तशैत्यं विद्राव्य वसन्तेन समशीतोष्णभावः प्रसारितः। शैत्यनिवारकस्थूलौर्णवस्त्रानि परित्यज्य जनाः प्रतनुसूत्रवसनपरिधानेष्वाग्रहवन्तो बभूवुः। वृक्षाः क्षुपाः लताः वल्लर्यश्च विविधवर्णसुरभितसुमनोभराक्रान्ताः विनमितपिटपाः बभूवुः। आम्रकुञ्जेषु विकसितमञ्जरीणां सौरभं नराणां घ्राणेन्द्रियाणि सन्तर्पयामास। वाटिकासु परभृतां मधुरकुहूरवोऽश्रूयत। जलाशयेषु विकसितानां पुण्डरीकाणामिन्दीवराणां तामरसानां वासन्तिकसरोजानाञ्च पुष्पपटलैः समाच्छन्ना चित्रविचित्रवर्णा प्राकृतिकशोभा दिशां प्रान्तराणि सुशोभयन्ती दर्शकानां विलोचनानि नवानुपममुखसम्भृतानि चकार।

वनेषूपवनेषु च दवीयसा विस्तीर्णेषु पलाशपाटलशाल्मलिकाञ्चनाराशोकादितरुषु विकसितानां पुष्पस्तबकानां शुकतुण्डसमकान्त्या सकलमेव जगत् सुतप्तस्वर्णद्रवसंलिप्तमिवाभवत्। हेमन्तस्य तुषारयुतहिमगर्भशीतलाः पवनाः समशीतोष्णमलयानिलरूपेण परिणम्य जनेभ्यः स्पर्शसुखं प्रायच्छन्। परं जनजनहृदयाह्लादकोऽपि वसन्तर्तुः दुष्यन्तस्य हृदये कथमपि प्रसादभावं न सञ्चारयामास।

अस्मिन्नेव सकलसहृदयजनमानसोन्मादकारिणि वसन्तसमये शकुन्तलाविरहानलसन्धुक्षितसकलगात्रेन्द्रियः कृशकायो महाराजो दुष्यन्तः प्रातरेव प्रमदोद्यानं समागत्य सरस्तीरवर्तिशिलाफलके निषद्य सूर्यास्तसमयं यावद् वर्तिकया चित्रपटं विविधालेख्यमुद्रिकाभिरलङ्करोति स्म। स नु तेषामेव

दृश्यानामङ्कने रुचिञ्चकार, येषां सम्बन्धः शकुन्तलासङ्गत्यां विलसितानां प्रणयरतिक्रीडानां प्रसङ्गैः सहाऽऽसीत्। तथा च-

कदाचित् स दुष्यन्तो द्वयोः पार्श्वयोर्विस्तृतसैकतालङ्कृतमालिनीसरिद्दृश्यान्यङ्कयति, कदाचित्तपोवनवाटिकानां दृश्यानि चित्रयति, कदाचिच्च हासपरिहासपराणां तिसृणामपि सखीनां व्यापारान् चित्रफलके निवेशयति। कदाचिच्चै प्रणयव्यापारपरायणां लज्जावनतवदनां मुग्धां शकुन्तलां मानसफलकादवतार्य चित्रफलकाधिरूढां विदधाति।

एवमेकस्मिन् वासरे मध्याह्नोत्तरवेलायां दुष्यन्ते शकुन्तलाप्रणयव्यापारगतमानसचित्राणि पट्टचित्रफलकेष्ववतारयति देवराजदूतस्य मातलेरागमनसूचना समायाता।

अथ सावधानेन सम्राजा लब्धादेशेन कञ्चुकिना बहिर्गत्वा तदनन्तरमन्तः प्रविश्यासाविन्द्रचारो दुष्यन्तसमक्षं समुपस्थापितः। मातलिमवलोक्यैव ससम्भ्रमं समुत्थितो दुष्यन्तो द्विपदं पुरस्सरो भूत्वा तं सम्भावयामास। आसने समुपवेश्य चासौ जगाद -

"एहि मातले ! मित्र ! एहि ! चिराद् दृष्टोऽसि। केन हेतुना अमरावतीं विरहौत्सुक्यनिर्भरां कृत्वा मम दुष्यन्तस्य राजभवनं भवता पवित्रीक्रियते ? देवराजस्तु किं कुशली ?"

सहसैव मातलिः किमपि वक्तुमसमर्थ इवेतस्ततो विलोकयामास। दुष्यन्तस्यादेशेन कञ्चुकिना सर्वमेव चित्ररचनासम्भारजातं सावधानतया तस्मात् स्थानादपनीय सुरक्षितरूपेण रक्षितम्। तदनन्तरञ्च नरपतिः मातलिना सह मन्त्रणाकक्षं प्रविश्य, तं समुचित आसने समुपवेश्य स्वयमपि चैकमासनमधिष्ठाय सस्नेहं साश्वासनं प्रोवाच -

"सखे मातले ! कथ्यतां का वार्ता ? निर्मक्षिकमेवैतत् स्थानम्। निर्भयं ब्रूहि। अपि त्रिविष्टपजनपदेऽमरावत्यां देवराजधान्यां सर्वे कुशलिनः ? देवराजो मम परममित्रं कि कुशलक्षेमेण वर्तते ? भवांस्तु किञ्चिदुच्छ्वसित इव, सम्भ्रान्त इव, उद्विग्न इव, उत्तेजित इव प्रतीयते। भवदागमनस्यात्र किमपि विशिष्टं प्रयोजनम् ? सर्व एव वृत्तान्तो विस्तेरण वर्णनीयः।"

मातलिः प्रोवाच-

"राजन् ! नाविदितो भवता कोऽपि वृत्तान्तः ! भवच्चारास्त्रिभुवनं

व्याप्नुवन्तोऽतिगूढानपि समाचारान् मानसान्तर्निहितानपि भावान् भवत्सकाशं प्रेषयन्ति। तथापि मया निवेद्यते।

"जानात्येव भवान् यत् त्रिविष्टपस्य परे पारे उत्तरवर्तिनि दिग्विभागेऽसुरजातीनां निवासः। असुराणां देवैः सह चिरपरम्परागतं वैरं सर्वत्र प्रसिद्धम्। स्वल्पमप्यवसरं लब्ध्वा परमपराक्रमशालिनोऽमित-संख्याबलसंयुता असुराः स्वर्गं प्रविश्यामरावतीं देवराजधानीमाक्रामन्ति। सदैव ते त्रिविष्टपं निजाधीनं विधायेन्द्रासनमप्यधिकर्तुं प्रयतन्ते।

पुरैकस्मिन् समयेऽसुराधिपतिः कालनेमिस्त्रिविष्टपमाक्रान्तुं साहसी बभूव। तस्मिन्नवसरे भवतामेव साहाय्येनेन्द्रस्तं तथा कुत्सितं मारं मारयित्वा पराजिगाय, यथाऽसौ बहुवर्षं यावद् गिरिकन्दरासु निभृतमात्मानं सङ्गोप्य बहिः स्वातन्त्र्यरूपेण भ्रमणस्यापि साहसं न चकार। परं सम्प्रति तस्य सुतः कालेयकः पितुरप्यधिकपराक्रमशीलः, साहसी, शौर्यसम्पन्नः, वीर्यवान्, षाड्गुण्योपायादिसमन्वितो राजनयनिष्णातोऽमितासुरसैनिकबलसमवेतो विविधायुधसामग्रीसमधिष्ठितो, न केवलं त्रिविष्टपं, परमुत्तरकुरुपर्वत-सीमान्तप्रदेशानपि प्रविश्य देवराजधानीमाक्रान्तां विधातुमीहते।

राजन्! देवसेना तस्यावरोधनेऽसमर्था विद्यते। समरेषु कपटमाया-चरणाभ्यासिन इमेऽसुरसैनिकाः सम्मुखमागत्य न युद्धाय प्रवर्तन्ते। परन्तु ते प्रच्छन्नरूपेणादृश्यताङ्गता अवसरेष्वाक्रमन्तः सम्मुखमायाता आत्मनो दुर्बलान् परिलक्ष्य तत्क्षणं प्रद्रुताः दुर्गमस्थानेषु तिरोहिताः भवन्ति। ततश्चावसरं लब्ध्वा पुनरप्यलक्षितरूपेणाक्रामन्ति।

राजन्! कालेयकस्यास्य न केवलं त्रिविष्टपराज्याधिकारस्यैवाऽऽवाकांक्षा, परमसौ सकलामेव देवजातिमार्यजातिञ्च समूलमुन्मूलयितुं चेष्टते। प्रजासु तस्य सैनिकानां वर्णयितुमशक्याः भीषणाः लोमहर्षका अत्याचाराः स्थिरहृदयानामपि वीराणां मनांसि कम्पयन्ति। न केवलं देवा एव तस्यात्याचाराणां भाजनानि, अपितूत्तरकुरुजनपदोत्तरसीमानिवासिन आर्यावर्तीया अपि तेन मृग्यन्ते।

असुरसैनिकाः ग्रामान् प्रविश्य मन्दिराणि, पूजास्थलानि भङ्क्त्वा गृहाणि वह्निना दीपयन्ति, महार्हाणि वस्तूनि लुण्ठन्ति, पुरुषान्, बालकान् वृद्धान् व्यापादयन्ति, प्रौढाः वृद्धाः वा स्त्रियः निघ्नन्ति, युवकान् रज्जुभिर्निबध्य

कशाभिस्ताडयन्तो दासकर्मकररूपेण प्रयोजयन्ति, यौवनशालिनीः रमणीः निगृह्य बलात्कारेण पीडयन्ति। अथ च सर्वत्र प्रजासु महान् हाहाकारः श्रूयते। क्वचित् पुरुषवधः, क्वचिद् वनितापहरणं, क्वचिद् भवनदाह इत्येव तस्य देशस्य समाचारः।

राजन्! सर्वत्र किंवदन्तीयं प्रसिद्धा, यदयं कालेयक आर्यावर्तदेशमध्ये निवसतोऽसुरानपि विद्रोहाय, आर्यजनेष्वत्याचाराय प्रोत्साहयति। भवतोऽस्मिन् देशे क्वचित्क्वचिदितस्ततो विरला असुरवसतयो विद्यन्ते। क्वचिदपि च नैर्दुर्गरचनाऽपि विहिता। ते सर्वेऽसुराः कालेयकप्रोत्साहनेन भवतो विद्रोहं कृत्वा आर्यावर्तमधिकर्तुं योजनातत्पराः वर्तन्ते। कालेयकसैनिका अपि कदाचित् प्रच्छन्नरूपेण कदाचिच्च प्रकटरूपेण भवच्छासनान्तर्गतराज्यसीमवर्ति-प्रदेशान् प्रविश्य तेषामसुराणां सहायतां कुर्वन्ति।

राजन्! महदुपद्रवकारिभिरत्याचारपरायणैरेभिरसुरसैनिकैरतिभीषणा विषमा परिस्थितिः समुपस्थापिता। ते कृषिं विनाशयन्ति, ग्राम्यानपि पशून् बलात् प्रचोद्यापहरन्ति, शिल्पिनां वधविनाशं कुर्वन्ति, सार्थवाहानां सार्थान् विलुण्ठन्ति, ग्रामाणां नगराणाञ्च सुन्दरभवनानि भस्मसात् कुर्वन्ति। न केवलं देवा, आर्याश्चाप्येभिर्दासीकृता, अपि च किन्नरगन्धर्वयक्षविद्याध-रजातीयाः युवकयुवतयोऽपि तैर्दासभावं नीताः।

अहो, एतदपि श्रूयते, यदेताः दासीकृताः युवकयुवतयस्तैः विपणिषु विक्रीयन्ते। नरमांसभक्षणमप्येभिः प्रारब्धमिति जनश्रुतिः। विशेषतस्तु मुनीनाम्, ऋषीणां, तपस्विनाञ्च रुधिरं पीत्वा, मांसभक्षणं कृत्वा ते तेषां शिरोभिः कन्दुकक्रीडां कुर्वन्ति। एनमेव समाचारं श्रावयितुमहमत्रायातः। प्रतिकर्तुञ्च भवानेव प्रमाणम्।

राजन्! कञ्चित्कालं यावदस्यामेव स्थित्यां विद्यमानायामयं कालेयकः क्रमशः प्रबलः प्रबलतरः प्रबलतमश्च वर्तिष्यते। त्रिविष्टपानन्तरं भवानेव तस्याक्रमणस्य लक्ष्यम्। अतः समयातिक्रमणपूर्वमेव स प्रतिकरणीयो वध्यश्च। सन्दीप्ते भवने कूपखननोद्यमो वृथा भवति। इन्द्रेण भवता च सम्भूय स दुराचारी कालेयको हन्तव्य एव।"

इन्द्रसारथेर्दूतस्य मातलेरिमानि वचांस्याकर्ण्य क्रोधवह्निसन्धुक्षितहृदयो दुष्यन्तस्तमाह-

"मित्र मातले ! आश्वसिहि, समाश्वसिहि। इमेऽधार्मिकाः पापशालिनो दुष्टहृदया असुराः देवानामस्माकञ्च प्रकृतिवैरिणः। जलानलयोरिव, तेजस्तिमिरयोरिव, नकुलसर्पयोरिव, काकोलूकयोरिवात्र विरोधः कालेयकस्य वधेनैव प्रशान्तिं यास्यति। इमेऽसुरसैनिकाः प्रबलाः भवेयुरिति तत्पूर्वमेवाहं तेषां दमनमनिवार्यरूपेण विधास्ये। अधुनैवाऽहं सेनापतिमादिशामि, यदसावार्यसेनां सज्जितां विदधातु। प्रातरेव वयं ससैन्यमितः कालेयकदमनाय प्रस्थास्यामहे।"

परन्तु मातलेरभिप्रायो न तथाविधः। स तु केवलं सम्राजो दुष्यन्तस्यैवाभिलाषी वर्तते, यस्य सैनापत्ये देवसेना कालेयकसैन्यं विनाशयितुं विद्रावयितुं वा समर्था भवेत्। तेन निवेदितम् -

"राजन् ! सेनया सह तस्मिन् नतोन्नते समविषमे पर्वतीये प्रदेशे प्रयाणमतिकठिनम्। अतिविलम्बस्य समयहानेश्च तत्र सम्भावना। एतस्मिन्नन्तरालेऽगणितानामसम्भाव्यानां घटनानां सम्भावना। न जाने किं घटयिष्यति विधिः ? असुरसैनिकानवरोद्धुं पराजेतुं वा, विद्रावयितुं विनाशयितुं वा देवसेनैव पर्याप्ता। परं न विद्यते कोऽपि तत्र युद्धविद्याविशारदः सेनापतिः। केनाप्यनाख्येयेन हेतुना देवराज आत्मानं देवसेनायाः सेनापतित्वेऽसमर्थमनुभवति। सेनापतिपदे भवन्तमभिषिच्यासौ विगतचिन्तो भविष्यति। अतो भवान् मया सह विनैव सेनां विनैवान्यं कमपि सहायक-मेकलः प्रतिष्ठताम्।

राजन् ! समयः स्वल्पः, शत्रुश्च शिरसि वर्तते। इन्द्रस्तु स्वयमेव मया सारथिना सञ्चोद्यमानं निजं स्यन्दनं भवन्तमानेतुं प्रेषयामास। समविषमेषु नतोन्नतेषु भूमिभागेष्वयं स्यन्दनः समानरूपेण तीव्रगत्या प्रधावति। पर्वतीयभूमिभागमार्गेषु सञ्चालनायैवास्य विशेषरूपेण वैज्ञानिकैः शिल्पिभिर्निर्मितिर्विहिता।"

मातलेर्वचनानि निशम्य समयस्य गम्भीरतामनिवार्यताञ्च लक्ष्यीकृत्य महानुभावो वीरभावोत्साहप्रोज्ज्वलितमानसो दुष्यन्तस्तत्क्षणमेव प्रस्थाननिश्चयं प्रकटयाञ्चकार। प्रधानामात्यं देवरातमाहूयासौ राज्यप्रबन्धविषये तात्कालिकानावश्यकानादेशान् निर्दिदेश। तदनन्तरमिन्द्रसारथेर्मातलेर्निर्देशे धावन् स्वर्गरथो हिमगिर्यधित्यकोपत्यकागतसमविषमभूमिभागानतिक्रम्य

स्वल्पेनैवावधिना अमरावतीं सम्प्राप।

(२२)

इन्द्रनिमन्त्रणानुरोधेन पूर्वमप्यसकृदेव दुष्यन्तस्यामरावतीयात्रा बभूव। अतिसौन्दर्यसमृद्धिशालिनी देवानां प्रधाननगरी देवतानां देवाङ्गनानामप्सरसाञ्च सततं प्रवर्तमानैरामोदोत्सवैः नृत्यगीतवाद्यैः सदा प्रफुल्लितेव, हर्षितेव आनन्दितेव गुञ्जितेवाऽदृश्यत। परं सम्प्रति तु तस्याः विचित्रा दशा विस्मयकारिणी समभूत्। तुषारपातेन म्लाना विशीर्णा लतेव नयनवेदनादायिनी साऽलक्ष्यत। राजमार्गेषु जनसम्मर्दाभावात् काचिच्छून्यताऽविद्यत। अत्यल्पसंख्यायामेव जना अनिवार्यकार्यवशादेव गच्छन्तो दृश्यन्ते स्म। श्यामश्वेतताम्रहरितवर्णप्रस्तरफलकनिबद्धाः ये राजमार्गा अर्धरात्रं यावत् प्रमोदभरनृत्यन्तीनामितस्ततः प्रणयिकरावलम्बितानां देवाङ्गनानामरुणचरणतलस्पर्शानवाप्य रञ्जिता इव, गतिवशकम्पितगात्रपतितैः प्रसूनैः चित्रिता इवावर्तन्त, त एव सम्प्रति तत्स्पर्शसुखानुभूतिमननुभवन्तः विरहसन्तप्ता इव शून्यशून्या इव संलक्ष्यन्ते स्म।

कुत्रचित् कश्चिज्जनो देवो वा काचिद् देवाङ्गना वाऽप्सराः वा यः कोऽपि केनापि कारणेन गृहाद् यदि बहिर्निरगच्छत्, भयत्राससङ्कुचितसकलगात्रो विषण्णवदनः झटित्येव स्वकार्यं सम्पाद्यासौ पुनः गृहं चौर इव सशङ्कितः प्राविशत्। जनहीनराजमार्गे तस्मिन् प्रचलन् प्रचण्डध्वनिना सकलस्यैव देवपुरस्य प्रान्तराणि बधिरयन्, आशौत्सुक्यगर्भनयनाभिर्देवताभिर्निरीक्ष्यमाणोऽसौ दुष्यन्तेनाधिष्ठितः स्यन्दनः सहसैवेन्द्रभवनस्य बाह्यद्वारतोरणसमीपं समाससाद।

कुरुदेशसम्राजो दुष्यन्तस्य त्रिविष्टपप्रवेशसमाचारस्त्विन्द्रेण सहस्राक्षेण सन्देशहारिभिश्चारैः प्रथममेव विज्ञात आसीत्। हस्तिनापुराधीशस्यामरावतीबाह्यद्वारप्रवेशोऽपि तस्य विदितः। निजभवनद्वारदेशे सम्प्राप्ते स्यन्दने, देवराजो मित्रं सभाजयितुं तत्रैव समतिष्ठत्। रथादवतरन्तं मित्रं तरसैव प्रसह्यैव दक्षिणकरतलेन दक्षिणभुजेन गृहीत्वा सुराणां स्नेहकरुणौत्सुक्यसम्भृतनयनदृष्टिरश्मिभिराकृष्यमाण इवासौ झटित्येव मन्त्रणागृहमानिनाय। देवानां राजगुरुर्बृहस्पतिरिन्द्रपुत्रो जयन्तोऽन्ये च प्रमुखदेवसेनापतयोऽग्नि-वायु-यम-वरुण-कुबेरादयस्तत्र पूर्वमेवागत्य

स्वस्वनिर्धारितेष्वासनेषु समुपविष्टाः देवराजमिन्द्रं कुरुराजं दुष्यन्तञ्च प्रतीक्षमाणा अवर्तन्त।

या विकटा विषमा वा परिस्थितिः समुत्पन्ना, सैव तेषां विचार-विषयाऽवर्तत। त्रिविष्टपमधिकर्तुं कालेयकस्यासुरसेना सततमप्रतिहत-गतिस्त्वरितगत्या वर्धमाना बभूव। तस्य अवरोधनाय विहिताः देवानां सर्वे प्रयासाः विफलतां गताः। स्वयं देवराजोऽपि तत्र किञ्चिदपि प्रतिकर्तुमसमर्थो विवश एवालक्ष्यत। यदि कालेयकस्य तत्सैन्यस्य च गतिरवरुद्धा न भवेत्, कतिपयेष्वेवाङ्गुलिसंख्यातेषु दिवसेषु साऽसुरसेनाऽमरावतीमधिकृत्य देवान् विद्रावयिष्यति दासान् वा विधास्यति।

इन्द्रेण सह देवसभामन्त्रणागृहं सम्प्राप्त एव दुष्यन्ते देवानां हृदयेषु नवाशया सञ्चरितम्। कालेयकः पराजेष्यते, देवानाञ्च सुरक्षा भविष्यतीति भावभरिताशागर्भविलोचनैस्ते दुष्यन्तं प्रत्युन्मुखा अभवन्। मन्त्रणागृहद्वारदेश एव बृहस्पतिस्त्रिविष्टपाधिपकुरुजनपदाधिपयोः स्वागतञ्चक्रे। सर्वे च देवाः निजासनेभ्य उत्थाय दुष्यन्तमभिनन्दयामासुः। इन्द्रासनसमीपमेव तादृशमन्यदासनं दुष्यन्ताय सुसज्जितमभवत्। इन्द्रदुष्यन्तयोर्निजासनगृहीतयोः सर्वे देवाः निजनिजासनेषूपविष्टाः। तदनन्तरं मन्दमन्दस्वरणैव तेषामेवंविधाः वार्तालापाः समभूवन् -

दुष्यन्तः- "देवराज ! महनीयानां देवानामधिपतिर्भवान् पराक्रमशौर्यदाक्ष्यादिगुणसम्पन्नोऽपि दण्डनीतिप्रयोगविचक्षणोऽपि बज्राभिधानमहदमोघायुधधारकोऽपि कालेयकमसुराधिपतिं निरोद्धुं हन्तुं पराजेतुं वा न क्षमते, महदाश्चर्यकरमविश्वसनीयमित्येतत्।"

इन्द्रः - "राजन् ! रहस्यमयो वृत्तान्त एष अतीव गोपनीयः। नाहं देवनायकानामपि समक्षमेतद् रहस्यमुद्घाटयितुं पारये। देवसेनानां नेतृत्वं मह्यमशक्यमेव। नाऽहं कालेयकं हन्तुं क्षमः।"

दुष्यन्तः - "किमिदं रहस्यं मत्तोऽपि गोपनीयम् ?"

इन्द्रः - "मित्र दुष्यन्त ! कुरुजनपदाधिपतिभिः सह त्रिविष्टपाधिपानां चिरकालीना पुरातनी मित्रता। इयं मैत्रीपरम्परा प्रागैतिहासिककालादेवास्माभिरुत्तराधिकाररूपेण गृहीता। अथ च भवान् शरीरद्वयेऽपि मम प्राणैकतानं मित्रम्। भवतः किं

रहस्यम् ? तथाऽपि न मयाऽधुना विस्तरेण किञ्चिद् वक्तुं शक्यते। समये भवान् सर्वं ज्ञास्यति। सम्प्रति एतावदेव कथयामि, यन्मया कालेयकभार्या वरप्रदानेनानुगृहीता, नाऽहं स्वयमेव तां वैधव्य कष्टभागिनीं करिष्यामि। इत्येषा मे प्रतिज्ञा। इत्येतन्मे वचनम्। अत एव मयाऽस्मिन् समरे भवान् देवसेनापतिपदमलङ्कर्तुमामन्त्रितः।"

दुष्यन्तेन देवसेनायाः सेनापतित्वमङ्गीकृतम्। देवराजधान्यां सकले च त्रिविष्टपप्रदेशे समाचारोऽयं वनानल इव प्रासरद्, यत् कुरुदेशाधिपतिर्दुष्यन्तो देवानां समरसहायो भूत्वा समायातः। असुरैः सह समरेऽसौ देवसेनां सञ्चालयिष्यति। देवगणेषु युद्धाय नवोत्साहस्य सञ्चारः सञ्जजान। असुरसन्त्राससन्त्रस्तहृदयास्ते वीररससागरे निमग्ना बभूवुः। गणनातीताः देवसैनिकाः युद्धाभिलाषेणेन्द्रभवनं निकषा समवेता अभवन्। देवसेनानायका अग्निवरुणवायुयमकुबेरचन्द्रसूर्यादयस्तेषु सुव्यवस्थास्थापनाय संलग्नाः बभूवुः।

रजन्यामेव दुष्यन्तेन सकला समरव्यवस्था संस्थापिता। प्रातः सूर्योदयस्य प्रथमकिरणैः प्रकाशिते पूर्वक्षितिजे देवानामनीकिनी दुष्यन्तस्य नेतृत्वे कालेयकेन सह योद्धुं समराङ्गणं प्रति प्रस्थिता। इन्द्रपत्नी स्वयमेव निजदक्षिणकरपल्लवाङ्गुष्ठेन दुष्यन्तं रक्तकुङ्कुमतिलकेन भाले विभूष्य नीराजनया सभाजयामास। स्थालीनिहितदीपकानां प्रकाशेन दुष्यन्तस्य कान्तिमदाननं तया कान्तिमत्तरं विहितम्। शुभविजयसूचकैः शकुनैः सर्वेषामपि देवानां वदनानि दैदीप्यमानानि बभूवुः। हरिचन्दनचर्चितपारिजातपुष्पमाला स्वकण्ठादवतार्य सहस्राक्षेण दुष्यन्तस्य ग्रीवायां पिनद्धा। पारिजातकुसुमस्रक्सौरभेण सह दुष्यन्तशौर्ययशःसौरभेणापि सर्वासु दिक्षु प्रसृतम्।

पारिजातपुष्पाणामियं माला वैजयन्तीनाम्ना प्रसिद्धा न सरलसुलभा। पुष्पाणीमानि न कदाचिदपि म्लायन्ते। देवजनेषु किम्वदन्तीयं प्रसिद्धा, यदेतत्स्रग्विभूषितकण्ठो जनो न कदापि समराङ्गणे पराजयमवाप्नोति।

अगणितगतिप्रचाराश्चाराः पूर्वस्यां प्रदोषवेलायामेव समाचारान् प्रैषयन् यदसुरसेना देवराजधानीतश्चतुर्दशक्रोशमात्रविप्रकृष्टान्तराले समायाता। हिममण्डितातितुङ्गमेरुशिखराण्युल्लंघ्य सा सेना भृगुमन्दरपर्वतयोर्मध्य-

वर्तिन्यामुपत्यकायां तत्स्थानं प्रविष्टा, यत्र सुरसरितो हिमानी द्रवरूपेण परिणता किञ्चिदिव वक्रीभूय प्रवहति। सुरसरितो द्वयोस्तीरयोः सैकतभूमिः लघुबृहदाकाराभिः शिलाभिश्चिताऽपि किञ्चिद् दूरं यावत् समतलवर्तिनी वर्तते। तत्र सरित्स्रोतसि सेतुं विरच्य तदुभयतः समतलभूमिभागेषु कालेयकसैन्यस्य शिविराणि स्थापितान्यासन्। रजन्यां विश्रम्य सा सेना प्राच्यां समुदितायामुषस्येव देवराजधानीमाक्रान्तुमुद्योक्ष्यते।

समयोऽयं चैत्रमासस्य। वसन्तस्य साम्राज्ये सर्वत्र वर्तमानेऽपि अत्युन्नतपर्वतीयभूमिभागेषु प्रकृत्या शैत्यं न तथा विसृष्टम्। हेमन्तर्तोरुत्पातानां प्रभावाः यत्र तत्रावलोक्यन्ते स्म। हिमाच्छादितातितुङ्गगिरिशिखराणां हिमानीप्रभवाणां सुरसरिति प्रवहतां लघुबृहदाकाराणां दिवसे दिवसकरकरैः रजतराशीनामिव निशायां चन्द्रचन्द्रिकया हेमचयानामिव प्रकाशमानानां हिमखण्डानामेतेषां संस्पर्शमवाप्य हिमशीतलः पवनस्तत्रत्यानां जीवधारिणां वपूंषि सततं प्रकम्पयन् तान् पावकतापं सेवितुमौर्णवसनान्यतिस्थूलानि च धारयितुं प्रेरयति स्म। आपादशिरःस्थूलैरौर्णवसनैः परिवृतास्ते हिमशीतप्रचण्डवाताघातभयेन मुखानामनावरणेऽप्यसमर्थाः समलक्ष्यन्त। सैकतेषु पर्वतारोहणेषु च यत्र तत्र हेमन्तर्तुर्हिमपातसूचकाः हिमावशेषाः सर्वत्रावर्तन्त।

सुरसरितमभितः सैकतभूमिमुत्क्रम्योत्तरदिशि मन्दरपर्वतस्य दक्षिणदिशि च भृगुपर्वतस्योत्तुङ्गता नभो भिनत्ति। अधित्यकायां किञ्चिद् दूरं यावल्लेखनीयशुभ्रत्वग्धारकाणां भूर्जवृक्षाणां वनानि वर्तन्ते। तदुपरि च हिममण्डितानि शिखराणि। भूर्जवृक्षाणां मध्ये सुरभितनीलवर्ण-कुसुमचयैरभिनवोद्गतैः पल्लवैश्चाचितेषु ग्रन्थिपर्णक्षुपेषु विचरन्तः सततं सावधानाः जागरूकाः लघ्वग्रदीर्घपश्चपादाः सितचित्तिकाचितबभ्रुवर्णकायाः क्षुद्रमपि सङ्केतं प्राप्य तीव्रगत्या कूर्दमानाः पलायमानाः कस्तूरिकामृगाः मृगीभिः समं प्रणयकेलिनिमग्नमानसाः संलक्ष्यन्ते। नाभिमृगाणामाश्रयेण तत्रत्यानि समतलशिलातलानि पृष्ठभागेषु सुरभितानि बभूवुः।

हिमशिखरेभ्यः प्रस्रवन्त्यः स्वच्छदुग्धसमनिर्मलपयोवत्यो लघुधाराः स्रोतस्विन्योऽगणितसंख्यायामवतीर्य शिलातलतरुस्कन्धसंघट्टनमवाप्योच्छलन्त्य उपत्यकामागत्य सुरसरिति विलयं यान्ति। मन्दरगिरिदरीमुखात् कस्मादपि

स्रोतसो निस्सृत्य तीव्रगत्या प्रवहन्ती उच्छलन्ती पाषाणखण्डैः संघट्टमाना नीलस्वच्छजलप्रवाहिन्यपि दुग्धशुभ्रकणप्रक्षेपिणी काचित् पयोधारा, देवगङ्गेति नाम्ना प्रथिता सुररसरित्यात्मानं विलाप्य सरितां पतिमुपगच्छति।

सुरसरितो दक्षिणे तीरे भृगुपर्वतोत्सङ्गे नदीतीरवर्ती प्रवाहविपरीतगामी अमरावतीमार्गः। किञ्चिदुदङ्मुखीभूय मार्गोऽयमूर्ध्वं गत्वा तत्रातिसङ्कीर्णतां प्रपद्यते, यत्र भृगुमन्दरपर्वतभूमयः परस्परं संयुज्यन्ते। गिरिद्वाररूपोऽयं पन्थाः काठिन्येनैव पुरुषद्वयपदसञ्चारयोग्यः। सङ्कीर्णगिरिद्वारमतिक्रम्य पुनर्विशालविस्तृतसमभूभिर्विस्तीर्णा। अस्मात् स्थानादमरावतीं यावद् विततो राजपथः सुगमः सरलायामः समस्थलश्च गच्छति। न काऽपि मध्ये महती सुकठिना प्राकृतिकबाधा दुर्गमता वा वर्तते। त्वरितगत्या अञ्जसा प्रसर्पन्ती स्थानादस्मादसुरानीकिनी प्रहरद्वयमात्रेणैवामरावतीं समासादयितुं समर्था।

प्रबलपराक्रमशालिनामसुरसैन्यानामवरोधाय दुष्यन्तस्तदेव सङ्कीर्णं गिरिद्वारं समुचितं निर्धारितवान्। कृष्णपक्षस्यान्तिमतिथिरवर्तत। विभावर्याः सूचीवेध्यं गहनं तमो गिरिनदीवनानि समविषमधरातलान्याच्छाद्य निजसाम्राज्यं संस्थापयामास। दुष्यन्तस्तु प्रदोषवेलायामेव प्रयाते सूर्यालोके समागते चान्धकारे निशागमे सहस्रशो देवसैनिकान् निहितकार्मुकस्कन्धान् नाराचनिहिततूणीरान् निशिताग्रदीर्घप्रासान् असिबद्धकटिकान् उपत्यकामभितो भृगुमन्दरपर्वतयोरधित्यकयोर्निभृतं सुगुप्तरूपेण न्ययोजयत्। तत्र च तैरगणितसंख्यासु लघ्वाकाराणां बृहदाकाराणां तीक्ष्णकोटिकानां वर्तुलानां सुचिक्कणानां खरखरायमाणानाञ्च प्रस्तरखण्डानां शिलानां पादपस्कन्धानां स्थूलविटपानाञ्च राशय एकत्रीकृताः।

निशाशैत्येन कम्पमानगात्रा अपि देवसैनिकाः कालेयकसैन्यावलोकनभयादग्नितपं विमुच्यौर्णवसनाच्छादनैरेव हिमशीतलवातप्रहारान् वारयन्तो युद्धोन्मादोत्साहसम्भृतमानसा असुरसैनिकानां गतिविधिं प्रेक्षाञ्चक्रिरे।

पूर्वक्षितिजे प्रत्यूषस्यागमनपूर्वमेव मन्दालोके सर्वत्र प्रसृते, दुष्यन्तः सहस्रद्वयसंख्यकैः देवसैनिकैः सह तरसा समागत्य तं सङ्कीर्णगिरिद्वारमार्गमवरुरोध। तेन सकल एव तदुद्योगस्तथा समायोजितो यथा न कोऽपि परपक्षगुप्तचरस्तस्य समरयोजनां ज्ञातुमलम्बभूव। प्रत्यक्षं त्विदमेव

प्रतिभाति स्म, यद् देवानीकिनी परमपराक्रमशालिभ्योऽसुरेभ्यो भीता किंदिशीका विद्रुता, कालेयकस्य चामरावतीप्रयाणस्य मार्गो निरवरोधो निर्विघ्नश्च वर्तते।

प्रत्यूषस्य मन्दालोके गिरिसानुषु समवतीर्णे, अरुणप्रकाशेन सुतप्तहेमवतीष्विव रञ्जितासु हिमगिरिशृङ्खलासु कालेयकेन पूर्वनिर्धारित-योजनानुसारं स्वकार्योद्योगः समारब्धः। असुरवाहिनी सुरसरित्तटवर्तिमार्ग-मवलम्ब्याग्रेसरीभूता। भेरीमृदङ्गतूर्यढक्काकाहलादिसैन्यवाद्यानां वाद्यमानानां तुमुलो भीरुहृदयबिभीषको निर्घोषो दुष्यन्तस्य तत्सहायकानाञ्च देवभटानामपि कर्णकुहराणि प्रविष्टः। समराकांक्षिणी देवसेना पूर्वमपि सुसन्नद्धा असुराणां वधाय समुद्यता बभूव। परं दुष्यन्तस्त्वसुरसैनिकानां सङ्कीर्णगिरिद्वारोल्लंघनस्य प्रतीक्षाकरणमेव साधुतरममन्यत।

सङ्कीर्णोपत्यकामार्गस्थिताऽसुरसेना कठिनारोहणायां दुर्गमायामधि-त्यकायां प्रच्छन्नस्थितदेवसेनापेक्षया न तथा सुविधाजनकस्थित्यामवर्तत। निकटायाते च सङ्कीर्णगिरिद्वारे पर्वताधित्यकासु स्थितैर्देवदारुभूर्जपादपशैला-दिव्यवधानसंश्रयैर्देवसैनिकैः सहसैव प्रस्तरखण्डानां पादपस्कन्धशाखानां निशिताग्रनाराचानाञ्च वर्षणमारब्धम्। अनेनाप्रत्याशितेनाघातेन चमत्कृताः कुत्रचिदप्याश्रयमलभमानाः शतशोऽसुरभटा अङ्गविहीनाः सञ्जाताः। अन्ये च नाराचविद्धाः वा प्रस्तरशिलाहताः वा तरुस्कन्धविटपाघातसंपिष्टाः वा प्राणरहिताः भूत्वा अधस्ताल्लुण्ठन्तः सुरसरित्सलिले पतितास्तत्रत्य-शिलाभिर्हिमखण्डैश्च संघट्टनं प्राप्य स्फुटितशिरःकपालाः सुतीव्रधारया प्रवाहिताः। एवञ्च तस्य कालेयकस्य सैन्यस्यार्धभागो विनष्टः।

परं कालेयकोऽपि नाल्पीयान् साहसी। परमपराक्रमी समरयोद्धा सोऽसुराधिपतिः प्रबलं संघर्षन् देवभटानां प्रहारैरात्मानं रक्षन् शौर्यशालि-भिरनेकैरसुरभटैः सार्द्धं सङ्कीर्णगिरिद्वारमतिक्रम्य विततसमभूमिभागं समायातः। समागत्यैवासौ देवभटैः सह समक्षमेव स्थितं, तमेव परमं शत्रुं मन्यमानो दुष्यन्तमतिभयानकवेगेनाचक्राम। कालेयकमनुगच्छन्तोऽन्येऽपि बहवोऽसुरसैनिकाः सङ्कीर्णगिरिद्वारमुल्लंघ्य तत्र समायाताः। तदनन्तरं महान् देवासुरसङ्ग्रामो बभूव।

दुष्यन्तकालेयकयोरार्यजनाधिपासुरजनाधिपयोः परमपराक्रमशलिनो-

र्युद्धदक्षयोर्विविधायुधप्रयोगकुशलयोः समरोत्साहवतोरतिभीषणः संघट्टः समजायत। प्रथमं तावद् दूरस्थितावेव तौ समारोपितमौर्वीकार्मुकौ संयोजितनाराचावन्योन्यं शरसन्निपातैः पराजेतुं वा निहन्तुं वा प्रायतेताम्। तदनन्तरं स्वल्पेनैव समयेन स्कन्धपृष्ठनिबद्धतूणीरेषु शररिक्तेषु सत्सु तौ परस्परं निकटमागत्य कटिप्रदेशनिहितचन्द्रहासावाकृष्य द्वन्द्वयुद्धपरौ संघट्टितौ। न तत्र कोऽपि न्यूनो वाऽधिको वा बलशाली समरदक्षश्च समदृश्यत। तुल्यबलयोरेव कञ्चित्समयं यावद् वामं दक्षिणञ्च परिवृत्य, अपसृतप्रसृतपादयोः चन्द्रहासौ प्रहरतोरन्योन्यं प्रहृत्य प्रहृत्य युध्यमानयोस्तयोः खड्गसञ्चालनचातुरीं विलोकयन्तो विस्मयाभिभूताः सर्वेऽपि देवासुरयोद्धारः परिवृत्य तौ परस्परं विस्मृतशत्रुभावाः निर्निमेषनयनाः समैक्षन्त। कदाचिद् दुष्यन्तः कदाचिच्च कालेयकः प्रबल इव समलक्ष्यत। परं दुष्यन्तेन सह देवानामपि भाग्यं प्रबलतरमासीत्। विधिस्तेभ्योऽनुकूलोऽवर्तत।

सहसैव दुष्यन्तस्यैकं भीषणं प्रहारमसहमानः कालेयकः सव्येन पादेन किञ्चित् प्रास्खलत्। लब्धावसरो दुष्यन्तस्तत्क्षणमेव सुदृढमुष्टिगृहीतचन्द्रहासमुत्तोल्य कालेयकशिरसि तथा प्रजहार, यथा कान्तलोहशिरस्त्राणसहितं तस्योत्तमाङ्गं कपालमध्यादारभ्य कन्धरांपर्यन्तं द्विधा च्छिन्नम्। तत्क्षणमेव यमदूतास्तस्य हृदयान्तर्निहितमङ्गुष्ठमात्रमात्मतत्त्वं सुदृढैः पाशैर्बद्ध्वा यमलोकमनयन्। निष्प्राणश्च तस्य कायो भूम्यां पतितः कतिपयक्षणं यावत् प्रस्फुरितो भूत्वा प्रशान्तभावं गतः।

यमलोकं गतेऽपि कालेयकेऽसुरनाथेऽसुरसैनिकाः न भयभीताः बभूवुः। तेषां साहसातिरेकस्तथैवाऽवर्तत। पूर्वतोऽपि प्रबलतरवेगेन विगलित-मरणभयास्तेऽग्रेसरणाय प्रयत्नपराः सञ्जाताः। प्रबलवेगेन ते देवभटानाचक्रमुः। परमसुराधिपस्य वधेन प्रोत्साहिता देवसेना तेषां प्रबलाक्रमणवेगमवरुध्य शत्रुसंहारयज्ञे दीक्षितेव यज्ञबलिपशूनिवासुरान् संजहार। सहस्रशोऽसुर-सैनिकास्तत्र युद्धे निहताः। हतावशिष्टाश्च प्राणरक्षार्थं विपरीतदिशासु पलायमाना अपि देवानां कार्मुकेभ्यो विमुक्तानां नाराचानां करमुत्तोल्य प्रास्तानां प्रासानाञ्चाघातैः पञ्चत्वङ्गताः। एवमाक्रमणकारिषु असुरसैनिकेषु न कोऽपि जीवन् निवृत्तः।

कालेयकस्य वधं विधायासुरसैनिकांश्चाशेषतो निहत्य विजयवाद्यैर्दिगन्तान्

बधिरयन्ती महान्तमुल्लासं प्रकटयन्ती, दुष्यन्तस्य, देवराजस्य देवनायकानाञ्च जयघोषणैः स्वकीयविजयमसुरपराजयञ्च सूचयन्ती देवानीकिनी दुष्यन्तस्याध्यक्षतायाममरावतीं प्रतिनिवृत्ता। अस्मिन् भाग्यनिर्णायके भीषणे सङ्गरे तस्य मनुजाधिपस्य विलक्षणं साहसं, शौर्यं, समरदक्षता, शस्त्रसञ्चालनयोग्यतेति गुणानां परिचयः सकलैरेव देवगणैः प्राप्तः।

दुष्यन्तस्य विजयेन सह तस्य यशःसौरभेण सर्वत्र प्रसृतम्। देवानां विजयस्य हेतुर्दुष्यन्त एवासीत्। तेषां प्रसन्नतायाः न कोऽप्यवधिरविद्यत। देवसैनिकैः सहामरावतीं प्रविशतो दुष्यन्तस्य देवाः, देवाङ्गना, अप्सरसश्च हार्दिकं सोल्लासं स्वागतञ्चक्रुः। अनुपममेवैतद् दृश्यमासीत्। सकला एव देवप्रजाः दुष्यन्तसमागमनमार्गे सुदूरं यावद् द्वयोः पंक्त्योः स्थिताः स्वनयनकमलपुष्पाणीव हृदयस्नेहकुसुमानीव सुरभितदिव्यसुमनांस्यवर्षन्त। दुष्यन्तस्तु तैर्देवबालानयनसरोजैः स्वागतीक्रियमाणो दिव्यप्रसूनस्रग्भिराच्छादितः। अमरावत्याः मुख्यप्रवेशद्वारतोरणादारभ्य इन्द्रभवनपर्यन्तं सकल एव राजपथो विकसितसुरभितचित्रविचित्रसुमनोभिराकीर्णः।

देवसंसद्यपि देवैर्दुष्यन्तसत्कृतिसमारोहोऽभूतपूर्व एव समायोजितः। देवराजो निजभवनतोरणसमुपस्थितो बाहुभ्यामेव विजेतारं मित्रमानीय इन्द्रासनस्यार्धभागे समुपावेशयत्। पारिजातकुसुमानां दिव्या सुरभिता माला, दुष्यन्तायैव सुरक्षिता, सुतेन जयन्तेनापि सस्पृहं साभिलाषं वीक्ष्यमाणा, सहस्राक्षेण विजेतुः सुहृदः कण्ठे पुनः पिनद्धा।

तदनन्तरं काव्यरचनाकौशलान्वितेन सकलविद्यामर्मज्ञेन शिक्षाधिकारिणा बृहस्पतिना दुष्यन्तशौर्यपराक्रमाभिव्यञ्जिनी काव्यमाला मधुरसङ्गीतमयकण्ठध्वनिना सस्वरं पठिता। विविधाभूषणप्रसाधनसुशोभिताभिरतिसूक्ष्मकौशेयवसनपरिधानान्तराललक्ष्यमाणगात्रसौष्ठवाभिर्लावण्यसौन्दर्यगुणैरेव निर्मिताभिर्विधिना, नृत्यगीतवाद्यकुशलाभिर्हृदयहारिणीभिरप्सरोभिर्दुष्यन्तचरितोपलक्षितगीतानि अभिनयकुशलनृत्येन सह प्रस्तुतानि। एवं विजयमुपलक्ष्यीकृत्य देवराजधान्याममरावत्यां पञ्चदशदिवसपर्यन्तं मापूर्णचन्द्रोदयमानन्दोत्सवानामायोजनान्यभूवन्। तत्र च दुष्यन्तः सर्वैः सम्मानितः।

कालकेयासुरवधानन्तरं पञ्चदशदिवसानामवधिर्व्यतीतः। दिव्यान् विलासानुपभुञ्जानस्य तत्रत्यानां रमणीयानां सुन्दरीणामप्सरसां सान्निध्यम-

नुभवतो दुष्यन्तस्य ते दिवसाः क्षणा इव व्यतीताः। परन्त्वधुना तेन हस्तिनापुरं प्रतिनिवर्तनाय इन्द्रस्यानुमतिः प्रार्थिता। पूर्णचन्द्रोदयानन्तरमपरस्मिन्नेव दिवसे प्रतिपदि स स्वमित्रं नाकाधिपतिं वासवमुपगम्य स्वकीयमभिलाषं प्रकटयाञ्चकार। असुररिपोर्हस्तिनापुराधीशस्य गमनमनिच्छन्नप्यसौ नाकाधिपतिस्तस्याऽऽग्रहमस्वीकर्तुं न पारयामास। दुष्यन्तेनापि स्वराज्यस्य प्रजाजनस्य च रक्षणं वा पालनं वा करणीयमेव। तेन दुष्यन्तस्य त्रिविष्टपात् प्रस्थानमनुमतम्।

अथ दुष्यन्तस्य निवर्तनोपलक्ष्ये पूर्णचन्द्रोदयानन्तरं द्वितीयायां तिथौ महानुत्सव अमरावत्यामायोजितः। अहं पूर्वमहं पूर्वमिति देवगणाः देवाङ्गना अप्सरसश्च सस्मितं सोल्लासं विविधैः स्वर्गीयैरुपहारैस्तं विजयिनं वीरमुपचक्रिरे। वाष्पार्द्रनयना शची पतिसुहृदं निजं प्रियदेवरं भालपट्टे केसरगर्भकस्तूरिकातिलकेन विभूष्येन्द्रभवनात् प्रस्थापयामास। दुष्यन्तविरहविह्वलीभूतहृदयाः प्रवहदश्रुक्लिन्नगौरकपोलाश्चन्द्रिकास्नातचन्द्रवदना अप्सरसो नयनजलार्द्रनयनाः सत्यः कथमपि मनोविक्षोभं निरुध्य दुष्यन्तस्य गमनमन्वमन्यन्त।

प्रमुखदेवनायकैः सह सहस्राक्षः प्रियं मित्रं विस्रष्टुममरावत्याः बहिर्द्वारस्थितसरसस्तीरपर्यन्तमाजगाम। तदनन्तरं स्यन्दनं समारूढे दुष्यन्ते मातलिः स्यन्दनाश्वान् वेगेन सञ्चोदयामास। सजलनयनानां पश्यतामेव सर्वेषां देवलोकनिवासिनामसौ दुष्यन्ताधिष्ठितरथः क्षणेनैव तेषां नयनागोचरो बभूव।

(२३)

अमरावती अविलम्बेनैव प्रापणीयेति त्रिविष्टपमागच्छन् दुष्यन्तो मार्गवर्तिनां गिरीणां प्रकृतिसुरम्यदृश्यानां मनोऽभिरामाणां नयनावलोकन-सुखमनुभवितुं न शशाक। प्रत्यावर्तनसमये न तथा क्षिप्रकारिता। दुष्यन्तो मातलिं प्रार्थयामास – "मन्दवेगः स्यन्दनः करणीयो, येन हृदयतोषिणां मनोऽभिरामाणां चित्तसन्तर्पकाणां गिरिसौन्दर्याभिव्यञ्जकानां दृश्यानां दर्शनसुखैरसावात्मानमनुगृह्णातु।"

मातलिना च मन्दीकृते रथवेगे दुष्यन्तस्तेषां मार्गवर्तिनां सुदूरस्थितानामपि निकटस्थितानामिव नयनगोचरीभूतानां दिव्यानुभूतिभिरात्मानमपि प्रीणयितॄणां दृश्यानामवलोकनैरलौकिकानन्दमनुबभूव।

दुष्यन्तेनावलोकितम् –

गगनचुम्बिगिरिशिखरेभ्योऽधित्यकाभ्यश्चोपत्यकापर्यन्तमधोदृश्यमानासु घाटीषु नदीतलपर्यन्तमुच्चावचा समविषमा वियतोऽवतरन्तीव विस्तृता भूमिः गुरुलघुपरिमाणवद्भिर्वनलतापरिवेष्टितस्कन्धविटपैः पादपैराच्छन्ना हरितश्यामलवर्णेव संलक्ष्यते। इतस्ततः समुद्गतानि विशालाकाराणि शिलातलानि विविधवर्णरत्नजटित मरकतमणिरचितबद्धभूमय इव प्रतिभासन्ते। यत्र तत्र चित्रविचित्रवर्णानि अचिरोद्गतमुकुलसन्निहितानि पुष्पाण्यद्भुतामेव मनोहारिणीं प्रकृतिशोभां प्रसारयन्ति। वासन्तिकटिवलीपुष्पैः सघनैरियं भूः सुदूरमाच्छादिता। कुत्रचिद् वनस्पतिषु कुत्रचिच्च वियत्युत्पतन्तः पतत्रिणः कूजनकलरवैः श्रोत्राणि प्रीणयन्ति। कुत्रचित् स्यन्दनगतिचण्डनिनादेन घोटकानाञ्च खुरखुररवेण वित्रासिताः हरिणशशादयो वराकाः वन्यक्षुद्रजन्तवः प्रच्छन्नगूढस्थानेभ्यो निर्गत्येतस्ततो धावन्तोऽवलोक्यन्ते।

क्वचित् कालायससमकृष्णवदनानामतिलम्बलाङ्गूलानां गोलाङ्गूलानां समूहाः सुदीर्घेणास्फालनेन पादपात् पादपं गच्छन्तो वियत्युत्पतन्त इव द्वाभ्यामग्रपादाभ्यां तरुशाखाः गृहीत्वा दोलायन्त इव किलकिलमधुर-रवैरानन्दोल्लासं व्यञ्जयन्ति।

एकस्मिन् स्थाने रथमार्गसंलग्ना सुविस्तृता समतलभूमिरवर्तत। हेमन्तर्तौ तुषारहिमपातेन विनष्टशष्पायामपि द्रवीभूतहिमसिक्तायां तस्यां भुवि किञ्चिदुद्भिन्ननवशष्पाङ्कुरायां बलीवर्दाकाराः कृष्णश्वेतबालव्यजन-रूपपुच्छगुच्छसुशोभमानाः चमरीमृगाः, दीर्घैरेवोर्णकेशैरावृतदेहाः वन्योर्णायवश्च गवयाः सितचित्तिकानिचितबभ्रुवर्णाः सुदीर्घबहुशाखोयुततीक्ष्णशृङ्ग-विराजमानाः सारङ्गाः शष्पाणि चरन्तोऽवलोक्यन्ते! रथघर्घरध्वनिना किञ्चिदिव वित्रस्येतस्ततः सत्वरं धावित्वा, ते निर्गते च स्यन्दने तथैव निर्भयनिश्चिन्तभावेन पुनः शष्पास्वादनरताः बभूवुः। मनोऽभिरामविस्तृत-चञ्चलनीलबभ्रुनयनैस्ते कामिनीनयनानामुपमानभाजनानि ध्रुवमेवावर्तन्त। अत एव कामिन्यो मृगाक्ष्यो हरिणाक्ष्यो सारङ्गाक्ष्य इत्यभिधानैः सहृदयैर्ज्ञायन्ते।

समतलभूमिं तिसृषु दिक्षु परिवृत्योर्ध्वमारोहन्ती भूमिरत्युच्चशिखरं यावदत्युत्तुङ्गविशालहरितदेवदारुतरुभिः सम्भृताऽवर्तत। तेषां तरूणां मध्यभागे च सा सघनैः क्षुपैः सन्निचिता। तत्र लोमशशृगालवृकादयो

मांसाहारव्यसनिन: नातिदीर्घाकारा: श्वापदा: बुभुक्षाक्रान्तमानसा: शष्पाणि चरत्सु मृगेषु सतृष्णनिबद्धदृष्टयो दुष्यन्तेनावलोकिता:। तेषामपि पृष्ठभागे कश्चिद् दीर्घकायो बभ्रुरेखाङ्कित: सुदीर्घकठोरतीक्ष्णोन्नतमुच्छगुच्छो ज्वलदङ्गारप्रतिमचक्षु: शार्दूलोऽपि लक्ष्यमाणो बभूव।

मन्दगत्या प्रसरता रथेन मार्गमाक्रमता दुष्यन्तेनान्येषामपि रमणीयानां दृश्यानामवलोकनं कृतम्। स्थाने स्थाने समुन्नतपयोधराच्छन्नपर्वतविवरेभ्य: प्रस्रुतानि पय:स्रोतांसि कलकलछलंछलशब्दायमानानि शिलातलेभ्य: संघट्टं प्राप्य समुच्छलद्भि: सलिलकणैर्वनस्पतीनभिषिञ्चन्ति क्रमशोऽधोऽधोऽवतीर्य, उपत्यकायां प्रवहन्त्यां नीलसलिलधारायां विलीयन्ते। संघट्टनजन्योच्छलनेन सलिलस्रोतसां शुभ्रा: दुग्धभ्रान्तिमिव समुत्पादयन्त्यो वारिधारा: द्विजवक्ष:स्थलस्कन्धसुशोभितशुभ्रयज्ञसूत्ररेखाभ्रान्तिं जनयन्ति।

केषुचित्स्थानेषु सघनवन्यवनस्पतिमध्येषु पर्वताधित्यकाया अधोऽवतरन्ति सुविशालसोपानाकाराणि क्षेत्राणि पर्वतीयैर्जनैर्महता परिश्रमेण यथासाध्यं भूमिं समीकृत्य प्रान्तभागेषु प्रस्तरानाचित्य सुनिबद्धानि सुदूरमुपत्यकापर्यन्तं विस्तृतान्यासन्।

कर्तितमाष-राजमाष-भट-कुलत्थ-कोद्रव-मुद्ग-तिल-श्यामाक-तण्डुल-त्रिकोणक-चोयकादिसस्यविरहितक्षेत्रेषु हिमपातभावेन न कान्यपि सस्यान्यवर्तन्त। परन्त्ववशिष्टहिमस्य द्रवीभावेन पर्वतीयनिर्झराणां च सलिलावतरणेन सा भूमि: केदारवती बभूव।

मध्ये मध्ये च क्षेत्रेषूद्गतेषु विरलपत्रेषु क्वचिदुद्भिद्यमानलघुनवारुणकिसलयेषु तरुषु क्षेत्रस्वामिभिरेकत्रीकृतानां शुष्कतृणसमूहानां राशय: पालितगृहपशूनामाहारभूता: दरीदृश्यन्ते। अपि च यत्र तत्र नारङ्गजम्बीरनिम्बुकादिवृक्षेषु कथञ्चिदपि शीतावशिष्टानि पीतारुण-पिङ्गलवर्णानि वर्तुलाकाराण्यधोमुखानि विरलफलान्यवलोक्यन्ते।

अतोऽपि सुदूरं ध्यानावहितचेता: दुष्यन्तोऽवलोकयामास। असुराक्रमणभयविमुक्ता: देवा: देवाङ्गनाभिरप्सरोभिश्च सार्द्धं निर्भयभावेन प्रणयविलासानन्दाननुभवन्तो गिरीणामुच्चावचभूमिभागेषु विहरन्ति। क्वचित् किन्नरयुगलानि गिरिशिखराण्यनायासमेवा रोहन्ति। क्वचिच्च गिरिसानुष्वप्सरोभि: सह समुपविष्टा: गन्धर्वा: वीणा: वादयन्ति।

अथ च ततोऽपि मनोहारीणि दृश्यान्यवलोक्यन्ते। केषुचित्स्थानेषु सुदूरवर्तिनीषु घाटीषु प्रवहन्तीषु, क्वचिदपि नीलपीतारुणसुमनोविभूषित-रिङ्गालवेतस्नागकेसरादिक्षुपशाटिकापरिहितासु क्वचिच्च लघुबृहच्छि-लाखण्डमणिजटितसैकतोभयपार्श्वमनोहरासु, देवदारुलोध्रसरलमहा-निम्बपाटलशिंशपाकाञ्चनारारिष्टतुणादिविशालगगनोत्तुङ्गतरुपरिवेष्टितासु कलकलं निनदन्तीषु लघुसरिद्धारासु स्नानं कुर्वन्तीनामतिस्वल्पसूक्ष्मवसनधारिणीनां देवाङ्गनानामप्सरसां किन्नरीणां यक्षिणीनां विद्याधरीणां च कमनीयाः सुघटिताः गौरवर्णाः, किरातभिल्लवधूनाञ्च श्यामायमानाः यौवनालङ्कृताः देहयष्टयो विश्वविधातुः सौन्दर्यरचनाकौशलमभिव्यञ्जयन्त्यो जलबिन्दुनिचितस्वर्णशलाका इव चमत्कृतिमादधानाः शोभन्ते।

अथ च तत्र तटवर्तिसैकतेषु जलार्द्रेषु नीलपुष्पयुतानां वानीराणां कटानाञ्च पिङ्गलपुष्पाणां नागकेसराणां जम्बूवर्णानां शेफालिकानां मनोहारिणी शोभा प्रसह्य दृष्टिमावर्जयति।

सहसैवासौ चक्रवर्ती महीपतिर्दुष्यन्तोऽतिरमणीयं मनोमोहनं विस्मयपयोनिधिनिपातनं दृश्यमाकर्णान्तविस्फारितलोचनाभ्यामवलोक्य न पदमप्यग्रेसरीभवितुं शशाक। तेन प्रार्थितो मातलिरपि प्रग्रहानाकृष्य वाजिनोऽवरुरोध। पर्वतीयरथमार्गं निकषैवाऽवर्तत महदुत्तुङ्गपर्वतशृङ्खला पर्वतीयैरपि जनैरधिरोहयितुमशक्या प्रायशः सहस्रहस्तोच्छ्राया। ततो नातिलघीयसी जलधारा प्रपातरूपेणाधःपतन्ती लघुसरोवररूपेण परिणम्य पुनः धाराकारा घाट्यामधो गच्छति। महदुच्छ्रायात् सम्पतनेनास्याः जलपृषताः मन्दं मन्दं प्रवहता पवनेनेतस्ततो नीयमानाः वायुमण्डलमार्द्रयन्तः समीपवर्तिनीः गिरिभूमीरपि क्लेदयन्ति। वियति भासमानस्य भास्करस्य रश्मयस्तत्र सलिलकणान्तःप्रविश्य विच्छिद्य सहस्रधा इन्द्रधनुषां शोभां विस्तारयन्ति।

सरोवरं परितो गणनातीताः कङ्कक्रौञ्चकारण्डवबकवार्ध्रीणससार-सराजहंसादयो जलपक्षिणोऽवलोक्यन्ते। तत्र केचन सरोवरतीरे ध्यान-मग्नप्रभुभक्ता इव सलिलमेकाग्रदृशाऽवलोकयन्ति, केचन प्रियाभिः सह जलक्रीडां कुर्वन्ति, केचन च समूहं विरच्य गगने समुत्पतन्ति। अहो, अयं शोणितचञ्चुपादः सितपक्षैः रजतराशिमिव, क्षीरसन्दोहमिव, चन्द्रकान्त-

मणिनिचयमिवातिशयानो राजहंसो जलक्रीडाव्यसनिनीं राजहंसीमवलोकमवलोकं प्रसादभरेणाभिभूयते।

कतिपयक्षणं यावत् सुस्थिरेण चेतसा तच्चित्तविमोहनं दृश्यरसं विस्मृतनिमेषेण नयनयुगलेन निपीय पुन: प्रचलितेन स्यन्दनेन दुष्यन्तोऽग्रेसरीबभूव। अकस्मादेवासौ सुदूरस्थितमेकं घनतरुसन्दोहमपश्यत्। प्रश्नवाचकदृष्ट्याऽवलोकयन्तं तं कुरुदेशाधिपतिं मातलि: कथयामास–

राजन्! नन्दनकाननमेतद् देवानामतिप्रियमभिलषणीयं विहारस्थलम्। परिजनै: सह इन्द्रोऽप्येतदुपवनं वनविहाराय समागच्छति। देवा: देवाङ्गना अप्सरसश्चैवोपवनमिदं प्रवेष्टुमनुमता:।

प्रायशश्चतु:क्रोशायामविस्तीर्णे तिसृषु दिक्षु पर्वतशृङ्खलाभि: परिवृते, एकस्मिन् पार्श्वेऽतिगभीरघाटीपरिसीमिते समतलभूमिभागेऽस्मिन् नन्दन-कानने देवशिल्पिभिर्विश्वकर्मप्रभृतिभि: संस्कारिता प्रकृति: सकलमेव रामणीयकमभिव्यनक्ति। सरलव्यायतमार्गैरगणितेषु विभागेषु विभक्ता: काननभूमय: प्रायश: सकलानपि पादपक्षुपलतावल्लरीसंयुतान् वनस्पतीन् धारयन्ति स्म। पर्वतभूमिविवरेभ्यो निस्सरन्त: छलछलायमाना: जलप्रपाता: महता परिश्रमेण स्थपतिभि: सुसंयमिता: स्थाने स्थाने सरांसि, पुष्करिणी:, वापिका:, सलिलधारायन्त्राणि च समुत्पादयन्तो वनस्पतींश्च पीतसलिलान् कुर्वन्त एनं काननं सरसं शस्यश्यामलं च विदधति। तत्र सङ्केतं विधाय मातलि: प्रोवाच–

"आयुष्मन्! सकलाभिरपि समृद्धिभि: सह काननमेतद् वैशिष्ट्यमपि दधाति, यदत्र पारिजातो नाम विशालतरुरेको विद्यते। स तु सुरतरु: कल्पवृक्षो वेति नाम्नाऽपि प्रसिद्ध:। अस्यैवानोकहस्य माला देवराजेन भवतां कण्ठे पिनद्धा। अस्मिन्नुपवनेऽयमेक एव पारिजाततरुर्विद्यते। अस्य वृक्षस्यारोपण-मङ्कुरणं वा नातिसुकरम्। सर्वे प्रयासा: द्वितीयस्य वृक्षस्याङ्कुरणे विफला: सञ्जाता:। पुष्पाणि चाप्यस्य कदाचिदेवानियतसमये विकसन्ति। परन्तु यदैव विकसन्ति, तदैवैतेषां सौरभेण सुदूरं सर्वासु दिक्षु प्रसरता पवनपदवी मनोऽभिरामेणोन्मादगन्धेन सम्भ्रियते। पादपाद् विशीर्णान्यपि वनरक्षकैर्विचितान्यपि पारिजातकुसुमानि न कदापि जीर्यन्ते, म्लायन्ति, शीर्यन्ते सौरभविहीना वा वर्तन्ते। देवराज एवैतेषां कुसमानां स्वामी।

नान्येभ्य इमानि सुलभानि। प्रमुखाः देवनायका अपि एतेभ्यः स्पृहयन्ति।

अपि च किम्वदन्तीयमप्यत्र प्रसिद्धा, यदयं पारिजाततरुः कल्पवृक्षो वा याचकानां सकलानेवाभिलाषान् पूरयति। परं स तु सदा वनरक्षकैस्तथा रक्ष्यते, यथा न कोऽपि जनस्तत्र निकटमपि भवितुमनुमतः।"

वर्णयत्येवं मातलौ नन्दनकाननात् प्रवहतो मन्दसमीरणस्यैकेन प्रवाहेण सकलमेव समीरमण्डलमवर्णनीयेन दिव्येन सौरभेणापूरितम्।

कतिपयैरेव क्षणैः कुण्डलिना भुजङ्गमेनेव कदाकारेणोच्चावचेन पर्वतीयमार्गेण प्रसरन्तो वाजिनो वासवरथं नन्दनकाननसमीपमेवानिन्युः। तत्रानल्पसंख्यायां देवानां देवाङ्गनानां समवायो दुष्यन्तेनावलोकितः। देवानां मनोरञ्जनाय बह्व्योऽप्सरसोऽपि तत्र समायाताः। सर्वोऽपि देवगणस्तत्राऽऽनन्दोत्सवेषु निमग्नः। कोऽपि जनो गेयकवितां विरच्य, श्रावणसमुत्सुकः श्रोतारं कमपि दृष्टिमितस्ततः प्रसार्य प्रतीक्षते। केचन इमानि गीतानि गायन्ति स्म। अन्ये च जनाः स्त्रियोऽपि पुरुषा अपि सङ्गीतलयमनुरुध्य नृत्यन्ति स्म। कतिपयक्षणं यावद् रथवेगं निरुध्य तत्रैव मातलिः दुष्यन्तं प्राह-

"राजन्! भवतः शौर्यस्य पराक्रमस्य साहसस्य समरदाक्ष्यस्य च यशोगाथा सकल एव त्रिविष्टपजनपदे प्रथिता। भवतः पराक्रमेण देवानां हृदयानि प्रसादितानि प्रकाशितानि च। पश्यतु भवान्, इमे काव्यरचनानिपुणाः देवाः करतलेषु भालपट्टान् निधाय किमपि विचारयन्तो भवच्चरितं गेयपद्येषु निबध्नन्ति। इमाः देवाङ्गनास्तानि पद्यानि प्रसाधनावशिष्टैर्लाक्षारसैर्भूर्जपत्रेषु लिपिबद्धानि कुर्वन्ति। अप्सरसश्च तान्येव पद्यानि छन्दोलयानुसारं सस्वरं गायन्त्यो नृत्याभिनयं प्रदर्शयन्ति।"

विस्मयेन प्रहर्षेणानन्देन च जडीभूतसकलेन्द्रियव्यापारो दुष्यन्तोऽन्तःकरण एवानिर्वचनीयैर्भावैः सम्भृतस्त्रिविष्टपनिवासिनां कालेयकासुरवधेन विगलितभयभावनानामानन्दोल्लासानवलोकयामास। परं परमानन्दनिमग्नसकलेन्द्रियमनसां देवानां दृष्टयः समीपस्थेऽपि मार्गे स्थिते दुष्यन्ताधिष्ठिते स्यन्दने न पतिताः। दुष्यन्तोऽपि देवानां तथाभूतं रसास्वादनमप्रतिहतं कुर्वन् मातलिं रथवाजिनं संप्रेरणायै प्रार्थयामास। मातलिनाऽपि रश्मिशैथिल्यं विधाय हरितः सञ्चोदिताः।

त्रिविष्टपसीमानमतिक्रम्यासौ वासवरथ उत्तरकुरुवर्तिपर्वतीयभूभागान्तिक्रान्तुं प्रवृत्तः। हिममण्डितोत्तुङ्गगिरिशिखराणां माला शनैः शनैः निम्नतां प्रपेदे। भूभृन्मालान्तर्गतनतोन्नतभुजङ्गममार्गेण प्रचलन्नथ धावन् स रथोऽकस्मादेव सघनैर्मेघमण्डलैराच्छादितः। तत्तु मेघमण्डलं सघनपुष्पवृष्टिभिरिव सलिलकणैस्तं महान्तं सम्राजमभिषिञ्चद् वेपथुमिव शैत्येन जनयदार्द्रवपुषमकरोत्। स्यन्दनस्य वाजिषु नेम्यामन्येष्वङ्गेषु च संलग्नाः सलिलपृषताः जलधरमध्ये दीप्यमानायाः विद्युन्मालाया आलोके स्थूलमुक्ताफलानीव चकाशिरे। विद्युद्दीप्त्या ससाध्वसं कम्पमानानां हरितां गतिर्ववृधे।

(२४)

शनैः शनैर्मेघमण्डलविनिर्मुक्ते स्यन्दने, परितः प्रसरति च भास्करालोके, स्पष्टं लक्ष्यमाणेषु सुदूरवर्तिष्वपि पर्वतीयदृश्येषु, क्षालित इव सकलगिरिमण्डले, दुष्यन्तेन पर्वतीयमार्गे प्रवहन्त्य उच्चपर्वतप्रान्तेभ्यः समागत्य मार्गमतिक्रम्य निम्नप्रदेशेषु क्षरन्त्यो मृन्मिश्रिताः लघ्व्यो जलधारा अवलोकिताः। सहसैव क्षुपनिकुञ्जेषु तरुकोटरेषु च निलीयमानानां जलवर्षणानन्तरं बहिरागतानां कपिञ्जलवनकुक्कुटकुरुकुचखञ्जनचाषटिट्टिभतित्तिरिलावकसारिकादीनां वयसां सरसमधुराः कर्णेषु पीयूषमिव घोलयन्तो विरावाः प्रकृतिमण्डलमापूरयन्।

सहसैव प्रगाढताम्रारुणकुसुमस्तबकसम्भृतबरुशानोकहान्तरालेषु यत्र तत्रोड्डीयमानानां प्रियतमविरहार्तश्यामाक्रन्दनमिवाभिव्यञ्जयन्तीनां घुघुत्तीनां करुणध्वनिस्तस्य कर्णाभ्यामाकर्णितः। परितश्च वृक्षशिखरेषु स्थितानां कृष्णवर्णप्रभाभासमानकायानां द्रोणकाकानां कर्णकटुरवा अपि समश्रूयन्त। जीमूतापगमेन प्रकाशमाने नीले वियति सुदूरमुड्डीयमानाश्चिल्लश्येनादयो मांसाहारिणः पक्षिणोऽपि दुष्यन्तस्य दृष्टिपथमागताः।

सहसा दुष्यन्तस्य दृष्टिः पूर्वस्यां दिशि समुद्गता। तेन निरीक्षितम्-

"सुदूरवर्तिन्यां प्राच्यामुपत्यकायाः परे पारेऽत्युत्तुङ्गगिरिशिखरं वर्तते। हरितश्यामलैः सघनैस्तरुभिराच्छादितं तच्छिखरं सघनैर्मेघैराश्लिष्टमिव प्रतिभाति। निविडतरूणां पत्राङ्कितजालमार्गेभ्यो निरूप्यमाणाऽस्पष्टा कुटीरपंक्तिरिव तत्र दृश्यते।"

दूरादेव दृग्गोचरीभूतेन गिरिशिखरवर्तिमनोरमस्थलसौन्दर्येण

नितरामभिभूतं दुष्यन्तस्य हृदयं हठादेवावर्जितम्। तत्र गन्तुं बलवदौत्सुक्यभावस्तं स्ववशंवदतामनयत्। गिरिशिखरं तद् दक्षिणकरसङ्केतिकाऽङ्गुल्या सङ्केत्य दुष्यन्तेन मातलिः पृष्टः-

"सखे मातले! प्राच्यां तस्मिन् हरितश्यामलतरुभिराच्छदिते गिरिशिखरे किमेतद् दृश्यते? शिखरमिदं किमभिधानम्। तरूणां पत्रजालमध्यात् परिदृश्यमानेषु कुटीरेषु के जनाः निवसन्ति ?"

ओष्ठयोः स्मितमभिनीय मातलिः प्रोवाच-

"राजन् ! हेमकूटाभिधानमिदं भूधरशिखरम्। इयमतिपवित्राऽनघा तपोभूमिः। अत्र देवराजस्येन्द्रस्य सहस्राक्षस्य जनकः कश्यपः प्रजापतिः भार्ययाऽदित्या सार्द्धं तपस्यति। सा च दक्षस्य प्रजापतेः दुहिता। भगवतः कश्यपस्य निर्देशनेऽत्र बहवस्तपस्विनस्तपोऽनुष्ठानमभ्यसन्ति। देवराजः पित्रोराज्ञापालकः सततं तयोः स्मरति। समये समयेऽत्र समागत्य तयोश्चरणसेवयाऽऽत्मानं पुनाति। तयोः सेवायै देवराजप्रेषिताः किन्नरसेवका अप्यत्र निवसन्ति! इयं तपोभूमिरत्र निवसतां जनानां हृदयेषु शान्तां स्निग्धाञ्चानुभूतिमनुभावयति। अतो बहुभिर्देवैर्मेनकोर्वशीत्यादिभिश्चाप्सरोभिः स्वकुटीराण्यत्र कल्पितानि।"

इन्द्रस्य सहस्राक्षस्य पितुः कश्यपस्य प्रजापतेर्नामग्रहणादेवोत्कण्ठितस्य दुष्यन्तस्य मनसि प्रबलाऽऽकांक्षा समुद्भूता, यदसौ मित्रपित्रोरदिति कश्यपयोश्चरणेषु प्रणमतु। स मातलिं प्रार्थयामास-

"मित्र ! मातले ! मनोरमं शुभमिदं स्थानमवलोक्य स्वपित्रोरिव च देवराजस्य पित्रोः तपःस्थलीं निशम्य तयोश्चरणसेवामुपेक्ष्य नोचितं हस्तिनापुरगमनम्। अतस्तथैव भवता विधेयं, यथा ममैषोऽभिलाषः सफलो भवेत्, तयोश्च तपस्विनोराशीर्वादैरहमनुगृहीतो भवेयम्।"

यथैवादिशति भवान्, इति अर्थगर्भितस्मितेनौष्ठौ विभूष्य मातलिः रथगतिं हेमकूटपर्वतदिशि परिवर्तयामास। त्वरितगत्या प्रधावन्तो वाजिनः स्वल्पेनैव समयेन स्यन्दनं हेमकूटपर्वतशिखरतलप्रदेशं प्रापयन्। समागत एव सघनतरुविटपपत्रच्छायालङ्कृते शीतले प्रदेशे दुष्यन्तस्य दक्षिणभुजः स्पन्दितुमारेभे। विचारितञ्च तेन, कथमत्र शुभशकुनस्यास्य फलप्राप्तिः। तदैव मातलिः रथं स्थिरं कृत्वा प्रोवाच-

"राजन् ! शान्तमिदमाश्रमपदं रथारूढेन भवता न गन्तव्यम् । प्रथमं तावदहं गत्वा पश्यापि । अपि कस्मिन्नप्यनिवार्ये कर्मणि भवेद् व्यापृतस्तत्रभवान् कश्यपः ? दर्शनात् पूर्वमनुमतिरप्यनिवार्या । तत्र गत्वाऽनुमतिं प्राप्य शीघ्रमेवाहं निवर्तिष्ये । गतोऽहमागत एव । भवानत्रैव प्रतीक्षताम् ।"

इति कथयित्वा मातलिः रथादवातरत् ।

स्यन्दनचालनयोग्यप्रविततपर्वतीयपथमध्यादेका तन्वी चरणवीथिः शिलाचयं तरुषण्डञ्च छेदयन्तीव पर्वताधित्यकायामुपर्युपरि प्रासरत् । इन्द्र-सारथिस्तथैव चरणवीथिपथेन उपरितनाश्रमं प्रत्यारुरोह ।

कश्यपतपोवनं प्रति प्रस्थिते मातलौ दुष्यन्तोऽपि रथादवतीर्य तस्मिन् प्रकृतिरामणीयकसंपृक्ते पर्वतीयमार्गे विचरितुं प्रारेभे । महता विस्मयेन चक्षुषी विस्फार्य तेनावलोकितम्-

"मार्गात् किञ्चिदुपर्येव सरलद्रुमस्कन्धसंलग्नायां समपृष्ठायां, तलप्रदेशे रत्ननिचयेनेव भ्राजमानायामेकस्यां विशालायां शिलायां निषण्ण एकस्तपस्वी यमनियमासनप्राणायामप्रत्याहारधारणाध्यानानीति सप्तयोगाङ्गान्यभ्यस्य अष्टमाङ्गे समाधौ परब्रह्मण्यात्मानं विलीनं कर्तुं नियतवृत्तिः निवाते दीपशिखेव निश्चलाङ्गः स्थितः । बाह्यलौकिकसंवेदनाविरतस्य तस्य वपुषो निम्नभागे बल्मीकमृत्तिका कीटैरारोपिता । कण्ठस्तु तस्य सरीसृपचित्र-वर्णनिर्मोकेनाभूष्यत । वन्यवल्लर्यस्तस्य शिरसि ग्रीवायां वक्षसि च परिवृताः । शिरसि सुदीर्घवभ्रुवर्णजटासु पक्षिणां कुलायाः समलक्ष्यन्त । स तु तपस्वी भानुमण्डलमभिमुखीभूय तपस्तपति स्म ।

महता विस्मयेनाभिभूतो दुष्यन्तो विस्फारितनयनो विस्मृतनिमेष-व्यापारस्तमेकाग्रदृशाऽवलोकयामास । सहसैव चमत्कृत्य तेन निरीक्षितम्-

"भयानकाकारो विशालकायो व्याघ्र एकस्तपोधनाभिमुखः शनैः शनैः निभृतपदं समायाति ।" कदाचिदयं मृगान्तको व्याघ्रस्तपस्विनमाक्रमेदिति सशङ्कितः स सम्राट् प्रजानां तपस्विनाञ्च पालयिता रथं निकषा समागत्य कार्मुकं गृहीत्वा मौर्वीमारोप्य तत्र शरसन्धानमकरोत् । ज्याकर्षणं विधाय शरप्रक्षेपणसमुद्यते तस्मिन् घोरघनगर्जनसदृशः कश्चिदुच्चगम्भीरध्वनिर्दुष्यन्तस्य कर्णकुहरयुगलं प्रविष्टः-

"अरे ! कोऽयं जनोऽतिधृष्टो यः शान्तेऽस्मिन्नाश्रमपदे बाणप्रहारेण मे

व्याघ्रं हन्तुमिच्छति ?"

ध्वनिना सार्धमेव विशाला शौर्यातिरेकसमन्विता प्रभावशालिनी काचित् पुरुषाकृतिः कस्मादप्युत्तुङ्गपादपादवप्लुत्य दुष्यन्तसमक्षं समागत्य स्थिता।

ससम्भ्रममव्यवस्थितचेताः दुष्यन्तस्तामाकृतिं स्तिमितनयनाभ्यामपश्यत्। धनुस्तेन विनामितम्। ब्रह्मचारिवेशधारकोऽयं पुरुषः कैशोरवयसि वर्तमानः साक्षाच्छौर्यस्य प्रतिमानमेवावर्तत। पादत्राणविरहितौ पादौ धूलिधूसरितौ, मौञ्जमेखलया कटिदेशे बद्धं कृष्णाजिनाधोवसनं, वक्षसि स्कन्धयोश्च वल्कलोत्तरीयं, वल्कलाधस्तात् प्रतिभासमानं यज्ञोपवीतं, पृष्ठतः कृत्वा निबद्धाः दीर्घाः जटा इति सर्वेषामेव ब्रह्मचारिवेशचिह्नानां स्थितिस्तत्रावर्तत।

रमणीये विस्तृतललाटे श्रमसलिलकणानां पृषताः मुक्ताफलानीव दीप्यन्ते स्म। ऊर्ध्वौष्ठे नासिकाया अधस्ताच्छ्यामवर्णा सूक्ष्मरोमराजिरचिरादेवाविर्भूता प्रतीयते स्म। दक्षिणांसे सुदृढं कार्मुकं, वामांसपृष्ठे च तीक्ष्णाग्रनाराचनिचितं तूणीरं दधानोऽसौ किशोरकः साक्षादेव पिनाकधारिणो नीललोहितस्य सुतस्य देवसेनापतेस्तारकासुररिपोः कार्तिकेयस्य प्रतिमानमेवाऽऽसीत्। अथ च तत्र वामांसे दीर्घ एको व्यावृतो मुञ्जतन्तुनिर्मितः सुदृढो रज्जुपाशोऽपि लम्बते स्म।

अष्टादशवर्षदेशीयं तं किशोरकं समवलोक्य दुष्यन्तस्य हृदयमनायासमेव स्वाभाविकेन वात्सल्यभावोद्रेकेण सम्पूरितम्। तं भुजाभ्यामाकृष्यालिङ्गनपाशे निबद्धुं वक्षसा च संयोजयितुं तस्य हृदयमौत्सुक्यनिर्भरं बभूव। शाकुन्तलेयोऽपि सर्वदमन एतादृशो भविष्यतीति विचारयति तस्मिन्नसौ किशोरको दुष्यन्तं निर्भर्त्सयन्नेवं प्रोवाच-

"धृष्ट पुरुष ! कस्त्वम् ? शान्ते तपोवनेऽस्मिन् त्वं कथं समायातः ? अथ च त्वं मम व्याघ्रं प्रहर्तुं कथं साहसी अभूः ?"

किशोरकमुद्दिश्य वात्सल्यभावसम्भृतहृदयोऽपि दुष्यन्तस्तस्य तथाविधमौद्धत्यं सोढुं न शशाक। तथापि कथमपि स्वक्रोधावेगं संहृत्य मनश्च संयम्यासौ प्राह-

"हे धृष्ट बालक ! मामजानतैव त्वयैतादृशं धृष्टाचरणं विहितम्। बालकस्त्वं गुरुकुलब्रह्मचारी प्रतिभासि। अत एवाऽहं त्वां क्षमे। पुनः

भविष्यति त्वयैतादृशी नोद्दण्डता समाचरणीया।"

परन्तु किशोरकस्तु स साहसस्य निर्भयभावस्य पराक्रमस्य च पुञ्ज एवाऽवर्तत। एकपदमग्रे भूत्वा दुष्यन्तं पुनः निर्भर्त्सयन् सोऽवादीत्-

"त्वं कोऽपि महान्, महत्तरो, महत्तमो वा भविष्यसि। राजा वा सम्राड् वा चक्रवर्ती वा वर्तिष्यसे। परं न मे परिचयस्य तवाऽपेक्षा। इयं प्रशान्ता मुनिजनानां तपोभूमिः। अत्रागत्य हिंस्रपशवोऽपि हिंस्रभावान् परित्यज्याहिंसाव्रतपालनरताः सन्तो निर्भयभावेन सञ्चरन्ति। हिंस्रभावनिर्भरस्त्वं मम मित्रं व्याघ्रं व्यापादयितुं कार्मुके शरं योजयितुं वा कथमुत्सहसे? त्वमनेनापराधेन नूनं दण्डनीयः।

तथापि सम्भवतस्तपोवनप्रभावमजानन्नेव त्वं मृगवधरूपं पातकमाचरितुं समुद्यतो धनुषि शरमारोपितवान्। तवायं प्रथम एवापराधो लक्ष्यते। नवागतस्त्वं प्रतीयसे। क्षमायाचनां कुरु। क्षमिष्ये त्वामहम्।"

किशोरकस्यैतानि उद्दण्डाशिष्टाविनयासभ्यभावविद्धानि वचांस्याकर्ण्य दुष्यन्तो न क्रोधावेगं संहर्तुं क्षमो बभूव। स उवाच -

"हे धृष्ट बालक! यदि तव न मे परिचयस्यापेक्षा, तदा स्वधृष्टतायाः फलं भुङ्क्ष्व।"

इति कथयित्वासौ चक्रवर्ती धनुरुन्नय्य, प्रत्यञ्चामाकृष्य, वात्सल्यभावसम्भृतोऽपि केवलं भीषयितुकाम एव संहितेन शरेण किशोरकं लक्ष्यीकृतवान्। परमतिचपलः कुशलश्च स किशोरकोऽतिसावधान आसीत्। दुष्यन्ते धनुष्युन्नमित एव निमिषमात्रेण किञ्चित् पार्श्वेऽपसृत्य, वामस्कन्धावलम्बिनं रज्जुपाशं सव्येतरे करे गृहीत्वा, वक्रीकृत्य, विशेषविधिनाऽऽकुञ्च्यातिकौशलेन दुष्यन्तं प्रति प्रचिक्षेप। धनुर्धारिणस्तस्य सकलान्येवाङ्गानि तथा तेन रज्जुपाशेन दृढं बद्धानि, यथाऽसौ हस्तपादमपि स्पन्दयितुं न शशाक।

तदनन्तरमसौ विमलस्मितविभूषितोज्ज्वलधवलदन्तकान्तिभिः दिशः प्रकाशयन् निस्तब्धमिव दुष्यन्तं निकषा समागत्य प्रोवाच-

"वीर पुरुष! दृष्टं मया तव शौर्यं, धनुर्विद्यादाक्ष्यञ्च। मम पौरवस्य समक्षं को धृष्टमाचरितुं समर्थः? स्वाविनयस्याधुना फलं भुङ्क्ष्व।"

रज्जुपाशेन सकलेष्वपि गात्रेषु बद्धो दुष्यन्तस्तस्य किशोरकस्य मुखात्

"पौरव" इति शब्दं निशम्य विस्मयाभिभूतमना: निष्कम्पनिर्निमेष-नयनाभ्यामवलोकयन् स्तम्भित इव सञ्जात:। कथमयं किशोरक आत्मानं पुरुवंशीयं कथयति ? विचारा एते दुष्यन्तस्य मनो हृदयमन्त:करणञ्चानिर्वचनीयया पीडया व्यथयितुमारेभिरे। एकाग्रमनसा चक्षुषी विस्फार्य ध्यानेनाऽनिमिषभावेनाऽवलोकयन्नसौ तस्य किशोरकस्यानने स्वकीयामेवाकृतिं दर्पणे प्रतिबिम्बमिव लक्षयामास। किमयं शाकुन्तलेय: ? मनसि चैवंविधैर्विचारैराक्रान्ते सत्येव तस्य हृदयगतिर्ववृधे, भालपट्टञ्च स्वेदबिन्दुभिश्चर्चितम्। अव्यक्तानिर्वचनीयवेदनयोन्मथितोऽप्यसौ किञ्चिदपि न वक्तुं पारयामास।

एतस्मिन्नेवान्तराले ऊर्ध्वतनचरणवीथिप्रदेशात् कस्याश्चिद् वनिताया: मधुरकण्ठस्वर: श्रुतिगोचरो बभूव-

"सर्वदमन ! ओ सर्वदमन ! जननी ते त्वामाकारयति। त्वरितं समागच्छ।"

"सर्वदमन" इति नाम श्रुत्वा दुष्यन्तस्यान्त:करणमतिविकलतां गतम्। शकुन्तला पुत्रं सर्वदमनाभिधानं समाचचक्षे। विचारनिमग्नमेवं तं सम्राजं रज्जुनिबद्धं बलादाकर्षन् स किशोरक: प्रोवाच-

"मातृष्वस: ! सम्प्रत्येव त्वरितं समागच्छामि। प्रथमं तावदेनमविनीतं पुरुषं तरुस्कन्धेन बध्नामि। अन्यथा मया दण्डनीयोऽप्ययं पलायिष्यते। अयं मम पालितं सुहृदं शार्दूलं व्यापादयितुं धनुषि शरं संहितवान्।"

दुष्यन्तेन पुन: स एव वनितास्वर: श्रुत:। सा कमपि जनं सम्बोधयति स्म-

"शकुन्तले ! ओ शकुन्तले ! पश्य स्वसुतस्योपद्रवम्। अद्याप्ययं पुनस्तथैवोपद्रवेषु संलग्न:। कमपि भद्रपुरुषं पाशेन संयम्य तं तरुस्कन्धेन निबध्नाति। सत्वरमागत्य भद्रपुरुषमेनं रक्ष।"

एतद् वचनमाकर्ण्य औत्सुक्यसम्भृतहृदयस्य किशोरकस्य दृष्टिरुद्गता। तस्य गतिरवरुद्धा। परं शकुन्तलेति नाम्नि श्रुतिगोचरे सति दुष्यन्तस्य हृदयगतिरतिशयं प्रवृद्धा। अतितरां वेपमानं हृदयं करतलाभ्यां सम्पीडयतस्तस्य दृष्टिरपि किशोरकदृष्टिमनुससार। तेनावलोकितम्-

"काचिद् वनिता पर्वतशिलाखण्डानाश्रित्य चरणवीथ्यां वर्तते। शृङ्गारप्रसाधनविहीना वल्कलवसनावृताऽपि वदनकान्त्या पर्वतीयवनप्रदेशान्

कान्तिमयानिवापादयन्ती सा तेजस्वितया त्रिभुवनमहिलासंहतिं तिरस्कुर्वन्ती मन्दं मन्दं पदमादधाना नीचैरेवावतरन्ती परिलक्ष्यते। साक्षात् तपोमूर्तिरिव सा वनिता तपोबाला हिमशैलकन्या पार्वतीव सुशोभते स्म।"

समीपमागतायां तस्यां दुष्यन्तो ध्यानावहितचेतास्तां विस्फारितलोचनाभ्यां पुनः ददर्श। परिचितेव सा प्रतिबभासे। दुर्बलं परमतितेजस्वि वदनं क्षीणा कृशा देहयष्टिः, असंस्कृताः दीर्घाः कुञ्चिताः घनाः श्यामवर्णाः केशाः जटाजूटरूपेण विततगौरवर्णभालपट्टे निबद्धाः। वल्कलवसनावृतस्य तेजःप्रदीप्तस्य तस्य सौन्दर्यस्य न किमप्युपमानम्। तदुपमितौ सर्वत्र दरिद्रता एवावर्तत। सन्निकृष्टं समागतायां तस्यां दुष्यन्तस्तां याथार्थ्येन पर्यचिनोत्–

"शकुन्तलैवेयम्।"

अहो , इयं शकुन्तला। मम भार्या , मम धर्मपत्नी, मम प्रिया, मम प्रियतमा। धर्मशास्त्राण्यनुसृत्य गान्धर्वविवाहविधिना मया परिणीता। एकस्यामेव रजन्यां प्रणयरतिविलाससुखान्यनुभूय मयेयं विस्मृतिगर्भे निक्षिप्ता। पुत्रेण सह शरणं याचमाना मयेयं सर्वजनसमक्षं राजसभायाः निस्सारिता। तिरस्कृत्य, अवमत्य, त्वं दुराचारिणी, त्वं पुंश्चलीति कटुवचनैर्विभेद्य बहिष्कृता। अधुनापीयं पवित्राचरणकान्त्या दीप्यते। व्रतपालनपरायाः अस्याः दुर्बलं कृशमपि वदनमतितेजस्वितया शुक्लपक्षप्रतिपच्चन्द्रलेखेव शोभते गौरवञ्च दधाति।

अहो अस्या अयं पुत्रः सर्वदमनः। शौर्यस्य, पराक्रमस्य, साहसस्य, सौन्दर्यस्य सौष्ठवस्य च साक्षात् प्रतिमानम्। ममैवायं सुतः। मम वीर्याद् रक्ताज्जातः। मम पौरवकुलगौरवम्। ममाकृतिवैशिष्ट्यमस्य वपुषि स्पष्टमेव प्रतिच्छायेव लक्ष्यते। परममुं सुतं वत्सलं कथमहमात्मीयं वक्तुं समर्थः ? एतत्सौभाग्यं कुत्र मे वर्तते ? मयैवैतत् सर्वं विनाशितम्। निजवंशगौरवमप्यमुमस्वीकृत्य, दुराचरणजातं कथयित्वा, तिरस्कृत्य च राजसभाभवनान्निष्कासितवानेनमहम्।

अहो, तस्य अबोधस्य बालकस्याकृतिः, तस्य वदने चक्षुषोश्च प्रतिबिम्बन्तो भावा अद्यापि मम हृदयमयःकीलका इव छिन्दन्ति। हे प्रभो! किमहं करोमि ? न जाने सम्प्रत्येष किशोरकः कथं मय्याचरिष्यति ? एषा शकुन्तला वा कथं मयि व्यवहरिष्यति ? चिन्तया, भयेन, उद्वेगेन, वेदनया,

औत्सुक्येन, वात्सल्येन, स्नेहेन च सममेव तस्यान्तःकरणमतिशयेनाऽऽलोडितम्।

उद्वेगचिन्ताग्लानिधिक्कृतिकिंकर्तव्यविमूढतादिभावैर्दुष्यन्तस्यान्तःकरणमतिशयेनाक्रान्तम्। तस्य वाणी जडीभूता। मुखादेकमपि शब्दमुच्चारयितुमशक्तः प्रस्वेदस्विन्नगात्रोऽसौ निश्चलनिर्निमेषनयनाभ्यां कदाचिच्छकुन्तलां, कदाचित् सर्वदमनमवालोकयत्। शकुन्तला भूयोऽपि निकटं समायाता।

विरहक्षामवपुष दुष्यन्तं न शकुन्तला प्रथमदृष्ट्या प्रत्यभ्यजानात्। तया दृष्टम् - एकं भद्रपुरुषं रज्जुपाशेन नियम्य तस्य पुत्रः समीपस्थेन पादपेन बद्धुमिच्छति। किञ्चिद् दृष्टिमुन्नमय्य, ससम्भ्रमं तमवलोक्य सर्वदमनं प्रत्युन्मुखीभूय सा क्षुब्धस्वरेणावोचत् -

"वत्स ! त्वं सततमेवोपद्रवपरो वर्तसे। समादरयोग्यस्यास्य भद्रपुरुषस्यैवं रज्जुपाशेन नियमनं किमुचितम् ? शिष्टजनानां किमेष व्यवहारमार्गः ? अहं तव कार्याणि प्रजापतये विज्ञापयिष्यामि। स एव तव नियमनेऽनुशासने वा समर्थः।

सर्वदमन उदतरत् -

"मातः ! मामपि शृणु। अयं भद्रपुरुषो मम प्रियं सखायं शार्दूलं लक्ष्यं विधाय धनुषि प्रत्यञ्चामारोप्य शरं सन्धाय, तं निहन्तुकाम आसीत्। वार्यमाणोऽसौ मामेव, तव सुतं शरव्यं कर्तुमैच्छत्। क उपायस्तत्रावर्तत ? अंसाद् रज्जुपाशमवतार्य आकुञ्च्यास्मिन्नेव मया प्रक्षिप्तः। ततो रज्जुपाशबद्धगात्रोऽयं तव सम्मुखं तिष्ठति। अम्ब ! तवैव शिक्षाया अयं प्रभावः। को मयि पौरवे धृष्टमाचरितुं समर्थः। यस्तु जनो मय्येवमाचरिष्यति, स तस्याः धृष्टतायाः फलमपि नूनं भोक्ष्यते।

मातः ! मया त्वत्तोऽप्यधिकं करणीयम्। कुरुदेशस्य चक्रवर्ती सम्राड् दुष्यन्तस्त्वया मे जनकोऽभिधीयते। त्वमहञ्च द्वावेव मातृपुत्रौ तेन तिरस्कृत्य राजसभाभवनान्निष्कासितौ। अनेनैव रज्जुपाशेन संयम्य तमहं तव चरणयोर्निपातयिष्यामि। तस्यां सभायां यत्त्वया प्रतिज्ञातं, तदहं सततं स्मरामि। दुष्यन्तो मम जनक इति सत्यमेव। परं किं भवति तेन ? कर्तव्यपालनसदाचरणविमुखेन तेन सम्राजा स्वकर्तव्यं न कथमपि पालितम्। सर्वजनसमक्षं निरपराधा पतिव्रता त्वं कलङ्किता। कठिनं दण्डनीयो हि

कर्तव्यपालनविमुखोऽसौ हस्तिनापुराधिपतिः।

मातः ! तव प्रशिक्षणेनैव रज्जुप्रक्षेपणाभ्यासो मया विहितः। पश्य, कथमहमेतस्यां विद्यायां दक्षो जातः। एवमेव सर्वगात्रेषु रज्जुपाशेन बद्धो महनीयोऽसौ चक्रवर्ती मया ते चरणयोर्निपातितः क्षमायाचको भविष्यति।"

सुतस्येमानि मातृभक्तिपूर्णानि शौर्याभिव्यञ्जकानि वाक्यानि निशम्य शकुन्तलायाः दुर्बलावपि प्रस्फुरन्तावोष्ठौ वात्सल्यगर्भितस्मितस्याऽऽभया चकाशाते। परं दुष्यन्तनामोल्लेखेन तया महती पीडा हृदयेऽनुभूता। नयनाभ्यां समुद्वेल्लन्त्यश्रूणि कथमति निरुध्य वाष्पगद्‌गदकण्ठेन सा जगाद –

"वत्स ! सम्प्रति भद्रपुरुषमेनं बन्धनविमुक्तं विधेहि।"

सम्प्रत्यपि शकुन्तला दुष्यन्तस्य न प्रत्यभिज्ञानं चकार। अल्पेतराणि वर्षाणि यावत् पश्चात्तापविरहवह्निदग्धस्य रात्रिजागरणकृशीभूतशरीरस्य तस्य प्रत्यभिज्ञानं प्रथमदृक्पाते न सम्भवमासीत्। तत्र तस्यागमनमप्यसम्भावनीयमवर्तत।

अथ बन्धनान्युन्मोचयितुमग्रेसरीभूते सर्वदमने, स वराको दुष्यन्तो वाष्पावरुद्धकण्ठेन अस्फुटस्वरेणावोचत् –

"शकुन्तले !"

(२५)

ससम्भ्रमुत्कम्प्य शकुन्तला दुष्यन्ते दृशं व्यापारयामास। अयमेव स्वरस्तया एकोनविंशतिवर्षपूर्वं श्रुतिगोचरीकृतः। अनेनैव हृदयहारिणा मधुरस्वेरण विमोहिता शकुन्तला दुष्यन्तस्य प्रणयपाशवर्तिनी बभूव। अस्यैव स्वरस्योन्मादस्य वशीभूता सा स्वकीयं मनो वा हृदयं वा वपुर्वा तस्मै वञ्चकाय समर्पयामास। अद्यापि सा तस्य स्मरति, तस्मै स्पृहयति। हृदयपटले स एवाऽऽसीनः। परन्तु तत्तु केवलं छलं वा, कपटो वा, वञ्चना वा, प्रतारणा वा, भ्रान्तिर्वा, मृगमरीचिका वाऽवर्तत। तस्यां कृष्णपक्षस्याष्टमीचन्द्रद्योतितायां रजन्यां क्षणिकमेव सुखमानन्दं वोपभुज्य तया कानि कानि दुःखानि नानुभूतानि, के के न अवमाना अवलोकिताः, कास्काः न तिरस्कृतय उपलब्धाः, कास्काः न विपत्तयः सोढाः।

चतुर्दशवर्षपर्यन्तं सा सुतं वक्षसाऽऽसज्य पितुराश्रमे स्थिता भर्तारं

दुष्यन्तमेकरजनीप्रियं प्रत्यैक्षत। कदाचित्तु बालकस्यास्य पिता तस्याः प्रियतमो हृदयहरणकारी चित्तचौरो, निजं सुतं निजां प्रियतमां च हृदये मनसि च कृत्वा विचिन्तयिष्यति रक्षिष्यति। तदनन्तरं सुतेन सह राजसभायां गतायां सत्याम् ....।

अहो, अयमेवासौ वञ्चकः, कपटपरायणो, मिथ्याचरणो, रूपसौन्दर्य-शालिशरीरोऽपि गरलगर्भहृदयः, कलुषान्धकारितान्तःकरणो दुष्यन्तः। अद्यायं शकुन्तलाया अधिकारे वर्तते।

अद्य सर्वेषामेवापमानानां वञ्चनानां मिथ्याभाषणानां तिरस्काराणां प्रतीकारे वा प्रतिशोधने वा सा समर्था। राजसभायां सर्वजनसमक्षं संघोषिता तस्याः प्रतिज्ञा वीरपुत्रेण समासाधिता। तस्याः कठिनतपस्या कठोरसाधनाऽद्य फलीभूता। सर्वदमनेनाद्य तस्याः सर्वेषामवमानानां तिरस्काराणाञ्च प्रती-कारः कृतः। मातुर्ऋणात् सोऽद्यानृण्यं प्राप्तः। एष कुरुदेशाधिपतिश्चक्रवर्ती सम्राड् दुष्यन्तो रज्जुपाशेन सर्वगात्रेषु बद्धस्तस्याश्चरणयोर्निपातित एव। यथाऽनेन पतिपदविडम्बकेन सा प्रेममयी, ममतामयी, विश्वसनीया, विश्वासवञ्चिता, विवशा, तपस्विनी तिरस्कृता, तथैवायं वञ्चकः प्रतारणकुशलो राजा रज्जुपाशनिबद्धस्तया प्रतिशोधनीयः। एवंविधैर्विचारैरुन्मथिता सा पुनः विचारयामास -

परन्तु किमनेन प्रतिशोधनेन तस्याः हृदयं शान्तं निरुद्वेगं निर्वापितं वा भविष्यति ? न हि प्रतिशोधनेन शान्तिं लभते जनः। सा आर्यनारी। पतिरेव तस्याः देवता। कीदृशोऽप्यसौ तया समादरणीयः। भर्त्रा तिरस्कृताऽपि सा न तं तिरस्करिष्यति। क्षणेनैवैते सुविचारास्तस्या अन्तःकरणमावव्रुः। बन्धनेषु बद्धगात्रं परिणेतारमवलोक्य प्रबलसन्तापस्तामाचक्राम। उच्चैरुत्क्रोश्य तरसा धावन्ती दुष्यन्तमुपगम्य सा ससम्भ्रममुच्चैः स्वरेण सर्वदमनमाह -

"सर्वदमन ! सर्वदमन ! अत्याहितं त्वया। किमिदमकरणीयं कृतम्। अयं ते जनकः कुरुदेशाधिपतिः प्रतापी सम्राट् पुरुवंशावतंसः। झटित्यत्रभवन्तं बन्धनान्मोचय, पादयोश्च निपत्य क्षमां याचस्व।"

मातुर्वचनानि निशम्य सम्भ्रमेण व्याकुलितचेताः विह्वलीभूतहृदयः सर्वदमनः क्षणेनैव दुष्यन्तं बन्धनरहितञ्चकार। तदनन्तरङ्करौ संयोज्य स कदाचिन्मातरं, कदाचिदपि च पितरं विस्मयानन्दनिर्भरैर्दृक्पातैरवलोकयितुं

प्रवृत्तः ।

लज्जाग्लानिखेदावसादादिभावैः सम्भृतहृदयस्य दुष्यन्तस्य चक्षुषी दुःखगर्भहर्षाश्रुभिरार्द्रे सञ्जाते। सहसैवासौ शकुन्तलायाश्चरणयोर्निपत्य सगद्गदकण्ठं प्रोवाच –

"क्षमस्व , प्रिये ! मां क्षमस्व। नाऽहं तव समक्षं किञ्चिदपि कथयितुं योग्यः । अक्षम्योऽपराधो मया कृतः । मत्सदृशः पापीयाञ्जनः कोऽस्मिन् भुवने भविष्यति, यस्तु विश्वासमयीं स्नेहमयीं, पवित्रतामूर्तिं, पतिव्रतां, पतिप्राणां भार्यां सुतेन सह समागतां साग्रहं साभिलाषं पत्युर्मुखमवलोकयन्तीं परित्यजेत् तिरस्कुर्यात्, स्वभवनाच्च निष्कासयेत् ?

प्रिये ! न जाने तेषु क्षणेषु मम मनः हृदयमन्तःकरणं वा कीदृशेन तमोगुणमयेन प्रबलेन मोहेन भ्रान्त्या वा समाच्छादितं, येन शुभमप्यशुभं भद्रमप्यभद्रं मे प्रतिबभासे। यथा कश्चिदन्धः शिरसि संनिहितां मधुरसौरभै-र्दिगन्तानाप्यायन्तीं स्रजं विषविकरालसर्पमिव परिक्षिपति, तादृश एव मम मनसो विकारस्तस्मिन् समये सञ्जातः ।"

दुष्यन्तस्येमानि वचनानि निशम्य शकुन्तलायाः हृदयगताः सर्वे सन्तापाः कलुषाः पीडाश्च व्यपगताः । नयने वाष्पबिन्दुभिरापूर्य प्रियं भर्तारं द्वाभ्यामेव भुजवल्लरीभ्यामुत्थाप्य सा स्निग्धमन्दमधुरस्वरेण ससम्भ्रमं सादरं जगाद –

"आर्यपुत्र ! किमिदं भवता क्रियते । उत्तिष्ठतु भवान्। मा मे चरणस्पर्शं विधाय पापभागिनीं विदधातु। न हि न हि, नैवं योग्यम् । मय्येवं भवन्तं विरक्तभावापन्नं विदधता विधिना मम पूर्वजन्मदुष्कृतां फलान्येव प्रदर्शितानि।" विधेर्विधानस्यापनयने न कोऽपि शक्तः ।

शकुन्तलायाः श्रद्धास्नेहसमादरसम्भृतानि वचांस्याकर्ण्य तद्भुजल-ताश्रितभुजो दुष्यन्तः कथमप्यात्मानमात्मनैवाऽऽश्वास्य समुदतिष्ठत्। परमतीतकृत्यलज्जया न मुखमप्युन्नमयितुं शशाक। अथाद्यैकोनविंशति-वर्षावध्यतिक्रमणानन्तरं तौ प्रणयिनौ पुनरपि संयोजितौ विधिना । तयोर्द्वयोरपि नयनेभ्यो विगलदश्रुबिन्दुभिः सकलान्येव कलुषानि, मनोमालिन्यानि, अविश्वसनानि, विरहजनितोत्पीडनानि तत्क्षणमेव प्रक्षालितानि।

एवं न जाने, कियन्तः क्षणाः व्यतीतास्तयोरन्योन्यमनिमेषं साग्रहं साभिलाषमवलोकयतोः । सहसैव सर्वदमनस्य सुहृदा व्याघ्रेण घुर्घुरायितम् ।

नवसङ्गमहर्षितयोस्तयोर्दृष्टिः सरंभसं सर्वदमने पतिता। सचेतनो दुष्यन्तः सर्वदमनं सस्नेहं प्रोवाच -

"वत्स ! कुलानन्दवर्धनं त्वामवलोक्य मम हृदयमतिहर्षेण सम्भृतम्। गौरवास्पदं नीतस्त्वया स्वपितुः वंशः। पुत्रस्तु स एव, यो गुणैः जनकं पराजयेत। सुचरितैः पितरौ प्रीणयेत्। त्वमनेन गौरवेण गौरवास्पदतां प्राप्तः। परं कथमहं कथयानि, यत् त्वं मम सुतः, मम सन्ततिः, मम कुलवर्धनः ? हा धिक् हा धिङ् मां श्रेयोविघातिनं, यस्त्वां तिरस्कुर्वन् परित्यजन्, जन्मविषये च शङ्कालुः कुकृत्यमिदञ्चकार। कुकृत्यकर्ता, दुष्टकर्मनिरतबुद्धिरहं पापीयान् निश्चयेन त्वय्यपराध्यामि। वंशोन्नतिकारकः, कुलगौरवभूतः, पराक्रमेणातिशयितसकलजगद्वीरजनसंहतिः पुत्रोऽप्यात्मीयभावेन न मया गृहीतः।

पुत्र ! सर्वदमन ! क्षमस्व माम्। एतस्य दीनस्य याचमानस्य पितुर्निर्घृणानपराधान् मर्षय। स्निग्धमधुरवचनैर्मां पितरं सम्बोध्य मम हृदयं मनो बुद्धिञ्चाश्वासय।"

एवं कथयित्वा दुष्यन्तः किञ्चिन्नम्रीभूय सर्वदमनस्य पादयोः पुरतो हस्तौ प्रसारयामास।

"पितः !" इति वाष्पावरुद्धकण्ठेनोच्चार्य सर्वदमनो दुष्यन्तस्य पितुर्वक्षसि समाश्लिष्टः। जनकोऽपि प्राणेभ्योऽपि प्रियं वत्सलमपत्यं निजवंशगौरवमालिङ्गने दृढं बद्ध्वा ललाटमध्ये चुचुम्ब। नयननिःसृतैरश्रुभिर्बिन्दुशः सम्पतद्भिः सर्वदमनस्यांसौ क्लेदितौ। भावावेशविवशयोः पितृपुत्रयोः कण्ठाभ्यां कतिपयक्षणपर्यन्तं नैकोऽपि शब्दः समुच्चरितः। तदनन्तरं किञ्चित्प्रशान्ते भावावेगे सर्वदमनस्त्वात्मानं पितुरालिङ्गनपाशादुन्मोच्यावनम्य चरणौ संस्पृश्यातिविनीतस्वरेण प्रोवाच -

"पितः ! अज्ञानेन कृतो ममापराधो भवता क्षन्तव्यः। भवान् मम जनक इत्यपरिचयादेवायमपराधो बभूव। अथवा अहमपराधी भवता दण्डनीयः।"

दुष्यन्तस्तु पुनः सर्वदमनमाकृष्याऽऽलिङ्गनपाशे दृढं बद्ध्वा स्नेहाश्रुगद्गदगिरा प्रोवाच-

"पुत्र ! अहमेवापराधी, येन त्वत्समः पराक्रमी, विनीतः, पितृभक्तश्च सुतस्तिरस्कृतः। धन्येयं सौभाग्यशालिनी तव जननी, येन त्वादृशः

कुलगौरववर्धनः सुतः प्रसूतः, अङ्के निधाय वक्षःस्थलसमुद्गतपयोधर-प्रवहत्पयांसि पाययित्वा वर्धितः, स्वयमेव च शिक्षितः। अस्यास्तव जनन्यास्तेजस्विता, दृढता, कर्तव्यपरायणता, पवित्रता, धार्मिकतेति सर्व एव गुणगणोऽपरिमेयः। भर्त्रा परित्यक्तयाऽपि अवमानितयाऽप्यनया पुत्रपालनरूपं महत्कार्यं सम्पादितम्। अस्याः शौर्यं शस्त्रसञ्चालनदाक्ष्यञ्चाद्भुतमेव। राजसंसदि सर्वजनसमक्षमेतदनया प्रमाणितम्। माता सर्वेषां गुरूणामपि गुरुरिति लोकोक्तिरनया प्रमाणिता।

पुत्र ! उत्कीर्णेव मम हृदयपटले सदा विराजते तव जनन्याः सा प्रतिज्ञा, याऽनया सर्वजनसमक्षं राजसभायाः निर्गच्छन्त्या समुद्घोषिता। अभ्यलषं सर्वदैवाऽहं यन्मम पुत्रस्तां पालयतु। अनया स्वसुतस्तथा शिक्षितो यथाऽसौ परमपराक्रमी शस्त्रसञ्चालनदक्षो भूत्वा पितरमपि पराजित्य मातुः प्रतिज्ञामपूरयत्। अयं जननीप्रतिज्ञां सम्मान्य मातुर्ऋणान्मुक्तः। जननीपयोमूल्यमनेन प्रदत्तम्।

वत्स ! त्वया पराजितोऽप्यहं गौरवं प्रसादं सन्तोषञ्चानुभवामि। सूक्तिरियं सर्वत्र प्रसिद्धा -

सर्वतो विजयमन्विच्छेत्, पुत्रादिच्छेत् पराजयम्। पुत्रो वै आत्मा, पितुर्गुणानादाय गर्भाज्जायते।

कथयत्येव दुष्यन्ते तथाविधं शकुन्तला सहसा भर्तृकराङ्गुलिप्रणयिनीं मुद्रिकामवलोकयामास। अहो, अत्र भर्तुर्दक्षिणकरकनिष्ठकाङ्गुल्यां सैव राजनामाङ्किता मुद्रिका, याऽनेन प्रियेण मालिनीतीरात् प्रस्थितेन प्रियाङ्गुलिप्रणयिनी विहिता। प्रियतमाङ्गुलिमनया मुद्रिकया सोऽकथयत् -

"मुद्रिकायामस्यामङ्कितानि नामाक्षराणि प्रतिदिनमेकैकं गणनीयानि। यस्मिन् दिवसे त्वं सर्वाण्येवाक्षराणि गणयिष्यसि, तस्मिन्नेव दिने त्वां नेतुमहं तपोवनं समागमिष्यामि।"

भर्तुः समीपमागत्य स्वमृदुकरपल्लवाङ्गुलिभिस्तां मुद्रिकां संस्पृशन्ती शकुन्तला प्राह -

"आर्यपुत्र ! कुतो भवतेयं मुद्रिका समधिगता ? अस्याः भ्रंशनमप्राप्तिर्वा मम सर्वासां विपदां कारणं बभूव। ममाङ्गुल्यामियं मुद्रिका किमपि

शिथिलेवाऽवर्तत। हस्तिनापुरागमनसमये शक्रावतारतीर्थे भागीरथीमवगाहमानायाः ममाङ्गुलितो विभ्रष्टेयं मुद्रिका सलिले निपतिता। भर्तृगृहगमनत्वरायमाणहृदयया मया च न लक्षिता। तस्मिन् समये राजसभायां यदीमां मुद्रिकां भवन्तं दर्शयितुमहं समर्थाऽभविष्यम् ....।

दुष्यन्तस्तु कथयामास –

"तदा त्वां मिथ्याभाषिणीमुद्घोषयितुं न मम सामर्थ्यमभविष्यत्। आवयोः परिणयप्रमाणमेतत् तत्र समुपस्थितमभविष्यत्।

प्रियतमे ! त्वयि राजसभायां समागतायां, परिचयप्रदाने च सञ्जाते मया त्वमभिज्ञाता। सकलस्य वृत्तान्तस्य तवाहमस्मरम्। अयमपि च मम हृदयान्तर्गतोऽभिलाषोऽवर्तत, यत् परमस्नेहपात्रीं हृदयनिर्विशेषां हृदयाधिष्ठातृदेवीमिव त्वां सादरं ससम्मानं साग्रहमन्तःपुरमानीय स्वप्रतिज्ञां परिपालयन् पट्टमहिषीपदे प्रतिष्ठापयेयम्। स्वसुतस्यास्य सर्वदमनस्यापि युवराजपदेऽभिषेचनं सम्पादयेयम्। परं प्रजाजनाः कथं विश्वसिष्यन्ति ? ते मामपवदिष्यन्ति यदस्माकं राजा प्रजापालको दुष्यन्तः परमलम्पटो रमणीसौन्दर्ययौवनलोलुपश्च वर्तते। यां कामपि नवयौवनविभूषितां लावण्यमयीं कामिनीमवलोकयति, वासनाभिभूत इन्द्रियवशंवदोऽयं तामेवान्तःपुरवर्तिनीं विदधाति।

केयं मुनिसुता तपोवनवासिनी तपस्विनी शकुन्तला ? कदा भूमिपालेन परिणीता ? कश्चायं चतुर्दशवर्षदेशीयः किशोरको, य आत्मानं राजसुतं कथयति ? नरपतिनेयं तपस्विनी यदि कदाचित् परिणीता, पाणिग्रहणसंस्कारानन्तरमेव कथं नान्तःपुरं समानीता ? केन हेतुनेयं चतुर्दशवर्षपर्यन्तं पितृगृहे स्थिता ? अहो तत्रैव तपोवने सुतं प्रसूय दीर्घमवधिं यावदयं वर्धितः। सम्प्रति राजानं छलितुं प्रलोभयितुं पापपङ्के च निमङ्क्तुं स्वसुतस्य राज्याभिषेकाभिलाषिणी, आत्मानं राजमहिषीं प्रमाणयितुं सर्वजनसमक्षमत्र राजसभाभवनं समायाता।

प्रियतमे ! न केवलं पौरजानपदा एव, अपितु अमात्यपरिषदपि, राजसभासभासदोऽपि इदमेव कर्णेषु जपेयुः, यदस्माकमयं राजा कामिनीदामिनीनवयौवनरामणीयकपाशबद्धः सौन्दर्यरूपमुग्ध एनां तपस्विनीमन्तःपुरनिविष्टामिच्छति। अमात्यपरिषदः, राजसभासभासदां पौरजा-

नपदप्रतिनिधीनाञ्च समर्थनमनुमोदनञ्चावहेल्य परिणीताऽपि भार्या न राजमहिषीपदप्रतिष्ठां भजते, न च कश्चिद् राजपुत्रोऽपि युवराजपदेऽभिषिच्यते। एवं न कोऽपि जनस्त्वां महादेवीपदाधिष्ठितां, न च सर्वदमनं युवराजपदाभिषिक्तं द्रष्टुं क्षमेत। तासु परिस्थितिषु सर्वदमनं स्वोत्तराधिकारिणं कृत्वा तस्य युवराजपदे प्रतिष्ठापनं त्वसम्भवमेवाऽवर्तत।"

"सम्प्रति ?" शकुन्तला समुत्कण्ठिता मन्दस्निग्धस्वरेणापृच्छत्।

दुष्यन्तः प्रत्युवाच -

"अङ्गुलीयकोपलब्ध्या प्रजाजनाः राज्याधिकारिणोऽमात्यपरिषत्सदस्याश्च विश्वासमापन्नाः, यदियं मुनिदुहिता दुष्यन्तेन धर्मशास्त्रानुसारं परिणीता। अयञ्च सर्वदमनस्तव सुतो राजपुत्रो वर्तते। सम्प्रति प्रजाजनाः मामपवदन्त्येव, यदनेन नरपालेन स्वपरिणीता धर्मपत्नी परित्यक्ता। पुत्रहीनेनाऽप्यनेन स्वकीयः सुतस्तिरस्कृतः।

प्रिये शकुन्तले ! त्वद्गमनानन्तरमेव तव संस्मृत्य संस्मृत्य विरहवेदनयाऽभिभूतेन मया न कदापि सुखं वा शान्तिर्वा लभ्यते। तव स्मरत एव मम जागरणदीर्घाः रजन्यो व्यतियन्ति। अहं तुभ्यं यानि यानि ......।

दुष्यन्तकथनं मध्य एव प्रतिरुध्य शकुन्तला प्राह -

"आर्यपुत्र ! भवतो दुर्बलं वदनं, क्षामक्षामं वपुश्चावलोक्यैव मया भवदन्तर्गतमनोव्यथा वेदना विह्वलता वाऽनुमीयते। प्रथमदृष्ट्यां प्रत्यनभिज्ञाने भवतः कृशतैव हेतुः। अनेन सर्वदमनेनापि पञ्चवर्षपूर्वं राजसभायां भवान् कतिपयक्षणं यावदेवावलोकितः। तस्मिन् काले चायमल्पवया आसीत्। अतो भवन्तं पितरमजानन्नयमज्ञानवशादेवैवमपराधी बभूव। क्षन्तव्योऽयं बालको भवता लालनीयः।"

"प्रिये ! न त्वयेत्थं कथनीयम्। करणीयमेवानेन कृतम्। एनं शौर्यगुणशोभमानं पराक्रमशालिनं स्वाभिमानिनं भयरहितं शस्त्रशास्त्रनिपुणं सुतं वक्षसाऽऽलिङ्ग्य मया या परमा शान्तिर्लब्धा, सा नाऽन्यत्र सुलभा।"

इति कथयित्वा दुष्यन्तः पुनः सर्वदमनमाकृष्याङ्के जग्राह। शकुन्तलया पुनः पृष्टम्-

"आर्यपुत्र ! भवता नैतद् रहस्यमुद्घाटितं, कथमियं मुद्रिका भवदङ्गुलिप्रणयिनी सञ्जाता?"

दुष्यन्तः प्रत्युवाच -

"प्रिये शकुन्तले ! राजसभाभवनं परित्यज्य गतायां भवत्यां प्रायशो दश मासाः व्यतीताः। हस्तिनापुरे मत्स्यजीवी एको रत्नवीथ्यां मुद्रिकाया अस्या विक्रयमिच्छन् नगररक्षकैश्चौर्यापराधे निगडितः। शक्रावतारनिवासिना तेन मत्स्यजीविना कथितं यद् गङ्गाप्रवाहे पाशपतितस्य विशालकायस्यैकस्य रोहितमत्स्यस्योदरं विदार्य तन्मध्यात्तेन मुद्रिकेयमधिगता।

शकुन्तले ! कथनमिदन्तव सत्यमेवाऽऽसीद्, यच्छक्रावतारतीर्थे गङ्गायां स्नानं कुर्वत्यास्तेऽङ्गुलितोऽङ्गुलीयकमिदं प्रभ्रष्टम्। अङ्गुलीयकमुपलभ्य पश्चात्तापवह्निर्मे हृदयमतितरां सन्तापयति। पुटपाककारागारे निगडितमिव मां सततं विरहानलज्वालाः सन्दीपयन्ति। अहम् अहम् ......।

शकुन्तला प्राह -

"आर्यपुत्र ! बलवती खलु भवितव्यता। कस्तां निरोद्धुं क्षमते। सम्प्रति प्रभूतशोकानले नाऽऽत्मानं सन्दीपयतु भवान्। अथ च, आर्यपुत्र ! भवतेदमपि कथनीयम्-यन्मानवैरगम्येऽस्मिन् प्रदेशे कथं भवदागमनं जातम् ?"

दुष्यन्त उवाच -

"प्रिये ! त्रिविष्टपजनपदाधिपतिरिन्द्रो देवराजः सहस्राक्षो मम मित्रम्। कालनेमिसुतः कालेयकोऽसुरराजस्त्रिविष्टपमाचक्राम। देवराजेन निमन्त्रितोऽहं, तस्य सहायतायै देवराजधानीममरावतीं सम्प्राप्तः। देवासुरसङ्ग्रामे देवसेना-पतिपदे नियुक्तेन मया विधिसौभाग्येन साऽसुरसेना पराजिता, कालेयकश्च द्वन्द्वयुद्धे निहतः। तदनन्तरं देवराजेनाहमाशातीतसम्मानेन सम्मानितः। परमदुर्लभेयं पारिजातमाला दिगन्तानपि सौरभेणापूरयन्ती सकलकामना-सफलकारिणी मम कण्ठे वासवेन पिनद्धा। अमरावतीतो निवर्तमानोऽहमनेन मार्गेण देवराजसारथिना मातलिना समानीतः। ततश्च तवालोकन-सौभाग्यशालितामलभे।

"प्रिये ! परमदुर्लभा इन्द्रसुतेन जयन्तेनाऽप्यभिलषणीया पारिजात-पुष्पमालिकेयं तव मृदुमधुरलघुकण्ठस्पर्शमेवार्हति। त्वमेवास्यास्तथ्यतोऽधि-कारिणी।"

इति कथयित्वाऽसौ सम्राट् तया पारिजातमालया शकुन्तलायाः कम्बुकण्ठं सुशोभयामास।

शकुन्तलायाः शरीरसौरभेण सङ्गतानि तानि पारिजातकुसुमानि दिव्यमनिर्वचनीयं सौरभं प्रसारयामासुः। तस्मिन्नेव समये वनस्पतिषु वर्तमानाः विहङ्गमाः मधुरकलरवेण वायुमण्डलमपूरयन्। सर्वदमनस्पर्शेण केसरेषु परामर्शसुखमनुभवता व्याडेन किञ्चित् घुर्घुरायितम्। मन्दशीतलेन समीरणेन तरुभ्यो लताभ्यश्च पुष्पाणि किसलयानि चादाय चिरविरहवेदना-सन्तापमनुभूय नवमिलनप्रहर्षरोमाञ्चितयोर्दुष्यन्तशकुन्तलयोरुपरि प्रकीर्णानि। मधुरस्मितेनौष्ठौ विभूषयन्त्या शकुन्तलया तिर्यक्कटाक्षेण दुष्यन्तः प्रणयी भर्ता गभीरं विद्धः।

प्रकरणसङ्गतं दुष्यन्तः पुनः प्रोवाच-

"देवराजस्येन्द्रस्य सारथिना मातलिना सञ्चालिते रथे स्थितोऽहं हस्तिनापुरमगच्छम्। मार्गेऽहं पूर्वदिशि अत्युङ्गतया नभो भिन्दन्तमिमं हेमकूटगिरिमपश्यम्। मातलिर्मामसूचयत् सहस्राक्षस्येन्द्रस्य पितरावदितिकश्यपौ परमपूजनीयौ पर्वतभूमिष्वेवात्र तपोवनेषु निवसतः। तयोर्दर्शनोत्कण्ठितोऽहं प्रणामलालसोऽत्र समायातः। इन्द्रसारथिर्मातलिः प्रजापतिकश्यपस्यानुमतिमुप-लब्धुं तपोवनं गतः। अहमत्रैव तं प्रतीक्षमाणः शुभशकुनैरनुगृहीतः। एषा यात्रा मह्यं कल्याणदायिनी शुभकारिणी चाऽभवत्। समायात एवात्र मयि, दक्षिणभुजः शुभोपलब्धिं सूचयन् पस्पन्द। शुभमत्रैव मम समक्षमुपस्थितम्।

शकुन्तले ! देवराजेनेन्द्रेणातिशयमनुगृहीतोऽहं, यो मामसुरैः सह योद्धुमामन्त्रयामास। इन्द्रसारथिं मातलिं प्रत्यपि मयाऽतितरां कृतज्ञता प्रकटीक्रियते, यो मामनेन हेमकूटमार्गेण हस्तिनापुरं नयति। प्राणेभ्योऽपि गरीयस्या त्वया कुलगौरवेण वंशवर्धनेन च सर्वदमनेन सुतेन सङ्गमनस्य हेतू तावेव वर्तेते।

प्रिये ! प्रजापतिकश्यपस्याश्रमं प्रति गतस्य मातलेः प्रचुरः समयो व्यतीतः। स तु आगच्छत्येव । तदनन्तरं वयं त्रयोऽपि प्रजापतिं कश्यपं मातरमदितिञ्च प्रणम्य तयोरनुमतिं प्राप्य एनमेव इन्द्ररथमारुह्य हस्तिना-पुराय प्रस्थास्यामहे। कुरुदेशस्य पौराः जानपदाः मन्त्रिमण्डलमन्ये च सर्वे राज्याधिकारिणस्त्वां महादेवीरूपे, सर्वदमनञ्च युवराजरूपेऽवलोकयितु-मतिव्यग्रमनोभिरौत्सुक्येन प्रतीक्षन्ते। महादेव्याः युवराजस्य च जयजयकारसंघोषैस्ते नभोऽपि निनादयिष्यन्ति।"

दुष्यन्तस्येमानि वचांसि श्रुत्वा हस्तिनापुरगमनकल्पनां विधाय साध्वसेन भयेन लज्जया च विवशा वेपमानतनुगात्रयष्टिः शकुन्तला प्रोवाच-

"न हि आर्यपुत्र ! न हि । एवं न कथनीयम् । सर्वदमनः राजसुत एव भवता नेयः । एष एव युवराजपदेऽभिषेचनीयः । अयं सार्वभौमश्चक्रवर्ती सम्राड् भूत्वा चतुरुदधिमेखलां धरां नियंस्यति, इत्येव कल्पनायां मम प्रसन्नता, मम सन्तोषः, मम सुखम् । अहमत्रैव हेमकूटगिरितपोवनेषु तपस्यन्ती, प्रजापतिं कश्यपं मातरमदितिञ्च सेवमाना स्वकीयमवशिष्टं जीवनं यापयिष्यामि । भवता सह लज्जाग्लानिभयादिभावैरनुविद्धाऽहं न गन्तुमुत्सहे ।

अपरञ्च, यस्यां राजसभायां सर्वजनसमक्षमहमपमानिता, पुंश्चली, व्यभिचारिणी, मिथ्याभाषिणी, राजपदलोलुपेत्यादिसम्बोधनैः सम्बोधिता, तत्र कलङ्कितमिदं वदनमहं दर्शयितुं न क्षमा । सर्वदमन एव भवता नेयः । अहमत्रैव वत्स्यामि ।"

शकुन्तलायाः वचांसीमानि निशम्यातिव्यथितहृदयस्य दुष्यन्तस्य नेत्रे अश्रुभिः परिपूर्णे सञ्जाते । तत्राश्रयमलभमानानि नयनसलिलानि कपोलमार्गेण प्रवहन्ति भूम्यां पतितानि । अञ्जलिमाबध्यासावुवाच-

"प्रिये ! न क्षान्ताः ममापराधा अधुनाऽपि त्वया ।अत एवैवंविधं त्वया निगद्यते । यदि त्वं मया सह हस्तिनापुरं न गमिष्यसि, अहमपि राजसिंहासनं परिज्यज्य त्वया सहात्रैव तपोवने वत्स्यामि । तदनन्तरं तव चरणसेवां कुर्वन् स्वापराधानां प्रायश्चित्तं विदधानः शेषां जीवनयात्रां व्यत्येष्यामि ।"

प्राणेभ्योऽपि प्रियस्य भर्तुरिमानि करुणदीनभावसम्भृतानि वचनानि निशम्य शकुन्तलाया अपि नयनाभ्यां वारिधारा प्रस्रवितुमारेभे । कथमपि चित्तोद्वेगं नियम्य भर्तुश्चरणावुपस्पृश्य सा कथयामास -

"आर्यपुत्र ! नातिपीडा हृदयेऽनुभवनीया । यथाऽऽदिशति भवांस्तथैवाऽहं करिष्ये ।"

(२६)

अस्मिन्नेव समये चरणवीथिपथेनावतरन् मातलिस्तेषां त्रयाणामपि परमौत्सुक्यभाजां दृशां गोचरीबभूव । प्रसन्नताया आलोकेन तस्य वदनं प्रकाशमानमासीत् । मन्दमधुरस्मितेन शोभमानाधरोऽसौ दुष्यन्तसमीपमागत्य

स्थितः। क्षणं यावत् सर्वदमने शकुन्तलायाञ्च दृशमाबध्य मातलिः प्रोवाच-

"राजन् ! वर्धापनं ते भूयात्। भार्यया सुतेन च भवतां सङ्गमनं सञ्जातमिति मेऽभिनन्दनं भवान् स्वीकरोतु।"

प्रसन्नवदनं समायान्तं मातलिमवलोक्य प्रथमन्तु दुष्यन्तेनानुमितं, यत्प्रजापतेरनुमतिरेवात्र कारणम्। परमधुना वृद्धिवचनान्युच्चरन्तं तं श्रुत्वा ज्ञातं, यदनेन शकुन्तलासर्वदमनमिलनवृत्तान्तोऽप्यधिगतः। स देवराजरथनियन्तारं पप्रच्छ -

"सखे ! कथं भवता ज्ञातोऽयं मम पत्नीपुत्रमिलनवृत्तान्तः ?" मातलिः प्रत्यवदत् -

"राजन् ! मार्गे समागच्छता मया प्रथममेव निवेदितं यदत्र प्रजापतेः कश्यपस्य तपोवने काश्चनाप्सरसोऽपि कुटीराणि कृत्वा समये समये तत्र विश्राम्यन्ति। आध्यात्मिकीञ्च शान्तिं ताः लभन्ते। तत्रैकं कुटीरं मेनकाया अपि वर्तते। अत्रेयं भवतो भार्या मातृकुटीरे निवसन्ती पुत्रं पालयति शिक्षयति च। प्रजापतिना कश्यपेनापि भवतः सुतस्य समुचितः शिक्षाप्रबन्धो विहितः। मेनकायाः प्रियसखी सानुमती प्रायशोऽत्रागत्यैनां निरीक्षते। अधुना शकुन्तलामनुगच्छन्त्या सानुमत्या सुखदं भवत्परिवारमिलनं विलोक्या-लक्षितभावेन निवृत्य सकलो वृत्तान्तः प्रजापतये निवेदितः।"

दुष्यन्तः पुनः पप्रच्छ -

"सखे मातले ! मानवैरगम्येऽस्मिन् पर्वतीये हेमकूटे कश्यपप्रजापतितपोवने कथमियं शकुन्तला पुत्रेण सार्द्धं समायाता, इति महन्मे कुतूहलम्।"

मातलिः प्रत्युवाच-

"राजन् ! जानन्त्येव भवन्तो, यदियं शकुन्तला मेनकायाः प्रसूतिः। तत्प्रभावादेवेयमत्र समायाता। तथापि विस्तृतं विवरणं प्रजापतिरेव भवन्तं कथयिष्यति। मात्राऽदित्या सह निजकुटीरे स्थितोऽसौ भवन्तं प्रतीक्षते।"

दुष्यन्तदृक्सन्निपातेन नितरां सङ्कुचिता व्रीडादिभावभरविनम्रा मुखमवनमयन्ती शकुन्तला प्रोवाच -

"आर्यपुत्र ! भवता सह गुरुजनसमक्षं गच्छन्त्यहं लजे।"

"प्रिये ! कल्याणि ! श्रेयांस्येव विधास्यन्ति गुरुजनाः। श्रेयसामवसरेषु

न तथा लज्जा करणीया।"

इति कथयित्वा दुष्यन्तः शकुन्तलायाः दक्षिणकरं निजवामकराङ्गुलिषु गृहीत्वा प्रजापतिकश्यपकुटीराभिमुखो बभूव। सर्वदमनं पुरस्कृत्य शकुन्तलया सह चरणवीथिपथेन पर्वतारोहणमसौ कृतवान्। मातलिरपि तमन्वगच्छत्।

स्वल्पसमयेनैव ते चत्वारोऽपि चरणवीथिपथमाश्रित्य शैलोत्सेधमारुह्य हेमकूटगिरिशिखरे विस्तृतां समभूमिं प्राप्ताः। अत्रत्यं रामणीयकं पावित्र्यं प्रकृतिप्रदत्तैश्वर्यं च विलोक्य दुष्यन्तस्य मानसं परमानन्दशान्तिनिमग्नं बभूव।

गिरिशिखरप्रदेशे विस्तृता समा भूमिः। तत्रैकतो मुनीनां तपस्विनामृषीणाञ्च शुद्धान्याडम्बरविहीनानि पवित्राणि कुटीराणि कल्पितानि। अपरतश्च देवानां देवाङ्गनानामप्सरसाञ्च नातिमहदाकाराणि रमणीयानि समृद्धिमन्ति भवनान्यासन्। अत्र तापसकुटीराणां देवभवनानाञ्च शुभ्रकान्तिमत्प्रस्तरनिर्मितासु भित्तिषु तनुसमतलवर्गाकृतिभिः श्यामवर्णैरश्मपाषाणफलकैरवसर्पिच्छदिषां निर्मितिः समलक्ष्यत। तपस्विनां देवानाञ्च निवासानां मध्यवर्तिन्यां भूमौ पार्श्वयोरर्धदेवानां यक्षाणां विद्याधराणां किन्नराणां गन्धर्वाणाञ्च कुटीराण्यासन्। एवञ्च चतुष्कोणिकायां विस्तृतायां तपोभूमौ पूर्वस्यां दिशि तपस्विनां कुटीराणि, पश्चिमस्यां देवभवनानि, प्रतीच्यां दक्षिणायाञ्च पंक्तिबद्धान्यर्धदेवानां गृहाण्यासन्।

एतैरावासैश्चतसृषु दिक्षु परिवृतो विस्तृतः समतलप्रदेशोऽवर्तत। तत्र सरल-साल-तमाल-शाक-शिंशपा-शाल्मलि-काञ्चनार-अशोक-पीतपुष्प-कदम्ब-वट-अश्वत्थ-निम्ब-प्रियाल-तुणादिपादपानाम् आम्र-जम्बू-बिल्व-आमलकी-निम्बु-नारङ्ग-अमृतफल-रम्भा-दाडिम-कपित्थादिफलतरूणाम् इङ्गुदी-केतकी-तुम्बरु-बन्धूक-जपादि-क्षुपानां नवमल्लिका-मल्लिका-यूथिका-जाति-सेवती-पिप्पली-बिम्बफलादिलतावल्लरीणां दीर्घाः पङ्क्तयः सुदीर्घं विस्तारवत्योऽनुपमां शोभां विस्तारयन्ति स्म।

वनस्पतीनां मध्ये व्याघ्रचित्रकतिन्दुकादिहिंस्रवन्यश्वापदैः सार्धं तपोवनपालितगोमृगादिपशवो निर्भयाः निश्शङ्काश्च विचरन्ति स्म। प्रजापतिकश्यपस्य प्रभावेण हिंस्रश्वापदानां हृदयेभ्यो हिंसाभावाः मृगाणाञ्च हृदयेभ्यो भीतिभावाः व्यपगताः।

मुनीनां कुटीराणां मध्ये कुटीरमेकं सुविततं विशिष्टमलक्ष्यत। तदेव

देवराजस्य पित्रोरदितिकश्यपयोर्निवासस्थानम् । वनस्पतिपंक्तिमध्ये विनिर्मितेन मार्गेण प्रचलन्तस्ते चत्वारोऽपि प्रजापतिकश्यपकुटीरं निकषा सम्प्राप्ताः ।

प्रजापतिस्तु कुटीरस्य बाह्यभागे वेदिसन्निहितदेवदारुकाष्ठ-विनिर्मितायामासन्द्यां चित्रमृगचर्मसमाच्छादितपृष्ठतलायां समुपविष्टो दुष्यन्तस्यागमनं प्रतीक्षते स्म। तस्य वामभागेऽर्धासने देवराजेन्द्र-जनन्यदितिरवस्थिता । दुष्यन्तं समागन्तमवलोक्य कश्यपोऽदितिं प्रोवाच -

"दाक्षायणि ! अयं कुरुजनपदस्याधिपतिर्दुष्यन्तस्तव सुतस्य मित्रं साहाय्यार्थं कालकेयासुरं निहन्तुममरावतीं गतः। समरशौण्डेन परमपराक्रमशालिनाऽनेनेन्द्रस्य कुलिशमाभूषणमात्रमेव कृतम्। मेनका-प्रसूतिः शकुन्तलाऽस्य धर्मपत्नी शाकुन्तलेयश्च सर्वदमनः सुतः । विधिवशाद् भाग्यदोषाच्च स्वल्पेतरं समयं यावद् इयं शकुन्तला प्रियेण विरहिता महतीं विरहवेदनामन्वभवत् । परमद्यानुकूलीभूतस्य विधातुरनुग्रहेणेयं भर्त्रा सङ्गता । सर्वदमनोऽप्ययं सकलविधशस्त्रास्त्रशास्त्रविद्यापारङ्गतो युवराजपदयोग्यता-मादधानः पित्रा सङ्गत्य मधुमासपुण्डरीकमिव विकसितवदनोऽवलोक्यते । पश्य, तव पुत्रस्य सारथिर्मातलिरयं सपुत्रपत्नीकं दुष्यन्तमग्रेसरीकृत्य समागच्छति ।"

कुटीरवृतिमुल्लंघ्यान्तः समायाते दुष्यन्ते, अदितिकश्यपौ सकलानपि तान् स्नेहसम्भृतदृष्टिवृष्टिभिः संभावयामासतुः । प्रथमं तावद् दुष्यन्तोऽदि-तिकश्यपयोश्चरणेषु प्रणनाम ।

कश्यप आशीर्वादान् जगाद-

"वत्स ! चिरञ्जीवी भूयाः। धर्मानुसारं प्रजाः पालयेथाः ।" अदितिराशीर्वादान् व्यतनोत् -

"वत्स ! सङ्गरेषु सततं शत्रून् पराजीयाः ।"

तदनन्तरं शकुन्तला देवराजस्य पित्रोः चरणेषु प्रणनाम। कश्यपः साशीर्वादं जगाद -

"वत्से ! इन्द्रस्य शचीव त्वं भर्तुरभिमता भूयाः ।"

अदितिराशीर्वादान् व्यतनोत् -

"वत्से ! सौभाग्यवती भूयाः । महादेवीपदं प्राप्नुयाः । तव पतिपुत्रौ

दीर्घायुषौ भूयास्ताम् ।"

तदनन्तरं सर्वदमनोऽदितिकश्यपयोश्चरणेषु प्रणनाम । कश्यपः साशीर्वादं जगाद –

"वत्स ! सार्वभौमं चक्रवर्तिपदं प्राप्नुयाः ।"

अदितिराशीर्वादान् व्यतनोत् –

"वत्स ! यशस्वी भूयाः । मातुः पितुश्च वंशयोः कीर्तिं प्रसारयेथाः ।"

देवराजस्य पित्रोश्चरणेषु कृतप्रणामाः सर्वेऽपि जनाः तत्समक्षमेव परिष्कृतभूमौ कटास्तरणालङ्कृतायामुपविष्टाः । दुष्यन्तस्तु पुनः कश्यपस्य चरणावुपस्पृश्य प्रोवाच –

"भगवन् ! भवतां मयि महत्यनुकम्पा यज्जायापरित्यागरूपकलङ्क-कलङ्कितमपि मां भवन्तौ सौभाग्यप्रदानेन साशीर्वादवचनैरनुगृह्णीतः । समादरणीयमेनकासम्बन्धेनापि मया भवतोः महानपराधो विहितः । भवत्सगोत्रं महर्षिं कुलपतिं कण्वं प्रत्यहमपराधी । अनधिकारिणेऽपि मह्यं भवद्भिर्महनीया आशीर्वादाः वितीर्णाः । इयं साध्वी पतिव्रता भर्तृहितकांक्षिणी शकुन्तला विश्वासघातकेन मया वञ्चिता छलिता । अस्मिन् वीरे पितृभक्ते च बालके सर्वदमने विहितानन्यायान् विचार्य मम हृदयं लज्जयाऽभिभूयते । शिरश्चावनतं ग्लान्या भूम्यामेव प्रवेशमभिलषति ।

वाष्पगद्गदं नयनजलक्लिन्नविलोचनं दुष्यन्तं सस्नेहं सानुग्रहञ्च सान्त्वयन् पुनः कश्यपो जगाद–

"वत्स ! योगदृशा सकलोऽपि वृत्तान्तो मयाऽधिगतः । शकुन्तलायाः पूर्वजन्मकृतकर्मणामेवैतत् फलम् । सम्प्रति भुक्तकर्मभोगा सा पवित्रान्तः-करणा सर्वथा महादेवीपदयोग्या ।

अपि च तस्मिन् काले प्रमाणं विनैव यदि त्वमिमां शकुन्तलां निजशुद्धान्तर्वर्तिनीमकरिष्यः, राजकर्मचारिणः सर्वदमनमेनं तवोत्तराधि-कारिरूपेणाङ्गीकरणे निषेधभावमेव प्राकटिष्यन् । अङ्गुलीयकस्य भ्रंशनेन सह तव शकुन्तलापरिणयप्रमाणमपि विभ्रष्टम् । अङ्गुलीयकस्य लाभः प्रजाजनान् विश्वासयितुं क्षमते यच्छकुन्तला तव धर्मसम्मता परिणीता भार्या सर्वदमनश्च धर्मसम्मतः सुतः ।"

तदनन्तरं कश्यपः शकुन्तलां प्राह–

"वत्से ! विप्रकृतयाऽपि तिरस्कृतयाऽपि त्वया भर्तरि रोषो न करणीयः। तव पूर्वजन्मकृतकर्मणामेवैष दोषः। विधौ विपर्यस्ते सर्वमेव विपर्यस्यति। विधिविपर्ययादेव त्वया महान्ति कष्टानि सोढानि अवमानाश्चानुभूताः। विधिदोषादेव भर्त्रा त्वमवहेलिता। परं सम्प्रति मनसो मालिन्यस्यापगमनेन त्वं भर्तुः प्राणेभ्योऽपि गरीयसी। तवायं सकलगुणविलक्षणः सुतः सर्वदमनः मेधावी, शूरो, वीरः, समरदक्षः, सकलशस्त्रशास्त्रविद्यापारङ्गतः, मातरि पितरि च भक्तिमत्तमः, द्वयोरेव कुलयोर्यशांसि दिग्दिगन्तेषु प्रसारयिष्यति।"

कमलमुकुलाकारमञ्जलिं निबध्य दुष्यन्तः पुनः निवेदयामास – भगवन्! कुतूहलमन्यन्मम चित्तमालोडयति। अनुमतिश्चेत् प्रष्टुमिच्छामि।

"वत्स ! अकथितमपि कुतूहलं ते जानामि। कथयामि। श्रूयताम्।" इति कथयित्वा कश्यपः सकलं वृत्तान्तं वर्णितवान् –

"त्वया तिरस्कृतेयं शकुन्तला सुतेन सह राजसभाभवनान्निर्गत्य हस्तिनापुरसीमानमतिक्रम्य गङ्गातीरेऽप्सरस्तीर्थमुपगम्य सकलजगद्वन्दनीयायाः, पीयूषोपमब्रह्मजलद्रवैः कलङ्ककलुषप्रक्षालनसमर्थायाः भगीरथतपःप्रभावेण धरायामवतीर्णायाः, शिवशिरोभूषणायाः भागीरथ्याः कलकलनिनादिनीं तरलतरङ्गसङ्कुलां धारां विलोक्य तत्रैव सोपानपंक्तिमाश्रित्योपविष्टा।

तत्र किङ्करणीयमित्यनिश्चयदोलाधिरूढेयं प्रथमं तावत् पितुरन्तिकगमनमेव श्रेय इति विचारयामास। परं भर्त्रा तिरस्कृता पितृगृहसमागता नारी न तत्र शोभते, न समाद्रियते, सततञ्च पितृगृहजनैर्व्यङ्ग्योक्तिभिश्छेद्यते। गङ्गातटस्थिताप्सरस्तीर्थसोपानपङ्क्तितलोपविष्टया तया न कोऽपि मार्गोऽवलोकितः।

सर्वदमनोऽपि किङ्कर्तव्यविमूढ इव गङ्गाप्रवाहे द्वावेव पादौ निमज्ज्य चिबुकं दक्षिणकरतलगतं कृत्वा तूष्णीमेवातिष्ठत्। शनैः शनैरस्ताचलोन्मुखीभूते मार्तण्डमण्डले मन्दीभूते च दिवसालोके सानुमत्यादयः काश्चनाप्सरसस्तत्रागत्य सलिलक्रीडारताः बभूवुः। सहसा सानुमत्याः दृष्टिश्चिन्तार्णवनिमग्न-सकलेन्द्रियमनोव्यापारायां शकुन्तलायां निपतिता।

मेनकासानुमत्योः परस्परं घनिष्ठः सखीभावो वर्तते। द्वावेवान्योन्यमतितरां स्निह्यतः। मेनकायाः सन्ततिरियं शकुन्तलाऽलक्ष्यरूपेण तस्याः सततं स्नेहभाजनम्। मेनकाऽपि मनसि स्वगर्भप्रसवायै कन्यायै स्पृहयति। विश्वामित्रस्य

तपोभङ्गस्खलितवीर्यस्य क्रोडे सद्योजातां तां कन्यां निक्षिप्य स्वामिनं सहस्राक्षमुपगताया अपि मेनकाया हृदयं न स्नेहभावशून्यमवर्तत। विश्वामित्रस्तु, कन्यायाः प्रसविता, तां स्ववीर्यप्रसूतिं नरमांसलोलुपैः श्वापदैः समाकीर्णेऽरण्ये परित्यज्य गतः। परं तदनन्तरमलक्ष्यरूपेण मेनका नवजातायाः कन्यायाः रक्षणप्रबन्धमकरोत्। मेनकायाः प्रेरणयैव शकुन्तास्तावत्तां जुगुपुः यावदेतां महर्षिः कण्वः कुलपतिर्निजाङ्कगतां न चकार।

समिदाहरणार्थं सुहृदं विश्वामित्रञ्चावलोकयितुं वनमागतः कण्व इमां कन्यां शकुन्तरक्षितामाश्रममानीय शकुन्तलेति नाम्ना विभूष्य पालयामास। अत्रापि सा मेनकाऽलक्ष्यरूपेण सुतामवलोकयति स्म, हितचिन्ताञ्च विदधाति स्म। शकुन्तलायाः पालनं, पोषणं, विवाहः, पुत्रप्रसूतिः, पुत्रशिक्षा, हस्तिनापुरगमनमिति सर्वे व्यापारास्तस्या अविदिता इति न। मेनकाया इमासु चिन्तासु सानुमत्यपि तस्याः सखी अवर्तत।

पुत्रेण सह गङ्गातटे समुपविष्टां मेनकासुतां शकुन्तलामवलोक्य विस्मयविकलहृदया सानुमती त्वरितगत्या तत्रैव समाजगाम। हस्तिनापुरगतं सकलं वृत्तान्तं निशम्य व्यथितहृदया सा शकुन्तलां समवबोध्यात्र हेमकूटपर्वते ममाश्रमे न्यवेशयत्।

शकुन्तलाजननी मेनका त्वत्र समागत्य, सुतायाः दुरवस्थामवलोक्य, तिरस्कृतिकथाञ्च निशम्य प्रथमं दुःखिता, तदनन्तरं चातिशयं रोषावेश-पराधीना बभूव। जामातरं दण्डयितुं विनाशयितुञ्च सा निश्चिकाय। परन्तु धन्येयं शकुन्तला, धन्यञ्च तस्या उज्ज्वलं चरितम्। भर्तृहितकामनाभिभूता परिणेतारमेव सर्वस्वं मन्यमाना, भर्तृमयमनःकाया सा कथमपि जननीं समवबोध्यापगतक्रोधां प्रशान्तहृदयामकरोत्। सुताया अनुरोधात् तव च देवराजसौहार्दभावात् सा रोषं संजहार। योगदृशा सकलं भाविवृत्तान्तमवगम्य मयाऽपि सूचिम् - पञ्चवर्षाणामवधौ व्यतीते पुनरप्यनयोः सङ्गमो भविता।

तदारभ्यैवेयं शकुन्तला मम तपोवने मेनकाया आवासे निवसन्ती दिनानि गमयति। तपोवनस्थितोऽप्ययमावासोऽप्सरसो निवासत्वात् सकलभौतिकसुखसुविधासामग्रीसम्पन्नो वर्तते। तथापीयं तपस्विनी पति-विरहविदग्धचित्ता तपस्विनामेवातिकठिननियमान् पालयति। महता दृढेन सङ्कल्पेनाध्यवसायेन चानया स्वसुतः सर्वदमनः कृत्स्नत्वेन समर्थो

सर्वगुणविभूषितश्च योग्यः कृतः।

शाकुन्तलोऽयं स्वपराक्रमगुणैरेव स्वपितुरनुग्रहमनपेक्ष्य चक्रवर्ती सम्राड् भवेदिति लक्ष्यीकृत्योद्देश्यं, सकला शिक्षणव्यवस्था मया विहिता। यद्यपि तपोवनेऽस्मिन् सकलविद्यापारङ्गता आचार्या उपाध्यायास्तपस्विनो निवसन्ति, सर्वदमनञ्चाध्यापयन्ति, तथापि शकुन्तलेयं स्वयमपि धर्मं, राजनयं, समरव्यूहरचनां, शस्त्रसञ्चालनञ्चैनं शिक्षयति। अस्य हृदये साऽदमनीयाः महत्वाकांक्षा उद्बोधयति। इयं स्वयमपि सकलविद्यापारङ्गता राजनीतिनिपुणा च वर्तते। अनयाऽयं ते सुतः किशोरवयस्येव महतः साम्राज्यभारस्योद्वहने समर्थः सशक्तश्च विहितः। इन्द्रायुधाद् बज्रादृते सकलानामन्येषामायुधानां प्रयोगमयं विजानाति। महतामपि सैन्यानां सञ्चालनेऽयं योग्यतामादधाति।

वत्स ! मेनकाप्रसूतिरियं शकुन्तला धरायां सकलासु नारीषु श्रेष्ठं रत्नम्। अस्याः गुणानां वर्णनमसम्भवमेव। शेषोऽप्यसंख्यसंख्याभिर्जिह्वाभिस्तान् वर्णयितुं न क्षमः। ईदृशी सौन्दर्यमयी, लावण्यमयी, मनोहारिणी, शीलवती, पतिव्रता, दृढनिश्चयकारिणी, सकलविद्यावदाता, शस्त्रेषु शास्त्रेषु च समानरूपेण निष्णाता, पुत्रपालनव्रता सकलगुणगणगरिष्ठा नारी विधात्रा न पुरा कदापि रचिता। न चासौ पुनः कदापि रचयिष्यति। शकुन्तलारचनायां विधातुः लोकत्रयविलक्षणं सकलमेव सृष्टिरचनाकौशलमभिव्यज्यते।"

दुष्यन्तस्तु द्वाभ्यामेव कराभ्यामञ्जलिं निबध्य मस्तकमवनमय्य निवेदयामास–

"भगवन् ! शकुन्तलायामविश्वासं भजता, तिरस्कारञ्च प्रदर्शयता मया महानपराधो विहितः। जानन्नप्यहमपरिचितमेवात्मानं प्रादर्शयम्। परमङ्गुलीयकलाभानन्तरमेव लज्जया ग्लान्या च मे हृदयं दूयते। अन्तःकरणञ्च पश्चात्तापानलेन दह्यते। क्षणमपि सुखं न मया लभ्यते। क्षणिकाऽपि निर्वृतिर्न मयाऽधिगम्यते। परं विधेर्विधानं न कोऽपि प्रमार्ष्टुं क्षमते। दैवेन ललाटपट्टे लिखितं न कोऽपि प्रोञ्छितुं समर्थः।

अवलोकयतु भवान्, शकुन्तलाङ्गुलितः प्रभ्रश्याङ्गुलीयकस्य सुरसरित्सलिलस्रोतसि पतनं, तस्य मत्स्येन निगरणं, मत्स्यस्य मत्स्यजीविनो जाले बन्धनं, मत्स्यजीविनो मत्स्योदरविदारणं, मत्स्योदरादङ्गुलीयकस्य निर्गमनम्, अङ्गुलीयकं विक्रेतुं मत्स्यजीविनो हस्तिनापुररत्नवीथीमागमनं, मत्स्यजीविनो बन्धनं,

अङ्गुलीयकोपलब्धि:, कालेयकस्य त्रिविष्टपाक्रमणं, सहस्राक्षेण मे निमन्त्रणं, कालेयकपराजय:, परावर्तमानस्य मम हेमकूटागमनं, विचित्ररूपेणात्र मम पुत्रेण भार्यया च सङ्गमनमिति सकल एव घटानाचक्रगतिर्विधिना चित्रपटलिखितेव प्रतिभाति। अनेन विधातुर्निरङ्कुशता, सर्वभावेन च बलवत्ता सिद्धा।

भगवन् ! इयं शकुन्तला धर्मसम्मता परिणीता भार्या मम कुलस्य लक्ष्मी:, हृदयस्य सर्वस्वम्। अस्या प्रसवोऽयं सर्वदमनो मम सुत: कुरुवंशस्य गौरवम्।"

प्रजापतिरवोचत् -

"यथार्थमेव भणसि त्वम्। सम्प्रति त्वया हस्तिनापुराय प्रस्थातव्यम्। तत आगतस्य ते प्रचुर: समयो व्यतीत:। प्रजाजना: महदौत्सुक्यभरनिर्भरास्त्वां प्रतीक्षन्ते। पत्न्या पुत्रेण च सह समायातं त्वां महतोल्लासहर्षभरेण समारोहेण सम्भावयिष्यन्ति। सहस्राक्षसारथिरयं मातलिस्त्वामल्पसमयेनैव राजधानीं प्रापयिष्यति।"

पुनरपि करावायोज्य दुष्यन्त: कथयामास -

"भगवन् ! अन्यैकाऽपि याचना मया निवेदयितुमिष्यते।"

कश्यप उवाच -

"वत्स ! ते मनोगता: भावा: मया योगबलेन पूर्वमेव विदिता:। कुरुदेशस्य सम्राड् दुष्यन्त: शाकुन्तलेयसहितया शकुन्तलया पुनरपि सङ्गत इति वृत्तान्तं कुलपति: कण्व: समाधिमास्थित: स्वयमेव वेत्ति। तथापि ममैक: शिष्यो व्योमरथमारुह्य व्योममार्गेणैवैनं वृत्तान्तं कण्वाय कुलपतये निवेदयितुं तदाश्रमङ्गत:।"

दुष्यन्तस्य पुनरपि प्रार्थना बभूव -

"भगवन्! सहस्राक्षेण देवराजेनाप्ययं समाचारोऽवगन्तव्य:। शकुन्तला-जननी मेनकाऽप्येनमपत्यवेदनाविनाशनं समाचारं निशम्य निर्वृता भवतु।"

कश्यपेनोक्तम् -

"वत्स ! दुष्यन्तशकुन्तलयो: सङ्गमनयोजना देवराजेनैव कल्पिता।

एकतस्तु प्रियमेनकादु:खेन दु:खितोऽसौ बभूव। अपरतश्च स्वसुहृदो मनोव्यथा तं सततमपीडयत्। देवराजस्यादेशेनैव मातलिस्त्वामनेन हेमकूटमार्गेणानिनाय। सम्प्रति समेनको देवराजेन्द्रस्त्वेनं शकुन्तलामिलनवृत्तान्तं विस्तरेण मातलिमुखादेव श्रोष्यति।"

प्रजापतिकश्यपस्यानुदेशमुपलभ्य दुष्यन्त: शकुन्तलया सर्वदमनेन च सह हस्तिनापुरप्रस्थानाय समुत्थितो बभूव। देवराजस्य पित्रोश्चरणेषु ते सर्वे पुन: प्रणेमु:। गमनोद्यतेषु तेषु कश्यप: सर्वदमनस्य शिर: करतलेन परामृशन्नुवाच-

"वत्स ! दुष्यन्त ! सर्वदमनोऽयं शाकुन्तलेयस्ते सुतो महान् तेजस्वी पराक्रमशाली च विद्यते। करतलयोश्चरणतलयोश्चायं चक्रवर्तित्वरेखालाञ्छितो वर्तते। निश्चयेनायं सप्तसमुद्रपरिवेष्टितां सप्तगिरिस्थिरीकृतां सप्तद्वीपवतीं धरित्रीमधिकृत्य सार्वभौमश्चक्रवर्ती सम्राड् भूत्वा त्रिभुवनं प्रशासिष्यति। अप्रतिहतंगतिरस्य रथ: सकलधरण्यां विचरिष्यति। जगद्विजयिनमेनं न कोऽपि पराजेतुं शक्ष्यति।

अपि च, भुवनस्य सकलान् प्राणिनश्चायं सर्वदमन: पालयिष्यति भरिष्यति च। कुलपति: कण्वस्तु यथार्थमेवैनं सर्वदमननाम्ना सुशोभितञ्चकार। तथापि सकललोकस्य भरणादयं भरताभिधानेन प्रसिद्धिं यास्यति। प्रतापशालिना भरतेन पालित: पोषितो रक्षितश्चायं देशोऽपि भारतवर्षनाम्ना जनै: कथयिष्यते। भरतस्य जननी तपोवनवासिनी शकुन्तलेयं भारजननीति सर्वेषु समयेषु भारतीयैर्जनै: कीर्तिता वन्दिता च भविता।"

कश्यपप्रजापतिचरणयो: पुन: प्रणामाञ्जलीन् विकीर्य दुष्यन्त: प्रोवाच-

"भगवन्! सर्वदमनोऽयमत्रभवता समादरणीयया जनन्या च यथा श्रेष्ठै: संस्कारै: संस्कृतो विद्याभिश्च शिक्षितस्तथाऽऽशास्यमेतत् सर्वं, यद् भवता कथितम्। भवत आशीर्वादा: ध्रुवमेव साफल्यं प्रयास्यन्ति।"

(२७)

तदनन्तरं पश्यत्स्वेव सर्वेषु प्रजापतितपोवननिवासिषु, हेमकूट-गिरिशिखराच्चरणवीथिपथेनाधोऽवतरणं कृत्वा मुख्यमार्गमाश्रित्य देवराजरथारूढा: शकुन्तला-सर्वदमन-दुष्यन्ता: स्यन्दनस्य वेगेन क्षणेनैव

नयनागोचरतां गताः। सपुत्रपत्नीकं दुष्यन्तं हस्तिनापुरं प्रापय्य मातलिरिन्द्ररथं सञ्चालयन् त्रिविष्टपाय प्रातिष्ठत। देवसपत्नानसुरान् विजित्य समागतं भार्यापुत्रलाभमुदितं सम्राजं हर्षनिर्भराः प्रजाजनाः नृत्यन्तो गायन्तो वादयन्तश्च सपरमोल्लासं स्वागतसमारोहानायोज्य सम्मानयामासुः।

स्वागतसमारोहाणां पञ्चदिवसानन्तरं सम्राजा राजसभायामाहूतानाममात्यपरिषत्सदस्यानां समितिसदस्यानां पौरजानपदप्रतिनिधीनाञ्चानुमतिः प्राप्ता समर्थनञ्चाधिगतं, यच्छकुन्तला महादेवीपदे प्रतिष्ठापनीया, सर्वदमनश्चोत्तराधिकारी घोषयित्वा युवराजपदेऽभिनिषेचनीयः।

अभिषेकसमारोहावसरे हस्तिनापुरे पुनश्च महतां हर्षोत्सवानामायोजनानि विहितानि। साम्राज्यस्य कोणेभ्यः कोणेभ्यः समागताः सामन्तराजानः प्रजाप्रतिनिध्रयः पौरजानपदाः नागरिकाश्च दुष्यन्तं प्रति सम्मानं प्रदर्शयन्तो युवराजायोपायनानि निवेदयामासुः।

महाराजो दुष्यन्तः सर्वदमनस्य सक्षमयोः दृढयोः वृषभस्येव स्कन्धयोः राज्यधुरमारोप्य चिन्ताभरविमुक्तः शकुन्तलया सह परमान्तरिकां शान्तिमधि. जगाम। सर्वदमनोऽपि स्वल्पेनैव कालेन सकलां धरित्रीं विजित्याप्रतिहतगतिरथो भूत्वैकच्छत्रचक्रवर्तिसाम्राज्यं संस्थापयामास।

उत्तरदिशि आहिमगिर्युत्तुङ्गशिखरप्रदेशेभ्यो वैवस्वताशायां विन्ध्यमप्युल्लंघ्य कुमारीतीर्थपर्यन्तमादक्षिणसमुद्रतटवर्तिभ्यो जनपदेभ्यः, प्राच्यां ब्रह्मपुत्रनदमप्यतिक्रम्य आब्रह्मदेशसीमान्तप्रदेशेभ्यः, प्रतीच्याञ्च सिन्धोर्नदस्य परे पारे सुदूरमावंक्षुसरित्प्रदेशेभ्य आगत्याऽऽगत्य राजानः सर्वदमनस्य प्रतापातिशयेन सन्तप्यमानाः पराजिताः हस्तिनापुरे सम्राजो दुष्यन्तस्य पादपीठनिहितचरणाङ्गुलिरन्ध्रभागान् निजशिरोनिहितमुकुटजटितपद्मरागमणिकान्तिभिरारक्ततां निन्युः।

दुष्यन्तस्य धरायामवतीर्णस्य पञ्चाशदधिकाः संवत्सराः व्यतीताः। युवराजपदाधिरूढो राज्यधुरं वहन् सर्वदमनः सकलान्यपि राजकार्याणि सम्पादयति स्म। प्रजानां भरणादसौ दुष्यन्तेन "भरत" इत्युपाधिना विभूषितः। शकुन्तला च महादेवीपदसमलङ्कृता भारतजननीत्युपाधिना गौरवं प्रापिता।

अथैकस्मिन् दिवसेऽन्तःपुरस्थितोऽसौ सम्राड् दुष्यन्तः शङ्खप्रदेशयोः कर्णयोरन्तिकं केशेषु किञ्चिद् धवलत्वगुणमालोकयामास।

अथ धर्मशास्त्राण्यनुसृत्य वानप्रस्थकालोऽयं सम्प्राप्त, इति दुष्यन्तेन विचारितम्। तेन भौतिकजगतः सकलानामेव विलासोपभोगानां रसास्वादनं विहितम्। अप्रतिहतानि राज्याधिकारसुखान्यनुभूतानि। राजसुलभाः सर्वे विलासाः विलसिताः। सकलाभिलाषाः प्रपूरिताः। अधुना शिथिलित-गात्रेन्द्रियस्य तस्य मनसि भौतिकसुखभोगविलासबाधकेन वैराग्येण पदं निधत्तम्। स्वकुलपरम्परामनुसृत्य शकुन्तलया च सह परामृश्य स सकलमेव राज्यप्रशासनभारं भरतोपाधिधारिणि सर्वदमने समारोप्य महद्भिः समारोहैः सह तं राजसिंहासनारूढं विधाय राज्याभिषेकोत्सवं सम्पन्नञ्चकार।

भगवति भास्करे उदयाचलशिखरमिव भरतोपाध्यलङ्कृते सर्वदमने राजसिंहासनमारूढवति, शुभेऽहनि भद्रकारिणि नक्षत्रे दुष्यन्तो धर्मशास्त्रोक्त-विधिना सपत्नीकं वानप्रस्थसंस्कारं सम्पाद्य वनेषु वासं स्वीचकार।

साऽपि तपोवनवासिनी शकुन्तला स्वल्पमेव कालं राजभवनविलासानु-पभुज्य सकलगृहस्थकर्मकाण्डेभ्यो विमुक्ता सुतं राजसिंहासनारूढं विलोक्य परमानन्दमनुभवन्ती, प्रजासेवानिवृत्तेन महता सम्राजा दुष्यन्तेन सह तपोव्रतसम्पादनाय कुलपतेः कण्वस्य शान्तं तपोवनं तपोवनवासिनीरूपेण पुनः प्रविष्टा।

इति महाकविडाक्टरकृष्णकुमारकृता तपोवनवासिनीत्यभिधाना कथाकृतिरुपन्यासविधारूपेण विरचिता समाप्ता ।।

परिशिष्ट १

तपोवनवासिनीगद्यकाव्यगतसूक्तयः

अग्निप्रदक्षिणादिविधीनतिक्रम्य स्त्रीपुरुषसंयोगो लोकनिन्दाभाजनतां प्राप्नोति।

पृ० ६५-६६

अनुरूपाय वराय कन्यका प्रदेया। पृ० ७९

अनुपस्थिता परं भविष्यति काले सम्भाविता विपत् पूर्वमेव प्रतिकरणीया। पृ० ३५

आर्यमर्यादापरित्यागकारिभ्यो जनेभ्यः सततं भेतव्यम्। पृ० १४९

उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत्। पृ० ३६

ऋषयो हि दृष्टधर्माः विदितसकलतत्त्वसाराः योगदृशा त्रिकालज्ञाः। पृ० ६२

ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः । पृ० १२६

कन्या परकीय एवार्थः। पृ० ७८

काकोलूकीयं वैरम्। पृ० १६

कामिन्यः स्वभावादेव कामक्रोधादिविकारवत्यो भवन्ति। पृ० १४७

कालगतिरनक्रमणीया।

क्षत्रियेषु गान्धर्वविवाहः प्रशस्यतमो गण्यते। पृ० ६४

गुणवतेऽनुरापाय वराय कन्या प्रतिपादनीया। पृ० ६५

घटितं चक्रं न निवर्तयितुं शक्यते। पृ० ८०

जन्मजन्मान्तर्गता हि भवन्ति परस्परसंयोगस्नेहव्यापाराः। पृ० ८०

तपोऽनुष्ठानभीरवो हि देवाः। पृ० ३४

दक्षिणभुजः शुभोपलब्धिं सूचयन्। पृ० २००

दारा अपि पतिगृहचारिणो भवेयुः। पृ० १०८

दैवेन ललाटपट्टे लिखितं न कोऽपि प्रोञ्छयितुं समर्थः। पृ० २०८

धर्म एव मनुष्याणां हितसाधकः। पृ० १६०

धर्मं कदापि न त्यजेत्। पृ० १६०

धर्मे अर्थे कामे च पत्नी सदा पत्युः सहायिका। पृ० १४०

न युक्तमसत्कृतसत्कारमतिथिजनं परित्यज्य गन्तुम्। पृ० ४५

न वयमप्सरसः सन्ततिपालनकार्याणि सम्पादयामः। पृ० ४०

न विपक्षबलवृद्धिः कदाप्युपेक्षणीया। पृ० ३५

न हि प्रतिशोधनेन शान्तिं लभते जनः। पृ० १६३

नारीषु पतिव्रता श्रेष्ठा। पृ० १११

पतिगृहपरित्यागः नारीभ्यो बृहत् पातकम्। पृ० १०८

पतिगृहं प्रयान्ती कन्या केन निरुध्यते । पृ० ७८

पत्युः प्रभावेणैव नारीणां सकलाः मनःकामनाः पूर्यन्ते। पृ० १११

पत्युः प्रभुता सर्वतोमुखी। पृ० १०८

पापकर्म कृत्वा न कोऽपि जनो विधिना प्रमुच्यते। पृ० १४४

पुत्राभावो महत्कष्टकरो हृदयोन्माथयिता च। पृ० १५८

पूतात्मनां महर्षीणां कोपं सोढुं कः क्षमते। पृ० ६५

पूर्वजन्मकृतकर्मणां फलानि भोक्तव्यान्येव। पृ० ८०

प्रजानां रक्षणं राज्ञामेव कर्तव्यम्। पृ० २४

प्रतिज्ञापालनं प्रथमं कर्तव्यम्। पृ० १४०

बलवती खलु भवितव्यता। पृ० १६६

बहुवल्लभा खलु राजानः श्रूयन्ते। पृ० ६३

बाल्ये पितुरधीनतायां वर्तमानः कन्याजनः कुतः स्वातन्त्र्यं लभते। पृ० ६४

मधुना स्नातु ते रसना। पृ० १८८

मरणमेवेहन्ते स्वाभिमानिनो न तु याचनम्। पृ० ११६

माता सर्वेषां गुरूणामपि गुरुः। पृ० ८२

मानुषसुलभो लघिमा। पृ० ६३

रक्षितो धर्म एव सकलान् रक्षति। पृ० १४०

राजरक्षितव्यः सकलः प्रजाजनः। पृ० ६१

राजरक्षितव्यानि हि तपोवनानि। पृ० ६३

वह्निना गृहे प्रदीप्ते कूपखननोद्यमस्य को लाभः। पृ० ३५

विधिना लिखितान्यक्षराणि प्रमार्ष्टुं कः क्षमते। पृ० १५७

विधेर्विधानं न कोऽपि प्रमार्ष्टुं क्षमते। पृ० २०८

विधौ विपर्यस्ते सर्वमेव विपर्यस्यति। पृ० २०६

सत्यमेव परमो धर्मः। पृ० १४०

सदैव शङ्काकुलानि हि भवन्ति नारीणां चेतांसि। पृ० ६३

सन्दीप्ते भवने कूपखननोद्यमो वृथा भवति। पृ० १६८

समयः स्वल्पः शत्रुश्च शिरसि वर्तते। पृ० १६६

सर्वतो विजयमिच्छेत् पुत्रादिच्छेत् पराजयम्। पृ० १६६

सुतस्य स्पर्शमवाप्य कस्य जनस्य चित्तमानन्दभरेण नान्दोल्यते। पृ० १४१

सुलभकोपा हि मुनिजनानां प्रकृतिः। पृ० ३६

स्त्रियस्तु स्वभावतः प्रवञ्चनशीलाः प्रतारणकुशलाः मिथ्याभाषिण्यश्च भवन्ति।

पृ० १४६

स्वधर्मस्थितो नियतानि कर्तव्यानि सम्पादयन्नेव जनः सिद्धिं लभते। पृ० ३३

शास्त्रवचनप्रमाणैर्लोकव्यवहाराणामुल्लंघनमपवादकारणम्। पृ० ६५

शुभस्य शुभं भद्रस्य भद्रं विधास्यत्येवानतिक्रमणीयो विधिः। पृ० ८२

परिशिष्ट-२

तपोवनवासिनीति गद्यकाव्ये ऋतुवर्णनानि

(१) गीष्मर्तुः

अथैकस्मिन् समये पुष्पकिसलयादिसमृद्धिसमेधिते मलयानिलमदान्विते जनजनमानसोल्मादकारिणि व्यतीते वसन्तर्तौ ग्रीष्मर्तुः प्रादुरभवत्। रजनीभिः सङ्कुचितुमारब्धम्। परिणामरमणीयाः दिवसाः विशालतां प्रपेदिरे। नवयौवनमदोन्मत्ता कामिनी उषाः स्वकीयं पाटलं विद्योतमानं वदनं प्रियतमदिनकरं दर्शयितुं सोत्कण्ठा सती, स्वमुखावरणमन्धकारनेपथ्यं पूर्वतोऽपेक्षयाऽतिसुप्रभातवेलायामपसारयितुं प्रावर्तत। दिवसस्य प्रथमप्रहरे सम्पूर्णतां गत एव प्रातःकालीनस्तपर्तुकुसुमसौरभसुवासितोऽपि शीतलः पवनः प्रखरभास्करप्रतप्तकिरणेभ्यः सन्तापमादायास्य लोकस्य सकलानेव प्राणिनः सन्तापयितुं प्रवृत्तः। किञ्चिद्दिवसपूर्वमेवोपवनानां यानि पुष्पाणि किसलयानि च निशीथिनीतुहिनबिन्दुभिरार्द्राणीव सञ्जायन्ते स्म, तपर्तुप्रारम्भे शुष्काणीव सन्ति म्लायमानानि संलक्ष्यन्ते स्म।

अस्मिन् काले रसालतरुविटपेषु सघनरूपेण विकासभावं भजमानाः मञ्जर्यः शोभमानाः बभूवुः। शिरीषकुसुमविभूषितकर्णाः प्रमदा उषसि अरुणालोके उपवनेषु कुसुमानि विचेतुं पर्यटन्। बन्धूक-जपा-यूथिका-मल्लिका-केतकी-सेवती-शतदल-सहस्रदलपुष्पाणि सर्वत्र वाटिकासु वापीषु च विकसितान्यवालोक्यन्त।

प्रभातवेलायां मधुरकलध्वनिना कूजनं कुर्वन्तः खगा आहारान्वेषणायेतस्ततत उत्पतन्तो, भास्करे किञ्चिदुन्नते वियति समारूढे सत्येव प्रचण्डसन्तापसमाकुलाश्छायाशीतल-स्थानानामन्वेषणेऽतिव्यग्राः समजायन्त। सूर्ये मध्याकाशमलङ्कृतवति सत्येव सकलमपि विश्वं निस्तब्धमिव भूत्वा गीष्मर्तोः स्वागताय सन्नद्धम्बभूव।

तपोवनवासिनी पृ० ९-१०

(२) वर्षर्तुः

प्रचण्डसन्तापदायकं ग्रीष्मर्तुमवहेल्य वियत्युन्नमद्भिर्मेघैः धरातलसमविषमप्रदेशान् धारासारजलवर्षणैः समानिव सम्पादयन्, जीमूतानां कडकडदिति घोरगर्जनैस्तडिताञ्च तडतडदिति निर्घोषचमत्कृतिभिः मृदुलहृदयप्राणिनां चेतांसि कम्पयन्, सहस्रशः सरितां नवजलदजलपूरितानां वृद्धिमापादयन्, नवकिसलयैः हरितपत्रैश्च विद्रुममरकतमणिखचितशोभान्

तरुलताक्षुपादीन् सम्पादयन् क्षेत्रेषु धान्यादिसमृद्धिकरः वर्षर्तुः समायातः।

तपोवनवासिनी पृ० ८४-८५

(३) शरदृतुः

विगते च वर्षाकाले शरदृतुना गगनावरणभूताः जीमूताः विद्राविताः। सुदूरं यावच्च विस्तृतनीलमणिसमा प्रभा वियति विस्तारिता। मध्ये च तस्य क्वचिदपि वर्षाजलविरहिताः धवलवर्णाः मेघा अदृश्यन्त। रजन्यां नक्षत्रखचितनीलमम्बरं रजनिरमण्याः स्वर्णसूत्रमणिजटित-नीलशाटिकाम्बरमिव प्रतीयाय। स्वच्छनीलनीरेषु विकसितपुण्डरीकारविन्देन्दीवरतामरसशोभां सम्पादयन् शरदृतुरपि हेमन्तर्तुना विद्रावितः। तपोवनवासिनी पृ० ८६

(४) हेमन्तर्तुः

शनैः शनैः दक्षिणायनीभूतस्य भगवतो मार्तण्डस्य मण्डलमचण्डमरीचीनां कोमलमुत्तापं प्रसारयद् बहुगुणरणीयं सञ्जातम्। क्षेत्राणि परिपक्वकपिशशालिधान्यप्रसवैश्चितानि निविडेक्षु-दुर्गमाणि च कुर्वन्, दिशां सीमान्तराणि प्रफुल्लनीलोत्पलशोभितानि मनोहरक्रौञ्चसारसहंसरव-निनादितानि सम्पादयन् विलासिनस्तरुणजनान् पीनस्तनोरःसुशोभितसुन्दरीसंसर्गकामुकान् जनयन्नयं सततमभिरामो हेमन्तर्तुः क्रमशः मदविकलकामिनीमानविद्राविणा महामहिम-हिमाच्छन्नेन योषितां प्रियेण शिशिरर्तुना समाक्रान्तः। तपोवनवासिनी पृ०८६

(५) शिशिरर्तुः

तस्मिन् काले जगत्प्राणो मारुतोऽपि तुषारसङ्घातनिपातशीतलः, प्राणिनो शैत्येन जडीकुर्वन् गृहाणि निरुद्धवातायनानि चकार। गगनतलं प्रालेयपातैर्धूमधूसरितमिव प्रतिबभौ। दिनानां परिणाहाः रजनीनाञ्च लघुताः लुण्ठिताः। सलिलेष्ववगाहाः सुदुष्कराः बभूवुः। क्षेत्राणि यवगोधूमादिशूकधान्यहरितबालिराशिभिः सम्भृतानि अत्युन्नतैरतिमधुररसभरै-रिक्षुभिरावृतानि छिद्यमानमुद्गमाषबल्लाणि अतसीसर्षपादिस्वर्णपीतपुष्पसमाच्छादितानि शोभमानानि नयनप्रीतिकराणि बभूवुः। तपोवनवासिनी पृ० ८६

(६) वसन्तर्तुः

सकलजनचित्तोन्मादकरो मनोरागप्रमोदनो हृदयपुण्डरीकविकासनो मधुकारी वसन्तर्तु-राविर्बभूव। उपवनेषु क्षुपतरुलतावल्लरीवीथयो नवोद्गतकिसलयैरनुरागातिशयं प्रकटयन्त्यः शुभ्रपीतारुणलोहितनीलविविधपुष्पस्तबकनिचयैरद्भुतां चित्रविचित्रतां दधुः। पलाशाशोक-शाल्मलिकाञ्चनारपाटलादितरुषु विकसितानां पीतरक्तारुणप्रसूनस्तबकानां विकासेन दिशां प्रान्तराण्यप्यरुणायितानि। आरग्वधतरवः पीतवर्णमञ्जरीभिर्वासन्तिकशोभां प्रसारयामासुः।

नवमल्लिकामल्लिकायूथिकाशेफालिकादिवल्लर्यो नवकैशोरवयःप्रपन्नरमणीजनाचिरोद्गत-कुचग्रन्थिरम्यगौरकुसुमस्तबकशोभिताः भुजविटपैर्निकटस्थिततरुस्कन्धालिङ्गनलालसा इव वर्धमानाः बभूवुः।

बहुदूरं यावद् विस्तृतेषु क्षेत्रेषु कनकाभपीतपुष्पराशिविभूषितसर्षपक्षुपान्तरालेषु यवगोघूमादिशूकधान्यानां शूकराशयः समदृश्यन्त। शोणवर्णप्रसूनालङ्कृताशोकतरुगर्भेषूपवनेषु मधुमासेन सर्वत्रोन्मादस्य साम्राज्यमिव स्थापितम्। प्रस्फुटतां प्रसूनानां सौरभं परागञ्चापहृत्य दक्षिणमलयसमीरणो दिशि दिशि स्पर्शसुखं विकरन् बालकबालिकासु क्रीडनोत्साहं, युवकयुवतिषु यौवनोन्मादं, प्रौढवृद्धजनेषु च भ्रमणोत्साहं वितन्वन् मन्दं मन्दमप्रतिबन्धं प्रावहत्। वनेषु वाटिकासु सरोवरेषु च विकसत्सु कुसुमेषु पुण्डरीकेषु नीलोत्पलेषु तामरसेषु च कोषमध्याविर्भूतमधुपरागकणलोलुपानां षट्पदानां विरावा विरहिजनदर्शनकुपितरतिपति-रोषहुङ्कृतय इव समश्रूयन्त। रसालपादपाः मदिरसौरभचयं दधानाभिर्मञ्जरीभिः समाच्छादिताः। चूतमञ्जरीणामास्वादनेनोन्मत्तकोकिलानां कुहूरवाः सर्वत्रोन्मादभावेन परिक्रमतां द्विरेफानां गुञ्जनरवानतिक्रम्य पथिकजनहृदयानि विदारयन्त इव लोकानां श्रवणकुहराणि बधिरयन्ति स्म। रसालतरुविटपाश्लेषेण मदोन्मत्ताः बिम्बफलवल्लर्योऽतिशयितकामिनीजनरदच्छद-रक्तवर्णफलनिचयं दधानाः सर्वत्रानुरागमिव प्रासारयन्।

स्थाने स्थाने बृहदाकारेषु लघ्वाकारेषु च मन्मथरिपुप्रियेषु बिल्ववृक्षेषु समवलम्बमानानां पचेलिमानामपचेलिमानां पीतहरितवर्णानां मालूरफलानां मनोरमैः सौरभैः समाकृष्टाः मधुकराः मधुकरीभिः सार्द्धं मधुरसास्वादाभिलाषिणस्तत्र समागत्य अतिकठोरावरणं भेत्तुमपारयन्तो निराशा एव परावर्तमाना मृदुविटपखरकण्टकैः संघट्टन्तः क्षता इव भवन्तः पुनः स्मितविभूषितप्रियतमाकृपाकटाक्षनिशितनाराचैर्निहन्यन्ते।

तपोवनवासिनी पृ० १५३-१५४

(६) हिमालये चैत्रमासः

समयोऽयं चैत्रमासस्य। वसन्तस्य साम्राज्ये सर्वत्र वर्तमानेऽपि अत्युन्नतपर्वतीयभूभागेषु प्रकृत्या शैत्यं न तथा विसृष्टम्। हेमन्तर्तोरुत्पातानां प्रभावाः यत्र तत्रावलोक्यन्ते स्म। हिमाच्छादितातितुङ्गगिरिशिखराणां हिमानीप्रभवाणां सुरसरिति प्रवहतां लघुबृहदाकाराणां दिवसे दिवसकरकरैः रजतराशीनामिव निशायां चन्द्रचन्द्रिकया हेमचयानामिव प्रकाशमानानामेतेषां संस्पर्शमवाप्य हिमशीतलः पवनस्तत्रत्यानां जीवधारिणां वपूंषि सततं प्रकम्पयन् तान् पावकतापं सेवितुमौर्णवसनान्यतिस्थूलानि च धारयितुं प्रेरयति स्म। आपादशिरःस्थूलैरौर्णवसनैः परिवृतास्ते हिमशीतप्रचण्डवाताघातभयेन मुखानामनावरणेऽप्यसमर्थाः समलक्ष्यन्त। सैकतेषु पर्वतारोहणेषु च यत्र तत्र हेमन्तर्तुहिमपातसूचकाः हिमावशेषाः सर्वत्राऽवर्तन्त।

काव्यकर्तुः परिचयः

जन्मतिथिः- 10 फरवरी 1925

जन्मस्थानम्- पश्चिमोत्तरप्रदेशस्थ मुरादाबादनगरम्

पारिवारिक पृष्ठभूमिः-

काव्यकर्तुः पितृचरणानां श्रीभूषणशरणमहोदयानां मुरादाबादनगरवास्तव्यानां गणना नगरस्यातिसमृद्धसफलव्यापारिकवर्गेऽलक्ष्यत। भारतीयस्वातन्त्र्यान्दोलनेतिहासेऽसौ प्रसिद्धो महनीयरूपेणागण्यत। आङ्ग्लशासनजनितपराधीनतापीडामसहमानोऽसौ कृष्णमन्दिरं कारागृहमपि स्वप्रवेशेनालञ्चकार। काव्यकर्तुः जननी श्रीमती रामप्यारी धार्मिकवृत्तिधारिणी कुशलगृहिणी समवर्तत। श्रीभूषणशरणमहोदयाः स्वजीवनकाल एव स्वतन्त्रतासूर्यालोकप्रकाशितां भारतभुवमवलोक्य प्रसादातिशयेन विकसितहृदयपुण्डरीकः १९४८ तमे खीष्टाब्दे भगवता समाहूतः स्वर्गलोकयात्रामङ्गीचकार।

१९४६ तमे खीष्टाब्दे डा० कृष्णकुमारमहोदयो बीसलपुरनिवासिनीं प्रह्लादस्वरूपतनूजां वैदर्भीमिव दमयन्तीं परिणीय गृहस्थधर्मरतो बभूव। सा पाविनी जननी हिमानीनिर्मल-सलिलप्रवाहानिव त्रीन् सुतान् सर्वविधगुणसुभूषितान् प्रदीपालोकमयङ्ककुमारानेकाञ्च गौरवान्वितां सुतां मञ्जुलां प्रसुषुवे।

शिक्षा-

राष्ट्रीयस्वतन्त्रतान्दोलनारक्तचित्तो राष्ट्रीयविचारधारासमलङ्कृतहृदयो भूषणशरणमहोदयः स्वपुत्रं आङ्ग्लशिक्षाभ्यसनपरिवर्जितमानसमायुषो सप्तमे वर्ष उपगङ्गं गुरुकुल-काङ्गडीविश्वविद्यालयेऽध्ययनाय 1931 तमे खीष्टाब्दे प्रवेशयामास। चतुर्दशवर्षावधिसमयं यावद् विद्यामधीत्यासौ तरुणावस्थां प्रपन्नः कृष्णकुमार आयुर्वेदालंकारप्रमाणपत्रमधिगम्य स्नातक- पदवीमभूषयत्। तदनन्तरमसौ आगराविश्वविद्यालयाद् एम.ए. (संस्कृत) इत्युपाधिं सम्प्राप्य पी-एच-डी. इत्युपाधिमप्यधिगतवान्। तदनन्तरं वाराणसीस्थसंस्कृतविश्वविद्यालयाद् आचार्य (साहित्य) पदवीं लब्ध्वाऽसौ प्रखरप्रतिभान्वितोऽध्ययनशीलो विद्यार्थी पुण्यभूमिकेदारखण्ड-स्थश्रीनगरे प्रतिष्ठापितेन गढ़वालविश्वविद्यालयेन डी. लिट. इत्युपाधिनापि सप्रतिष्ठं विभूषितः।

अध्यापनम्-

स्वकुलमातृसेवासंलग्नमानसोऽसौ कृष्णकुमारः प्रथमं तावद् गुरुकुलविश्वविद्यालये-ऽध्यापनकार्यं स्वीचकार। तदनन्तरं मुजफ्फरनगरस्थसनातनधर्मस्नातकोत्तरमहाविद्यालयेऽध्या-पनकार्यं निर्वाह्य विभिन्नेषु उत्तरप्रदेशस्थराजकीयस्नातकोत्तरमहाविद्यालयेषु प्रायशः देवतात्महिमालयनगाधिराजक्रोडसमवस्थितेषु संस्कृतविभागाध्यक्षपदमलंकुर्वाणः श्रीनगरे

नवस्थापितगढवालविश्वविद्यालये संस्कृतविभागाध्यक्षपदमङ्गीचकार। बहुतिथं यावत् सम्मानं समुपलभ्य विद्यार्थिनां स्नेहादरपात्रतां गतोऽसौ १९८५ तमे खीष्टाब्दे सेवानिवृत्तो बभूव। तदनन्तरं गङ्गातीरमेव बहु मन्यमानः सर्वकलुषप्रक्षालन समर्थे पुराणेषु प्रसिद्धे कनखलनगरे जीवनयात्रानिर्वहणाभिलाषी निवासमभिललाष।

शोधकार्याणि-

डा० कृष्णकुमारमहोदयेन बहूनि शोधकार्याणि विश्वविद्यालयानुदानायोगसहायतयाऽन्यासां च संस्थानां सहयोगेन स्वयं चापि महताऽध्यवसायेन प्रपूरितानि। तेषां च कानिचिदधो लक्ष्यन्ते-

(i) केदारखण्डपुराणस्य सम्पादनमनुवादो विवेचनात्मकमध्ययनञ्च
(ii) संस्कृतरूपकेषु जन्तूनां वनस्पतीनाञ्च स्थितिः
(iii) संस्कृतशास्त्राणां प्रशासनिकसंस्थाः
(iv) प्राचीनभारतस्य सांस्कृतिक इतिहासः
(v) गढवालजनपदस्य प्राचीना अभिलेखाः

शोधनिर्देशनम्-

डा० कृष्णकुमारस्य निर्देशने पञ्चाशदधिकछात्रैः शोधकार्याणि सम्पाद्य विभिन्नेभ्यो विश्वविद्यालयेभ्यः शोध-उपाधयः सम्प्राप्ताः।

ग्रन्थलेखनम्-

डा० कृष्णकुमारेण विरचिता लिखिताश्च चत्वारिंशदधिकग्रन्थाः वर्तन्ते। विषयानुसारं तेषां नामान्यधो निर्दिश्यन्ते-

(i) प्राचीन भारतीय संस्कृतिरितिहासश्च

(१) भारतीय संस्कृति के आधार तत्त्व
(२) वैदिक साहित्य का इतिहास
(३) संस्कृत साहित्य का इतिहास
(४) गढवाल के प्रमुख तीर्थ
(५) गढवाल के संस्कृत अभिलेख
(६) गढवाल के प्राचीन अभिलेख और उनका ऐतिहासिक महत्त्व
(७) प्राचीन भारत का सांस्कृतिक इतिहास

(ii) समालोचनात्मकग्रन्थाः

(८) पं० अम्बिकादत्त व्यास-एक अध्ययन
(९), संस्कृत-नाटक-सूक्ति-तरङ्गिणी
(१०) संस्कृत नाटकों का भौगोलिक परिवेश
(११) संस्कृत नाटकों का जीव-जगत्
(१२) संस्कृत नाटकों का वानस्पतिक पर्यावरण

(iii) अलङ्कारशास्त्रीयग्रन्थाः

(१३) अलङ्कारशास्त्र का इतिहास
(१४) ध्वन्यालोक व्याख्या
(१५) छन्दोऽलंकारप्रकाश

(iv) वैदिकसाहित्यम्

(१६) वैदिकसाहित्य का इतिहास
(१७) ऋक्सूक्तसंग्रह
(१८) ऋक्सूक्तसुधाकर
(१९) चतुर्वेद-सूक्त-सुधाकर
(२०) वैदिकसूक्तसंग्रह

(v) काव्य-व्याख्या ग्रन्थाः

(२१) अभिज्ञानशाकुन्तलम्
(२२) प्रियदर्शिका नाटिका
(२३) प्रतिमानाटक
(२४) रघुवंश
(२५) किरातार्जुनीयम्
(२६) शिवराजविजयः
(२७) कुसुमलक्ष्मी
(२८) कुन्दमाला
(२९) हर्षचरितम्

(vi) काव्यानुवादाः

(३०) मेघदूतानुशीलनम्
(३१) चौरपञ्चाशिका

(vii) ग्रन्थविवरणी

(३२) Descriptive catalogue of Sanskrit Manuscripts Part I
(३३) ,, ,, Part II
(३४) ,, ,, Part III

(viii) पुराणानि

(३५) केदारखण्डपुराणम्- सम्पादनमनुवादो विवेचनात्मकमध्ययनञ्च (चार खण्डों में)

(ix) मौलिकसंस्कृतकाव्यप्रणयनम्

(३६) उदयनचरितम् (संस्कृतोपन्यासः)

(३७) अस्ति कश्चिद्वागर्थीयम् (संस्कृत नाटकम्)

(३८) तपोवनवासिनी (संस्कृतोपन्यासः)

(x) कथा साहित्य

(३९) प्राचीन कथायें

(x) चिकित्साग्रन्थाः

(४०) विषविज्ञान

(४१) पोषण के लिये विटामिन और खनिज

(४२) अन्तःस्रावी ग्रन्थियां

(xi) प्रकाशनार्थं पाण्डुलिपयः

(४३) बाल्मीकिरामायणम् (सम्पादनमनुवादश्च)

(४४) केदारखण्डप्रदेशस्य तीर्थयात्रा तीर्थस्थलानि च

(४५) संस्कृतशास्त्रों की प्रशासनिक संस्थायें

(४६) विधिपौरुषम् (संस्कृतोपन्यासः)

एतदतिरिक्तं काव्यकारस्य वा सम्पादकस्य वा समालोचकस्य वा काव्यव्याख्यातुर्वा डा० कृष्णकुमारस्य बहवो निबन्धाः शोधलेखाः वा विभिन्नासु पत्रिकासु प्रकाशिताः समभूवन्, आकाशवाणीकेन्द्रेभ्यश्च वार्ता अपि प्रसारितां प्राप्ताः।

सेवानिवृत्त्यनन्तरमधुनाप्यस्यां वृद्धावस्थायां डा० कृष्णकुमारमहोदयः सततं सरस्वतीसाधनायामेव दिवानिशं संलग्नो दृश्यते।

[illegible]